ॐ

ब्रह्मसूत्रानुगुण्यसिद्धिः ।

श्री सर्वतन्त्रस्वतन्त्र महामहोपाध्याय हरिहरशास्त्रिणा-

मन्तेवासिना वेदान्तविभूषणेन शास्त्ररत्ना-

करेण कृष्णतटाकाभिजनेन

कृष्णशास्त्रिणा

विरचिता ।

तेनैवसंशोध्य,

कुंभघोणस्थ श्रीगोपालविलासमुद्रणालये

मुद्रापयित्वा प्रकाशिता च सती

विजयतेतराम् ।

१९२६

ॐ

॥ श्रीशङ्करगुरुभ्यो नमः ॥

श्रीब्रह्मसूत्रानुगुण्यसिद्धिः ।

यदहंभावमापन्नमहमासीत्सनातनम् ।
तदहंभावमुत्सृज्य सदस्मि ब्रह्मचिद्घनम् ॥१॥

वेदमानैकमेयाय जगज्जन्मादिहेतवे ।
नमश्शिवाय शान्ताय साक्षिणे शास्त्रयोनये ॥२॥

नरहरिरपिपूर्णपूरुषो यस्तदपिच हरिरेव पूर्णरूपः ।
हरिहरमपि तन्तथाविधानं गुरुपरिबृढमानतोऽस्मि नित्यम् ॥

तन्वीचिदेकरसगर्भभरालसाङ्गी सीमन्तिनीश्रुतिशिखानुगुणं विशन्ती
यद्दर्शनांगणमसूत सुतं प्रबोधं तं संततं श्रुतिगुरुम्मुनिमानतोस्मि॥४॥

यद्भाष्यसंभाषणभेषजेन प्रासूतसद्यः प्रतिबोधबोधम् ।
साध्वीश्रुतिश्शङ्करदेशिकेंद्रं भिषक्तमं तं भिषजान्नतोऽस्मि ॥५॥

श्रीकामकोटिपीठाधीशश्चन्द्रावतंसमध्यक्षम् ।
शङ्करमभिनवमीडे नूतनताटंकचक्रसंक्लृप्त्या ॥६॥

सिद्धेपि वस्तुनि सिषाधयिषाऽवलंबी बुद्धेपितत्वमथतत्रबुभुत्समानः
श्रीचन्द्रशेखरयतींद्रपदेप्रणम्य तच्छासनात्किमपि कौतुकमातनोमि ॥

अद्वैतं शिवमपि बोधयत्यशेषे श्रुत्यन्ते तदनुगुणेऽपि सूत्रजाले ।
तन्नैतद्विमतमिति प्रतारकाणां वाङ्मुद्रां विरचयितुम्ममैषयत्नः ॥८॥

ये वेदान्तमहाधनाः परचिदानन्दे निमग्नान्तरा
येचान्ये सततं बुधा हरिहरध्यानामृताप्लाविताः ।
येऽपि श्रुत्युपदर्शितेन विधिना सन्मार्गसम्मज्जना-
स्तेषामेष पदारविंदरजसा मूर्धाभिषेकं वृणे ॥९॥

शुद्धाद्वैतसभासु पण्डित इति प्रत्तं य इत्थं पदं
धत्ते भारतमण्डलीच महती दत्ते स्म यस्मै पदम् ।
यद्वेदान्तविभूषणाभिधमिमां सिद्धिं विधत्ते परां
कृष्णः कृष्णमुनीद्रसूत्रसरणेस्सारानुगुण्यावहाम् ॥१०॥

आरोप्यमेव सकलञ्चिदधिष्ठितञ्चेत्यावेदयंति यदिवेदवचांसिनित्यं।
आरोप्यमत्रभवतादथदोषमात्रन्तेनाणुमात्रमपिदुष्यति नात्रकिञ्चित् ॥

श्रुतयोऽद्वैतमेवाहुरित्येतड्डिण्डिमायितम् ।
सूत्राण्यपि तथैवेति पटहोऽपि प्रताड्यते ॥१२॥

क्वेदं सूत्रस्य गांभीर्यं क्व मे मन्दतमा मतिः ।
भाष्यकृत्पक्षपातेन ह्यनुवाचयतीह माम् ॥१३॥

दुष्प्रापन्दुर्निरूपं परशिवमनघं सूत्रकृत्सूत्रजालै-
र्निश्शंकञ्चः प्रशान्तम्मुनिरतिकरुणो ग्राहयत्यात्मतत्वम् ।
इत्येवं भाषमाणो दृढतरहृदयग्रन्थिजालं विभिन्दन्
भूयान्निश्रेयसे नश्शिवगुरुतनुभूश्शङ्करश्शङ्करार्यः ॥१४॥

सूत्रानुगुण्यसिद्धिस्सुधियश्श्रुतिगोचरीक्रियतां ।
अथचेत्तनुगुणेयं सिद्धं सिध्यत्यभीष्टमस्माकम् ॥१५॥

ॐमथ 'अथातोब्रह्मजिज्ञासे' ति सूत्रयता भगवता सूत्र-
कृता ज्ञाधात्वर्थस्येष्यमाणत्वमुपनिबद्धम् । तच्चानुपधिकं फलस्यैव-

त्यविप्रतिपन्नं । तथाह्याह स्म भगवान् भाष्यकारः ‘ फलविषयत्वादिच्छाया’ इति । अस्तिसाधनविषयिण्यपि सेति चेत्, अस्ति, अथापि नैतदनभिसन्धि इष्यते कैश्चिदपि । अथात्र फलविषयिण्येव सोपनिबद्धा । न पुनर्धर्मजिज्ञासेव साधनविषयिणीति कुतोऽयन्निश्चय इति चेत् न, असति बाधके फलविषयिण्या एवास्या एष्टव्यत्वात् । धर्मज्ञानन्नफलमित्यत्राविवादात् । अथकथं ज्ञाधात्वर्थः फलं, सुखस्यैव तत्वादितिचेन्न । सएव सुखमित्यावेदनात् । आवेदयन्ति हि वेदान्तास्स एव सुखमिति ‘ सत्यं ज्ञानमनन्तं ब्रह्म । आनन्दो ब्रह्मेति व्यजानात् । प्रज्ञानं ब्रह्म । भूमैवसुख’ मित्येवमादयः । आवेदितं हि तत एव सूत्रकृतापि ‘ब्रह्मजिज्ञासे ’ ति तस्येष्यमाणत्वोपनिबन्धनेन सुखत्वम् । आवेदितश्च भाष्यकृतापि ‘ ब्रह्मावगतिर्हि पुरुषार्थ ’ इति । आह स्म हि भगवानाचार्यवाचस्पतिरपि ‘विगळितनिखिलदुःखानुषंगपरमानंदघनब्रह्मावगतिर्ब्रह्मणस्स्वभाव इति सैव निश्श्रेयसं पुरुषार्थ’ इति । तथाच फलात्मकमपि ज्ञानन्तत्तद्विच्छुरणे तत्तदात्मकं भवतीति धर्मात्मकसाधनविच्छुरणे साधनात्मकंभवति । अविच्छुरणे तु ब्रह्मात्मकफलात्मतान्न विजहातीति विवेक्तव्यम् । एवञ्च मुख्यफलसंसूचनम्मुख्यं प्रवृत्त्यङ्गं कृतं भवति ।

ननु विचारप्रतिज्ञार्थं विचार्यसंशयोऽपि सूचनीयः । स कथं ब्रह्मस्वभावावगत्या तदनिवर्तिकया सूचयितुं शक्यः । ब्रह्मविषयिण्येव खलु सा तन्निवर्तिका तं सूचयेदितिचेत् सत्यं । नकेवलं संसारदशायामपि विद्यमाना ब्रह्मस्वभावावगतिः पुरुषार्थः । किन्त्वनावृततत्स्वभावा । अनावरणश्च ब्रह्मविषयिण्यैव तयेति सापि विवक्षिता ज्ञाधातुनैव । सातु ब्रह्मस्वभावावगति संवलिता मनःपरिणामविशेषरूपा ‘ ब्रह्मण इति कर्मणि षष्ठी । जिज्ञास्यापेक्षत्वाज्जिज्ञासाया ’ इति भाष्येण प्रतिपादिता । अनेनैव समासेन यदवरोहादियं ज्ञानपदवाच्याभवति तस्या अपि लाभेन नतदर्थं पृथक्समासान्तर-

मन्वेष्टव्यं भवति । तथाचेक्षत्यधिकरणे भाष्यं । नासाक्षिकासत्वत्र्वृत्तिर्जानातिनाभिधीयत ' इति । उक्तश्चाभियुक्तै ' रुभयमपि विवक्षितं, सौत्रपदानामनेकार्थत्वस्यालंकारत्वादिति । अनेकार्थत्वकथनमपि नसैन्धवादिपदवद्वृत्तिभेदाभिप्रायेण । किन्त्वेकस्यैवार्थस्य विशिष्टात्मना फलित्वं । विशेषणमात्ररूपेण फलत्वमित्यभिप्रायेण । वस्तुतस्तु ब्रह्मस्वभाव एव केवलो ज्ञाधात्वर्थः । न च वृत्तिरपि, अप्रकाशरूपत्वात् सा तु तत्र ज्ञानपदप्रयोगोपाधिः । अत एवाह भगवान्विवरणकारः ' वृत्तौ ज्ञानत्वोपचारादिति ।

ईक्षत्यधिकरणभाष्यन्त्वभ्युपगमवादमात्रेण । अयमभ्युपगमवादोऽपि स्पष्टीकृतो विवरणे । ' ज्ञानत्वप्रयुक्तञ्जन्मापि विद्यते, न प्रकाशगुणत्वप्रयुक्तमेव, द्रव्यजन्मव्यतिरेके ह्यद्रव्योपाधौ जन्माभावस्य प्रदीपादौ दृष्टत्वात् । अत्रापि ज्योतिश्शब्देनात्मनि प्रकाशगुणस्य जन्माभावनिश्चयात् । नचान्तःकरणेऽपि प्रकाशगुणोदयोज्ञानपरिणामः । स्वभावत एव प्रकाशगुणवद्द्रव्यस्यांतःकरणस्यैव विशेषपरिणामस्य ज्ञानत्वाभ्युपगमा ' दिति चैतन्यप्रकाशस्य स्वाभाविकत्वव्यवस्थापनार्थं प्रकाशगुणत्वेन स्वाश्रयोपाधिजन्मवर्जं जन्माभावस्य साधनावसरे, जन्मवत्वेन पृथग्जनगृहीतं ज्ञानमिति प्रथमं चैतन्यात् पृथक्त्वेनांतःकरणपरिणामविशेष एव ज्ञानमित्युपपाद्य, ' नच ज्ञानमपि क्वचिज्जन्मवद्दृष्टम् । दृष्टमन्तःकरण इतिचेन्न । ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात् । तस्य च आत्माश्रयत्वात् । अन्तःकरणपरिणामे ज्ञानत्वोपचारादि ' ति चैतन्यस्यैव पश्चाज्ज्ञानत्वव्यवस्थापनादिति ॥ तत्र वृत्त्युपहितं चैतन्यं ज्ञानं । तदुपलक्षितं तु फलमिति न काप्यनुपपत्तिरिति ॥

अथकथं सिद्धं ब्रह्म साध्यं सुखं स्यात्, कथंवा सर्वानपेक्षं ब्रह्मसाधनानपेक्षन्नित्यसिद्धन्नस्यात्, कथश्चवा पुनः पुनरभिलष्य-

माणं सुखमपि साध्यन्नस्यादिति चेत्, कं प्रत्येवमाक्षिपसि, ननु यस्त्वं ब्रह्मैवसुखमिति वदसि तन्त्वां, ननु नाहमेवं वदामि, किन्तु श्रुतिर्ह्येवमुपदिशति, तत्र कथं श्रुतिरेवमाक्षिप्यतां परिच्छिन्नबुद्धिना भवता । यदि साप्येवमाक्षिप्यते तर्ह्यहमप्येवमाक्षिपामि भवन्तमाक्षेप एव प्रणिधानवन्तं किन्नामेदं सुखं, किमर्थंवा पुनःपुनरभिलष्यते, कथमिदं सुखमिति । अथानुपधिकेच्छाविषयस्सुखं । आत्मार्थे पुनःपुनरभिलष्यत इति चेत् न तदेदं सुखं, यतोऽनुपधिकेच्छाविषयत्वमस्य गतं भवत्यात्मार्थमभिलष्यमाणत्वे, नन्वेवं का गतिः । इयमेव ते गतिः । यदनुपधिकेच्छाविषयस्सुखमिति निरुच्याप्यात्मार्थन्तदभिलषद्भिस्तीर्थकारैस्साकं कथं सिद्धं ब्रह्मसुखं स्यादित्याक्षेपं परित्यज्य पलायनम् ।

अतस्स्वसत्तायामसंदिग्धमन्तरेवाव्यभिचरित संवेदनमात्मैव स्यात् सुखमनन्यार्थत्वेन निरुच्यमानं सर्वैरपि तीर्थकारैरस्यमानश्चाब्रह्मस्तंबान्तं करुणबीभत्सादिष्वपि वृत्तिषु ।

अथ कथन्नित्यसिद्धात्मस्वरूपमपि पुनःपुनरभिलष्यत इति चेत् । पृच्छात्मानमेव त्वदीयं, किमेवमभिलष्यसे नित्यसिद्धोऽपि भूयोभूयोजायमान इवेति । अथ सहजानंदसुन्दरोऽप्यनर्थावहविषयव्रातविच्छुरणेनानानन्द इवावभासमानोऽयमात्मा विषयविच्छेदे नवोनव इव जायमानः काममभिलष्यतां भूयोभूयः ।

अथापि कथमन्तरेवानुभूयमानस्यास्य सुखस्य सर्वव्यापि ब्रह्मभाव इति चेन्न । यतः कथंवाऽब्रह्मभावे सुखस्य सुखभावः । 'नाल्पे सुखमस्ती' त्यल्पस्यासुखत्वे, नह्यल्पं सुखं भवति बृहद्धिसुखं भवतीति । अस्तु किमर्थमिदं शास्त्रमारभ्यत इति मन्यते भवान् । विवक्षितार्थ विज्ञानार्थमिति मन्येऽहं । न यतोनविज्ञानमात्राय प्रवर्तयितुं शक्यते लोकः । ननु विज्ञानस्य फलार्थत्वात्तत्र शक्यते

प्रवर्तयितुं फलाभिलाषीलोकः । न यतोऽन्येषामेवाचार्याणामयं प्रकारः । नत्वस्याप्यागमाचार्यस्यायमेव प्रकारः । अयंतु वेदान्तवाक्यार्थ विचारणाध्यवसान निर्वृत्तं ब्रह्मावगमं ब्रह्मणस्स्वभावं साक्षादेव निश्श्रेयसं पुरुषार्थमुररीकृत्यारभते शास्त्रमित्यस्तीदमाचार्यान्तरविलक्षणमस्मद्बादरायणाचार्यस्य लक्षणमिति ।

अथ येनविषयविच्छुरणेन नित्यसिद्धब्रह्मात्मभूतमपि सुखं पुनःपुनःरभिलषितं भवति तदिदानीं किं रूपमिति जिज्ञासितं भवति । तत्र विच्छुरणन्नाम मिश्रणम्, एकलोलीभावः, मिथुनीभाव इति यावत् । सच चित्वेनैव, नैवानन्दत्वेन , विषयाविच्छुरिताया एव चित आनन्दत्वात् । स चाध्यासिक एव, प्रकाशस्य प्रकाश्येन तात्विकमिथुनीभावायोगात् । नन्वस्त्यनाध्यासिकस्संयोगादिरिति चेन्न । तस्य प्रकाश्य प्रकाशनाप्रयोजकत्वात् । आवारकस्येवावार्यावरणाय प्रकाशकस्यापि प्रकाश्यप्रकाशनाय तादात्म्यस्यैवेष्टव्यत्वात् । तस्यच तयोराध्यासिकत्वावश्यंभावात् ।

तथाहि—आवार्यं हि घटादिकमावारकस्य तमसोयोगे तदात्मतामापद्यत इत्यनुभवसिद्धं । अन्यथेदं तम इति वदयं घट इत्यपि प्रकाशापत्तेः । एवं प्रकाशकयोगेऽपीत्यकामेनाप्यंगीकार्यम् । अस्ति संयोगोपीति चेत् । अस्तु संयुक्तयोरेव तयोस्तदिति सोऽपि । अथापि तादात्म्यमप्युपेयमेव । अन्यथा पटसंयोगेऽपिघटस्याप्रकाशापत्तेः । ननु यदवच्छेदेन पटसंयोगो भवत्येव तदवच्छेदेनाप्रकाशः । सर्वावच्छेदेन संयोगे तु भवति घटस्यैवाप्रकाश इति चेन्न । अव्यवधायकत्वात् । येतु संबन्धमात्रेणावृण्वन्ति ते व्यवधायका एव संतआवृण्वन्ति घटादिकं पटकुड्यादयः, असंयुक्ता अप्यन्तराळस्थाः । इदंतु नान्तराळस्थं सदावृणोति, यतोऽन्धन्तमसावृतेऽपि मध्यांगणे प्रदीपप्रकाशितानन्तरांगणस्थमध्यक्षमनुभवति प्रथमांगणस्थो लोकः।

अतस्संयुज्य स्वतादात्म्यमापाद्यैवावृणोतीदं घटादिकं तमः । अत एव तत्र व्यवधायकापाकरण एव यत्न आस्थेयो, नाधिकः, अत्र त्विदमपाकृत्य प्रकाशतादात्म्य संपत्तयेऽपि प्रदीपकरणेनेनेत्यतत् घटभाष्ये स्पष्टं । एवञ्च सदा तमसा प्रकाशेन वान्यतरेण तादात्म्यमापन्नमेव वर्तते घटादिकं, एवमेवाज्ञानेन ज्ञानेनवान्यतरेणेति विज्ञेयं । इदञ्चान्यस्यान्यतादात्म्यमाध्यासिकमेवेत्यप्युपेयम् । विषयोऽपिच यदि स्वयं सन् स्यात्तदा कदापि वर्तेतान्यतरनिरपेक्षं, तदभावान्न सन्निति सोप्यध्यस्त एवेति । ननु, न प्रकाशः प्रकाश्यप्रकाशनार्थं प्रकाश्यात्माभवति । किन्तु तं प्रकाशयतीति चेन्न । तं प्रकाशयतीति चेत् किंकरोति, किं केवलन्तेन संयुनक्ति । उत तेन संयुज्य तत्र प्रकाशमाधत्ते नाद्यः । किमर्थं स तेन संयुनक्तीति वक्तव्यम् । तस्यापि प्रकाशायेति चेन्न । स्वयमप्रकाशमानोघटः कथं प्रकाशसंयोगमात्रेणैव प्रकाशेत, यदि प्रकाशेत, पटादिसंयोगमात्रेणापि प्रकाशेत । नच तमो विदारणार्थं प्रकाशसंयोग एवापेक्ष्यते । तस्यैव तद्धेतुत्वादितिवाच्यम् । विदारिते तमसि कथं घटः प्रकाशत इति वक्तव्यं । स्वयमेवेतिचेन्न, स्वयमेव प्रकाशमाने तस्मिन् पूर्वन्तमोयोगायोगात् । न हि प्रदीपस्तमसावृतो भवति । न द्वितीयः । किं घटादौ प्रकाशमादधानोयं सौरप्रकाशस्तत्र स्वान्यमेव प्रकाशमाधत्ते । उत स्वयमेव तन्निष्ठः प्रकाशते । नान्त्यः । घटनिष्ठत्वेन प्रकाशमाने प्रकाशे घटस्य किं भवति । सकथं प्रकाशेत, प्रकाशःखलु प्रकाशेत ।

नाद्यः । ससौरप्रकाशाहितः प्रकाशस्स्वयं प्रकाशते वा नवा । नाद्यः घटे द्विगुणप्रकाशापत्तेः । किञ्चायं प्रकाशस्स्वात्मनैव प्रकाशते । किं घटात्मनापि प्रकाशते । नाद्यः । पूर्वदोषापत्तेः । यदि प्रकाश्यात्मनापि प्रकाशते तदा ससौरप्रकाश एव तथा प्रकाशतां, किं मध्येऽनेन प्रकाशेन । नान्त्यः । स्वयमप्रकाशमानस्सप्रकाशः कथमन्यं प्रकाशयेत् ।

ससौरप्रकाशाहितो घटप्रकाशस्स्वयं प्रकाशमानो घटमऽपि प्रकाशयतीति मावोचः । यतस्तं प्रकाशयतीति चेत्, किं करोति, किं केवलं तेन संयुनक्ति । उत तेन संयुज्य तत्र प्रकाशान्तरमाधत्त इत्यादिका चर्चापिशाचिका तत्रापि प्रसरेत् । तस्मात् प्रकाशस्स्वेन रूपेणेव घटादि प्रकाश्यात्मनाऽपि प्रकाशत इति सिद्धम् ।

न च विनापि घटं सतथा प्रकाशतामिति वाच्यम् । स्वतश्शुद्धे प्रकाशे तद्विच्छुरणार्थं तस्याप्यपेक्षितत्वात् । नचैवं सौत्रांतिकमतापत्तिरिति वाच्यम् । भावानवबोधात् । नहि भावोऽवबुद्धोस्माकं भवता देवानां प्रियेण । न हि वयं सौत्रांतिक इव प्रकाशे प्रकाश्य प्रतिबिंबमभ्युपगच्छामः । येन नित्यानुमेयतां घटस्यापादयेम तेन सौत्रांतिकतामप्यात्मनः प्रसञ्जयेम । किंतु प्रकाश्येन प्रकाशस्य तादात्म्यं, तेन तस्यापि प्रकाशम् ।

नन्विदमबुद्धिपूर्वकमेवेति वक्तव्यम् । केनचिदग्रहणेपि सत्वात् । चेत् किं, तच्च गुणिनि गुणस्य क्रियावति तस्याजातेर्व्यक्तौ च तथ्यमेव दृष्टमिति कथमिदमतात्विकमिति चेत् ।

इदमप्यबुद्धिपूर्वकमेव ते चोद्यं । यतोऽबुद्धिपूर्वकमेव जायमानं केनचिदग्रहणेऽपि वर्तमानमथापि कल्पितमेव पश्यामस्स्फटिके वयमारुण्यमागन्तुकम् । वक्ष्यति चेदन्निर्विषयाधिकरणे एकस्यैवात्मनस्संराध्य संराधकभावोपपादनाय ग्रथिते न 'प्रकाशादिवच्चावैशेष्यं प्रकाशश्चकर्मण्यभ्यादिति सूत्रकारः । तस्य ह्ययमर्थः । यथा प्रकाशादेस्स्वतोऽवैशेष्यं विशेषाभावः । अथच, कर्मणि स्वव्याप्तेः कर्मतयोपाधावंगुळिकरकोदकादौ सविशेषा इवावभासन्ते प्रकाशादयः । एवमात्मापि कुत एतदेवं अभ्यासात् सर्वत्र वेदान्तेष्वेकत्वाभ्यासादिति । तथाच प्रकाशस्य प्रकाश्येन तादात्म्ये भवति, पारमर्षमेव सूत्रं प्रमाणमिति । ननु तमो न घटादि तादात्म्यमापद्यते येन स्वेनैव रूपेणावभासते, प्रकाशवन्नघटात्मनापीति चेत् । अहो

श्लाघनीयप्रज्ञोऽसि । किमर्थन्तमोघटादेस्स्वतादात्म्यमापादयति तद्प्रकाशायेति चेत् , तर्हि घटात्मतामापन्नमपि तमो न तदात्मना प्रकाशेतेति कुतोनावधारितं भवता । प्रकाशस्तु प्रकाश्यप्रकाशनाय तदात्मतामापद्यत इति सोऽपि प्रकाशत इत्यवश्यमवर्जनीयन्तमः प्रकाशयोस्तद्विषययोश्च परस्परमाध्यासिकंतादात्म्यं । एवमेवाज्ञान- चैतन्ययोरपीति स्वयमह्रस्वोपि ह्रस्वइवावक्रोऽपि वक्रइवास्थूलोऽपि स्थूलइवचावभासतेऽयाश्चिन्मात्रोब्रह्मात्मेति सिद्धम् ।

अत्रायन्निष्कर्षः– तमःप्रकाशौ सममेवस्वविषयेषु स्वतादात्म्यमर्पयतः, तेतु तमस्यविविक्ताकारन्तेजसि विविक्ताकारञ्च स्व-स्वीयन्तादात्म्यमर्पयन्ति । तत्रच तयोस्स्वभावभेदएव हेतुः, एव-मेव ज्ञानाज्ञानयोरपीति । सर्वञ्चेदमभिप्रेत्यैवोपवर्णयांबभूव भग-वान्भाष्यकारो 'युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवदि' ति । यूयमिति प्रत्ययस्य वयमितिप्रत्ययस्यच गोचर-योरित्यर्थः । तत्र प्रत्ययस्य प्रत्ययिनश्च प्रत्याय्यवशादेव नानात्वं प्रत्ययित्वञ्च प्रत्ययिन इति ध्वनयितुं प्रत्ययाकारप्रदर्शने प्रथमं बहुत्वेन प्रत्याय्यस्यग्रहणं युष्मदिति, ततस्तत्प्रयुक्तबहुत्वेन प्रत्य-यिनोऽस्मदिति । गोचरस्येत्येकत्वोपादानंतु, प्रत्ययात्पूर्वं प्रत्या य्यानामज्ञानान्धतमसताद्रूप्येणैकध्यं, प्रत्ययिनांतुस्वरूपतश्च तत्प्र-त्याययति यथाघटादीनान्तमस्यैकध्यं, प्रकाशेप्रविभागावभासः, प्रकाशस्यच तद्वशादिति ॥ जिज्ञासाचापाततोऽपि ब्रह्मात्मनि नित्य-त्वमनात्मनिच तुच्छत्वमविवेचयतोऽविरक्तस्यानुपरतबाह्यान्तःकर-णस्यानर्थव्रातादप्रमुमुक्षोश्च नसंभवतीति विवेकादिसाधनचतुष्टय-संपन्नएवात्राधिकरोतीत्यथशब्देन सूच्यते । तथाहि । ब्रह्मजिज्ञा-सेत्यनेन तद्विजिज्ञासस्वेत्येतद्विन्यासससामर्थ्येन तत्सजातीयश्चार्थसा-मर्थ्येन सूच्यते श्रुतिवाक्यम् । तत्रार्थसामर्थ्यसंसूचितवाक्यघटित-प्रकरणेन यस्मिन्सति भवन्ती भवति ब्रह्मजिज्ञासेति न्यायेनचाय-

मधिकारस्सूच्यते । सचाथशब्देन स्वार्थानंतर्यप्रतियोगितयापेक्ष्यत इति तेन सूच्यते । अथातश्शब्दार्थः कोहेतुः कुत्रेति जिज्ञासितंभवति। तत्रयस्माद्वेदएवकर्मणोऽनित्यफलतां ब्रह्मविद्यायाश्चपरमपुरुषार्थसाधनतां दर्शयति । ततोहेतोरिति भाष्याल्लभ्यते । ततः कुत्रेति परं जिज्ञासितव्यम् । नन्वधिकारब्रह्मजिज्ञासयोरन्यतरस्मिन् स्यात्तदभ्यस्याप्रसक्तेः । न ब्रह्मजिज्ञासायां, सत्यधिकारे तस्यावश्यंभावात् एवं तर्हि, अधिकारमेवाक्षिपति, कः वेदेन वैदिकः । कथमिदंविज्ञायते । वेदएवेति भाष्यस्वारस्यात् । अथाधिकाराक्षेपद्वारा किमाक्षिप्यते । ब्रह्मजिज्ञासा, न । यतोऽधिकारसंपन्न एव ब्रह्म जिज्ञासेत सकथमधिकारासंभवान्न ब्रह्मजिज्ञासितव्यमिति प्रतिषेद्धुं शक्येतेति। अस्तु तर्हि प्रतिषेध्या वेदान्तवाक्यमीमांसा सूत्रकारीया, नेयमारंभणीयाऽधिकारासंभवादिति । युज्यतेतराम् । अतएवनेदं सूत्राक्षरार्थसंबंधिनीं विनेयानामाशंकामपाकर्तुं, प्रयुक्तमतःपदं । अधिकारिणामेव विनेयत्वात्तत्रतेषामाशंकाऽयोगात् । किन्तु कश्चिदाक्षिपति कर्ममीमांसको वेदेन वेदांतवाक्यमीमांसां सूत्रकारीयामार्थिकीं, कुतोऽयमधिकारः, कावा ब्रह्मजिज्ञासा, तत्र कथंवाऽरभ्यते वेदांतवाक्यमीमांसेति, कथमेवमिदानीमाक्षिप्यतां, केनेदानीं स्पष्टमुक्तं वेदांतवाक्यैरेव मीमांस्यते ब्रह्मेति, उपरिहिवक्ष्यति 'शास्त्रयोनित्वादि' तीत्युदासीनइवाननुभाष्यतदाक्षेपं, तमिमन्तेनैवशातयति क्रुध्यन्निवसूत्रकारोऽतइतीत्येवमिव व्याचकार भाष्यकारो 'यस्माद्वेदएवेति'।। इममेवार्थं स्पष्टमाचष्टेच भामती ।

एवं प्राप्ते— आह भगवान् सूत्रकारः । तस्यार्थमाचष्टे भाष्यकारइति पृथङ्नामद्वयग्रहणेन, भगवानित्याक्षेपानर्हत्वप्रतिक्षेपसमर्थत्वयोस्सूचनेन च । एवञ्च नास्त्यैकशास्त्र्याशंकागन्धोऽपीतिलभ्यते अत्र 'पूर्वप्रकृतापेक्षायाश्च फलतआनन्तर्याव्यतिरेकादिति भाष्यं दृश्यते, तस्यचायमर्थः । अस्ति पूर्वप्रकृतसापेक्षार्थांतरपरोऽप्यथ

शब्दः । तत्रार्थांतरं द्विविधं, व्यवहारेपरंस्वापेक्षितस्यार्थस्यपूर्वं प्रकृतत्वमपेक्षमाणमेकं, अर्थवशतोऽपि तस्यतदपेक्षमाणमपरञ्चेति, अपेक्षाप्याद्याविरोधगर्भा । अपरातु हेतुभावगर्भा । तत्र पृथिवीनित्या, अथानित्येत्याद्योऽथशब्दः । अस्यायमर्थः । अथ- यदि नित्यान, नित्यविरुद्धाचेदिति । तदाऽनित्यावेति वाक्यार्थसमाप्तिः । तथाचायमथशब्दः पूर्वप्रकृतत्वेन नित्यत्वमपेक्ष्यतद्विरुद्धत्वेनानित्यत्वरूपमर्थांतरमुपादाय तद्रूत्वेन पृथिवीपरोभवति । अनित्यपदन्तु तत्वेन तदादायतत्परोभवतीति न पौनरुक्त्यं । एवञ्चायं विकल्पार्थक इति व्यवहारएव प्रवर्तते । नत्वन्यत्र । न हि पृथिव्यामनित्यत्वंतत्र पूर्वन्नित्यत्वमपेक्ष्य जायते । वर्ततेवा । अतो यत्रापेक्षितस्य पूर्वमुपन्यासस्तत्रैवास्यप्रयोग इति नात्रस्थाथशब्दोऽयमथशब्दः । तदभावात् । द्वितीयस्तु, ' जायामेस्यात् । अथ प्रजायेय, वित्तंमेस्यात्, अथ कर्मकुर्वीये ' ति प्रयुज्यमानः, अस्यतु, अथ, तदा, यदाजाया भवति, वित्तं भवति तदेत्यर्थः । जायावित्तसापेक्षं प्रजनिमाप्नुवानि, कर्माणिच करवाणीति वाक्यार्थः । तथाचायमथशब्दो जायावित्तसापेक्षत्वेन रूपेण प्रभूताञ्जनिं कर्मचाचष्टे, अयमेवात्रभवन् भवेत्, अपेक्षाचात्रहेतुभावगर्भा, कदावाजनिकर्मणीजायावित्ते पूर्वमपेक्षेयातां, ते प्रतितयोर्हेतुभावएवेति । हेतुभावश्च पूर्वमनुपन्यासेऽपि भवति हेतुमन्निष्ठं हेत्वानंतर्यञ्च गर्भीकरोतीति ' फलत आनंतर्याव्यतिरेकादि ' ति भाष्यं संभवति साक्षादेवानंतर्यार्थत्वे किं शिरोवेष्टनेनेत्यभिप्रायकम् । इदमेवोक्तं ' तत्र पूर्वं प्रकृतस्ययोयं हेतुभावस्तत् गर्भापेक्षायाः प्रक्रियमाणे, आनंतर्यविषयत्वावश्यंभावेनाथशब्दस्य पूर्वप्रकृतापेक्षयाऽर्थांतरपरत्वे विषयविवेचनेऽनुज्झितानंतर्यार्थत्वादि ' ति सिद्धांतसिद्धांजने श्रीकृष्णानंदसरस्वतीभिः ॥

नन्वत्र भवत्यपरिहार्यं पौनरुक्त्यं । प्रक्रियमाणे प्रकृतानंतर्यकथनेनैव प्रकृतासंभवाक्षेपप्रतिक्षेपसूचनसंभवात्, अतएवोक्तं सि-

द्धांतमुक्तावळीकारैः, अथशब्देन विवेकादि त्रयानंतर्यमुच्यते, अत-इतीदमा मुमुक्षा परामृश्यते, ल्यब्लोपेपञ्चमी, मुमुक्षां प्राप्येत्यर्थः। विवेकादिमुमुक्षांतस्यानंतर्यप्रतियोगिनस्संभवप्रदर्शनार्थमत इतीति भाष्यादिः' अत्रवदन्ति। विहितक्रियासामान्ये सामर्थ्यविद्वत्वा-दिकमधिकारः, काम्येतु विहिते विशिष्यकामनाऽधिकारः, तथाच काम्येऽत्र ब्रह्मविचारे मुमुक्षैवाधिकारइति प्रयोजकस्य विवेकादेः प्रयोज्यया मुमुक्षया सहानंतर्यप्रतियोगितयोक्तिरयुक्ता, विचारे साधनचतुष्टयानंतर्योक्त्यैवतत्संभवस्यापि लाभादतःपदवैयर्थ्यञ्चेति, मत्पक्षेतु नकोप्ययंदोषइतीति चेत्। अत्रोच्यते। अहह केयंप्रथम-सूत्रएवैषां भाष्यभामत्यादिविरुद्धा पदार्थविवरणप्रणाळिका। कथमत्रसूत्रकारोऽनतिप्रचुरप्रयोगां ल्यब्लोपेपञ्चमीं प्रथमत एव प्रयुञ्जीत। कोहि नामजानीयात् सूत्रभाष्यकारयोर्हृदयम्। तावेव परस्परं विजानीयातां, यथा शिवस्यहृदयं विष्णुर्विष्णोश्चहृदयं शिवः इदमत्रप्रथमंविवेचनीयं, कीदृशेनाभिप्रायेणेदं शास्त्रमारब्धमिति, एवं किल विज्ञायते परमर्षेरभिप्रायस्य धोरणी। यथाकिल। अहोनुखलु कष्टंहीदं वर्तते। यत्किल। अनवरतं ह्यनर्थमेवार्थमध्रुवमेवच ध्रुवमभि-मभिमन्यमानो बंभ्रमीति ब्रह्मादिस्तंबान्तोयं जन्तुः। न च कटाक्षे-णापि किञ्चिदीक्षते सकृदपि परमार्थसन्तमात्मानं प्रत्यंचं। तथाहि यदाहि किल किञ्चिद्रामणीयकमिव पश्यत्ययं लोकः, स तदैवतद्ध्रुव-मेवाभिमन्यते, ततस्सञ्जोरज्यति तत्र. अनुक्षणमेवचकरणैरभिव्या-प्नोति तद्, अन्वेवसज्जति सुदृढं, अनुभवतिच ततोऽर्थमनर्थंवाऽदृष्ट-वशं, एवमेवपुनःपुनः परिभ्रमन् श्रांतस्स्वपिति षडरमिमञ्चक्रमधि-रूढः, पुनरप्युद्बुध्यते, पुनरपि श्रांतस्स्वपितीति। यदातुकिलैवं स्वभावाद्विनिवर्तते तदैवास्यजन्तोरेतस्मात् षडराच्चक्रादवरूढस्य भवेदात्यंतिकं स्वास्थ्यम्। ततोऽस्मादवश्यमवरोहयितव्योयंजन्तुः, तदर्थमयमुद्बोधनीय इत्यमर्त्यश्चाधिकं स्तुवन्ती मर्त्यंश्च नित्यान्निन्दन्ती

प्रवृत्ते श्रुत्यन्तसुन्दरीयं । तदवश्यंच केचिभिवर्तेरन् स्वाभाविकादपि विषयेषु परिभ्रमणादैवादपि विकुण्ठितमनोरथा अवरोपित संपत्का आरोपितविपत्काश्च । तएते श्रुत्यन्तमवलंबेरन्, तस्यच यथावदर्थंच प्रतिपद्येरन्, वादिभिरप्याक्षिप्येरन् । अन्यथाच गृहं तोऽनर्थव्रातमपिलभेरन्, अतोवश्यमेतेऽनुकंपनीया मया वेदाचार्येण वेदांततत्वावबोधनेनेति । तत्रेदमुक्तं येस्वाभाविकलोकविपरीताविवेकादिमुमुक्षांतसाधनसंपन्नास्तैरियं ब्रह्मजिज्ञासाभवति कर्तव्या, तैरेवकर्तव्या, इयमेवकर्तव्येति । तत्रयोयं सिद्धांतमुक्तावळीकारपरिष्कारस्तस्येदमुच्यते सदृशमुत्तरम् । यदिदमुक्तं काम्यो मोक्षः । कामनात्राधिकारः काम्यमेवमोक्षसाधनं ज्ञानं । तत्साधनंच श्रवणादिकमिति तदिदंसुष्ठूक्तं, नचैवमुक्तवतेत्थं व्याख्यातुं युक्तं कामनां प्राप्यकाम्यसाधनं कर्तव्यमिति । नहीदं कामयित्वेदं कर्तव्यमिति विधीयते कुत्रापि, किंतु यदीदं कामयसे तर्हीदं कर्तव्यमिति विधीयतेसर्वत्र । न हि ज्योतिष्टोमेन यष्टव्यं स्वर्गं कामयित्वेत्यस्तिविधिः । किंतु स्वर्गं कामयमानेन यष्टव्यंज्योतिष्टोमेनेत्यस्ति विधिः, अहह नित्यमपि यदि जिजीविषासि तदाहोतव्यमितिहि विधीयते विधिना । किंतु होतव्यमेवेत्यधिकम्भिवेश्यते नित्यत्वाज्जिजीविषायाः । तत्रकथंमुमुक्षां प्राप्येदं श्रोतव्यमिति विधीयतां सूत्रकृता, व्याख्यायतां वा तथाभवता । अतस्संपन्नमुमुक्षांतस्स्वयं जिज्ञासते ब्रह्म, तदर्थमिदं शास्त्रमारभ्यते भगवता बादरायणेन प्रतिक्षिप्याक्षेप्तारमत इति । न च मुमुक्षानंतर्यमेवास्त्वथ शब्दार्थ इति वाच्यम् । सूत्रकारभाष्यकारयोरनिष्टेः । अथकोवाशयोऽनयोरिति चेत् । इदमुच्यते । नतावद्विवेकादिमुमुक्षांतास्सकृदेव सर्वात्मना निष्पन्नास्सन्तो निष्पादयन्त्युत्तरोत्तरं । येनमुमुक्षानंतर्यमेव वक्तव्यं स्यात् । किंतु प्रथममापाततो जायमानाः परस्परावष्टंभेन चिरकालाद्भवंति संपन्नाः, तत्र योऽयंविवेकस्सद्याकारो ध्रुवमिदमध्रुवमिदमिति । तत्र चरमोऽध्रुवा-

दिच्छामवरोहयति । प्रथमस्तु ध्रुवेतामारोहयति । तामेवविषयेषणामनुजायमानो नयनादीनिच करणानि तेषु व्यापारयंस्तमनुचवर्धमानस्तेष्वेव परिभ्रमणरूपोयोयं मनसः परिणामविशेषस्तस्योपरमएव शमइति संकीर्त्यतेदमादिहेतुर्विवेकावष्टंभोऽपि तस्योपष्टंभो मुमुक्षासलिलावासिक्तविरक्तताबीजांकुरः । तथाच विवेकचूडामणिः । 'एतयोर्मन्दता यत्र विरक्तत्वमुमुक्षयोः । मरौ सलिलवत्तत्र शमादेर्भानमात्रते ' ति । अयमितरावष्टंभोपि सर्वोपष्टंभोज्ञानोपायेषु यथास्यपरिपंथीपतनसाधनेषु । तथाहि व्यासः ' बलवानिन्द्रियग्रामोविद्वांसमपि कर्षति । शमदमाद्युपेतस्स्यात्तथापितिष्ठति '

तथाचैकतुलामधिरूढा एवैते भवन्ति ज्ञानोपायाः । अनुवर्तनीयाश्च मोक्षांतन्नतु मध्येसन्यसनीयाः कर्माणीवेति विज्ञायते सूत्रभाष्यकारयोरादरातिशयोत्र सममेवसर्वेष्विति । इतरथाऽथ मुमुक्षानन्तरं ब्रह्मजिज्ञासेत्येव वक्तव्यमिति व्यर्थं भवदीयएव पक्षेऽतःपदमयुक्तश्च त्रिवेकादित्रयानंतरमिति भवदीयं विवरणमिति किं स्वयूथकलहेन । इत्थं सूत्रानुगुणे सत्यपिभाष्येऽति गंभीरे । सिद्धं वेदांतोक्तश्चस्यात् व्युत्पत्तिराहित्यात् । इत्याक्षेपेसिद्धेऽप्यस्ति व्युत्पत्तिरित्यत कार्या । ब्रह्मणि जिज्ञासेति व्याकुर्वन्तिस्म लक्ष्मणाचार्याः । तत्र, मतप्राबल्यदौर्बल्ये पूर्वाचार्यैर्विवेचिते । सूत्रानुगुण्यं कस्येति परमत्रविविच्यते । अस्ति हि शास्त्रादावनुबंधचतुष्टयं साध्यत इति शास्त्रकृतां मर्यादा । साच त्यक्तेति भवति महान्दोषएषां। नच तदपि शब्दादेवप्रतीयत इति नायंदोषएषामिति वाच्यं । तस्यैव संभवासंभवविवेचनेन प्रधानतस्साधनस्य सांप्रदायिकत्वात् । विचार्यासंभवाशंकापेक्षया तदभ्युपगम्य तस्य शास्त्रप्रतिपाद्यत्वाक्षेपस्याल्पीयस्त्वात् । सांख्यादितंत्रवदनुमानमेवोपनिबध्यत इत्यनेनापि समाधेयस्यास्याक्षेपस्याकिञ्चित्करत्वात् । सामान्यतोविचार। प्रतिज्ञायां वेदान्तस्सेति कृत्वाऽक्षेपस्यहठात्कारायितत्वात् । शास्त्र-

योनित्वप्रतिज्ञासत्वे तदनंतरमेवायमाक्षेपोन्याय्य इत्यस्य सर्वसंमतत्वसंभवात् । एकेनैवसमन्वयसूत्रेण सर्वविधस्यापि शास्त्रवेद्यत्वाक्षेपस्य प्रतिक्षेपसंभवे पृथक्पृथक्तत्र सूत्रविनियोगकरणस्य बालिशचेष्टितायमानत्वात् । तत्पुनर्ब्रह्मप्रसिद्धमप्रसिद्धंवेति विकल्प्य सर्वात्मनाप्याक्षिप्य समाधायके सत्यपि भाष्ये, एवंविधदोषगण ग्राहग्रसनीयस्याधिकरणविरचनस्य भाष्यविद्वेषैकमूलकत्वाच्च ॥

वृत्तात्कर्माधिगमादनंतरन्तत एव हेतोर्ब्रह्मविविदिषेत्यथातश्शब्दौ च विवृण्वन्ति । तत्राथशब्देन वर्तिष्यमाणस्य वृत्तादानंतर्येऽतश्शब्देन वृत्तस्यवर्तिष्यमाणहेतुत्वेवा प्रतिपादितेऽर्थसिद्धमितर दिति भवत्यन्यतरनैरर्थक्यं । विवृतश्चेदन्नैरर्थक्यं सिद्धान्तसिद्धाञ्जने ॥ किञ्च कोयंकर्माधिगमोनाम । यदनंतरभाविनी ब्रह्मविविदिषा । किं पूर्वतंत्रविचारणासाध्यः, उताधीतसांगसशिरस्कवेदस्याल्पास्थिरफलं कर्मेति स्वतएव जायमानः । नतावदाद्यः । सार्किं साक्षादेवोपयुज्यते । आहोतदंगकर्मानुष्ठापकतया । नाद्यः । कर्मणैव निरतिशयं सुस्थिरञ्चफलं प्रतिपादयता पूर्वतंत्रेण निर्वृत्तः कर्माधिगमः कथं साक्षाद्ब्रह्मविविदिषाहेतुस्स्यात् । कथंवा 'शेषत्वात् पुरुषार्थवाद' इति विवदमानेन मुनिना विरचितं तंत्रं कर्मणैव तादृशं फलन्नाधिगमयेत् । नच द्वितीयः, ऊर्ध्वरेतस्स्वग्नींधनाद्यनपेक्षाविद्या । ग्रहस्थेषु सर्वापेक्षा । सर्वत्रशमाद्यपेक्षेत्युपेयतां भवतां सर्वाधिकारिसाधारणं शमाद्यानंतर्यस्यैवावश्याभ्युपेतव्यत्वात् । किञ्च निरतिशयं फलं प्रयच्छति कर्मेति विजानता सता विहितं कर्म तत्र कथं विरागताहेतुस्स्यात् । तत्र कुतो वातस्य शमादिः । कुतश्चवाब्रह्मविविदिषेति । नापि चरमः । अल्पास्थिरफलं कर्मेति विजानतो विविदिषेत्युक्तौ तत्रविरक्तस्य सेत्युक्तं भवति । तत्र सर्वाधिकारि साधारणं वैराग्याद्यानन्तरं विविदिषेत्येव वक्तुमुचितं लाघवादिति नकर्माधिगमानंतर्यमथशब्दार्थः । अस्माकंतु न ब्रह्म

विविदिषाहेत्वर्थमतःपदं । किंतु वेदांतवाक्यमीमांसारंभहेत्वर्थमिति न पौनरुक्त्यमिति ।

इत्थमतिदुष्टमर्थं प्रतिपाद्याप्यथमतान्तरं सर्वं । विद्वेषमात्रहेतोर्वी-ताशंकं विदूषयन्त्येते ॥ उक्तंचेदं श्रीकृष्णानन्दसरस्वतीभिः । 'अहो-परविद्वेषव्यसनिता तान्त्रिकहतकस्य । यस्स्वार्थोपपत्तिनिरपेक्षं परार्थविघातायैव प्रणिधत्त' इति । एवं किल विदूषयन्त्येते । ननु, वाक्यार्थज्ञानानंतरमेव शरीरपातस्स्यात् । नचानादिवासनया मात्र या भेदज्ञानमनुवर्तत इति भवता शक्यते वक्तुम् । वासनाया अपि-मिथ्यात्वेन ज्ञानेन निवृत्तत्वात् । वासनाकार्यं भेदज्ञानं छिन्नमूलमथ-षानुवर्तत इति बालिशभाषितमिति ॥

वयमत्रवदामः । किमेवं विदूषयन्ति सूत्रकारीयम्मतं । यतस्स-एववक्ष्यति । 'भोगेनत्वितरेक्षपयित्वा संपद्यत' इति । ननु निष्प-न्नोपासनविषयं हि तत् । नहि निवृत्ताविद्याविषयमितिचेत् । कदा वेदमुपासनान्निष्पद्यते । सांपराये । उतांतराळएव । यदि सांपराये युक्तश्चैतत्, आप्रायणादुपासनविधानात् । 'सांपराय' इति तदा-नीमेवोपासनकार्यस्याघनिर्हरणस्य निर्धारणाच्च । तत्रकेन कस्य कदाभोगेन क्षपणं कर्तव्यं भवन्मते । अथान्तराळएव । सांपरायइति तु नतदानीमेवाघनिर्हरणपरम् । किंतु व्यध्वनितदभावपरम् । आप्रा-यणादित्यपि नतावत्पर्यन्तमुपासनविधानपरम् । किंतूपास्यसौंदार्य-वर्जितहृदयेनोपासकेन क्रियमाणोपासनज्ञापनपरं । अतोऽस्त्येवोपा-सकस्याप्यारब्धं कर्मेति चेत् न । एवन्तर्हि यथा निष्पन्नमुपासनं सत्य त्वेऽपि सर्वेषामारब्धवर्जमेव कर्मविनाशयत्येवमेव मिथ्यात्वेपि तद्वर्ज मेव तद्विनाशयतिज्ञानमित्यत्र कः प्रद्वेषोभवताम् । वस्तुतस्तु नायं पक्षस्तव साधीयान् । यद्यंतराळएवनिष्पन्नमुपासनन्नष्टंच तेनानार-ब्धं, तदाऽरब्धं परंभोगेन क्षपयितव्यमुपासकेन । नचाप्रायणादुपा-सनमपि कर्तव्यम् । नचस्वयमेवानुवर्तत इति वाच्यम् । भोगानवसर-

प्रसंगात् । नच प्रारब्धेन प्रच्यावितो भोगमनुभवतीति वाच्यम् । ततः प्रयत्नपूर्वकमुपासने प्रवृत्त्यनुपपत्तेः । नच चिरसमयवासनया प्रवृत्तिरुपपद्यत इति वाच्यम् । परानुग्रहनिग्रहव्यतिरेकेण तत्र वासना या एवासम्मतेः । नच परएव तत्र प्रेरयतीति वाच्यम् । तस्य तथा प्रेरणस्य निष्प्रयोजनत्वात् । नच तावन्तं कालं सुकृतदुष्कृतास्पर्शः फलमिति वाच्यम् । तदधिगमात् परं प्रमादेन कृतमप्यघं परस्सहतइति तदधिगमसूत्रं व्याकरिष्यता भवतेत्थं वक्तुमशक्यत्वात् । किंच तदधिगमानुक्षणमेव परिपूर्णानुग्रहेण परेण यथा पुनरप्युपासनायासो न स्यात्, यथावा प्रमादेनाप्यघसंस्पर्शो न स्यात्, यथाचवा प्रारब्धदुःखानुभवोऽपि न स्यात्तथा सद्य एव नेतव्यः परमं पदं विद्वानिति तवैव सद्यश्शरीरपातेन भवितव्यम् । अपिचोपास्यसौन्दर्यावर्जितहृदयस्य परमपदेऽपि जक्षणादिषु नक्षणावहश्चित्तमिति भोगसाम्याभावप्रसङ्गश्चेति, अस्मत्पक्षोपपत्तिस्तु तत्रैव सूत्रे प्रपञ्चयिष्यते ॥

यत्तु द्विचन्द्रज्ञाने बाधकसन्निधानेऽपि मिथ्याज्ञानहेतोः परमार्थतिमिरादिदोषस्य ज्ञानाबाध्यत्वेनाविनष्टत्वान्मिथ्याज्ञानानुवृत्तिरविरुद्धा । प्रबलप्रमाणबाधितत्वेन भेदज्ञानानुवृत्तिर्विरुद्धैवेति तत्तुच्छम् । सति बाधके चन्द्रैकत्वाज्ञानस्य निवृत्त्यभ्युपगमात् । तथाचयथा तिमिरादिदोषसमसमये सत्यपि बाधके चन्द्रैकत्वाज्ञानमेव निवर्त्तते । नच द्विचन्द्रादिज्ञानमपि, तत्तु जायत एव बाधिताकारं तिमिरादिनिवृत्तौ तु तदपि निश्शेषन्निवर्तते एवमनादिवासनासमसमये सत्यप्यात्मैकत्वविज्ञाने तदज्ञानमेव निवर्तते । नतु भेदज्ञानमपि तत्तु जायत एव बाधिताकारं वासनानिवृत्तौ तु तदपि निश्शेषन्निवर्तत इति दृष्टान्तदार्ष्टान्तिकयोस्संप्रतिपत्तौ स्वबाधकबाध्यत्वाबाध्यत्वरूपं दोषवैषम्यमकिञ्चित्करं प्राबल्यमपि भेदज्ञाननिवृत्त्यौपयिकं स्वजन्यपटुतमसंस्कारसाचिव्यं नास्त्येव तदानीमिति क्वात्रानुपपत्तिरिति ।

येचास्मदीयाज्ञानस्थापनानुमाने प्रतिप्रयोग उपनिबद्धस्तचात्रोपक्षिप्य प्रतिक्षिप्यते—अज्ञानं न ज्ञानमात्रब्रह्माश्रयं अज्ञानत्वात् शुक्तिकाज्ञानवत् ज्ञात्राश्रयं हि तदित्येकः प्रयोगः—अत्र ज्ञानाभावस्य पक्षत्वे सिद्धसाधनं भावरूपस्य तत्वे तु दृष्टान्ते साध्यविकलता मन्मते शुक्त्यज्ञानस्य ब्रह्माश्रयत्वात्तत्र शुक्तेः केवलमवच्छेदकत्वात्, उक्तं चाद्वैतसिद्धौ नह्यविद्याकल्पितेऽस्माभिरविद्या वा तच्छक्तिर्वाऽभ्युपेयत इति । ज्ञात्राश्रयं हि तदिति हठात्कृत्योक्तिः । भवताऽज्ञानस्यैवानभ्युपगमात् । मया तु ज्ञात्राश्रयत्वानभ्युपगमादिति । एवं बहवः प्रयोगाभासा ग्रन्थोदरपूरणार्थमुपनिबद्धाः । ते तु ग्रन्थविस्तरभयान्न लिख्यन्ते समाहिताश्चाद्वैतसिद्ध्यादाविति । यत्वन्ते कुबुद्धिकल्पितमिति पृथग्जनेनेव निन्दितम् श्रीभाष्यकृता तदश्रुतमिव परित्यज्यते--सिद्धमव्युत्पन्नमिति पूर्वपक्षे तस्य सूत्राक्षरेण किमप्युत्तरमदत्वा कर्माधिगमात् परन्तत एव हेतोर्ब्रह्मविविदिषेत्येतत्कथं घटेत । आभिप्रायिकस्याक्षेपस्य वाचनिकेन ह्युत्तरेण भवितव्यं । अस्मन्नयेत्वतश्शब्दबलादयमर्थो लभ्यते । यथाकिल-अथ ब्रह्म जिज्ञासते, तत इदमारभ्यत इत्युक्तौ नेदमारम्भणीयं, आमुष्मिकफलाय हीदमारभ्यते । तत्तु निरतिशयं कर्मणैव लभ्यत इति वेदेन विज्ञायत इत्याक्षेपे अतः, यस्मात्ततएव वेदात् कर्मणोऽनित्यं फलं ब्रह्मविज्ञानाच्च नित्यं फलं विज्ञायते, अतस्संभवति विशिष्टाधिकारिणो जिज्ञासा, तत इदमारभ्यत एवेत्येतत् सम्यग्विमृशन्तु पण्डितप्रकाण्डा इति ॥

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
सविशेषं सदा यूयमुपाध्वं तत्र काक्षतिः ॥

स्वप्रकाशं परं ज्योतिः प्रतिक्षेप्तुं न शक्यते ।
नह्युलूकः प्रतिक्षेप्तुं शक्नुयाच्चण्डभास्करम् ॥

प्रत्यक्षदृष्टमपिकोनुभवानितित्वांपप्रच्छुरम्बरचराइतियच्छुतोऽसि ।
जिज्ञासितोसिदिविषद्भिरितीतरेषांजिज्ञासितव्यइतिशंकरसाधितोसि

॥ इति जिज्ञासाधिकरणम् ॥

२ जन्माद्यस्ययतः—

अत्र जिज्ञास्यस्य ब्रह्मणो लक्षणप्रमाणजिज्ञासायां सूत्रेण लक्षणं प्रतिपादयन् प्रमाणञ्च सूत्राक्षरविन्यासवैचित्र्येण सूचयतीत्यर्थकं 'ब्रह्मजिज्ञासितव्यमित्युक्तं किं लक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान् सूत्रकार' इति पातनिकाभाष्यम् । तत्र किमिति जिज्ञासायां, लक्षणमिति प्रमाणस्याप्युपलक्षणं । सूत्रकारइति श्रुतिवाक्यमेव सूत्रीकरोति विन्यासवैचित्र्येणेत्यर्थकं अत एवात्रावसाने भाष्यं, तस्माज्जन्मादिसूत्रन्नानुमानोपन्यासार्थं किंतर्हि वेदान्तवाक्यप्रदर्शनार्थमिति । भगवत्पदमपि भगवदंशावतारोऽपान्तरतमानामवेदाचार्योऽयं, अतो वेदान्तमेव प्रमाणराजं सूत्रीकुर्यात् नाप्रतिष्ठितमनुमानमुपन्यस्येत् कपिलादिवदित्यर्थमभिव्यनक्ति । अतएव सिद्धवद्वेदान्त वाक्यकुसुमग्रथनार्थत्वात् सूत्राणामिति भाष्यम् । एवमेव शास्त्रावसानसूत्रावतरणिकायामपि अत उत्तरं भगवान् बादरायणआचार्यः पठत्यनावृत्तिश्शब्दादनावृत्तिश्शब्दादितीति भगवत्पदाचार्यपदघटितं भाष्यं तथा मध्येऽपि पुरुषार्थाधिकरणे तस्मात् पुरुषार्थोऽतश्शब्दादिति भगवतो बादरायणस्य यन्मतं तत्तथैव तिष्ठतीति भाष्यम् । अत्र "यतोवे" त्यादिवाक्यं विन्यासवैचित्र्येण तत्सजातीयञ्च 'यस्सर्वज्ञ' इत्यादिकमर्थसामर्थ्येन संसूचितं, तत्रार्थसामर्थ्य सूचितेन सर्वज्ञत्वञ्चोपक्षिप्तं भवति । यथा पूर्वसूत्रेऽधिकारः, नतु जगत्कारणत्वोपन्यासेन, तस्य केवलप्रकृतिमात्रपरत्वशंकायामुपक्षेपायोगात्, अत एवोत्तराधिकरणे जगत्कारणत्वप्रदर्शनेनेति पातनिकाभाष्यं नतूपन्यासेनेति वेदितव्यं । उपहितपरोऽयं पादः, यदेवोपाधिसंश्लेषविश्लेषाभ्यां विशिष्टञ्च शुद्धञ्च भवति, द्वितीयस्तुविशिष्टपरः,

तृतीयश्शुद्धपरइतिच विवेक्तव्यं। एतच्चतत्र तत्र स्पष्टतरमुपपादयामः१

एवं श्रुतिमुपाक्षिप्य जगतः कारणं ब्रह्मेति प्रदर्शिते ब्यजिज्ञासन्त स्वधीतवेदान्ताः प्रशान्तस्वान्ता यतयः य इमं भगवन्तमाप्ततममन्यन्त वेदाचार्य–कथं ? नूनं श्रुतिरेवोदाहृता सूत्रेण, यदियं विज्ञापयति सूत्राक्षरविन्यासवैचित्री, यतोवेत्यादिवाक्यत्रयमेव सूत्रीकृत्योदाजहारेति । श्रुतिस्तु तदात्मानं स्वयमकुरुत । सच्चत्यच्चाभवत्, सर्वं खल्विदं ब्रह्म, इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं, तत् सत्यं स आत्मा तत्वमसि, अहं ब्रह्मास्मि, प्रज्ञानं ब्रह्म, प्रज्ञानघन एव, यस्सर्वज्ञः, नेति नेतीत्यादिका प्रत्यगभिन्नमद्वितीयं ब्रह्म जगतउपादानं निमित्तञ्चेति श्रावयति । अथाप्यत्र विवदन्ते महर्षयोऽपि सन्तो हैतुकाः — तत्र, कपिलः किल मुनिवर्यो वदति, प्रधानं नाम जडमेव परिणममानं जगतस्स्वतन्त्रं कारणमिति — कणादस्त्वदृष्टवशादारभन्ते परमाणव एव प्रपञ्चमिति । ब्रह्मैव, परमाणुभिस्सृजति प्रपञ्चमिति भगवान् गौतमः — अस्ति ब्रह्म तथापि न तत् सर्गोपयोगि, किन्तु सिद्धावेवेत्याह भगवान् पतञ्जलिरपि — सिद्धस्य कथंपूर्वत्वमात्रघटितंकारणत्वं, प्रपूर्वत्वोत्तरत्वयोरपि संभवात्, तस्मात्तत्कालोत्पन्नेन कर्मणोपारूढं सद्भवति कारणमिति वक्तव्यं, ततो वरमप्रपूर्वस्यानुत्तरस्य च तस्यैव कारणत्वं, सिद्धं न शास्त्रार्थ इति चोद्घुष्यति शास्त्रैकशरणोऽपि भगवान् जैमिनिः— सन्तु नामैते परस्परं विरुद्धदिक्कं स्वतन्त्रमेवाभिदधानाः यदि च 'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरं । तस्मान्मायी सृजते विश्वमेतदि' ति श्रुत्युक्तं प्रपञ्चस्य मायिकत्वं स्यात्तदा कुतस्सिद्धमपि ब्रह्मौपानेपदं न स्यात् । ततो यद्युपक्षिप्तं सर्वज्ञत्वं दृढीकुर्यात् यदिच शास्त्रयोनीति प्रतिजानीयात्तदा वीतशङ्का भवेमेति जिज्ञासमानेषु सनकादिसमानेषु विनेयेषु करुणारसकल्लोलितकटाक्षः परिपिशंगितजटामण्डलमण्डितो मायामयवटमूलमुपासीनमनुकुर्वन्नुमारमणमुदाज-

हारमृदुस्मेरमुखाम्बुजो भगवान् बादरायणश्शास्त्रयोनित्वादिति। इममर्थमभिव्यञ्जयन्नवतारयतिस्म जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तं तदेव दृढयन्नाह 'शास्त्रयोनित्वादि' तीति भगवान् भाष्यकारः ॥

अयमाशयः-अत्र शास्त्रस्येदं योनिः शास्त्रमस्य योनिरिति भवति द्विधा व्युत्पत्तिः। तथाच शास्त्रयोनित्वात्, शास्त्रयोनिकत्वाद्वेति हेतुमात्रमत्र प्रतीयते। नैतज्जगद्योनित्वे, शास्त्रयोनित्वस्य पाणिन्यादौ व्यभिचारात् । वेदयोनित्वं त्वनुमानेन वा, वेदेन वा, साधनीयं तदा जगद्योनित्वमेव ताभ्यां साध्यतामिति साध्याविशिष्टो भवति हेतुः, शास्त्रयोनिकत्वेनास्य साधनेऽप्येवं साध्याविशेष एव उत्तरशेषत्वं तु दूरनिरस्तं यतश्शास्त्रयोनिना शास्त्रयोनिकेन भवितव्यमिति नास्ति निर्बन्धः । शास्त्रयोनिकत्वं तु उत्तरसूत्रसाध्यमेव । साध्यनिर्देशात् प्रागेव पृथग्धेतुकथनमप्यदृष्टचरं। इदमेवाह कल्पतरुः— अत्र हेतुमात्रं प्रतिभाति । नैतज्जगद्योनित्वे साध्याविशेषादिति ॥

अथ मानान्तरागोचरत्वं साध्यतां शास्त्रयोनिकत्वेन, यदाह श्रीमांल्लक्ष्मणार्यः, अनुमानेन सिद्धेरित्याशंक्याह शास्त्रयोनित्वादितीति, एवञ्चैकैव व्युत्पत्तिराभिप्रेतेतिचेन्न। सिद्धे च मानान्तरा गोचरत्वे शास्त्रयोनित्वं, 'अप्राप्ते हि शास्त्रमर्थवदि'ति न्यायात् अनेन च तत्साधन परस्पराश्रयप्रसंगात् । तस्मात् पञ्चम्यन्तमात्रतया प्रयुज्यमानं हेतुद्वयतामापन्नमपि विविक्तं साध्यमलभमानमुपाश्लिष्यपूर्वोत्तरसूत्रे, सिद्धञ्च दृढीकुर्वत् साधयिष्यमाणञ्च प्रतिजानत् पूर्वोपात्तस्य जन्मादेरनुमानत्वशंकां च काञ्चिन्निराकुर्वत् कार्यत्रयं निर्वहतीदं शास्त्रयोनित्वादिति शास्त्रं ॥

तथाच ये मुमुक्षान्तसाधनसंपन्नास्स्वधीतवेदान्ततया स्वयमेव यथाश्रुतमर्थमवलम्ब्य तत्र संवादमात्रमपेक्षमाणास्ते तु यतयश्शास्त्रयोनित्वात् सर्वज्ञमेव जन्मादिकारणं ब्रह्म शास्त्रयोनिकत्वाच्छ्रुति

रेव सूत्रेणोदाहृता, नानुमानं मयोपन्यस्तमित्युपादिष्टा वेदाचार्येण वीतशंका बभूवुरिति तदर्थमिदमुपदेशात्मकं शास्त्रं निर्वृत्तं । अस्यैव प्रपञ्चश्शास्त्रयोनिकमेव ब्रह्म ब्रह्मैव शास्त्रयोनिकमिति साधयितुं प्रवृत्तमुपर्यधिकरणद्वयं । अत्र स्वतन्त्रसाध्याभाववतो हेतोर्ग्रथनेन न जगत्कारणे स्वातन्त्र्येणानुमानस्य प्रवृत्तिरिति उपक्षिप्तस्य सर्वज्ञत्वस्य दृढीकरणेन शास्त्रानुसारिणी युक्तिरप्यपेक्षितेति च सूचयित्वा सांख्यमप्युत्थापयामास, तदर्थमेव हि सर्वज्ञत्वदृढीकारः । अत एव ईक्षते' रिति मुखत एव हेतूकरिष्यति तत्परीक्षायां ।

इदमेव सूचितमर्थद्वयमनुभाषितं वाक्यार्थविचारणाध्यवसानानिर्वृत्ता हि ब्रह्मावगतिः नानुमानादिप्रमाणान्तरनिर्वृत्तेति । श्रुत्यैव च सहायत्वेन तर्कस्याप्यभ्युपेतत्वादिति च । शास्त्रयोनिकत्वप्रतिज्ञया तु कर्ममीमांसकोत्थानं । एवश्चाथवेति वर्णकान्तरोपक्रमस्थं भाष्यं फलं वा मूलं वेतिव्यर्थेच्छमित्यर्थकं वेदितव्यं, एवं च, संभवति तंत्रेण बह्वर्थसाधकत्वे, द्वितीयार्थमात्रपरत्ववर्णनं सूत्रस्य लघुत्वापादकं भवतीति वेदितव्यम् ।

अत्र " ब्रह्म न वेदान्तवेद्यं, तदुक्तस्य जन्मादित्रयहेतुत्वस्य ब्रह्मण्यसंभवादित्याक्षेपे, आह 'जन्माद्यस्यत इति' श्यामो युवा लोहिताक्षोदेवदत्त इत्यादिवत् समसमयमसंभवेऽपि, विभिन्नकालं संभवात्, भवतीदं लक्षणं ब्रह्मण इति सूत्रार्थः । अत्रोपलक्षणमुप लक्ष्याकारः, पूर्वप्रतिपन्नाकारश्चेति त्रितयमवर्जनीयं । यथा यत्र शरारिरास्ते, तन्मित्रक्षेत्रमित्युक्ते, शरारिरुपलक्षणं, मित्रस्वामिकत्वमुपलक्ष्याकारः, क्षेत्रत्वं पूर्वप्रतिपन्नाकारश्च, एवञ्जन्माद्युपलक्षणं, लक्ष्मीपतित्वमुपलक्ष्याकारः, ब्रह्मत्वं पूर्वप्रतिपन्नाकारश्चेति । इदञ्च केषुचिच्छाण्डिल्याद्युपासनेष्वनुपास्यत्वायोपलक्षणतया केषुचिदुपास्यत्वाय विशेषणतयाच, विवक्षितमिति श्रीमाल्लक्ष्मणाचार्यः अत्रतु, कथमयमेवमाक्षिपतीदानीमतिकर्कशाशयः किञ्चिदप्यप्रति

ज्ञातवति, मुखतो भगवति सूत्रकारे, परमेवहि प्रतिज्ञास्यति 'शास्त्रयोनित्वा' दिति । अतएवनास्त्यवसरोऽध्याक्षेपस्येति, सूचयामासाननुभाष्य, कर्मठस्याक्षेपं भाष्यकारः । न च, कथन्तर्ह्यध्यासभाष्यस्य प्रवृत्तिरिति वाच्यम् । यतोऽध्यासभाष्येण, न, प्रथमंसूत्रमवातीतरत्, किन्तूत्तरत्र वक्तव्यं सुखावबोधायास्माकमत्र समाकार्षीत् अत एव हि, 'यथाचायमर्थस्सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्याम' इति भाषितं, नत्वत आहाथातोब्रह्मजिज्ञासेति ।

अत एवाह च भगवान् पद्मपादाचार्यः, 'वक्ष्यति चैतदविरोधलक्षणे जीवप्रक्रियायां सूत्रकारस्तद्गुणसारत्वादि'त्यादिना। यद्येवमेतदेव प्रथममस्तु । मैवं अर्थविशेषोपपत्तेः । अर्थविशेषे हि समन्वये प्रदर्शिते तद्विरोधाशंकायान्तन्निराकरणमुपपद्यते, भाष्यकारस्तु, तत्सिद्धमेवादिसूत्रेण सामर्थ्यबलेन सूचितं सुखप्रतिपत्त्यर्थं वर्णयतीति, तथा च, सूचितार्थस्योपवर्णनमेव ग्रन्थकारसरणिमनुरुणद्धि, नतु तदेवाक्षिप्य समाधीयत इति । अपिच सिद्धं ब्रह्म न वेदान्तवेद्यं । सिद्धे व्युत्पत्तिदौर्घट्यात् । तदुक्तलक्षणस्यतत्रासंभवात्, मानान्तरमेयत्वात्, पुरुषार्थासंस्पर्शित्वाच्चेति चतुस्सूत्र्यवतरणिकाप्रणाळिकाभवतः । सेयन्न ऋज्वीप्रणाळिका, किन्तु कुटिलैव, यतोऽत्रजन्मादिसूत्रस्य समन्वयसूत्रानंतर्यं गीर्वाणगुरुणाप्यपरिहार्यमापतति । सिद्धमपि भवति व्युत्पन्नम्मानान्तरामेयं पुरुषार्थसंबन्धिच,अतो वेदान्तवेद्यमेवेति साधनानन्तरमेवह्ययथापि तदुक्तस्य लक्षणस्य ब्रह्मण्यसंभवान्नेदन्तद्वेद्यमित्याक्षिप्य समाधानं संगतमिति । किञ्च जन्माद्यस्ययत इत्युच्यते लक्षणं ब्रह्मणोवेदांतेन। तत्तु तत्र नसंभवतीत्याक्षेपे जन्माद्यस्ययत इति प्रत्युक्तमित्येतत्पामराणामपि परिहासास्पदं । अतः कथञ्चिदपि नास्त्यवसरोऽद्याक्षेपस्येत्यस्वरसं मनसि निधाय, अथापि यद्यवसरादाक्षिप्यते तदैवमेवाक्षेप्तव्यं । यथा कदाचिदपि किञ्चिदपि

कथञ्चिदपि ब्रह्मणोलक्षणन्नसंभवतीति । नत्वेकदा शास्त्रोक्तं लक्षणं न संभवतीत्येतदाहस्माचार्यवाचस्पतिः । 'तमिममाक्षेपं भगवान् सूत्रकारः परिहरतीति, नान्यं श्रीभाष्यकारोक्तमिति शेषः । तथा चात्र परिहसतीव भामती श्रीभाष्यश्रियं कुलांगनेव कुलटाम् । अत्र माभूज्जगत्तद्धर्मतया ब्रह्मणोलक्षणम् । तदुत्पत्त्यातु भविष्यति देशान्तरप्राप्तिरिव सवितुर्व्रज्याया इति समादधाति भामती । अत्र देशांतरप्राप्तिरुपलक्षणम् । व्रज्योपलक्ष्याकारः सवितृत्वं पूर्वप्रतिपन्नाकारः, तत्र व्रज्यानन्तरभाविनीदेशांन्तरप्राप्तिर्व्रज्यावच्छिन्नावृत्तिरित्युपलक्षयत्येव तदवच्छिन्नं सवितारं, न तु विशेषयति यथा, तथा जन्माद्युपलक्षणम्, निर्विशेषमुपलक्ष्यं जन्माद्यनवच्छिन्नं । सविशेषसाधारणं ब्रह्मत्वं पूर्वप्रतिपन्नाकारः । इदन्तूपलक्षयदेव निर्विशेषम् विशेषयति सविशेषं विशेषणमेव जन्मादिहेतुत्वन्तस्य स्वरूपमिति स्वरूपलक्षणतयेति विभावनीयम् ।

वयमपि किञ्चिच्चोदयामश्श्रीभाष्यकारोपरि । किमर्थमुभयात्मना लक्षणत्वमूरीकृतमिति । नचोपासनाया व्यवस्थाया इति वाच्यं । गुणान्तराणां येन न्यायेनोपसंहारानुपसंहारसिद्धिस्तेनैवास्यापि तत्सिद्धौ व्यर्थत्वात्, अस्योपास्यत्वांगीकारे जगद्व्यापारवर्जसूत्रविरोधाच्च । किञ्चोपलक्षणत्वपक्षे, जन्मादिहेतुत्वमेव हि लक्ष्मीपतित्वमिति तस्योपलक्षणत्वे भवति निर्विशेषता तस्येति मन्मतप्रवेशापत्तिः । वयन्तु स्वरूपलक्षणमेवेदं लक्ष्मीपतेरभ्युपगच्छामः । विशेषणतयेत्येतदप्युपरञ्जकतयेत्यर्थकतया वक्तव्यम् । नतु व्यावर्तकतया लक्षणमिति लक्षणन्नविशेषणं विशेषणन्नलक्षणमित्यस्यानुमानिकाधिकरणे वक्ष्यमाणत्वादिति ।

जन्मादिकेकलयतां पृथगेकमेकञ्जन्मादिकं कथमिदंवदलक्षणंस्यात् ।
जन्मादिकंकलयतामपिकारणत्वञ्जन्माद्योऽस्ययतइत्यपिसूचितोसि ।
भूतस्यनिश्वसितमेतदृगादिशास्त्रं भूतेशºयन्महतइत्यभिवक्तिशास्त्रम् ।

शब्दस्रस्ययोनिरपितद्भगवंस्त्वमेवयत्पाणिनीयमपिते डमरुप्रसूतम् ॥

इति जन्माद्यधिकरणशास्त्रयोनित्वाधिकरणे ।

शास्त्रयोनित्वेन सर्वज्ञं कारणमिति दृढीकृत्योत्थापितस्सांख्यः, तत्र तन्त्रेण शास्त्रयोनिकत्वप्रतिज्ञयोत्थापितः कर्मठश्च । तत्र सिद्धन्नशास्त्रार्थइति वदन्तं प्रतिक्षिप्यानन्तरमेव सिद्धस्य शास्त्रार्थत्वेऽपि ब्रह्म न तदर्थइति वदतः प्रतिक्षेपो युक्तइति कर्मठमेव पुरतः प्रत्यवतिष्ठमानमिव प्रतिक्षिप्य ततश्शास्त्रमपहरति—

४ तत्तुसमन्वयादिति—

अतःपदेन कर्मठो गळहस्तितइत्युक्तं पूर्वं, किञ्चातः, अतस्वाधिकारविरुद्धएवायममधिकारइत्यधिकारो पक्षेपमात्रेणोपरुन्धिन्धिकृतइति भवति । अतएवाधिकारविरोधाच्चेति पूर्वमेव तत्प्रस्तावः । अतोऽपि वा को विशेषप्रतिलम्भः । अयमतो विशेषः प्रतिलब्धः । यत् ब्रह्मान्यस्याध्यासएवेदं शास्त्रमारम्भणीयमिति—तत्कथं—इदमुच्यते । एवंकिल भगवतो जैमिनेराशयउन्नीयते यत्किल प्रमाणराजो वेदः । प्रमाणानाञ्च परस्परं विविक्तो विषयो वक्तव्यः । तथाचाप्राप्तएव शास्त्रस्यार्थवत्ता वक्तव्या । साच न सिद्धे, सिद्धस्य कथञ्चिन्मानान्तरमेयत्वावश्यंभावात्, तथाहि साधयन्ति कपिलकणभुगादयः प्रधानं परमाणुं परमपि निमित्तमात्रं परिणममानमपि प्रकृतिमिश्रमेवेति च परस्परं विभिन्नप्रस्थानाः प्रमाणान्तरेण, श्रुतयस्तु केवलञ्चिन्मात्रमेवोपादानन्निमित्तञ्चाहुः । तच्च ब्रह्मान्यस्याध्यासएव भवत् भवेत् । ततश्च श्रुतिविरुद्धमपि भवति तेषां मतं । यदि चिन्मात्रमेव कारणं स्यात्तदा सिद्धमपि तन्न मानान्तरमेयं स्यात् । नहि चिन्मात्रे मानान्तरं प्रवर्त्तितुमुत्सहते विना वेदान्तप्रमाणराजं । तत्र तदन्यस्याध्यासोऽवश्यमभ्युपगन्तव्यो भवति । सतु कथं सहसैवाभ्युपगन्तुं शक्येत सर्वैरप्यनभ्युपगम्यमानस्तीर्थकारैः, कथमेववोपपद्येत विरुध्यमानेषु वेदान्तवर्जं सर्वेष्वपि प्रमाणेषु । अतस्तएवोपचरि-

तार्था वेदान्ताः, प्रपञ्चस्तु नकदाचिदप्यनीदृशइति । तत्र उपपद्यत-एवायमध्यासः ततो नायमाशयस्साधीयान्, नवा कपिलादीनामपि मतं साधीयइत्यादावेवाध्यासमुपपाद्य वेदान्तएव प्रमाणराजो नवेद समान्यमित्याहस्म भाष्यकारो, "यथाचायमर्थस्सर्वेषां वेदान्ताना" मिति । उपपादितत्वाच्चाध्यासस्य, वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं शास्त्रारंभप्रयोजकं सूत्रमितिच । नहि चिन्मात्रे मानान्तरं प्रवर्त्तितुमुत्सहते विना वेदान्तप्रमाणराजमिति साधूक्तमित्यप्याहस्मात्र, "तत्वमसीति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वा"दिति । समन्वयादित्यत्रान्वयोऽनुगमनं, पदानां परस्पर-संगतार्थाभिधानमित्यर्थः,समा, मुख्यन्तात्पर्यं द्योत्यते । गौणस्यानुवैवलाभात्, कथंचिदपि तात्पर्याभावेऽनुगमनस्यैवाभावात्, तेन कर्मोपासनयोरन्वयएव, नतु समन्वयः । अतएव ब्रह्मबोधकवेदान्तानां प्रमाणराजत्वं, परमतात्पर्येण स्वार्थबोधकत्वात्, नह्युपासनार्थं ब्रह्माभिधीयते । किंतु ब्रह्मज्ञानार्थमुपासनमित्येतदर्थं ब्रह्मणि परमतात्पर्येण पदानां परस्परमनुसरणस्य सूत्रकारेणोक्तत्वात्, प्रतिपत्तिविधिशेषतया ब्रह्म समर्प्यते वेदान्तेनेति वादिनः प्रत्याचिख्यासिता, अत्रापरे प्रत्यवतिष्ठन्त, इत्यादिना भाष्येणेति वेदितव्यं । व्यर्थमिदमधिकरणं श्रीभाष्यकारस्य, कुतः, अवशेषाभावात्-कथं-सिद्धमपि व्युत्पन्नं ब्रह्म, वेदान्तोक्तलक्षणलक्षितं, मानान्तरामेयश्चेति साधिते कोत्रशिष्यतइति । नन्वस्त्येवावशिष्टं, तथापि प्रवृत्तिनिवृत्त्यन्यतरत्वाभावेन न शास्त्रप्रतिपाद्यं ब्रह्मेतीतिचेत्, अहहसिद्धमपि न मा-मानान्तरवेद्यं, अथापि न शास्त्रवेद्यं, साध्यत्वाभावादिति साधारणजनपरिहासास्पदमपिहीदं भवति चोद्यं । अथ कुतोऽयं परिहासः, अतो नास्त्येव ब्रह्मेति पर्यवसनादितिचेन्न, तथासति, प्रवृत्तिनिवृत्तिव्यतिरेकेणाप्यस्ति शास्त्रप्रतिपाद्यमित्यस्यैव साधनीयत्वात्, तत्र शक्तिग्रहप्रमाणान्तरागोचरत्वयोः परिकरत्वात्, शास्त्रोक्तलक्षणस्य

तदनन्तरकरणीयत्वाच्च भवदीयप्रणालिकायाः पामरपरिहास्यत्वावश्यंभवात् । किञ्चोपास्यमेव भवतां प्रतिपाद्यं । तच्चाक्रियात्वेऽपि भवति यूपाहवनीयादिवच्छास्त्रप्रतिपाद्यमिति, नास्त्येवास्यचोद्यस्यावकाशः । प्रतिक्षेपोऽपि परिहास्यपदवीमेवाधिरोहति भवतां,यथाहि प्रसक्ताशंकानिवृत्त्यर्थस्तुशब्दः । तत् शास्त्रप्रमाणकत्वं ब्रह्मणस्संभवत्येव, कुतः-समन्वयात्-परमपुरुषार्थतयाऽन्वय स्समन्वयः, तस्मात् । परमपुरुषार्थतया ब्रह्मणोऽभिधेयतयान्वयादित्यर्थइतिहि प्रतिक्षिपन्ति भवन्तः । तत्र पदसमन्वयो वाक्यसमन्वयः, तथा पदार्थसमन्वयो वाक्यार्थसमन्वयइत्यस्ति तान्त्रिकव्यवहारः । नतु ब्रह्मणस्समन्वयः कर्मणस्समन्वयइति समस्ति व्यवहारः । अभिधेयतया ब्रह्मणोऽन्वयोऽपि पदेष्विति वक्तव्यं, तत्रापि न ह्यस्ति घटस्य पदेष्वन्वयः, पटस्य वाक्येष्वन्वयइति समञ्जसो व्यवहारइतीदमपि परिहास्यमेव । किञ्च शास्त्रतात्पर्यविषयत्वमेव वक्तव्यं । तत्र पुरुषार्थतयान्वयः कोपयुज्यते । नह्यपापश्लोकश्रवणादिकन्तथान्वीयमानमपि तात्पर्यविषयो भवति । कर्मण्येव तात्पर्यात् । परमत्वविशेषणेनापि न निस्तारः । फलगतपरमत्वस्य तत्साधनएव शास्त्रतात्पर्यविशेषाधायकत्वात् । नच परमोद्देशेन मुख्यत्वमेव सूत्रार्थइति वाच्यं । शास्त्रप्रतिपाद्यत्वे फलवत्त्वस्यैव प्रयोजकत्वात्, फलत्वस्य पदार्थश्रैष्ठ्यएवोपयोगात्, अतो भाष्यइव ब्रह्मोपदेशस्य फलवदर्थावबोधकत्वेनैव कर्मणीव ब्रह्मण्यपि शास्त्रप्रतिपाद्यत्वं व्यवस्थापनीयं । तत्र यदि भवति फलत्वं ब्रह्मणो भवतु कामं । नतत्प्रतिपाद्यत्वे प्रयोजकं भवति, अथैवन्तर्हि कथं ब्रह्मणि तात्पर्यस्य सिद्धिः, तत्साधनएव हि तत्सिध्येदितिचेत्-नास्मान प्रत्ययमाक्षेपः प्राप्नोति । यइमे वयं ब्रह्मज्ञानव्यतिरेकेण ब्रह्मप्राप्तिन्नाभ्युपगच्छामः । यदि साधनीभूतोपासनव्यतिरेकेण ब्रह्मप्राप्तिमभ्युपगच्छतो युष्मान् प्रत्ययमाक्षेपः प्राप्नोति तदा युष्माभिरेव प्रतिकर्तव्यं । किं

कुर्मो वयं । अस्माकन्त्ववान्तरतात्पर्येणैवोपास्यसिद्धिः । तथाच निर्गुणमिव सगुणपि दुर्लभं भवतामिति स्थिते, कुतोऽत्र जरन्मायावादिमतन्तरुणमायावादिमतमित्यवहेळनस्यावकाशो भवतां पृथग्जनपरिहासास्पदानामपीति ॥

सिद्धेऽपि शक्तिमनुरुद्ध्य समन्वयेन
शास्त्रैकगम्यइति शंकर साधितोऽसि ।
आवर्तनावधिगुणागुणसाक्षिभाव-
मापद्यमानइति नेतरमानमेयः ॥

इति समन्वयाधिकरणम् ॥

अथेदानीं सांख्यः प्रत्यवतिष्ठते । अयञ्च स्वपक्षरक्षणाय वा परपक्षप्रतिक्षेपाय वा प्रणिधत्ते, इयंच सप्तसूत्री कारणसामान्यविषयिण्यपि प्रधानतस्सद्विद्याविषयिणी, ईक्षत्यादेस्तदन्तर्गतस्य विस्पष्टमुपन्यासात्, तत्रच चतुस्सूत्री तस्य स्वपक्षप्रतिक्षेपिका, त्रिसूत्री तु प्रतिबन्दीनिरासिकेति विवेकः । तत्र प्रथमपक्षोपक्षेपकं, सांख्यास्तु तत्परतयैव वेदान्तवाक्यानि योजयन्तीति भाष्यं । तानि प्रधानपक्षेऽपि योजयितुं शक्यन्ते । सर्वशक्तित्वन्तावत् प्रधानस्यापि स्वविकारविषयमुपपद्यतइति भाष्यन्तु द्वितीयपक्षोपक्षेपकं। प्रतिबन्दीह्यनेनोपक्षिप्यते । प्रधानपक्षेपीत्यपिनापक्षपदग्रहणेनच ब्रह्मैवाश्रयणीयमिति कोऽयन्निर्बन्धः प्रधानमेवचाश्रीयतामिति प्रत्यवस्थानात् । अथ वास्तूभयमपि कारणमुपादाननिमित्तभेदेनेति प्रतिबन्द्यन्तरं । वक्ष्यति च सूत्रकारोऽप्यानुमानिकमपीत्यत्रिनेममपि पक्षं, ननु स्वपक्षात्प्रतिबन्दीप्रथमपक्षस्य फलतः को विशेषः, अयमेव पक्षआश्रीयतान्नतु ब्रह्मपक्षइति पर्यवसानात्, अतएवापिकारावेवकारार्थावित्यत्र भामतीतिचेत्–न-नेयं ब्रह्मपक्षव्यवच्छेदिका भामती । किन्त्वनिर्धारणपूर्वपक्षभ्रमव्युदासिका, तथाचात्र कल्पतरुः, भाष्येऽपिकारदर्शनाद्वनिर्धारणपूर्वपक्षइति केचिद्व्याचक्षते, तद्व्यावर्त्तयत्यपिकारावितीति,

आनुमानिकाधिकरणे च न चानेककारणवैय्यर्थ्यं, कल्पभेदेन व्यवस्थोपपत्तेरिति, वयन्तु प्रतिबन्दीत्वादस्त्वयमपि कश्चित्पक्षइति मन्यामहे, अस्यान्याय्यत्वेस्तूभयमप्युपादानं, तत्रच वैय्यर्थ्येऽस्तु कल्पभेदेन व्यवस्था तत्रापि दोषे भवतु निमित्तोपादानभेदेनेति च, एवञ्च सूत्रभाष्ययोरपिरुभयार्थोपि भवति समुच्चयार्थोऽवधारणार्थश्चेति, तथाचानुमानिकाधिकरणे भाष्यन्तदेवच कारणमिति चकारघटितन्तदपि कारणन्तदेवच कारणं, ब्रह्मैवच कारणमित्याद्यर्थकं, एवमुभयथा प्रत्यवतिष्ठमाने सांख्ये, सेक्षणमेव कारणमिति शास्त्रसिद्धेनैव शास्त्रयोनित्वेन दृढीकृतेऽपि कथमेवमनीक्षणमेव प्रधानं कारणमुच्यते शास्त्रेणेत्याक्षिप्यतइति वदन्निवेक्षणमेव प्रथमन्दर्शयित्वा क्रुध्यन्निवच पश्चाद्दण्डं पातयति —

५ ईक्षतेर्नाशब्दमिति ।

अत्र न सांख्यपरिकल्पितमचेतनं प्रधानञ्जगतः कारणं शक्यं वेदान्तेष्वाश्रयितुं, अशब्दं हि तदिति भाष्यं, अत्र कुतइत्यनाक्षिप्यैव हेतुरवलंबितस्संयोजितश्च हिकारेण, तथाचास्यायमर्थो भवति भाष्यस्य, कथं, कथमेवमाक्षिपसि, नैवेदमुच्यते प्रधानं भवता परिकल्पितं कारणं वेदान्तैः, यत्कारणं, यतो यत्कारणं प्रधानन्तदुच्यते शास्त्रेणेत्यवोचः, नतु यदुच्यते शास्त्रेण तत्कारणमिति, अप्राप्ते हि शास्त्रस्यार्थवत्ताविविक्तविषयाणिहि प्रमाणानीति, सच न्यायः कर्ममीमांसकाभ्युपगतोऽनुगृहीतोस्माभिरपि,तत्रसिद्धस्य नाप्राप्तिरित्येतत्परं व्युदसनीयं व्युदसितं, तत्कथं मानान्तरावगतं शास्त्रार्थस्स्यात् प्रधानं, अशब्दं हि तद्भवतीति, एवन्निगृहीतेऽपि तस्मिन्नाहमिमन्यायमुपैमि, किन्तु प्राप्तमेव संवदते शास्त्रमित्युपैमि, तत्र कथमशब्दत्वमिति पुनः प्रत्यवतिष्ठमाने-आहेक्षतेरीक्षितृत्वश्रवणात्कारणस्येति, अत्र प्रधानन्नवेदान्तवेद्यं, वेदावेद्यत्वात् , घटवत् , कर्मान्यच्छास्त्रप्रतिपाद्यन्नप्रधानमीक्षितृत्वेन श्रूयमाणत्वात् , जीववत् , व्यतिरेकेण

प्रधानवद्वेति प्रयोगावुन्नेयौ-ततस्सदीक्षणं गौणं, प्रकरणविशेषपठितत्वात्, तैजसेक्षणवदिति सांख्यस्य प्रयोगे, अनात्मेक्षणत्वमुपाधिः, सदीक्षणममुख्यं, आत्मेक्षणत्वाज्जीवेक्षणवदिति प्रतिप्रयोगो वा—

६ गौणश्चेन्नात्मशब्दादिति ।

सोऽपि गौणश्चेन्न-तन्निष्ठस्य मोक्षोपदेशादिति । अत्राथवा पूर्वसूत्रएवात्मशब्दन्निरस्तसमस्तगौणत्वाशङ्कतया व्याख्याय स्वतन्त्रएव प्रधानकारणनिराकरणहेतुर्व्याख्येयइत्यस्ति भाष्यं । तत्र किमर्थएवकारः, न पूर्वशेषइत्येवमर्थइतिचेन्न-तदभावेऽपि लाभात्, न चाशब्दत्वादिकमिव न सहायापेक्षइत्यर्थइति वाच्यं । अस्यापि गौणत्वशङ्कानिवृत्त्यर्थमुत्तरापेक्षत्वादितिचेन्न-यथाऽशब्दत्वं स्वरूपसिध्यर्थमेव सहायापेक्षस्ससहायएवप्रयुक्तस्तथा नायमतोऽसहायएव प्रयुक्तइत्येवमर्थत्वात्, तथाचात्र प्रकारान्तरं प्रवर्त्ततइति भवति, ननु कोऽयं प्रकारः, कीदृशोवापूर्वइति चेत्-उच्यते, पूर्वं सानुयायिनासह प्रयुक्तः प्रधानसाधकः, अत्र सहप्रयुक्ताभ्यां सानुयायीकृतस्तादृश इति, कौ तौ सहप्रयुक्तौ, अवचनप्रतिज्ञाविरोधौ, ननुचाद्वचनं सहप्रयुक्तं, यतआह श्रीमांल्लक्ष्मणार्यः, चकारेण तत्त्वमसीत्युपादेयत्ववचनं समुच्चीयते, अस्ति च प्रतिज्ञाविरोधादिति सूत्रमिति, युक्तश्चात्रचनस्य वचनेन समुच्चयइति चेत्-अहह कथमेवमधिकरणमाकुलयितुं प्रवर्त्तते श्रीमान्स्वरसक्रमभंगप्रसंगेन,भज्यते हि स्वरसःक्रमो वचनावचनयोर्वैपरीत्येन, उक्तार्थत्वप्रसंगाच्च, उक्तोह्ययमर्थस्तन्निष्ठस्येति, नहि तन्निष्ठत्वव्यतिरेकेणास्त्युपादेयत्वं बदरस्येवसतः, प्रक्रियाभंगप्रसंगाच्च, भज्यते हि प्रक्रियैवं सति सूत्रकारीया, ननु केयं प्रक्रिया-कथमस्याभंगइति चेत्-शृण्ववधानतः-प्रथमन्तावत्कर्मठादाहृतं प्रमाणं ब्रह्मणि वेदान्तः, तदनु प्रमेयाहरणाय प्रधानमल्लेनायोधनं क्रियत इतिमनसि निखातव्यं । तत्राशब्दत्वमुपक्षिप्य प्रतिरुद्धे प्रधानमल्लेऽत्र शेचतेन तस्मिन्नीक्षणमपिसहप्रायुङ्क्त,तत्तु गौणत्वेन प्रतिरुन्धति तस्मिं

स्वस्यात्मशब्दोनुप्रयुक्तः, तत्रापि गौणत्वमाशंकमाने तस्मिन् गौणत्वसोपानपरंपरामारोढुं प्रवृत्तोऽयमिति मन्वानस्तदनुच प्रयुयोजत-न्निष्ठस्येत्युपर्यारोहणप्रतिरोधकं स्वतंत्रश्च साधनमिति भाष्यात्प्रतीयते, स्वातन्त्र्यञ्च नचेक्षणं गौणमात्मशब्दात्, नचात्मशब्दोगौण ईक्षतेरिति परस्परसहायाभ्यान्ताभ्यामेव संस्तम्भनेन, तेन सूत्रद्वयेनैकत्रिकं संपन्नं, अनेन तु स्वपक्षसाधकाभ्यां भावरूपाभ्यां पृष्ठानुपृष्ठभाभ्यां परस्परावष्टंभेन प्रबलीकृताभ्यां कथंचिदपि चालयितुमशक्याभ्यामीक्षणात्मशब्दाभ्यां लिंगश्रुतिभ्यामुपोद्बलितेन परपक्षप्रबाधकेनाभावरूपेणाशब्दत्वेन साक्षादेव प्रबाधितं प्रधानं प्रथमेन त्रिकेण, अत्र कारणवाक्यसामान्यं प्रधानपरतया समर्थनीयं ब्रह्मद्वेषिणा। ब्रह्मनिष्ठेन तु तत्सामान्यं वा तत्रैकं वा न तत्परमिति पराकरणीयं, तत्राद्यः प्रकारःप्रगतः, ततः प्रकारान्तराय दत्वावकाशमुपदेशोपि गौणश्चेन्न हेयत्वावचनाच्चेति तदनु प्रायुङ्क्त । नच वचनं कर्तव्यमिति वाच्यं, प्रतिज्ञाविरोधात्, सापि गौणीचेत्तर्हि हेयत्वं वक्तव्यं, नचैवमवोचदिति संस्तंभनं, अत्र प्रकारान्तरसूचकन्तस्मान्न प्रधानं सच्छब्दवाच्यमिति भाष्यं। नच वचनमपि कर्तव्यं, प्रतिज्ञापि गौणीति वाच्यं, निश्चित्य पूर्वमेव कारणमेवं गौणं गौणमिति ब्रुवतस्तव श्रुति संवादइत्यस्यैवासंभवादितिच चकारेणैव संस्तम्भनं । एवञ्चानेनापि सूत्रद्वयेन द्वितीयमपि त्रिकं संपन्नं, अनेन च परपक्षप्रबाधकाभ्यामभावरूपाभ्यां परस्परावष्टंभेन प्रबलीकृताभ्यां कथञ्चिदपि चालयितुमशक्याभ्यामवचनासांगत्याभ्यां लिङ्गाभ्यामुपोद्बलितेन स्वपक्ष साधकेन भावरूपेण वाक्येनार्थात् प्रधानप्रबाधनं कृतं द्वितीयेन त्रिकेण, एवमेकन्तस्य स्वपक्षबाधकं प्रकरणमुपसंहृतञ्च चकारेण, प्रकारपरिसमाप्तावपि प्रकरणापरिसमाप्त्या द्वितीये सूत्रे न चकारः, एवं श्रौतप्रतिज्ञाविरोधसमुच्चायकेन चकारेण प्रतिबन्दीमवलम्बमानस्य सांख्यस्य प्रतिज्ञाविरोधोऽपि गर्भीकृतो वेदितव्यः । एवञ्च षडपीमान्

हेतून् दर्शपूर्णमासवत्त्रिकद्वयीकृत्य धर्मेण पापमिवापनुनोद ब्रह्मविद्वेषिणं भगवान् सूत्रकारइति भवति । पश्चात्तु पार्श्वचराभ्यामिव भावरूपाभ्यामेव स्वाप्ययश्रुतत्वाभ्यां श्रौतलिंगवाक्याभ्यामुपोद्बलितेन भावरूपेणैवाशब्दत्वप्रतिद्वंद्विभूतेन गतिसामान्येन लिंगेन ब्रह्मैव कारणमिति स्वपक्षमेव परिरक्षन्परं प्रतिचिक्षेपान्तिमेन त्रिकेणेतिसारं। अतएवात्र भाष्यं, अतस्तच्चेतनं जगतः कारणन्नप्रधानमिति, कुतश्चन प्रधानञ्जगतः कारणमितिच, तथाच प्रक्रियाभंगप्रसंगात् प्रधानस्य सत्पदावाच्यत्वमेकमेव साध्यीकृत्य प्रवर्त्तमानञ्चोपादेयमेवश्रीभाष्यं। यतस्वयमेव सूत्रं ग्रथयति चकारार्थश्च श्लथयति, प्रक्रियाश्च भञ्जयति स्वारसिकीं सूत्रकारीयां श्रीभाष्यकारः । प्रतिबन्दीनिरासस्तु चेतनैककारणगतिसामान्यात्, नहि कारणान्तरसद्भावे तदेककारण गतिसामान्यं संभवति, तच्च स्वाप्ययादवश्याभ्युपेयं, प्रत्यहं स्वंह्यपीतेन भवितव्यञ्जीवेन सत्पदाभिधानं कारणं, तत्र कल्पभेदपक्षे कल्पान्तरेकंहि स्वमपीयाज्जीवः । नहि जडश्चेतनस्य स्वं भवति नहि स्वात्मीये घटादौ कश्चिदपीतो भवति, निमित्तमात्रत्वपक्षे तु सदावा कमपीयात्, उभयपक्षे विशिष्टपक्षेपि वा कथं स्वमपीतस्स्यादनुभयात्मकोऽविशिष्टात्मकश्च जीवः । कर्ममीमांसकः किल जडाजडात्मकंजीव मुपगच्छति, सतु ब्रह्मवा प्रधानं वा नेच्छति, श्रावयति च श्रुतिःस कारणं कारणाधिपाधिपइति सर्वज्ञं सर्वोपसंहर्तारं कारणं परमेश्वरं, एवन्त्रिकत्रयेण जितः प्रधानमल्लः, एवमेवच किल बहुप्रकारम्मल्लायोधनं पश्यामः, परेतु समन्वयान्तेन विचारपेटिका निर्वृत्ता, इदानीं शास्त्र मारभ्यते, नाशब्दमीक्षतेरिति । ब्रह्मकारणमेवेत्ययोगव्यवच्छेदार्थः प्रथमः पादः, अन्ययोगव्यवच्छेदिकात्रिपाद्यस्पष्टस्पष्टस्पष्टतरजीवादिलिंगिकेति वर्णयन्ति । वयन्तु विचारारंभस्समर्थितः प्रथमसूत्रेणैव,सम्भावितसद्भावं ब्रह्म जन्मादिना धूमनेव धूमध्वजः,शास्त्रयोनिकश्च ब्रह्म, तेन नानुमानमुपन्यस्तम्मया, आनुमानिकन्तु न कारणं,

अतः कारणमेव ब्रह्म, तदेवच कारणं, सत्पदाभिहितत्वात् सन्मात्र मेव ब्रह्म, नहि सदन्तरसत्वे सत्पदेन निर्दिश्येत, व्यावृत्तेन हि शब्देन पदार्थो निर्दिश्यते, सदन्तराभावादेव न सत्तादिविशिष्टं, किन्तु सन्मात्रमेव अतएवेक्षतिरेव, नत्वीक्षितृ, यदि सत्वमीक्षितृत्वञ्च व्यवहाराय कल्प्यते कल्प्यतां यथेच्छं, सत्वात्मासर्वस्य, तदप्ययाधारस्त्वात्, सन्निष्ठस्यैव मुक्तिर्न्नत्वसन्निष्ठस्य, तन्निष्ठमेव शास्त्रं, श्रावयतिच तमेव कारणमप्ययाधारंश्रुतिः परमेश्वरमित्येतत्सर्वं श्रुतत्वाच्चेत्येवमंतैस्साधितं, श्रुतत्वाच्चेति श्रवणानन्तरमपि ब्रह्म कारणंवा नवेति नशंकनीयं वैदिकैः, अतआनन्दरूपतापरमवशिष्टावशिष्टं यत्पुच्छन्तन्निर्धारणेन निर्धारणीया, गतिसामान्यञ्च विशिष्य समर्थनीयं, तच्च ब्रह्ममीमांसायां स्पष्टास्पष्टतल्लिङ्गकमेव वाक्यमुदाहृत्य, नतु जीवादिलिंगकं, अतन्मीमांसात्वात्, यत्र मात्रयापि नास्ति ब्रह्मलिंगन्नतच्छक्रेणापि ब्रह्मपरन्नेतुं शक्यं, प्रमाणलक्षणोयमध्यायः, नत्वयोगाद्यध्यायः, उपहितविषयोऽयं पादः, यत्र शुद्धमवरूढं यतोवरूढं च विशिष्टं, तच्च विशिष्टं शुद्धञ्चोपपादनीयं परस्तादित्यादिकमुपगच्छामइति । अत्र प्रसंगात्, क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशतेदेवएक इति श्रुतिमुदाहृत्य, अमृताक्षरं हरो रुद्रः, सतु जीवः, क्षरात्मानौ प्रधानजीवौ एकोदेवो नारायण ईशते, स्वायत्तीकरोतीति व्याकृतं श्रीभाष्यकृता श्रुत्यर्थमजानता,-तथाहि- अमृतशब्दात्सुपोलुक्, अमृतंजीवः, सत्वक्षरं, तथाच क्षरात्मानौ एकोदेवो हरः, ईशते, स्वायत्तीकरोति, स्वात्मभावमापादयतीति श्रुत्यर्थः, अन्यथेशतइत्यस्य कर्त्रभावप्रसंगात्, नहि देवइति नारायणस्य वाचकः, अमृतपदवैयर्थ्यप्रसंगाच्च, अत्र क्षराक्षरस्वरूपप्रदर्शनपूर्वकन्तदीशितारन्निर्धार्य तत्रेशनं विधीयते, तत्र किं क्षरमित्याकांक्षानिर्वर्त्तकं प्रधानं क्षरमिति, अथ किमक्षरमिति प्रश्नेभवन्मतेऽमृतोहरोऽक्षरमिति वक्तव्यं यथा कश्चन्द्रइति पृष्टे प्रकृष्टप्रकाशश्चन्द्रइति, नतु हरोऽमृताक्ष-

रमिति, नहि कोदेवदत्तइति पृष्टे मित्रातनयश्श्यामदेवदत्तइत्युत्तरयन्ति लोकाः, किन्तु श्यामोमित्रातनयो देवदत्त इत्युद्देश्यमेव विशिंषन्ति, तत्तनयान्तरव्यावृत्त्यर्थं, नतु विधेयमरुणदेवदत्तव्यावृत्त्यर्थमनाकांक्षितत्वात् तथाच भवताप्यवश्यं लुगङ्गीकर्तव्यो भवति । व्यवहितान्वयस्त्वधिको भवति दोषः, ईशितुरनिर्धारणाच्च न्यूनता, अस्मन्नयेतु हरइति निर्धारितोभवति, ईशनञ्च स्ववशीकरणं सर्वस्वापहरणेनापि, तत्र हरत्वमुपयुज्यते, नतुश्रीमन्नारायणीयं पालकत्वं, विरोधात्, एकत्वमपि तत्रोपयुक्तं हरस्यैव, यदाह भगवतीश्रुतिः एकएवरुद्रो नद्वितीयाय तस्थे, यएको रुद्र उच्यतइतिच देवत्वमपि तस्यैवानुशासनिके स्पष्टं, देवीतिच तत्रतत्र भगवती नारायणी निगद्यते, अतोऽजानतैव श्रुत्यर्थमन्यथाव्याकृतं भवतेति सिद्धं । अत्राय न्निष्कर्षः-अस्ति काचिन्महादेवे महामाये महेश्वरे महती विभूतिर व्यक्ता महासुषुप्तिः, सचोपहितं बीजभावापन्नं विशेषविधुरं सन्मात्रं सत्पदाभिधेयं ब्रह्म, यत्रेक्षतिरवततार शान्तं शिवमद्वैतं शुद्धं ब्रह्म । यच्च विशिष्टं सर्वमत्तीत्यात्मा सतु तां विजृम्भयन्विभूतिं भवोद्भवो हिरण्यगर्भो भवति सर्वस्यास्य जनयिता चराचरस्य यस्य हिरण्यमिव चैतन्यं गर्भे भवति, नत्वन्तर्बहिश्चाभिव्यापकं, विजृंभिताश्च ता मभिव्याप्नुवंस्तत्पुरुषो विष्णुर्नराणामयनन्नारायणः पुरुषोत्तमइति भवति, तामेवानुप्रविशन्सद्योजातो जीवोनाम भवति यइहामृतपदे नोक्तः,तथाच क्षरं प्रधानममृतञ्जीवरूपमित्युपब्रह्मणं, सएवेशानस्सर्वविद्यानां रुद्रो बभूव, यइह हरशब्देनोक्तः, सचायं हरो विजृंभितां स्वविभूतिं विष्णौ विन्यदधात्, सर्वविद्यानिधिस्सर्वेषणाविधुरो महाभिक्षुकः, तदाह भगवती श्रुतिः पदं यद्विष्णोरुपमन्निधायीति । विष्णोर्यत्पदमधिकारस्तदुपमं लक्ष्मीसमीपे निधायीतिश्रुत्यर्थः, स च विष्णुः प्रधानस्सर्वेषामासीत्, यइह क्षरशब्देनोच्यते, क्षरणञ्च तस्य प्रळये आगन्तुकलक्ष्मीवियोगेन नतु तस्य तस्यास्संबन्धेन च्यु-

तिर्भवतीश्वरत्वादतस्सोच्युतइति संकीर्त्यते, अमृतन्तु स्वरूपतो यज्जैवं रूपन्तत्तूपाधिसंवलनेन च्युतं भवति, यतस्संसरति, यस्तु हरो नारायणीभूयाविभ्राद्विजृम्भितां विभूतिं स्वस्वरूपेण तत्साक्षीचावर्त्ततस्थितिसमये सएष जीवेश्वरोपाधिद्वयमव्यक्तीकृत्य परित्यज्य विभागमेको देवो महामायो महेश्वरो महानटो बभूवेति श्रुत्यर्थइति ।

सर्वश्चेदमभिप्रेत्य सकारणं करणाधिपानां विशेषतो जीवानां सामान्यतो ब्रह्मविष्णुरुद्राणामधिपः अधीत्य पालयिता महासुषुप्तौ स्वात्मभावमापादयिता नचास्य कश्चिज्जनिता नचाधिपइत्यर्थिका श्रुतत्वाच्चेति श्रुतिरुदाहृता सूत्रकृता विवृता भाष्यकृता लिखिता चाभिसन्धिमात्रभेदवता भवतेति सर्वं शिवं ।

तत्तेऽनलेक्षण विलक्षणमीक्षणश्चेदात्मायते नम इति श्रुतिरब्रवीच्चेत् ।
सर्वाप्ययेऽप्ययविवर्जितएकएव संवर्तसे यदि तदा सदसि त्वमेव ॥

हित्वा हि हेयमखिलं विधिसूनवस्ते
लब्ध्वा त्वयीश परमां प्रणिधाननिष्ठाम् ।
त्वज्ज्ञानलब्धनिखिलज्ञपदं प्रपन्नाः
कैवल्यमुक्तिमभजन्निति सुप्रसिद्धम् ॥

इतीक्षत्यधिकरणम् ॥

६ आनन्दमयोऽभ्यासात् ।

वैदिकतार्किकमल्लौ प्रत्येकं प्रधर्षितौ, तत्र सामान्यतश्शास्त्रयोनिब्रह्मेति प्रतिज्ञाय मुख्यया तात्पर्यवृत्त्यापदानामन्वयात्प्रसाधितं, तच्च वेदानामेकवाक्यत्वाय कर्मैकपरत्वमुपेयतस्सर्वात्मना विपरीतं संवृत्तं, तदनु कर्मकारणविषयभेदेन पूर्वापरविभागतयाद्व्यर्थो वेदइत्युपयन्सांख्यो नत्वदभिमतंजगतो योनिः, यतो नशास्त्रयोनि, यत्तु गर्भावृतमिव योन्याऽविद्यावृतं शास्त्रेणैव प्रकाश्यते तदेव शास्त्रयोनि शास्त्रस्यच तदेव योनिःप्रकाशको जगतश्चाव्यक्तस्य, यतो योनिरिति गीयते, त्वदभिमतं त्वशब्दमेव मदभिमतन्त्वीक्षितृ, अत्रैव गति-

सामान्यं, श्रुतंच विस्पष्टन्तेदव कारणमिति पराकृतः, ततस्तु सां-
ख्येनस्यात् कथञ्चिन्निष्कृतिरितिप्रतीक्षमाणःकर्ममीमांसकस्तेनानुगतः
पुरस्तात्प्रत्यवतिष्ठते । तदनुयायीच सांख्यः पश्चादित्येतत्सूत्रक्रम-
विन्यासविशेषाद्विज्ञायते, यतोऽत्र षट्सूत्र्या प्रतिक्षिप्य प्रथमं पश्चा-
त्कामाच्चेत्यादिद्विसूत्र्या प्रतिक्षिपति पृष्ठतो निलीनमिवार्द्रावमानं सां-
ख्यं । पृथक्पराजितयोरपि मिलित्वा पुनरभियोगस्तथैव शूरेण तत्प-
राभवश्चेति लौकिकोऽपि न्यायोऽत्र सुसंगतो दृश्यते, परन्तु सर्वाण्य-
पि जीवाशङ्कानिराकरणपरतया विवृण्वन् श्रीभाष्यकारएवात्रासंगतो
दृश्यते । तत्रैवं प्रथमस्य प्रत्यवस्थानं–नन्वानन्दवल्ल्या जीवएवदृश्य
ते समन्वयः, नतु त्वदुक्ते ब्रह्मणि, यतोऽधीतयजुरादिसर्ववेदस्य त-
न्मयतामापन्नस्य तत्संस्कृतमनोमयस्य ततःपरन्तदुक्तसर्वार्थविज्ञान-
वतोऽत्यन्तं श्रद्दधानस्यानुष्ठितनिखिलकर्मोपासनस्य तस्यैव विज्ञान
मयस्य पश्चाच्च तज्जन्यप्रियमोदादिफलभाजो जीवस्यानन्दमयस्या-
थर्वाङ्गिरसादिवदवयवत्वेन श्रूयते ब्रह्मेति–तत्प्रतिक्षेपार्थमिदं सूत्रं
आनन्दमयोऽभ्यासादिति, कोवार्थइति विवेक्तव्यं, नन्वाभ्यासोनाम
समानेन पदेन पुनःपुनः परामर्शः सचात्रानन्दपदेन, आनन्दश्च ब्रह्म,
अतस्सएवानन्दमयइत्यर्थः, अथाभ्यस्यतान्नाम ब्रह्म, अथापि कथ-
मानन्दमयो ब्रह्मेतिचेत् अधिकृतस्यैवाभ्यस्यत्वादन्यथाऽप्रसक्तप्रसं-
गादिति, अथैवं निर्बन्धे कथम्मयटोविकारार्थत्वशंका सतिच प्राचुर्ये
ऽपि स्मरणे, प्रायपाठबलेन स्यात्, न स्यात्, नियमस्यैव ततो ब-
लीयस्त्वात्, अथानन्दमयस्यैवोत्तरत्रानन्दपदेन निर्देशोलक्षणया जी-
वस्य यथा ज्योतिष्टोमस्य ज्योतिष्पदेनेत्येवम्मन्वानस्य प्रायपाठब-
लात् प्रत्यवस्थानमितिचेन्न यतो निर्णीतार्थस्यैकदेशेन निर्देशइति
निर्णयो दृष्टान्ते, इहतु कथं संदिग्धस्यार्धांशनिर्देशइति निश्चेतुं शक्य-
मिति, ननूभयथास्मरणेऽपि प्रथमं प्रायपाठबलादाक्षेपः, तस्य ब्रह्म
प्रतिपादकानन्दपदाभ्यासेन समाधिः, ततःप्रायपाठस्य गतिः केति

पुनराक्षेपे प्राचुर्येऽपि स्मरणात्पर्यायान्तरगतावलम्बनापेक्षया प्रकृत पर्यायगतार्थानुसरणस्यैव युक्तत्वाच्चेति प्रतिक्षेपस्य क्वानुपपत्तिरिति चेन्न एवंसति वाक्यशेषवशादर्थनिर्णयइति भवति, तत्राभ्यासः क्वोपयुज्यते, उत्तरादित्येवहि वक्तव्यं, किञ्च चतुर्वारं हृदयमारूढे विकारार्थेमयटि सकलशाखाध्ययननिखिलकर्मानुष्ठानावस्थोपस्थितिनिरन्तरितप्रियमोदादिफलावस्थोपस्थितिसहकृतेच कथन्नामार्थनिर्देशतयापि नेतुं युक्तेनोत्तरेणानन्दपदेनाधिकृतमयडन्तनिर्णयश्चेति–ननु प्राणमयएव विकारार्थो गतः, किन्तु प्राणवृत्तिप्रचुरइति विवृतं, केन? श्रीमता, कथमेतदेवं स्यात् , स्यादप्येवं, यद्यन्योऽन्तरआत्मान्योन्तर आत्मेत्युक्ताःपञ्चआत्मानस्स्युः नचैतदस्ति, किन्त्वेकस्यैव तत्तन्मयतया तत्तद्विकारता, एवञ्च पञ्चापि विकाराएव नकोऽपि प्रचुरः, यदि प्रचुरस्तदाविज्ञानमयोऽपि कुतो नब्रह्म स्यात्, वर्त्ततेहि तत्रापि प्रकृतिमात्रस्याभ्यासः, किञ्च ब्रह्मेतीक्षितेत्यात्मेति सदित्येवच साधितं पूर्वं, नत्वानन्दइत्यपि, तत्र कथमानन्दपदं ब्रह्मेति निर्णयः कथंवा मयडन्तोपि तेन तदर्थइति निर्णयः अथाभ्यासेनानन्दपदे ब्रह्मणि तात्पर्यं लिंग्यते, यद्विवक्षितन्तदेवाधिक्रियेतेति सूत्रार्थइतिचेन्न-स्यादेतदेवं, यद्यन्यविवक्षयान्यन्नाधिक्रियेत, नचैतदस्ति, यतः पारिव्राज्यविवक्षया याज्ञवल्क्यस्य द्वे भार्ये इत्यारब्धं, रावणादीन् प्रकृत्य श्रीरामादीनभ्यस्यन्ति कवयः, सूक्ष्मान्तारन्दर्शयितुं स्थूलन्तारन्दर्शयन्ति प्रथमं लोकाश्च, अतो यत्पदेनोपादाय समन्वयान्तं प्रसाधितन्तत्पदाभ्यासमेव हेतूकृत्य स्वयमप्यभ्यस्यति तत्पदं सूत्रकारः, अभ्यासोऽपि तात्पर्यस्यैव निर्णायकः, तेन यत्र यदभ्यस्यते तत्र तदेव विवक्षितमित्ययमेवार्थआञ्जसः, नतु तदेवाधिकृतमिति, व्यभिचारात्, तथाचानन्दमयवाक्यं ब्रह्मपरमित्यर्थः पर्यवस्यति, ततो येन देवासुरमनुष्यादिभ्यो विलक्षणीकरणं पशुपक्ष्यादीनांपुच्छेन तच्छब्दान्नेतिपुनराक्षेपे प्राचुर्यात्प्रायापत्तेरिति प्रतिक्षेपः,

आधिक्यात्, यतश्शिरआद्यपेक्षया दत्तमधिकं प्रतिष्ठेति विशेषणं पुच्छे सर्वत्र तस्मादित्यपि विवक्षितं, तेन नह्यन्नमयादीनि वक्तव्यानीत्युक्तानि, किन्तु यत्तेषां पञ्चानामपि प्रतिष्ठाधिष्ठानमतएव तत्सर्वबाधावधिभूतं पुच्छमवशिष्टं ब्रह्म तदेव वक्तव्यमिति तेषामप्युक्तिः कल्पनापि तेषुशिरआदीनां, यतोऽत्र प्रतिष्ठेत्यधिकं दृश्यतइत्यर्थः पर्यवस्यति, तृतीयसूत्रन्तूपपत्तिपरतया भाष्ये प्रपञ्चितं वृत्तिमते । सापि तात्पर्यस्यैव लिंगं, यदि ब्रह्म नविवक्षितं तर्हि किमर्थं सानन्दमयस्य प्रपञ्चस्य हेतुत्वेन व्यपदिश्येतेति स्वमतेऽप्युपपादितं, ततो मांत्रवर्णिकमेवच गीयतइति सूत्रं, इदन्तु गीयते स्तूयतइत्यर्थवादप्रदर्शनपरं, अत्र क्लीबान्तमांत्रवर्णिकपदेन तदन्तमंत्रवर्णघटकपदघटितोऽर्थवादस्सूचितः, सचासन्नेवेत्यादिर्ब्रह्मपदघटितो द्विरुक्ततत्पदेनाभ्यासोऽर्थवशादर्थवादश्च भवति तात्पर्यलिंगमेव, वृत्तिमतेतु मांत्रवर्णिकमेव ब्रह्मेहानन्दमयइति गीयतइति वक्तव्यं, तत्र गायतिर्नोपपद्यते, नह्यनेन वाक्येन किञ्चिद्गीयते, अतएवेदं पदन्नविवृतं भाष्यकृता प्रतिपाद्यतइति नपदार्थस्स्तुतिस्त्वत्र नास्तीत्यभिप्रयता, क्लीबान्तत्वञ्च नप्रत्यभिज्ञापकमत्र लिंगान्तरस्यैव सत्वात्, प्रत्यभिज्ञाभावाच्च नास्य तद्ब्राह्मणत्वं, अतो वृत्तिमतेऽब्राह्मणस्यैव ब्राह्मणत्वं कल्पितं सूत्रकृतेति स्यात्, तन्मताभिप्रायेतु प्राकरणिकएवचेति वक्तव्यमित्येतदपि संसूचितं भाष्येण, यतो मन्त्रब्राह्मणयोरेकार्थत्वं युक्तं अविरोधात्, अविरोधार्थमित्युक्त्वा अन्यथाहिविरोधस्स्यादिति वक्तव्ये, अन्यथाहिप्रकृतहानाप्रकृतप्रक्रिये स्यातामित्युक्तं भाष्ये। तथाच वृत्तिर्नसूत्रानुगुणेति सिध्यति, एवम्मत्तमपि मतंगजं प्रतिक्षिपति महामारुते,अभ्यासो नामात्र शतगुणितोत्तरक्रमेणानन्दस्य गुणनं तादृशप्रचुरानन्दवत्वादित्यर्थइत्यस्य कावार्त्ता श्रीभाष्यमशकस्य, यतोऽत्रोत्तरसूत्रार्थोऽपि क्रोडीकृतोभवति, नचायमवैय्याकरणः पूर्वपक्षीति शङ्कुं शक्यं, येन प्राचुर्येऽपिस्मरणस्मारणार्थमुत्तरसूत्रमिति

समाधातुं शक्येत । तृतीयसूत्रमपि नात्यन्तमुपयोगाय स्यात्, एवञ्च प्रथममभ्यासः, ततस्स्वपक्षस्यैव साधकतया बाधकतयोक्तस्य प्रबाधनं, ततउपपत्तिः, पश्चात्तु निगमनेन सह विपक्षेबाधकप्रदर्शनमित्यन्वयप्रकरणमिदं मांत्रवर्णिकमेवच गीयतइति महाप्रकरणप्रदर्शनेनोपक्रमोप्युक्तइति तदपि लिंगं संसूचितं भवति पुच्छवादे अथेदानीं व्यतिरेकमाह । नेतरोऽनुपपत्तेः, भेदव्यपदेशाच्चेति, इतरो जीवो नानन्दमयः आनन्दमयो नविवक्षितः, अनुपपत्तेरित्युभयत्र समानं, यद्यानन्दमयएव विवक्षितस्तदा तं प्रकृत्य ततोऽन्यत्वेन तत्प्राप्यफलतया किमर्थं पुच्छं विस्पष्टमुपदिशेत्, नच विशिष्टफलभाक्त्वेन तम्महीकरोतीति वाच्यं, तथासत्ययमेवहि रसं लब्ध्वानन्दी भवतीति वक्तव्यमिति अयमितिच प्रकृतमानन्दमयमेवहि परामृशतीति पुच्छवादस्यैवानुगुणस्सूत्रार्थः, परपक्षे बाधकप्रदर्शनद्वारा फलवच्च पुच्छवेदनमिति सूचितन्तात्पर्यलिंगमितरत् । वृत्तिमते फलत्वव्यपदेशाच्चेति वक्तव्यं नहि रसिकएवायमानन्दमयइत्यभ्युपगच्छन्तंप्रति नहि लब्धैव लब्धव्योभवतीतिसन्तर्जयितुं शक्यमिति न तन्मतानुगुणं सूत्रं, अत्र विपश्चिदपश्चिमेन श्रीभाष्यकारेणैवं विवृतं, ननु मांत्रवर्णिकमपि जीवादनतिरिक्तमेव यत्तस्यैव निर्विशेषं शुद्धं स्वरूपन्तदेव यतो ब्रह्मेत्यतआह–नेतरइति कुतइति चेदाह-अनुपपत्तेरिति, अनुपपन्नं हि तस्मिन्निर्विशेषे मन्त्रोक्तं विपश्चित्वं, विविधं पश्यच्छिद्धिविपश्चित् पृषोदरादित्वेनयलोपात्, तत्वञ्च विपश्चित्वन्न कुतश्चिदपि कारणादुपपद्यते निर्विशेषइति, तदिदमुपपादितस्यैव स्वपक्षे वक्तव्या पक्षान्तरेऽनुपपत्तिः, नहि विपश्चित्वं पूर्वमुपपादितमानन्दमयस्य अनुपपत्तेर्नमांत्रवर्णिको जीवः भेदव्यपदेशाच्च नानन्दमयस्सइति क्रमभेदः' निर्विशेषेऽपि जीवभावइव विपश्चित्वमपि कचित्कुतो नस्यादितिचासमञ्जसं, यत्तु तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तरआत्मानन्दमयइति जीवाद्भेदेन व्यपदिशत्यानन्दमयमिति द्वितीयसूत्रविवरण

न्वदप्युक्तस्याश्चेति कुतो नोक्तमित्याक्षेपपराहतं । ततस्तु मास्त्वानन्दमयो विवक्षितः, किन्त्वस्तु प्रधानं विवक्षितमिति सांख्याशङ्कामाशंक्योक्तं कामाच्च नानुमानापेक्षेति। अनुमानापेक्षाच न अनुमानत्वात्, कामाच्च, नह्यनुमानं विवक्षितं स्यात्, पूर्वत्वात्, अपूर्वोहि शास्त्रार्थः, कामाच्च, नह्यनुमानं कामयेत, जडत्वात्, अतस्तदपेक्षा, तदाक्षाच नकर्तव्या, यथाजीवापेक्षा, प्रत्यक्षत्वाज्जीवस्य, विलक्षणात्कामाच्च, अतस्त्वयाच नानुमानापेक्षा कर्तव्या यथा पूर्वमीमांसकेन जीवापेक्षेत्यपूर्वत्वं सूचितं भवति तात्पर्यलिंगं । काममात्रेण सृष्टिश्रवणान्नानुमानप्रधानादिपदाभिधेयाचित्संसर्गापेक्षाऽनन्दमयस्य सर्गइति प्रतीयते, जीवस्यतु हिरण्यगर्भादेरस्ति तदपेक्षासर्गइति नानन्दमयो जीवइति श्रीमान्, इदन्तु प्रथमतः क्लिष्टं । प्रकृतेः स्वरूपतो वियदादिनान्यथाभावउत्पत्तिः, जीवस्यतु धर्मभूतज्ञानविकासः, तदुभयविशिष्टत्वमेव परस्य स्रष्टृत्वमिति स्वाभ्युपगमविरोधश्चेत्यसमञ्जसं, प्रत्येकं पराकृतयोरनुक्षणमेव युगपत्पराकृतिरप्यावश्यकीत्येतदपि त्यक्तं भवति, नह्यप्यनुमानपदेन प्रधान प्रतिपादनं पश्यामो वेदइतिच, ततस्त्वीक्षणमपि गौणयतः कामो मउदपानसमः, भवतिच पूर्वोऽपि शास्त्रार्थइत्याशङ्कां प्रत्याह अस्मिन्नस्यच तद्योगं शास्तीति। अस्मिन्पुच्छे ब्रह्मणि अस्य आनन्दमयस्य यादृशो योगस्सद्विद्याया मुपदिष्ट इति तन्निष्ठस्येत्युक्तस्त्वांप्रति पूर्वन्तादृशमभयपूर्वकं योगं प्रतिष्ठामनन्यव्यापारेण वर्त्तनं शास्तीदश्च शास्त्रमिति स्मारयित्वा शास्ति सांख्यं सूत्रकारः अत्र अस्मिन्नानन्दमये अस्य जीवस्य तस्यानन्दस्य योगन्तद्योगं शास्ति रसस्यैवायं लब्ध्वानन्दी भवतीति शास्त्रमिति श्रीमान् अत्र किन्नामास्ति शासनं, अत्रहि पुच्छत्वेनावतारितस्मात्रवर्णिकं ब्रह्मसत्वासत्ववेदनस्तुतिनिन्दापूर्वकं सकलजगत्स्रष्टृत्वेन परोक्षतया प्रसाध्याध्यात्मं सर्वप्राणिप्राणनादिहेतुतया ऽनन्दपदेन प्रतिनिर्दिश्यरसतया साक्षात्क्रियते सर्वैरप्यन्वहमिदमिति

साधयति, अस्माभिरुदाहृतन्तु यदाह्येवैषएतस्मिन्नभयं प्रतिष्ठां विन्दतेऽथ तदासोऽभयं गतो भवति तस्मादवश्यं विन्देतेति शास्ति । एवंसति कोऽहि नामैतदेवं व्याकुर्याद्विना श्रीरामानुजं सोऽपि किमर्थमेवं व्याकुर्यादसति भगवत्पादीये भाष्ये, नन्वास्तामेतत्सर्वं, प्रधानादिव जीवादपि व्यावर्तनीयं हि ब्रह्म, बाढं, तर्हि नास्ति जीवातिरिक्तं कारणं ब्रह्मेत्येवाक्षिप्य साधनीयमितिचेन्न अर्थसिद्धेः, सिद्धं ह्यर्थतोऽन्यत्वंजीवाद्ब्रह्मणो निखिलजगज्जन्मादिहेतुरीक्षितृसत्पदाभिधेयमात्मा ब्रह्मेति साधिते वादृशं सर्गमेवानभ्युपगच्छन्तमभ्युपगच्छन्तमपि जडादेव तमभ्युपगच्छन्तञ्चप्रति । सिध्यत्येव ह्यर्थात्त्वया गतिसामान्येन ब्रह्मसिषाधयिषितन्तच्च क्वचिज्जीवे गतिदर्शनादसिद्धमित्याक्षेपेण ब्रह्मासिद्धिप्रसंगस्य निराकरणेच जीवादन्यत्वं ब्रह्मणइति, एवञ्चानेन फलसाधनशासनोपन्यासेनाद्यलिङ्गव्यतिरिक्ततात्पर्यलिङ्गपञ्चकमुक्तंभितं, लिङ्गपञ्चकसद्भावेनाद्यलिङ्गेनापि भवितव्यमिति वृत्तिमतं, तच्चार्थान्तरविवक्षयाऽर्थान्तरोपक्रमस्य बहुळन्दृष्टतया ननियन्तुं शक्यतइति पुच्छब्रह्मवादेन निराकृतमिति संक्षेपः।

किञ्चात्र पञ्चात्मानः प्रदर्श्यन्ते, कस्यैत, विज्ञानमयस्येतिचेत् कुतोऽन्नमयस्य नस्यात्, मनोमयस्यवा मध्यमस्य अथवानन्दमयस्यान्तिमस्य, अथसएवाधिकृतश्शास्त्रेषुजीवः तस्य त्रयोगौणात्मानः, स्वयन्तु व्यावृत्ताकारो मुख्यस्स्वस्य पञ्चमस्तु स्वपरसाधरणो मुख्यआत्मेति चेन्न-यतो नैकस्य बहवआत्मानो भवन्ति अतः पञ्चमोवा षष्ठोवा यस्सर्वात्मा शास्त्रप्रतिपाद्यस्सएकएवात्मा, अन्येनात्मानइति मन्मतमेव वरं, नन्वेवं पुच्छवादानुगुणेषु सूत्रेषु कथं सूत्राणि त्विति भाष्यं गुणेत्वन्यायकल्पनेति भामती, अग्नीषोमीये पशावेकपाशके अदितिः पाशान् प्रमुमोक्त्वेतानिति मन्त्रोक्तस्य बहुत्वस्यानन्वयेनोत्कर्षे प्राप्ते-विप्रतिपत्तौ विकल्पस्स्यात् समत्वात् गुणेत्वन्याय्यकल्पनैकदेशत्वात्-उत्कर्षानुत्कर्षयोर्विप्रतिपत्तौ अदितिः पाशं प्रमु-

मोक्त्वेतमिति मन्त्रेणास्य विकल्पस्स्यात्, समत्वात् प्रधानपाशप्रति-पादकस्य प्रातिपदिकस्य गुणेतु पाशविशेषणत्वेन बहुत्वप्रतिपादके शसितु अन्याघ्यकल्पना पाशावयवबहुत्वे लक्षणाकल्पना प्रातिपदिक-परतन्त्रैकदेशत्वाद् प्रत्ययस्येति न्यायेन तदुपपादककल्पतरुश्च संग-च्छतामितिचेत् न यतस्सर्वोऽयं यत्नस्स्वमते सूत्रानुगुण्याभावाशङ्कया नोपात्तः, किन्तु सौत्रपदे लक्षणाश्रयणभीरुं वृत्तिकारं व्युत्पादयितुं अथ सूत्रकारेण वा किमर्थं लाक्षणिकं पदमुपात्तमानन्दमयइतिचेत्-लक्षणयैव प्रतिपादयति श्रुतिश्शुद्धं ब्रह्मेति द्योतयितुमिति गृहाण । यद्येवं प्रियशिरस्त्वाद्यप्राप्तिरिति सूत्रं कृत्वाचिन्तेयमिति भाष्य-श्च कथं संगच्छतामितिचेत्, एवं, यदि कश्चित्पाशुपतोवा पाञ्चरात्रो वाऽऽनन्दमयो ब्रह्मेति ब्रूयात् तदा तेनापि प्रियशिरस्त्वाद्यप्राप्ति रेष्टव्येति, तथाच तन्मतन्नयुज्यतइत्यर्थः, एवञ्च सूत्राणामनेकार्थत्व स्यालंकारत्वेन आनन्दमयो ब्रह्म अभ्यासादित्यारभ्य तद्धेतुव्यपदे-शाच्चेत्यन्तेन तान्त्रिकपक्षे प्राप्ते मान्त्रवर्णिकमेवच गीयते, चस्त्वर्थः पक्षं व्यावर्त्तयति, नेतरोऽभ्यस्यते, तत्र सत्वासत्वशङ्कानुपपत्तेः, अतो नब्रह्म सइति कोऽपि प्रकारउन्नेयो भवतीति । अथ कथं प्रत्यगभि-न्नस्य ब्रह्मणआनन्दरूपत्वं, इष्यमाणस्यैव तत्वात् सिद्धस्य प्रत्यगा त्मनस्तदभावादितिचेन्न स्रक्चन्दनादीनामपीष्यमाणत्वेन सुखत्वा-पत्तेः, नन्वन्येच्छानधीनेच्छाविषयस्सुखं स्रगादिस्तु सुखेच्छाधीने-च्छाविषयइति कुतोऽयन्दोषइतिचेन्न, सुखस्याप्यात्मार्थत्वेनेष्यमाण त्वात्, नन्वात्मवृत्तित्वेनेष्यमाणमपि नतदिच्छाधीनेच्छाविषयइति कुतो दोषइतिचेन्न उत्तरकालात्मसंबन्धेच्छाधीनत्वात्सर्वासामपि, नहि सुखंवा सुखसाधनंवा तत्वेन भूयादितीच्छति कश्चिदपि, कि-न्तु सर्वमपि मे भूयादिति, तत्र सदातनीम्मानभूवं हि भूयांसमिती-च्छामन्वेवान्यदिच्छति मे भूयादिति सर्वोलोकइति को विशेषस्सु-खस्य तत्साधनादात्मनोन्यत्वइति ।

तदेवं–सूत्रकल्पद्रुमारूढाब्रह्मवल्ली-विसृत्वरी ।
भाष्यवृन्तसुसन्नद्धप्रबोधसुमभामती ॥
कल्पद्रुमसमाश्लेषात्कल्याणफलदायिनी ।
प्राप्नोति परमं विष्णोः पदं परिमलान्विता ॥
नष्टेऽहि लोकनिवहे निटिलेक्षणात्ते
शिष्टोऽथ शङ्कर मुदा यदि नृत्यसि त्वम् ।
स्पष्टोऽवशिष्टविषये श्रुतपुच्छशब्दः
कष्टतरेण विधिना शिव कुत्र नेयः ॥

इत्यानन्दमयाधिकरणम् ।

---

७ अन्तस्तद्धर्मोपदेशात् ।

८ भेदव्यपदेशाच्चान्यः ।

यदेवोपाधिविलयावशिष्टं सत्पुच्छन्तदेवोपाधिविशिष्टन्ततोन्यदिवोद्भूतं सदुपास्यं, उपाधियोगश्चास्मिन् सत्यपि यस्मिन्नुदेवोपाधेस्स्यात् ब्रह्म, नतु तत्र विलीनन्तमेव शास्त्युपदिशति शास्त्रं, अन्यएवायमुपास्यः पुच्छाच्च जीवाच्च, यतउपदिश्यन्तेऽत्र धर्मास्तस्यैवोपास्यत्वाय, नतूच्यन्तएव केवलमदृश्यत्वादिगुणकइव व्यपदिश्यतेचाय जीवाद्भेदेनेत्यादिकमत्र भाषितं स्यादीश्वरस्यापीत्यादिना-नन्वस्त्वेतत्–तस्येति सिद्धौ हि तस्यैवेति स्यात् कोऽयमेवंविधो धर्मः, कथमस्य तद्धर्मता, श्रुत्यन्तरादिति चेत्तदाऽऽनन्दतया परं किमपराद्धं, तत्र कथन्तत्साधनायैव पूर्वाधिकरणमित्यवोचइति चेन्न सिद्ध्यसिद्धिभ्यां विशेषात् अयंचात्र धर्मउपदिश्यते यस्सर्वपाप्मोद्गमः, यश्चर्क्सामगेष्णत्वादिनोन्नीयमानस्सर्वात्मभावः, याच निखिललोककामेशतेति तत्र सिद्धोहि, सर्वपाप्मोद्गमो धर्मो नपाप्मपरतन्त्रस्य भवति जगज्जन्मादिहेतुतेति, सर्वात्मभावश्च जगज्जन्मनिमित्तो निखिललोककामेशताचावनहेतुभूता, नचैवमानन्दरूपता सिद्धा । नहि

जगज्जन्मादिहेतुना चेतनेनाप्यानन्दात्मना भवितव्यमित्यस्ति निर्बन्धः केनापि तस्य तथात्वानंगीकारात्, आप्ततत्वाच्च, आप्तताब्रह्मक्रमानन्दात्मता, यतस्सर्वेऽपि वयं यतामहे प्रत्यहमुपर्युपरि सुखार्थं अतस्साध्यावस्थमेव तत्वं कारणस्येति किञ्चित्परप्रकरणमादाय साधनीयमेवेति, एवञ्च तस्यैव संभवद्धर्मोपदेशादिति हेत्वर्थः पर्यवस्यतीति । ननु तस्यैषएव शारीरआत्मेत्युक्तं शेषितया नतूपकरणितयेति प्रत्याख्यातञ्जीवत्वमानन्दमयस्य, तन्नयुज्यते, हिरण्यश्मश्रुत्वादिविशिष्टविलक्षणशरीरस्य चतुर्मुखत्वादिविशिष्टस्येव कर्मकृतत्वप्रसिध्या यथाऽयमुपकरण्येवान्तरस्तथैवानन्दमयोऽप्यान्तरइत्याशंक्य शेष्येवोभयत्र, विलक्षणन्तु शरीरमप्राकृतमैच्छिकमिति समादधाति, तथाच पूर्वशेषएवेदमधिरणमिति श्रीभाष्यं, तत्तु पूर्वाधिरणाक्षेपाय प्रवृत्तस्य पूर्वशेषत्वे सर्वत्राप्येवंविधा रीतिः कथंचित्संपादयितुं शक्येति सर्वमपि पूर्वशेषएव स्यात्, तत्र कथमत्रैव पूर्वशेषत्वकथनमिति नस्वरसं, कथन्तन्मते नित्यत्वादस्य शरीरस्यैच्छिकत्वमितिच तदेवं—

कप्यसपुण्डरीकाक्षं घर्मरश्म्यन्तरास्थितं ।
उन्नामानं हरिं वन्दे किन्नामास्ति ततःपरम् ॥

कामप्यहो न विजहाति पिशाचिकेय-
न्नारीं भुवि श्रुतिमपि स्पृशति ह्यसूया ।
तत्वानलेक्षण निवेदयितुं प्रवृत्ता
दुष्टोपमेयपदएव तयैव सेयम् ॥

यस्यैकमेव नयनं कपिपृष्ठभाग-
तुल्याम्बुजेन सदृशं स हरः परोऽयम् ।
यस्योभयं स च हरिः परएव साक्षा-
त्तावप्युभौ हरिहराभिधमेकतत्वम् ॥

इत्यन्तरधिकरणम् ॥

अस्ति सर्वोपाधिविनिर्मोकेऽपि ब्रह्म, दृश्यते चाध्यक्षमन्तररप्युपाधेरुपासकैरधिदैवमादित्येऽध्यात्ममक्षिणिच विलक्षणनामरूपविशिष्टतयेति श्रूयते, अतस्तद्युष्माभिरपि यथा दृष्टश्च श्रुतश्च स्यात्तथोपासितव्यमित्यनुशासन्निव सिद्धस्य प्रसिध्यर्थं प्रवर्त्तयत्युत्तरमधिकरणत्रयं, प्रसिद्धिश्चाप्यात्यन्तिकी यथाश्वमेधादिना समाराध्यदिव्यमंगळविग्रहवत्त्वेनात्मतनयतयावतारितस्यश्रीरामइतिकृतनामकरणस्य प्रसिद्धस्यैव भगवतो विश्वामित्रस्य मखमुखेनोपपादिता श्रीमता दशरथेनैवमेव द्रुतकनककमनीयकळेबरतयावतार्योदिति कृतनामकरणस्याधिमखमुद्गीथप्रस्तावयोरधिच्छन्दोगायत्रीमहामन्त्रस्यच संबन्धनिबन्धनेनैवोपपादिता सिध्यन्ती सिध्येदिति मन्वानः प्रवृत्ते 'आकाशस्तल्लिंगा' दित्यादिनाधिभूतं प्रसिद्धतरपदलाक्षणकीकरणेन,एतदेव सूचयति भूतविशेषे तावत्सुप्रसिद्धइति तद्धि प्रसिद्धतरेण प्रयोगेणेतिच भाष्यकृत्, अथ कथमेव मवगम्यते प्रसिध्यर्थः पादशेषइतिचेत् यतआरप्स्यते सर्वत्र प्रसिद्धोपदेशादित्युत्तरं पादमिति गृहाण, अन्य एवायं यथाश्रुतात्प्रसिद्धादाकाशादत्र प्रतिपाद्यमानआकाशः, यतस्तस्यैवात्र लिंगंव्यपदिश्यते प्रसिद्धाकाशसंबन्धिनो लिंगात्सर्वभूतकारणत्वादिकाद्भिन्नमिति भाष्यात्प्रतीयमानोऽत्र सूत्रार्थः अस्योपक्षेपायचान्यइत्यधिकोक्तिः पूर्वाधिकरणावसानइति विभावनीयं । एवञ्चान्यशब्देनापीदमेव प्रतिमाद्यते वेदान्ते, यदि सर्वभूतकारणत्वादिना प्रतिपाद्यतइति प्रसिद्धिरुपपादिता भवति सूत्रकृता, न पुनस्साधितमेव पुनःपुनःपरावर्त्यसाध्यतइत्येतदनुक्षणमेव निपुणतरमुपपादयिष्यामः, लिंगाल्लिंगान्तरबाधनेऽपि तेन नश्रुतिबाधनमित्यस्य प्रवृत्तिः, अत्र उभयत्र प्रयोगदर्शनात्संशयइति भाष्यं, रूढिनिरूढप्रयोगाभ्यामिति तद्विवरणात्मकः कल्पतरुः, श्रुत्या लिंगस्यानन्यथासिध्याचेति न्यायारक्षामणिः— प्रसिध्यतिशयपरायणत्वाद्यनुपपत्तिभ्यां संशयः । उभयत्रप्रयोगदर्शनादित्युक्तं परैः । तद-

युक्तं अश्रुतवेदान्तस्य परत्रेवात्रापि परमात्मविषयत्वाप्रतिपत्तेः इतरस्य संशयाभावाच्चेति सुदर्शनः । अस्त्वेतत्, अत्रपरोवरीयस्त्व मुपपाद्य तद्विशिष्टवेषेणोद्गीथे ब्रह्मसंपाद्यप्रसिद्धिरुपपाद्यते परोवरीयस्त्वंचाप्रतिष्ठितत्वान्तवत्व दोषास्पृष्टं परायणत्वानन्तत्वोभयापेक्षं । उभे अपि ते कुत्रापि कदापि स्वासत्वाभावाय सर्वभूतज्यायस्त्व-स्रष्टृत्व संहर्तृत्वान्यपेक्षेते इत्येतत्सर्वं यत्र प्रसिद्धं लोकानान्तत्पदे-नोपादाय ब्रह्म तत्र समर्प्यते भगवत्या श्रुत्या । तत्रैवंसति, किमत्र परावर्त्यते ब्रह्मवादोनास्ति कारणं ब्रह्मेति, उताहोभूतमप्यवान्तर-कारणमिहोपदिश्यते परोवरीयस्त्वेनोद्गीथे संपाद्योपास्यत्वायेतिपूर्वः पक्षइति विवेक्तव्यं । ननु परावर्त्तनमेव, यतआह श्रीमांल्लक्ष्मणार्यः अतआकाशादनतिरिक्तंब्रह्म, नन्वात्मनअकाशस्संभूतइत्याकाशस्यापि कार्यत्वं प्रतीयते, सत्यं, तस्य तु स्वस्मादेव सूक्ष्मरूपात् स्वयं स्थूलरूपस्संभूतइत्यर्थइति, न तल्लिंगादिति सिद्धवद्धेतूपन्यासायोगात्, तथाहि ब्रह्मशब्दस्तु यौगिकः, अयन्तु भूते रूढो विशेषसमर्पकः, अयश्चाकाशो नित्यो विभुश्चेति कणादादयः, ततश्चैतदनुगुण मेव नेयं वाक्यं सर्वमपीति प्रत्यवस्थाने कथं ब्रह्मणएव लिंगादिति हेतूकर्तु युक्तं, नहि सांख्यपरीक्षायामेवमुक्तमिति, नच सर्वाणह वाइति प्रसिद्धवन्निर्देशात्पुरोवादानुगुणमेवेदन्नेयमिति सूत्रार्थइतिचेन्न अवधारणात् अवध्रियतेह्याकाशादेवेति, तथाच यदुक्तं यतोवा इमानि भूतानि जायन्तइत्यादिसामान्यतस्तत्सर्बमाकाशादेवेत्युक्तं, तथाहि सर्वाणिहवा इमान्याकाशादेव समुत्पद्यन्तइत्यर्थावलम्बने नहि प्रत्यवस्थानं, तत्र कथं पुरोवादानुगुण्येनास्यनयनं विशेषसमर्पकस्य किंचैवं परावर्त्तने सर्वत्राप्येवं कर्त्तुं शक्यते, परिहारोऽप्येवमेव युज्यतइति कथमयोगान्ययोगव्यवच्छेदाभ्यां फलभेदः, नचोदाहरण धोरणीभेदेन पादभेदफलभेदाविति वाच्यं कुतः उच्यते, एतावतापि किमुक्तं भवति, नन्वाकाशमेव कारणमुच्यते, संभवति चात्रोच्यमानं

सर्वमपि यथाश्रुतमेवाकाशे, ब्रह्मवाक्यमपि सर्वमविरुद्धमेव भवति, नेयंचाविरोधेन शब्दबलादिति प्रबलं पूर्वपक्षयति पूर्ववाद्यत्र, उत्तरत्र त्वस्त्वब्रह्मापि कारणमिति, तत्र कथं भोस्तल्लिंगादिति वचनमात्रेण पराणुद्येतभूतवादी, अहह मत्तेभकुंभमर्दनम्मालतीकुसुमेन, मत्कुणमर्दनन्तु महामहीध्रप्रयोगेणेति केयं विषमादृष्टिर्लक्ष्मणाचार्यस्य, ततो विहायमतिकर्दमं स्पष्टब्रह्मलिंगकएवायं पादइत्येवाभ्युपेत्यन्तेनेति अथास्तु भूताकाशस्यापि वाय्वादिक्रमेण कारणत्वोपपत्तेर्भूतान्तरापेक्षया ज्यायस्त्वादीनामप्युपपत्तेस्तदेवोपास्यं शब्दोपात्तमित्युत्तरः पक्षइतिचेन्न समन्वयाक्षेपात्, यदि प्रतिहारादात्रादित्यादिरिवेदमप्युद्गीथेसंपाद्योपास्यन्तदा तथैवास्तु का नो हानिस्समन्वयस्येति, नचास्तु तत्वनिर्धारणं प्रयोजनमिति वाच्यं, अनवसरात्, अनुनिष्पत्तेश्च, समन्वयसमर्थनं ह्यवसरप्राप्तं, समर्थितेच तस्मिन् स्वयमेव निष्पद्यते तत्वनिर्धारणमिति अत्रोच्यते यत्र मात्रयाप्यस्ति ब्रह्मलिंगन्तत्रास्पष्टब्रह्मलिंगकेऽप्यब्रह्मलिंगाद्वा शब्दाद्वा ब्रह्मलिंगस्य बाधनेऽब्रह्मापि शास्त्रे ब्रह्मसमकक्ष्यं स्यात्, तच्चानिष्टं यतोब्रह्माब्रह्मणोस्समसत्ताकत्वे श्रुतितात्पर्यविषयस्याद्वैतस्य बाधस्स्यात्, प्रकृतेत्वस्ति स्पष्टमेव ब्रह्मलिंगं, अतोऽब्रह्मशब्दानुगुण्येन न तस्य संकोचइति ।

अथ केयमनन्यथासिद्धिः, यद्बलाल्लिंगं श्रुतिं बाधते, नच साधारण्यं, असाधारण्येऽप्यार्थवादिकत्वं वाऽन्यथासिद्धिः । तदभावस्सेति वाच्यं, एवन्तर्हि स्वयमेवान्यथाभवतो लिङ्गस्यबाधिकाश्रुतिरिति भवति। तत्र किन्नामप्राबल्यं श्रुतेः नच साधारणस्य पक्षे बाधकत्वं प्राबल्यमिति वाच्यं । साधारण्यात्, साधारणंहीदं लिंगेन एष सीतापतीरामइत्यादौ तथादर्शनात्, नचाग्निरधीतेऽनुवाकमिति यत्कथञ्चिदप्यनुपपन्नत्वं सेतिवाच्यं । प्रकृतेसंकुच्योपपद्यमानत्वात् । नचान्येषां संकोचसंभवेऽपि कारणत्वस्य नसंकोचस्संभवतीति वाच्यं । विनापि संकोचं पूर्वपक्षभाष्ये तदुपपादनात् भूताकाशस्यापि

वाय्वादिक्रमेणकारणत्वोपपत्तेरिति तत्राप्याकाशादिक्रमेणैव ब्रह्मणः कारणत्वस्यवाच्यत्वादित्यभिप्रायकतया, तथाचभूतपदं प्राणिपरमिति भाष्यात् प्रतीयते। तत्र कुतस्सर्वशब्दसंकोचइति। अथ यद्यपि पूर्वपक्षिणैवमुपपाद्यते, सिद्धांती तु नोपपद्यतएवेत्याह, यतआह मूलकारणस्य ब्रह्मणोऽपरिग्रहादाकाशादेवेत्यवधारणं सर्वाणीतिचभूतविशेषणञ्चानुकूलंस्यादिति, अयमाशयः नायमेवकारोऽन्ययोगं व्यवच्छिनत्ति, किन्त्वयोगं। तेननक्रमिकं कारणत्वमिहशब्दार्थः किन्तु साक्षात्, बच्च भूतसामान्यंप्रति। तच्च शब्दपक्षे मूलकारणापरिग्रहान्नोपपद्यते, आकाशस्यवायुंप्रति साक्षात्कारणत्वेऽपि तेजआदौ वाय्वादिनाऽन्यथासिद्धेः, यथाकापालिकस्य घटादौ कपालादिना, परिहृत्यशब्दं ब्रह्मणः परिग्रहेतु तस्य तत्तत्तादात्म्यापन्नस्य संभवति भूतसामान्यं प्रत्येवकारणत्वं, यथामृदः कापालिककपालघटादिकं प्रतीति, तथाच कथंचिदप्यनुपपन्नत्वमेवसेतिचेन्न। एवंभूतादेवलिंगाच्छ्रुतेः प्राबल्यस्यवक्तव्यत्वात्, नहि स्वयमेवापसरतो विद्रावणेन भवति कश्चिद्बलीयान्, प्रकृते तु ब्रह्मणः प्रथमजेगगने कथंचिदुक्तस्याप्यर्थस्य संगमनसंभवात्, शीताळोरध्यापकस्य समीपगेचटचटात्कुर्वत्यग्नावपि कथंचिदनुवाकाध्ययन नयनसंभवाच्च। अथ कंथ वर्णिनमभिप्रेत्य प्रयुक्ते कथंचिदपि संगमनसंभवइतिचेन्न। तथा सत्यभिप्रायस्यैवानन्यथासिद्धिप्रयोजकत्वापत्तेः। अस्तुकानोहानिरिति चेन्न प्रकृतेभूतेऽप्यभ्यासदर्शनात्, नन्वभ्यासापेक्षया प्रबलमुपक्रमोपसंहारात्मकमानन्त्ये तात्पर्यलिंगन्दृश्यते, इदमेवोक्तमपि चान्तवत्वदोषेणेत्यारभ्य संपाद्योपसंहरति, तच्चानन्त्यं ब्रह्मलिंगमित्यन्तेन भाष्येण। अतएवेदमेकमेवलिंगमनन्यथासिद्धमिति सौत्रमेकवचनमिति न्यायरक्षामणिरपीति चेन्न। तुल्यत्वात्। तुल्यएवह्ययन्न्यायोऽब्रह्मलिंगस्यापीति, अस्तु कोदोषइति चेन्न। तथासति यत्र मात्रयाप्यस्ति ब्रह्मलिंगमिति पूर्वोक्तनियमभंगापत्तेरिति,न,पृथगारं-

मात्, पृथग्घ्यारभ्यते चरितार्थमपि पूर्वन्यायेनेन्द्रप्राणाधिकरणं ब्रह्माब्रह्मानेकशब्दलिंगसमवायेऽपि ब्रह्मलिंगमेवेतरबाधकमिति विलक्षणन्यायप्रदर्शकं । तदेतदर्थंच । पुनःकिमर्थंच । तत्तु तत्रैव वक्ष्यते, यदत्र स्वस्मादेव सूक्ष्मरूपात् स्वस्य स्थूलरूपस्येत्युक्तं श्रीमता, तदाकाशस्यापि वायोरर्थान्तरत्वबाधकं, कारणस्य कार्यसूक्ष्मरूपत्वात्, अतस्तदापातदर्शनायातं, यत्तु सुदर्शनेनोक्तं भाष्यमयुक्तमिति तत्तु तदीयदुर्दर्शनायातं, नह्यश्रुतवेदान्तस्यवा सुश्रुतवेदान्तस्यवात्र संशयः, किन्त्वन्तरधिरणान्तमवधृतवेदान्तस्य, भवताप्युक्तन्यायापवादार्थमेवमेव वक्तव्यत्वात्,भाष्येऽप्यानन्दमयाधिकरणावलंबेन यदेष आकाशआनन्दइति, अन्तरधिकरणावलंबेन आकाशोवै नामनामरूपयोर्निर्वहितेतिच भाषणात्, भवता पुनस्सर्वमपि यथाश्रुतमेव गगने संभवतीति पूर्वपक्षयता लिङ्गस्यानुपपन्नत्वन्नकोप्यन्तरोत्थापकतया समर्थयितुं शक्यं, नहि ब्रह्मणोऽन्यत्रानुपपन्नमिदं लिङ्गं, शब्दस्त्वाकाशेरूढः, अतआकाशादनतिरिक्तंवा ब्रह्मातिरिक्तंवेति कश्चित्सन्दिग्धे, किन्त्वाकाशोवा ब्रह्मवास्य विषयइति सर्वस्संदिग्धे, किञ्चात्मनआकाशस्संभूतइत्यत्रात्मशब्दस्याकाशादनतिरिक्तार्थत्वनिश्चयेसर्वभूतकारणत्वरूपलिङ्गस्याकाशउपपन्नत्वनिश्चयः, सत्यस्मिन्निश्चये शब्दात् ब्रह्मण्याकाशादनतिरिक्तत्वनिश्चयइत्यहो महदिदं पाण्डित्यं प्रदर्शितं भवद्भ्यामाचार्यान्तेवासिभ्यां परस्पराश्रयदुष्टं पूर्वपक्षं प्रणयद्भ्यामित्यलमधिकेन । एवमुपहितं ब्रह्मलक्षयित्वा तत्र स्थितिप्रयुक्तं परोवरीयस्त्वमुपपाद्य तद्वत्तयोद्गीथे संपादितं । तदिदं स्थितिप्रयुक्तं परोवरीयस्त्वमित्येतत् रातिर्दातुः परायणमिति श्रुतिमुदाहृत्य परायणत्वमुपपादयता भाष्येण प्रदर्शितं ।

तदेवं....आकाशतो जगदुदाहरति स्म तास्थ्या-

दाकाशशब्दमपि तत्वमसीति शंभो ।

आकाशमध्यइति ते वसतिं वदन्ती-
मन्यां श्रुतिं श्रुतिरियं हि परिष्वजन्ती ॥
इत्याकाशाधिकरणं ।

॥ अतएव प्राणः ॥

अत्र सर्वभूतकारणत्वस्यैवातइति परामृष्टतया तल्लिङ्गादिति सौत्रमेकवचनं प्रत्येकमेव साधकमित्यभिप्रायेण भूतत्वावच्छिन्नकार्यतानिरूपितसाक्षात्कारणताया भूताकाशेऽसंभवात्, न्यायरक्षामणिस्तु कथञ्चिदितरेषां संकोचसंभवेऽपि नानन्त्यं सहते संकोचमित्येवमभ्युपगमवादेन, अत्र प्रळयप्रधानं ब्रह्मप्रस्तावे संपाद्योपास्यतया निर्धार्यते, यतः प्राणमेवाभिसंविशन्तीत्युपक्रमवती-श्रुतिरत्रोदाह्रियतइति । अस्मिन्प्रकरणे उद्गीथप्रतिहारयोरन्नादित्या-वब्रह्मणीदेवतात्वेनोक्तौ, तद्वत्प्राणोप्यब्रह्मैव ग्राह्यइतीदं भाष्येऽनादृतं । प्रकरणोक्तानामन्नमयादीनामब्रह्मत्वेऽपि कारणस्यानन्दमय-स्य ब्रह्मत्वं समर्थितमिति प्रकरणमात्रस्य पूर्वपक्षावलंबनत्वेन बुद्ध्याव-नारोहादिति सुदर्शनः । तदिदमसंगतं, आकाशवाक्यगतमपि लिङ्ग-माकाशे संभवत्येवेति पूर्वमपि पूर्वपक्षयित्वा न संभवतीति सिद्धा-न्तिते तत्रासंभवेऽप्यत्र संभवतीति प्रत्यवस्थाने तद्वत्प्रसङ्गभिया प्रक-रणस्यापि भवतस्समुच्चेयत्वात्, पूर्वपक्षावसरे लिङ्गस्य ब्रह्मासाधा-रण्यानिश्चयेन तेनात्र प्रकरणस्य बाधायोगाद्, आनन्दमयाधिक-रणे सिद्धान्तसाधकस्य साधारण्याशङ्काभावात्, अस्मद्भाष्येऽपि प्रकरणमात्रस्यानालम्बनात्, केवलशब्दबलात्संकोचस्य बाधनेऽपि प्रकरणसचिवशब्दबलात् भूतसंवेशनोद्गमनयोर्भूतसारेन्द्रियसंवेशनो-द्गमनरूपत्वमंगीकार्यमित्येवमर्थन्तत्साचिव्यस्यावश्यकत्वाच्चेति ।

तदेवं-संवृक्षेचेत्सर्वलोकानपि त्वं
संवृङ्क्षेचक्षुरादीननोऽयं ।

आनीर्वातापेतएवातएव
प्राणोऽस्यद्धा पञ्चवक्त्वमेव ॥
इति प्राणाधिकरणं ।

॥ ज्योतिश्चरणाभिधानात् ॥

अथ पादाभिधानादित्यनभिधाय चरणाभिधानादित्यभिधाने को हेतुः, पादोऽस्य सर्वाभूतानीति पादाभिधानं हेतुः, तथाच भाष्यं पादाभिधानादित्यर्थोऽयमर्थो लब्धइत्यर्थकं, ननु किमुत्तरमभिहितं भवता मम प्रश्नस्य, इदमुत्तरमभिहितं, यत्सर्वभूतपादेनोन्मितं ब्रह्म ततस्तेषां यच्चरणं संसरणन्तद्ब्रह्मणएव । अंशेन सर्वभूतात्मकं सद्ब्रह्मैव संसरतीत्यर्थइति तथाच श्रौतः पादशब्दश्चरणशब्देन व्याख्यातः नह्युन्माने चरणशब्दः प्रयुज्यते लोके किन्तु चरस्य गमनसाधने, एवञ्च, चरसामान्यं पादत्वेनोक्तमिति द्योतयितुं चरणाभिधानादित्युक्तमिति वेदितव्यं एतेनैवं हि ब्रह्मप्रसिद्धं वर्ततइति प्रसिद्धिरुपपादिता भवति, वाक्यान्तरगतेन ब्रह्मलिङ्गेन वाक्यान्तरस्य तत्परत्वसाधनेन सन्दिग्धवाक्यगतेन लिङ्गेन विचार्य निर्णीतान्यपि ब्रह्मलिङ्गानि गौणयन्तोऽयोगव्यवच्छेदमेव पादस्य पणं फणन्तश्च पराकृता भवन्ति, अत्र गायत्रीद्वारा चेतोर्पणं ब्रह्मण्यवश्यं कर्तव्यमिति निगदितं भवति, यन्निरतिशयोत्कृष्टदीप्तिजुष्टमुपहितं ब्रह्म समन्वयविषयतया पादस्य पणायितन्दिवीति द्युसंबन्धि दिवःपर इति तद्बहिर्भूतं शुद्धंच तदध्यात्मंकौक्षेय ज्योतिषि संपाद्य द्रष्टव्यं श्रोतव्यश्च नह्यत्र विरोधो द्युसंबन्धे तद्बहिर्भावेच, उभयस्मिन्नप्यविरोधात्, यतो वृक्षाग्रमिव श्येनस्योपाधिरेव द्युलोको ब्रह्मणः, न ह्युपाधिसंबन्धासंबन्धाभ्यामुपहितं भिद्यतइत्यादिकमुपदिष्टं भगवता वेदाचार्येणेति वेदितव्यं। अत्रोदाहरणेकारणत्वस्यानभिधानात् बंभ्र-

मीति तान्त्रिकः, यतएवमाह, अत्र कारणत्वस्यानभिधानेऽपि तद्व्याप्य मभिधीयते निरतिशयोत्कृष्टदीप्तिजुष्टत्वं, व्याप्तिग्राहकन्तु तस्य भासा सर्वमिदं विभातीति श्रावयित्वा तथाक्षरात्संभवतीह विश्वमिति श्रावकम्मुण्डकं, तथाचात्र व्याप्यावधारणाद्व्यापकस्यावधारणं यथा धूमावधारणाद्धूमध्वजस्येति। अत्रैकं परंभवति हर्षहेतुः यदि श्रुत्यन्तर मादायत्वमाक्षिपासि तदाहमपि वाक्यान्तरमादाय प्रतिक्षिपामीति यत्। परन्तु तदेव मुण्डकवाक्यं कुतो नोदाहृतमिति पर्यनुयोगे ज्योतिश्शब्दाघटितत्वादिति वक्तव्यं, चेत्किमितिचेत् अधिभूतप्रकरणं विच्छिद्येतेति वक्तव्यं, कुतो वायुस्त्यक्तइति प्रश्ने वायुविशेषत्वात् प्राणस्य नायन्दोषइत्यभिधातव्यं, अथाप्युत्तराधिकरणे गत्यभावान्नेयं कल्पना युक्तेति विभावनीयं ।

तदेवं—ज्योतिस्त्वमेव यदतःपरतोदिवोऽन्ये
देवायतो दिविषदोऽस्यथ देवदेवः ।
पादस्तवैतदखिलं भुवनं त्रिपदी
तस्याः पराप्यभिहिताश्वतरेण यस्मात् ॥

इति ज्योतिरधिकरणं ।

अतःपरमत्र किमवशिष्टं, अनुगमः केषां यज्जीवविशेषलिङ्गं, यश्च भूतवाचकश्शब्दः यच्च तस्यापि लिङ्गं, यच्च सैद्धान्तिकं ब्रह्म लिङ्गमित्येतेषां, अथ कथमनुगममात्राय पृथक्प्रयत्नो युज्येतासति प्रयोजनान्तरे अस्ति यज्जीवसामान्यलिंगस्य बाधनन्नाम यच्चाब्रह्मणां लिङ्गसमवायस्यच, किञ्चान्यद्वक्तव्यं, लोकदृष्टिरन्या शास्त्रदृष्टिरन्येतिचैवं विचारितवेदान्तस्य भवति शास्त्रदृष्टिरिति सूचनार्थ एवमनुगमेन निगमस्य विचारितं विचारयिष्यमाणमपि सूचनीयमुपासात्रैविध्याभ्युपगमादित्युपास्यप्रधानः पादः प्रवर्त्तिष्यतइति ।

अत आह प्राणस्तथानुगमादित्यादि ।

यद्यपि प्राणब्दः प्राणाधिकरणेन भग्नोत्साहः कृतः, तथा जीवलिंगमपि निर्जीवीकृतमन्तरधिकरणेन, प्राणलिङ्गमपि कैमुतिकन्यायेन निष्प्राणीकृतं प्राणाधिकरणेनैव, अथापि बहून्यब्रह्मलिङ्गानि संघीभूय ब्रह्मलिंगन्दुर्बलयन्तीति पूर्वपक्ष्याशयः, प्राणलिङ्गसह कृतः प्राणशब्दइति तेन पक्षीकरणं, भाषितमिदं सर्वं ननु वर्णितं प्राणशब्दस्य ब्रह्मपरत्वं, इहाप्यस्ति ब्रह्मलिंगमिति, अनेकलिंगदर्शनादितिच अत्र प्राणलिंगस्यापि दर्शनादिति वक्तव्येऽनेकइत्युत्कीर्त्तनं संभवत्यब्रह्मलिङ्गानां बहुविधानामप्येकत्राब्रह्माणि समावेशः, इन्द्रदेवताया बलवत्वेन जीवविशेषाविशिष्टत्वेनच जीवस्यच प्राणोपकरणित्वेन देवतात्माभिमानित्वेनच प्राणस्यापि जीवसहभावित्वेन देवताविशेषे विशेषाभिव्यक्तत्वेनच तेष्वेकोवा सर्वेऽपिवा भवन्ति संभूयोपास्याः, न ब्रह्माप्राणादिकमित्याशयेन । अतएवान्तिमसूत्रेऽन्यतरोवोभौवा नब्रह्मेति भाष्यं । एतेन शब्दसाचिव्येन प्राणलिंगस्य प्रातिभङ्ग्येऽपि कथमितरस्य तथात्वं, कुतोवा नतेषामपि परस्परं प्रातिभङ्ग्यं, कुतश्चवा विनिगमनाविरहेण ब्रह्मैवोपास्य न्नस्यात् केनवा हेतुना ब्रह्माब्रह्मसर्वोपासनमेव नस्यात् तथाच कथ मस्यभाष्यस्योत्थानमिति परोक्तं परास्तं । एवंप्राप्ते उक्तन्तथानुगमादिति अयमाशयः अब्रह्मलिंगान्येव दृष्ट्वा ब्रह्मलिंगं भवन्ति भुग्नग्रीवाणि ब्रह्मार्थत्वादध्यस्तानामब्रह्मणां, तथाच भगवती श्रुतिः, तदस्य रूपं प्रतिचक्षणायेति । नब्रह्मलिंगं स्वार्थत्वाद्ब्रह्मणइति । एवं स्थिते, इन्द्रप्राणादिशब्दिताज्जीवविशेषाद्ब्रह्मपृथक्कर्तुमधिकरणमिति वर्णयतां किं समाधानं स्यात् इन्द्रस्तथानुगमादितिकुतो नोक्तं सत्य पीन्द्रस्य प्रियन्धामोपजगामेति श्रवणे तस्याहंकारवादेच, अन्तरधिकरणादस्य को विशेषस्स्यादिति–अत्र वृत्तिरप्यादृता भगवता भाष्यकृतानन्तरपादावतरणसूचनाय आचार्यास्तु नानुमन्यन्ते प्रतिज्ञा-

तानुगमभंगस्स्यादेवेति, तत्र प्रसञ्जितेनैवानन्तरपादविषयोपक्षेपइ-त्यूहनीयं, यदातु एकविशेष्यकं बहुप्रकारकमेकमुपासनन्नवाक्यं भेदापादकमिति समर्थयितुं शक्यते तदा वृत्यर्थोऽप्यनुग्राह्यएवेति ।

तदेवं—आयुर्मृकण्डुतनयाय यतो व्यतारी
रापीतवानपि गरन्नमृतो यतश्च ।
आयुर्हदेवनिवहोऽमृतमित्युपास्ते
देवं त्रिलोचनभवं तमतो महान्तं ॥

इतीन्द्रप्राणाधिकरणम् ।

इति श्रीमहामहोपाध्यायसर्वतन्त्रस्वतन्त्रहरिहरगुरुचरणसंसेविनो वेदान्तविभूषणस्य श्रीजगद्गुरुशङ्करभगवत्पादार्पितशास्त्ररत्नाकरबिरुदाङ्कितस्य श्रीकृष्णाख्यस्याद्वैतसभापण्डितस्य कृतौ ब्रह्मसूत्रानुगुण्यसिद्धौ प्रथमः पादः ॥

पराणुद्यभूतन्तच्छब्दाब्रह्मणि लाक्षणिकीकृताः, तेन शब्दान्तरेणाप्युच्यमानं यदि सर्वस्य कारणन्तदा ब्रह्मैव तेनाप्युच्यत-इति प्रसाधनेन प्रसिद्धं ब्रह्मवेदान्तेष्वित्यासीत् यथाच दृष्टंचश्रुतश्चस्यात्तथापि संपादितं ब्रह्मप्रतीके, एतावताऽस्य सन्निधानमपि स्यादन्यस्य बाधकं, किमुतलिंगं लिंगान्तरस्य यद्यप्यस्पष्टमित्यप्यासीत् नहि तत्र प्रसिद्धे सन्निहितेऽन्यश्श्वसितुमपि शक्नोतीति अतः प्रतीकोपासोपरि स्वतन्त्रापि सास्योपदेष्टव्या शब्दान्तराहरणानन्तरं ब्रह्मणि साधारणोऽपि शब्दो विशेषणीयइत्येतदपि संप्रति सांप्रतमित्यादिकमभिप्रेत्योपक्रमते 'सर्वत्र प्रसिद्धोपदेशादिति' यातु सर्वत्र प्रसिद्धेनोपक्रान्ता, यस्याश्च यस्यस्यादद्धानविचिकित्सास्तीत्याह पूर्वोपासकः, सैवाद्यप्रथममवतारणीया शाण्डिल्यनामांकिता विद्याऽस्य विषयः प्रसिद्धश्चायमर्थस्सर्वत्र योयज्जलानस्सतदात्मकः, यथा मृज्जलानो घटादिर्मृदात्मकः हाटकजलानः कटकमुकुटादिर्हा-

टकात्मकः, जलजलानो वीचीतरंगादिर्जलात्मकइति प्रसिद्धश्च सर्वत्र वेदान्तेषु सर्वस्य ब्रह्मजलानत्वमत्र हेतुतयावलंबितन्वज्जलानिति, प्रसिद्धश्च तेन सर्वत्र ब्रह्मभावोऽत्र प्रसिद्धतयाश्रावितस्सर्वं खल्विदं ब्रह्मेति, एवं सर्वत्र प्रसिद्धस्यैवात्र मनोमयत्वादिनोपास्यत्वेनोपदेशादिति भाष्याशयः, अत्र विकारप्राचुर्यसाधारणतद्धितान्तो विशेष्यते सर्वत्र प्रसिद्धस्य सन्निधानमवलंब्य नह्युपास्यसकलगुणवत्तयोपेते सन्निहितेचाचार्येऽन्तेवास्युपास्यो भवति कथंचित्तत्सदृशोपीऽति प्रभूतेह्यस्य सामान्य "न्तद्धितार्थोऽपि सामान्यन्नापेक्षायानिवर्तक' इति भामती, ईदृशोऽयं पादइत्यन्ते साधारणशब्दविशेषादिति निगमनेन सूचयिष्यति सूत्रकारोऽपि, अत्र प्रसिद्धस्य पराकरणाय शब्दान्तरं लिंगमपि स्पष्टमपेक्षितं पूर्वपक्षिणः, शब्दान्तरश्चात्राणीस्त्वव्यपदेशस्तद्व्यपदेशादित्युक्तो वक्ष्यते चशब्दादिभ्यइति लिंगमपि स्पष्टमन्तरवस्थानमर्भकौकस्त्वादित्युक्तं वक्ष्यते चान्तःप्रतिष्ठानाच्चेति, आभ्याश्चा स्पष्टं ब्रह्मलिंगं, प्रसिद्धस्यापि सन्निधानमन्यार्थत्वान्नप्रकृतं बाधितुमुत्सहतेऽन्तेऽपि ब्रह्मसंकीर्त्तनं सर्वं खल्विदं ब्रह्मेत्युक्तिमवलंब्यस्तौति प्रकृतमुपास्यंजीवमित्यभिमन्यतेऽत्र पूर्वपक्षी सिद्धान्तिनोऽपि पाश्चात्यं लिंगमस्पष्टमिति त्रितयमपेक्षितं यद्विवक्षितत्वं गुणानामनुपपन्नताचान्यत्र, स्मृतिश्चेति उक्तश्चात्रैतत्त्रितयं, वक्ष्यते चानुपपन्नताऽसंभवादित्यन्तरालेऽप्यनुषञ्जनाय, स्मृतिश्च स्मर्यमाणमिति वक्ष्यते यदि लभ्यतेऽनुषञ्जनीयान्तरालेपीत्येवमर्थं, विवक्षितत्वन्तु गुणानां सर्वत्राप्यनुवर्त्तनीयमित्येतत्सर्वमत्र विभावनीयं, सत्यप्येवमस्पष्टजीवादिलिंगकोयं पादइत्युक्तिः परेषामति रभसात्, नहि विधूनितमत्तमातंगम्महामारुतमभियुङ्क्ते समुदायोऽपि मशकानां, मन्देतु तस्मिन्नेकोऽपि शक्नोति तमभिगन्तुम्मशकइति । एवं सर्वं खल्विदमिति वाक्यमेवोपासनविधायकं, मनोमयइत्यादिकन्तु गुणविधायकं, तथाचेह ब्रह्मशब्देन प्रत्यगात्मोच्यते परोवेति विशयः,

सर्वशब्दनिर्दिष्टंहि ब्रह्मादिस्तम्बान्तं जगत्, ब्रह्मादिभावश्चाविद्यावतः प्रत्यगात्मनएव विद्यते, नाविद्यादिदोषगन्धरहितस्य परस्य, ब्रह्मशब्दोऽपि प्रतीचि क्वचित्क्वचित् प्रयुज्यमानो दृश्यते अतएव कुहचित्परं ब्रह्मेति परस्मिन् सविशेषणोक्तिः, ज्यायस्त्वसत्यसंकल्पत्वादयस्त्वस्य वस्तुतो ब्रह्मभावेनोपपद्यन्तइति प्राप्ते आह सर्वत्रेति सर्वत्र सर्वमिति निर्दिष्टे सर्वस्मिन्जगति, ब्रह्मेति तादात्म्येन विधीयमानं परमेव कुतः, तज्जलानिति सर्वं खल्विदं ब्रह्मेतिच प्रसिद्धवदुपादेशात्, एवं वेदान्तेषु परस्यैव प्रसिद्धत्वादित्यर्थइति वर्णयन्ति, श्रुतिवाक्यविवरणन्तु छान्दोग्यविवरणभाष्यानुकारि, इदश्चैतेषां स्वमतेन, इतःपूर्वत्वस्मदधिकरणं लिखितं, तत्रारुचिकारणमुपक्रमोपसंहारगतब्रह्मशब्दैनैकविषयत्वप्रतीतिस्वारस्येनाभिन्नविषयत्वप्रतीतिपूर्वकपूर्वपक्षानुदयइत्याह श्रीमान् सुदर्शनाचार्यः, अत्रोच्यते येनोपक्रान्तं ब्रह्मजिज्ञासेति तदत्र श्रूयते क्लीबान्तं ब्रह्मपदं, यदस्य जन्माद्यस्यतइत्युपक्षिप्य व्यवस्थापितं कृत्स्नेन पादेन तदपि श्रूयते तज्जलानिति सर्वस्य ब्रह्मजलानत्वन्तदधीनश्च ब्रह्मत्वं घटादेरिव मृत्वं, अस्तिचान्तेऽपि ब्रह्मपदं, तत्र कथमस्य जीवपरतेति। नचाविद्यादिदोषविहीनस्य ब्रह्मादिसर्वभावो नघटते जीवस्यतु घटतइति तदाशङ्केति वाच्यं, तथासति कुतोऽस्पष्टता जीवलिंगस्येति। अहह केयमत्र भवतामपि विस्मृतिः, अन्ययोगाय्योगौहि पणायितावद्य तत्र यदि ब्रह्मणो ब्रह्मादिभावो नघटतइत्याक्षिप्यते कारणत्वमेव ह्याक्षिप्यतइति भवति, तथासत्ययोगएवहि पर्यवस्यतीति नच ब्रह्मणः कारणत्वाद्विलक्षणमिदमुच्यते जीवस्येतिवादइति वक्तुंशक्यं। तत्कारणत्वस्यैवान्यत्र योगस्यवक्तव्यत्वात् सत्यप्येवमस्मत्पूर्वपक्षानुत्थानोपन्यासः कुलटायाः कुलस्त्रियामिवापवादारोप एव भवताम्। सर्वं खल्विदं ब्रह्मेइति वृत्तिविरोधस्त्विष्यत एव, यतोऽसंगतापि वृत्तिरनुरोद्धव्येति नास्तीशाङ्का। ततोयदि प्राथमिकं वाक्यं शमविधिपरतय-

ननीयते तदानास्त्येवाधिकरणस्योत्थितिरिति विज्ञेयं, समर्थितश्चा-स्मत्पक्षे पूर्वःपक्षः । यदत्र- श्रवणादिना निष्पाद्याशान्तिरुपासन-स्य निष्पादिका तस्याश्च 'तस्मादेवं विच्छान्त उपासीतेति सिद्ध-त्वात् कुत्रापि शान्त्युपायत्वेनोपासनविधानाभावाच्छान्तपदस्य-तत्कामपरत्वास्वारस्याच्चत्यक्तं परकीयं विवरणमित्युक्तं सुदर्शनेन तत्तु तस्यात्यन्तम्मतिमान्द्यमाविष्कृणोति । यतो यदभावात् संसर-ति सर्वोजन्तुस्सहस्रवारमपि सा विधातव्या, अत्रैव विधिरन्यत्रा-नुवादइति वक्तुं शाण्डिल्यविद्यांगत्वेन विशिष्यविधानमित्युपगन्तुञ्च-शक्यते च, स्नातः कुर्वीतेति न विधातव्यं, तथासति स्नानकामेन कर्मकर्तव्यमिति विहितं स्यादिति ब्रुवाणो मन्दप्रज्ञइति विस्पष्टमेव विज्ञातुं शक्यमिति, यदप्यस्मदीयाधिकरणानुवादे सर्वत्र ब्रह्मधर्म-त्वेन प्रसिद्धस्य मनोमयत्वादेरत्रोपदेशादिति हेतुपरिष्करणम्मूल-कारस्य तदपि तथाप्रसिद्धत्वे श्रुते च पूर्वं ब्रह्मपदे पूर्वपक्षविभञ्ज-कतयाऽसमञ्जसं, अस्मत्पक्षे पक्षपदालाभदूषणस्य तु तृतीयएव यो-गः प्रतिवक्तेति, अथास्त्यत्र "विवक्षितगुणोपपत्तेश्चे" ति सूत्रं प्रा-येण स्वतन्त्रसगुणोपासनवाक्यविषयोऽयं पादः नतु पूर्वइवानुपपपन्न-गुणकप्रतीकोपासनतद्विषयः, नवापरंइवाविवक्षितगुणकविषयकश्चेति संसूचकं, अस्तु केऽत्र विवक्षिता गुणाः ननु सर्वेऽपि, कथन्तर्हि विशेषणं ननूक्तं प्रयोजनं न प्रकृतप्रयोजनार्थेनैवार्थान्तरसूचनस्य न्याय्यत्वात् अस्तु तर्हि श्रीभाष्यकारोक्तं प्रयोजनंविवक्षितस्यैव वक्ष्यमाणत्वाद्वक्ष्यमाणगुणेत्येवमर्थं विवक्षितेति विशेषणमितिचेन्न । तस्यापि प्रयोजनस्य वक्तव्यत्वात् अस्ति प्रथममेव वाक्यमुपासन-विधायकमिति सूचनं प्रयोजनमितिचेन्न, तस्य निराकृतत्वात्, वक्ष्य माणेति विस्पष्टमनभिधानकारणस्य वक्तव्यत्वाच्च, के तर्हि विवक्षि-ताः, ये पुनः पुनरप्युपादानेनाभ्यस्यादृतास्सर्वकर्मत्वादयस्तेऽत्र वि-वक्षितास्युरिति वक्तव्यं, अथ न मनोमयत्वादयो विवक्षिताः, चेत्

किं, कथमेवन्तर्हि विशेषणं, न, परीक्षावसरत्वात्, पूर्वापरपरीक्षाहि क्रियतइदानीं. उपासनाप्रकारस्तूपास्यनिर्धारणानन्तरनिर्धारणार्हः, तथाचात्र मनोमयत्वं प्राणशरीरत्वं बुद्धिविज्ञानमयत्वेन भारूपत्वमणीयस्त्वमित्यादयः प्रसिद्धिबलेनोपकरणोपकरणिभावनिबन्धना स्पष्टाएव जीवीयत्वेन सन्ति गुणाः केचन प्रथमं श्रुताः, चरमश्रुतत्वेन तैरभिभूता वस्तुतो ब्रह्मभावमादाय जीवेऽपि नेतुं शक्याइत्यस्पष्टास्सन्ति सत्यसंकल्पत्वादयश्च केचन गुणाः, तत्र पूर्वपक्षे मनोमयत्वादयो भवन्त्यविवक्षितास्सिद्धत्वादुपासकस्य सत्यसंकल्पत्वादयस्तूपक्रमोक्तयथाक्रतुन्यायेन संपादनीयाइति भवन्ति विवक्षिताः, ते च परस्मिन्नेवोपपद्यन्ते, सन्निहितश्चसः न हि सन्निहितउपपन्नेऽनुपपन्नग्रहणं युक्तं, न च सर्वं खल्विदं ब्रह्मेत्युक्तब्रह्मभावापेक्षयास्मिन्नपि समञ्जसास्तइति वाच्यं, अतिवृत्तत्वात्तदपेक्षायाम्मनोमयत्वादेश्शरीरत्वस्य, मनोमयत्वाद्यवच्छिन्नेतु शारीरे ब्रह्मधर्मानाञ्जस्येनोपपद्यन्ते, आञ्जस्यस्यैवाभावे कुतस्सामञ्जस्यं, तथाच भाष्यमिति चैव ञ्जातीयकागुणा न शारीरआञ्जस्येनोपपद्यन्तइति, सूत्रश्चानुपपत्तेस्तु अनुपपत्तेरेव न शारीरइतीति। अत्र यथासत्यसङ्कल्पत्वादयो ब्रह्मण्युपपद्यन्तएवं शारीरेऽप्युपपत्स्यन्ते शारीरस्य ब्रह्मणोऽभेदात् शारीरगुणा इव ब्रह्मणीत्यतआह सूत्रकारो नेतरइतीति भामती, तत्र सूत्रकारग्रहणन्तस्याभेदवादित्वएवेदं सूत्रं सार्थकमन्यथा निरर्थकमेवेति सूचयितुं, तदिदमसहमानश्चोदयति सुदर्शनः, यथा सर्पादिव्यावृत्तरज्जुत्वादिप्रतीतौ भीषणत्वादिना रज्जोर्विशेषणन्नोपपद्यतएवं जीवव्यावृत्तसत्यसंकल्पत्वादिप्रतीतावध्यस्तजीवधर्मेण मनोमयत्वादिना परस्यापि विशेषणन्नोपपद्यते नित्यस्य जीवस्य कथमारोपितत्वञ्चेति बलाबलविचारोयज्जीवत्वमेव शारीरत्वापरपर्यायमारोपितमुपासनाप्रकारस्तु छान्दोग्यविवरणादेवाऽधिगन्तव्यइत्यादिकमजानानः, अधिष्ठानन्तु सर्वास्पदं स्यान्नत्वारोपोऽधिष्ठानधर्मास्पद-

मित्येतदप्यजानानः । छान्दोग्यविवरणभाष्यन्तु वाक्यभेदापादकमधिकरणमुल्लंघ्य, अधिकरणन्तु कृत्वा चिन्तया, तत्फलन्तु परार्थं सन्निहितमपि ब्रह्मैवानुवर्तनीयमुपासनाय प्रसिद्धत्वात्सर्वत्र नहि प्रसिद्धे सन्निहितेऽन्यमुपास्ते मन्दोऽपीति प्रसिध्यतिशयप्रसाधनार्थैवेति

तदेवं—पादस्सर्वो यदीयो दिविदिवइतियद्रूपमाहस्म पश्चा-
ज्ज्योतिस्सर्वं खल्वक्तं शमगुणविधये यज्जलानञ्जलानं ।
सर्वत्रैव प्रसिद्धं श्रुतिशिखरगुणेष्वत्र शाण्डिल्ययोगी
यं संप्राप्तस्स मे स्याद्धरिरिह शरणं सत्यसंकल्पकामः ॥

इति सर्वत्र प्रसिद्धाधिकरणं ।

अथ यच्छं विश्वं क्रमप्राप्तन्तं व्युत्पादयति—

अत्ताचराचरग्रहणात्, प्रकरणाच्चेति ।

अत्रावयववृत्त्यैनकदेशविवर्तिनाव्यस्तेन रूपकेणरूपीकृतोऽत्तेति कश्चित् प्रथमं बुद्धिमधिरोहति, यस्येत्यस्योदन इत्यादौ ससंबंधिकएवान्वयात्, तेन स्वारसिकेनात्तृत्वेन जीवलिंगेनाभिभूयमानं ब्रह्मलिंगमस्तिवा नवेत्यन्वेषणीयमितीवाहात्र सूत्रकारोऽत्तेति पक्षं संपादयन्, इदमेवानुभाषते भाष्यकारोऽत्र कश्चिदोदनोपसेचन सूचितोऽत्ता प्रतीयत इति । अन्विष्यगृहीतमिव प्रयुङ्क्ते 'चराचरग्रहणादि'ति सूत्रकृत्, विषय्युपरक्तविषयानुसंधानात् परंप्रतीतमर्थमादाय प्रयुङ्क्त इत्यनुभाषते मृत्यूपसेचनत्वेन सर्वस्य प्राणिनिकायस्य प्रतीयमानत्वादि'ति भाष्यकृत् । अथ कथमदनीयस्य गळाधोभागसंयोगानुकूलव्यापारस्यात्तृत्वस्य परापरसाधारण्यमितिचेत्, मनोमयत्वस्यवा तत्कथं । मास्तु तस्यापि तदिति चेत् । तर्हि 'तद्धितार्थोऽपि सामान्यन्नापेक्षायानिवर्तक' इति कथं भामती, अस्तु भामत्यप्यसंगतेति चेन्न । तज्जलानिति जन्मादि हेतुत्वं परस्य श्रुत्यन्तरप्रसिद्धमादाय प्रवृत्ता हि श्रुतिमुपसूचयन्नुदाजहार प्र-

सिद्धिमेव हेतुतया तत्र सूत्रकारः, तेनान्यत्र यथा प्रसिद्धमब्रह्म-
तथात्रप्रसिद्धं ब्रह्मवेदान्त इत्युक्तं भवति, तथाचसमानं विकारप्राचु-
र्ययोस्तद्धितार्थत्वन्नापेक्षायानिवर्त्तकमिति संशयोपपत्तिः, अथ बली-
यसीलौकिकी प्रसिद्धिरिति विकारएव प्रथमं बुद्धिमधिरोहतीत्या-
क्षेपे, सर्वत्रप्रसिद्धस्यात्रोपदेशादिति सन्निधापयामास सन्निहितं
ब्रह्म, यथा ज्योतिरधिकरणे, एवं वेदान्तवाक्यप्रतीतमत्तृत्वमपि
परापरसाधारणं पुरोवस्थितस्यात्मसात्करणमेव न तु पूर्वोक्तम् ।
अत्रापि सन्निधापयति प्रकरणाच्चेति ब्रह्मेति । शास्त्रप्रसिध्यापि
पूर्वपक्षलाभायाग्निर्वाऽत्तेति । एवं स्थितेऽत्रजीवः परोवेति शिरोद्वय
मेव, नतत्रयम्, चित्याग्नेरेव पूर्वं प्रस्तुतत्वेन साक्षादग्न्यप्रस्तावात्,
विच्छिन्नत्वाच्च तत्प्रकरणस्य, अध्यात्मप्रकरणे विद्याङ्गकर्मोपयोगि-
त्वमन्तरेणाग्नेरनुपयोगेन तद्वैभवप्रतिपादनायोगाच्चेति वदन्ति परे ।
उपकोसलविद्यायामग्निभिरेवेयमस्मद्विद्येति स्वोपासनोपदेशादप्रकृत
मपि जीवमिव पूर्वाधिकरणेऽत्राग्निमादाय पूर्वपक्षकरणेऽपि प्रकरणेन
प्रतिक्षेपसंभवात् ब्रह्मजज्ञं देवमीड्यं विदित्वेति महीकृत्य विराड्रूप-
स्याग्नेरुपासनस्य प्रस्तुतत्वात् प्रकरणविच्छेदस्य जीवेनसमानत्वाद-
न्यथा प्रकरणाच्चेत्यस्याऽयोगादुक्तयुक्तेश्च नाग्निपरित्यागो न्याय्य-
एषां किन्तुभूतग्रहोपि न्याय्य इति । अथात्र कल्पतरौ यत्र शुद्धे स
चराचरसंहर्त्ता तत्कइत्थमिति वेदेति शुद्धस्य दुरवबोधत्वशेषतया
पूर्वभागस्य नयनेन किमर्थन्तस्य ब्रह्मपरत्वव्यवस्थापनव्यसनम-
स्माकं, जीवपरत्वेऽपीष्टसिद्धेरितिचेन्न । अनुग्रहार्थत्वात् । येम-
न्दास्तेऽनुकंप्यन्तेहि सविशेषनिरूपणैः । तदत्रास्तु जीवपरत्वमेव का
नो हानिरित्यौदासीन्ये कथमीश्वरसिद्धिः । तदभावे कुतोद्वैतैकत्वं,
तदभावेतु कुत्रकथमहंग्रहः, तदभावेच कुतस्तेषामद्वैतैकत्वविज्ञाना-
न्मोक्षसिद्धिरिति विधत्ते भगवती श्रुतिरुपास्य ब्रह्मसाधनपूर्वकन्तत्रा-
हंग्रहोपासनम् । ततस्तन्निर्धारणाय प्रवृत्तेऽत्रसूत्रकार इति । अथ

परस्मिन्नेव समन्वयइति साधयितुं प्रवृत्तस्य कथं विशिष्टस्यावान्तर-तात्पर्यविषयस्यात्रसाधनं संगच्छेतेति चेन्न । जन्मादिनाह्युपलिलक्षयिषितं ब्रह्म । तत्र यज्जन्मादि हेतुत्वविशिष्टन्तत्सिध्यधीनसिद्धिकन्तदुपलक्षितमित्यावश्यकत्वाद्विशिष्टसाधनस्येति । यदात्वासीनो दूरं व्रजतीत्यादिनोक्तोविरुद्धधर्म समावेशात्मकस्स्वरूपोपहितरूपाभ्यां समाधेयतया दुरवबोधश्चराचरसंहर्तुरेव प्रकारोयत्रेत्यनेनोच्यतेऽस्मिन्नेवसर्वेश्चराचरमात्मसात्कृत्यबीजभावमात्रसंपन्ने सुप्रदर्श शुद्धं ब्रह्मतीति विभाव्यते तदानकोऽपिक्लेशइति विभावनीयम् । येयं प्रेत इत्यत्र प्रेते मोक्ष्यमाणेसतीत्यर्थमुपयन्ति परे तत्र कथमास्तिकसार्वभौमस्य यमसमक्षमेव मृतजीवविषयकसत्वासत्वशंकायुक्तेति युक्तिश्चाचक्षते, तत्रकथमेवमेते संशेरतइति संशेमहे । नहि चार्वाकेणेवाऽशंकनीयमास्तिकेन माध्यमिकेनेवैवाशंकनीयमिति कोवाशंकेतास्तिकः, ब्रह्मव्यतिरेकेणास्ति नास्तीति विप्रतिपत्तिरिति व्याख्यातारस्तुनप्रतिवचनार्हाः । यतो निरंकुशाः । यतोनायमस्तीति चैके वेदान्ताइत्येवं व्याख्यातव्यन्तैः, शास्त्रमन्तरेणानवगम्यमानत्वात् ब्रह्मात्मभावस्य, तत्र यदिशास्त्रीयपक्षान्तरतयाऽयमुपेयते तदात्रैवाऽपूर्वेपर्यवसानस्यवक्तव्यतया स्वपक्षप्रतिक्षेपायैव यतन्तेत इति पर्यवस्यति, अहह भाष्यादि प्रणेतारोऽप्यार्थवादिक कथास्वपि बद्धादरामोमुह्यन्ति मुग्धाइवेति किमिदं संवृत्तं । किञ्च, न हि कुण्डेबदरमिव शरीरे पृथगात्मानं पश्यन्नेवास्तिकः कर्मसाकल्यवैकल्यनिमित्त फलाफलप्राप्तिमाशंकमान आशंकते, किन्तु शास्त्रप्रामाण्यनिश्चयेन परोक्षमेव निश्चिन्वन्, यतआस्तिकपरिबृढानामपि शरीरपूजापरिभवादौ हर्षविषादौ दृश्येते । अत एवाहस्म भगवान् भाष्यकारस्तेषामपि पश्वादिभिश्चाविशेषम् । नहि यमसदनेऽपि यमाद्योवा नारकिणोवाऽशरीराएव जीवरूपास्तेन दृष्टा इतिवा द्रष्टुमर्हाइतिवा कल्पयितुं शक्यम् । यमादिभिस्संवादादिश्रवणात् । नच वैतरणी

नद्यादिकमसिपत्रवनादिकञ्चातीत्यग्रामान्तरमिव मनुष्यमात्रेणाञ्जसैव प्राप्तं यम सदनमित्यपि कल्पयितुं शक्यम् । किन्त्वत्यन्तमास्तिकस्यासत्यादतिभीतस्य कुमारस्यापि सतः पितृवचनं सत्यापयित्वातद्धितमेवाभिलषतो यथाश्रवणं यममेवाभिध्यायतोगच्छतश्चतस्यैवदेवस्य प्रसादेन स्वप्नइव सर्वमपि निर्यातयमयमालयप्राप्त्यादिकं संजातमिति कल्पयितव्यम् । तत्र दृष्टेचदेवेयदिदं कर्मोपासनाकाण्डजीवातुभूतमिदंकाम इदंकामइति श्रुतमपि बहुशोनिश्चितमपि सुदृढं वादिभिर्विकल्पनात् स्वभावतश्च भूयोभूयस्संदिह्यमानं शरीरादतिरिक्तं कर्तृरूपं कर्मोपासनेच ब्रह्मलोकान्तसन्दायके तत्वमस्यहंब्रह्मास्मीतिच वेदान्तप्रमाणराजप्रतिबोधितमपि कथमेवंस्यादिति सन्दिह्यमानमन्तरेण शंकरं ब्रह्मादिभिरप्यन्यैर्धर्माधर्मकृताकृताद्यतीतन्निर्भेदं ब्रह्मचास्मादेवदेवान्मृत्योस्सर्वज्ञादवगन्तव्य मिति मन्वानोऽधीतसाङ्गसशिरस्कस्वाध्यायोयं पप्रच्छैवन्नचिकेताइत्यत्र कानुपपत्तिरिति । अथभाष्ये प्रकरणाच्चेति सूत्रे, नजायते म्रियते वेति मंत्रः कथमुदाह्रियताम् । परस्य जननाद्यप्रसक्त्याऽस्य जीवविषयत्वात् । भीष्मादि बंधुवियोगात् भीतं समाधातुं भगवतास्यावतारितत्वाच्च । अतोमहान्तं विभुमात्मानं, नायमात्माप्रवचनेन लभ्य इत्यादिकमुदाहरणीयमिति चेत् न, श्रुति सूत्रभाष्यार्थप्रकराणानामनवबोधात्तथोदाहरताम् । तथाहि सर्वसंहर्तृत्वेन परएवात्तेतिनिर्धारिते, संहर्तुरपि संहर्तुर्दृष्टत्वात् कथं सर्वसंहर्तृत्वं, कथंवा परत्वं ब्रह्मक्षत्रादिसर्वाघातुकस्येत्युभयाशङ्कावारकं हि प्रकरणमुदाहरणीयं, न तु यत्किञ्चित् , तत्र नजायते म्रियतेवा कदाचिदिति चराचरेषु लोकदृष्टिदृष्टेजननमरणे निवारिते, नायंकुतश्चिदिति स्वरूपतोजनिर्निवारिता, ततोनास्त्यस्याप्यत्तेति सिध्यति । ततोहंतृत्वदोषापनयाय, नबभूवकश्चिदप्यस्मात्, तत्र कं हन्यात् , यतस्स्वात्मानमेवानेकधा

प्रसारयित्वा पुनस्स्वात्मन्येवोपसमाजहार, ततः कुतोदोषः कुतश्चन परइति प्रतिपादितम् ।

अतएव नायं हन्ति न हन्यतइत्युभयनिषेधः, एकत्ववचनाच्च, जीवपरत्वे कथमेकत्वमुपपद्येत विपश्चित्वलिंगाच्च, ब्रह्मणा विपश्चितेति ब्रह्मणोहि विपश्चित्वं श्रुतं श्रुत्यन्तरे भगवतापि 'नत्वेवाहञ्जातुनासन्नत्वन्नेमे जनाधिपाः। नचैव नभविष्यामस्सर्वेवयमतःपरमिति' कर्मोपासनोपयुक्तजननमरणास्पृष्टज्जीवबहुत्वमुपपाद्य किमेतेन बहुप्रलापेन, एकएवायमात्मा त्वयि मयि सर्वत्रच परमेश्वरः, तस्य कुतोमरणं तस्य कुतोवा जनिः, तथाहि श्रुतिरितीदमवतारितं यदि, कुतो भगवद्वचनविरोधश्च, परेणाप्यहमेकः प्रथमासं वर्त्तामिच भविष्यामि चेत्युक्तं, तदुदाहृतन्तु नकाप्युपयुज्यतइति भाष्योदाहृतमेव प्रकरणानुगुणमिति ।

नायंहन्ति नहन्यतेच भुवियं हन्ताहतश्चेत्युभौ
जानीतोनशयानइत्यपि यतोयात्येव सर्वत्रयः ।
कस्तंवेदमदामदं रविसुतं ब्रह्मात्मनिष्ठं विना
लब्धासोऽपि यमेवचैषवृणुते तंदेवदेवं भजे ॥
चराचरमिदञ्जगत् सकलमेवयस्योदनं
कृतान्त उपसेचनं कृतपुरत्रयप्लोषणम् ।
अदर्शनभियापुनर्हरिदृगश्चितांघ्रिं हर-
न्त्रिलोचनमहं भजे विधिशिरः कपालाचितम् ॥

इत्यत्राधिकरणम् ।

अथ यदन्नं विश्वन्तदतः पृथक्प्रतिपादनीयमित्याह—

गुहां प्रविष्टावात्मानौहि तद्दर्शनात् । विशेषणाच्चेति ।

अत्रौप्रत्ययस्साधारणः, छायातपाविति शब्दान्तरं, गुहाप्रवेशएवलिङ्गम् । जनिस्तु जनकैकपूर्वा, संहारस्तुसंहत्रैकावसानः,

पालनन्तु पाल्यपालकोभयाविनाभूतमिति श्रुतिसूत्रयोरनेकद्विवचनान्तोक्तिः, अवितुरवनोपपादनायैवावनीयेन सहोक्तिः, नतु तस्याप्युपपादनाय, अतोऽवितैवास्य विषयइत्यवधारयितव्यं, ऋतं पिबन्तावित्युत्तरवाक्ये यतोबुद्धिद्वितीयो जीवएव प्रतिपाद्यते ततइदमपि तत्परमेवेत्याक्षेपे आह गुहामिति यतो गुहां प्रविष्टा वात्मानौ, ततो ब्रह्मैव प्रकरणि, तयोरेव, गुहाहितं, अदितिर्देवता मयी गुहां प्रविश्य तिष्ठन्तीमितिच गुहाप्रवेशदर्शनादितिपूर्वेणेदमेकाधिकरणयन्ति परे, तत्र पक्षोहेतुः, तत्साधकश्चेति त्रयमपि ग्रथयित्वा हेत्वन्तरस्य ग्रथनेऽपीदं यदि न स्वतन्त्रन्तदा किंवा तथा स्यादिति विमृशन्तु विमर्शकाः अत्तेवाविताऽपि पाययिता पृथगेव प्रतिपाद्यइत्यस्यानुत्तरत्वाच्च । तदेवं--

यस्य छायेव जीवो यइह हृदि गुहान्तेन साकं प्रविष्टो
यःपातारं स्वकर्माशयफलममृतं पाययत्यन्तरात्मा ।
एवं पञ्चाग्नयो ये यइह हुतवहश्चिन्वते नाचिकेतं
विद्युर्विद्यानिषण्णास्सतु हृदि सततं सन्निधत्तां हरिर्मे ।।

इति गुहाधिकरणं ।

अथेदानीं यदन्योऽन्तर आत्मान्योऽन्तर आत्मेत्यानन्दमयस्याप्यन्तरतया "यदेषआकाश आनन्दोनस्यादित्यवतारितमिदमेवशास्त्रार्थ इति षड्विधमपि तात्पर्यलिंगमुपन्यस्य निर्धारितमानन्दमयाधिकरणे पुच्छं ब्रह्म, तदेवसुखविशिष्टतया संयद्वामंसर्वेषामपि वामानां भामानाञ्चोपनायकमक्षिण्येव दृश्यमानमुपास्यं कं खं विशिष्टगतिप्राप्यञ्चविचार्यनिश्चेतव्यमित्याह–

अंतरउपपत्तेरिति ।

अत्र विशिष्टाभिधानेति साक्षादेवपादार्थाभिधानम् । गत्यभिधानाभिधानमपि विशिष्टविषयत्वोत्तंभनं । अस्तु कात्रोपपत्तिः ।

प्रथमंतावदात्मत्वामृतत्वादीनां तत्रतत्र ब्रह्मणि श्रुतानामत्रापि श्रवणस्यव्याप्तिबलात् ब्रह्मण्युपपत्तिः । ततश्चानुरूपस्थानकल्पनोपपत्तिः यथामहार्हमासनमिदं कल्पितमित्युक्ते महाराजायैवेत्युपपद्यते तथा निर्लिप्तमिदं स्थानं कल्पितमित्युक्ते निर्लेपायैवेत्युपपद्यत इति । अन्यथास्थानेनापि रूषणेनस्थानस्यापि रूषितत्वापत्तेरिति । नन्वेवं सत्यार्थवादिककल्पनानुरूप्येणापि परएवेति प्रतीयतइत्यर्थः पर्यवस्यति । तत्र कथं काचादिभिस्सलेपत्वान्नपरस्थानार्हश्चक्षुरित्यपि वक्तुं शक्यमिति दूषयति भाष्यं सुदर्शनः । न "ह्ययंहि धूर्जटिस्साक्षाद्येनदग्धाः पुरःक्षणा" दित्युक्ते स्वपुरपरिपालनादधूर्जटिरित्यपि वक्तुं शक्यमिति कश्चित् पर्यनुयुङ्क्तइतिचेदेवमदर्शनात् स्यात्पर्यनुयोगः । तृतीयातुसंयद्वामत्ववामनीत्वभामनीत्वानां घटनोपपत्तिः ।

॥ स्थानादिव्यपदेशाच्च ॥

अत्र कस्थानशब्दार्थः । आदिपदार्थोवा । किंवास्यसाध्यमिति । अत्रतावदाह । अनवस्थितेश्चेति व्यतिरेकेवक्ष्यमाणत्वात्तत्प्रतियोगिनीस्थितिरिहान्वयेस्थानशब्दार्थो 'यश्चक्षुषि तिष्ठन्निति श्रूयमाणा नाधारः । तत्प्रयुक्तदोषस्यार्भकौकस्त्वादित्याशंक्य परिहृतत्वात् । परस्यैवेदं व्यपदिष्टमन्तर्यामिब्राह्मणेऽत्र प्रत्यभिज्ञायते । नच तत्राप्यपरस्यैवेदमस्तुव्यपदिष्टमिति वाच्यम् । यतस्तत्र चक्षुरन्तरोयमयतीति नियमनेन सहव्यपदिष्टमतः परएवायमिति परत्वं साधयति, नियमनाद्यादिपदार्थइति । अपरः प्रत्याह । स्थानमित्युक्ते प्रथममाधारएव बुद्धिमधिरोहति, यथावस्थानमित्युक्तेऽवस्थितिः । अनवस्थितेरितिस्थित्यानियमोहि हेतूकरिष्यते । तत्र तत्प्रतियोगिप्रापकं स्थानपदमित्युक्तीरभसात् । चक्षुषितिष्ठन्नित्यत्राधारस्यैव प्रथमतश्श्रवणाच्छ्रुत्यन्तरमपिनानूकूलम् । नियमनमप्युत्तराधिकरणसाध्यमिति नतद्बलादपीष्टसिद्धिः । नच सिद्धवद्धेतूकरणमिति वाच्यम् । तदपेक्षया साधितस्य हेतुत्वसंभवे तस्यैवयुक्ततर-

त्वात् । स्थितिव्यपदेशस्य सिद्धान्तसाधकत्वेऽन्तःप्रतिष्ठानाच्चेत्युत्तरत्र पुनरप्याशङ्कायोगात्, अतः पूर्वपक्षप्रथमबीजस्यापरपक्षेऽपि पुनःपुनरबाधकत्वमेवोच्यते । तत्रयथानामरूपादिकमप्युपास्यत्वायोपदिश्यत इत्यवादिष्मतथेदं स्थानमपि व्यपदिश्यत इति गृहीतव्यमिति नामादिकमेवादिपदार्थः । ननु नियमनादिकमिति स्वभाष्यादर्शोपाधिनैव सुदर्शनोप्यदर्शनोजात इति । ननु सुखविशिष्टाभिधानादेवचेत्युक्त्यैव कं खं ब्रह्मब्रह्मैवेति साधितेऽपि, कथं सुखाकाशपरयोः कं खं पदयोर्ब्रह्मपरत्वमित्याशंक्य अतएवच स ब्रह्म सुखविशिष्टाभिधानादेवच सुखशब्दो ब्रह्मपर इति किमनतिरिक्तार्थसूत्रान्तरकरणेन परेषामिति चेत् भाष्यकारपदवीमिव सूत्रकारपदवीमप्यारोढुमिति गृहाण-- तदेवं-

कं खं ब्रह्मपरं यदक्षिण पुरुषं पश्यन्ति यं योगिनो
यद्ध्यायीलभतेऽर्चिरादिगतिमान् ब्राह्मं दुरापं पदम् ।
संयद्वामइतीरितोऽथ भगवान् योवामनीर्भामनी-
र्देवश्चक्रधरं भजामि सततं तं कोसलाराधितम् ।

इति इत्यन्तराधिकरणं ।

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ।

अत्राधिदैवमन्तरादित्येऽध्यात्ममन्तरक्षिणिचाखिललोककामेशतया व्यवस्थापितस्यैवांतर्यमनादिनोपासनविधायकं वाक्यं विषयीकृत्यविचार्यते । अथकथमस्मिन्नस्यावकाशः । यतस्तद्धर्मेति धर्मस्यस्पष्टता प्रकीर्त्यत इति चेन्न । अत्र व्यपदिष्टस्यान्तर्नियमनस्य तस्मिन्नेवोपपत्तेरिति सिद्धवद्व्यपदेशात् । तथाचभाष्यम् । “ परमात्मनोयमयितृत्वन्धर्मउपपद्यत ” इति । अत्रेदमादौ विवेचनीयं । नियमनंतु द्विविधं बाह्यमाभ्यन्तरश्चेति, बाह्यन्तु भृत्यादीन्प्रतिराज्ञोवाश्वादीन्प्रतितक्षणश्च, नेदमस्य विषयः, अन्तरोयमयतीति श्रुतेः,

आन्तरमपिद्विविधं प्रातिस्विकमनुगतश्चेति, आद्यन्तु स्वस्वकार्यकरणनियामकानाञ्जीवानां, द्वितीयन्तुसापेक्षं सहजश्चेति द्विविधम् । सापेक्षमप्याधिकारिकं योगजश्चेति द्विविधम् । तत्राधिकारिकं पृथिव्यादीनाम् " सैषापुरुषस्यापानमवष्टभ्येत्यादिना श्रूयमाणं । योगजन्तु यथा तंकणस्य महर्षेरीश्वरेतरसर्वप्रपञ्चनाटयितृत्वं, यथा वा शुकस्य तर्वादिशब्दापायितृत्वं पौराणं, स्वाभाविकमपि गौणम्मुख्यश्चेति द्विविधं । तत्र गौणंस्मार्तं सांख्यानाम् । मुख्यन्तु पारमेश्वरमौपनिषदानामनेन सिषाधयिषितमित्येवं पञ्चविधमान्तरन्नियमनमिति । तत्र तद्धर्मेति ब्राह्मं स्मार्तं शारीरश्च शब्दतएवस्फुटमुपात्तं अधिदैवादिष्वित्ति सप्तम्याव्यतिरेकसूचिकयाव्यपोह्यतयाऽधिकारिकमवबुबोधयिषितं । परिशेषात्तदित्यनेन व्यावर्त्यन्तां कणादिकमेवेत्यविस्रब्धमभ्युपगन्तव्यम । तत्रलाघवात्सर्वानुगतमेकमेवग्राह्यमिति बहुवचनेनसूचिता काचिद्युक्तिः । तच्चनयोगिनि संभवति, योगसिद्धेः पूर्वमभावादिति सूत्राशयः । तमिमं सूत्राशयं " योगिनोवा कस्यचित् सिद्धस्य सर्वानुप्रवेशेनयमयितृत्वं स्यादिति सर्वान्तिमतयोपन्यस्य प्राचीकटद्भाष्यकारः । तत्परावर्त्तनमपि भाष्यभामत्योस्स्पष्टं । इदंतु सूत्रेऽन्तर्याम्यधिदैवाधिलोकादिष्वित्यधिकतया पठंतिपरे । माध्यन्दिनानां यस्सर्वेषु लोकेष्वित्यधिकं दृश्यते । तच्च काण्वैरपि ग्राह्यं । तथाच विद्यैक्यमित्यभिप्राय इति प्रयोजनश्चाचक्षते सिद्धवत्कर्तुमिवात्मीयं पाठभेदम् । अत्रोच्यते । गुणोपसंहारपादकृत्यस्य कात्र प्रसक्तिः ? उभयसाधारण्येनाधिदैवादिष्वित्येव वक्तव्येगुणोपसंहारन्यायेन विद्यैक्यमिति मतिर्माभूदित्येवमर्थमधिकपाठं पपाठेति मतिभेदापत्तेश्चनायं पाठस्साधीयानिति । एवन्तर्ह्युभयेऽपि हीत्युभयग्रहणस्य किं कृत्यमिति चेन्न । केचित्तु य आत्मनीति न पठन्ति, तेषांज्जीवएवान्तर्यामीति न गतिसामान्यमिति शंकायान्तेऽपि विज्ञानशब्देन जीवं भेदेनाधीयत इत्येवमर्थमिति गृहाण । त्वत्पक्षे

तु विद्यैक्यस्य सूचितत्वादेकत्रोक्तएवन्यायोऽपरत्रापीति वज्रलेपायितमुभयग्रहणवैयर्थ्यमिति । अथकथमर्थान्तरं वेत्यप्रसिद्धपक्षान्तरकल्पनं कल्पेतेति चेत् अहह प्रसिद्धिपराधीने पादे सर्वत्राप्यप्रसिद्धिरेव प्रतिद्वंद्वीकर्तव्या । तत्र नियम्यैर्ज्ञातएवतान्नियमयति लोकेराजादिः, अयन्त्वताद‍ृशोऽप्रसिद्धः कश्चिदित्येकत्रापि तत्प्रतिलंभेश्लाघनीयेऽपि कथमेवं विषीदसि विद्वेषमात्रेणेति । यत्तु देवतायाएव योगसंभवेन ततः पृथग्विफलं योगिकल्पनमिति तस्य तंकणएव सिद्धः प्रतिवक्ता । शारीरस्यैव देवतात्वसंभवेन ततः पृथग्विफलं देवताकल्पनमित्यस्यापितुल्यत्वाच्च । यच्च सति द्रष्टृत्वादिश्रवणे कुतस्स्मार्तशंका, नह्यर्थांशमादाय शंकेति घटते, जडस्य नियमनमप्यशक्यशंकम् । न हि मृदादिकं घटादिकन्नियमयतीति शंकेतकश्चित्, सूत्रेतु सिद्धेनसाध्यस्य व्यपदेशः, तथाचशारीरश्चेत्यन्तमेकं सूत्रं, यथाद्रष्टृत्वाद्यतद्धर्माभिलापान्नस्मार्तमन्तर्याम्येवं शारीरोपीति तदर्थ इति । तच्च प्रत्युच्यते । सत्यपि यआत्मनितिष्ठन्निति श्रवणे कथं शारीरशंका । नह्यर्थांशमादाय शंकेति घटते, स्वान्तर्नियमनमप्यशक्यशंक्यम् । नहि देवदत्तस्स्वात्मन्यन्तः प्रविश्यस्वन्नियमयतीति शंकेत कश्चित् । सूत्रन्त्वधीयत इत्यन्तमेकमेव, यथाभेदेनाध्ययना ज्जीवोनान्तर्याम्येवं स्मार्तमपीति तदर्थ इति । अथ जीवइत्यनुक्त्वा शारीरइति पूर्वपक्षोत्तंभनात् कथमेवंस्यादितिचेत् । अथानुमानमित्यनुक्त्वा स्मार्तमिति पूर्वपक्षोत्तंभनात्कथमेवं स्यात्, अथमृदादिष्वदर्शनात् कथं शङ्कोदयः अथास्मदादिष्वदर्शनात् कथं शङ्कोदयः । विलक्षणस्य हिरण्यगर्भस्य स्यात् । विलक्षणस्य प्रधानस्यस्यात् । तस्मात् पञ्चशिराएवात्रविकल्पः, नतु देवताजीवपरैस्त्रिशिराः अथवा षण्मुखः । तदेवं–

देवोनांतर्यमयति तथानाप्रसिद्धश्चकश्चि-
न्नैवस्मार्त कइहतनुमांस्तंकणादिर्नयोगी ।

किन्त्वन्योसौ हरिरिति परस्तस्यधर्माभिलापा-
दन्तर्यामीसतु हृदि सदा सन्निधत्तांममात्मा ॥
इति इत्यन्तर्याम्यधिकरणं ।

अथाकाशाद्यधिकरणावधारितं भूतयोनित्वोपहितमेव विशिष्टश्च शुद्धश्चेति द्योतयितुं भूतयोन्यक्षरवाक्यमवतारयति ।

॥ अदृश्यत्वादिगुणकोधर्मोक्तेरिति ॥

पक्षस्साधारणः, दृष्टान्तशब्दश्शब्दान्तरम् । अतद्धर्मानभिलापात्सङ्गतिः । अर्थवशादेवबहुव्रीहिग्रहणसंभवे प्रत्ययस्यापि ग्रहणमन्यपदार्थएव विवक्षित इत्येतमर्थमाविष्करोति । भूयोवचनस्य विशेषार्थत्वात्, सादृश्यार्थोवाप्रत्ययः । अल्पार्थोवा । सादृश्याल्पत्वे च गुणानांव्यावर्त्तकत्वमेव नतु रूषकत्वमपि, नहि दिगंबरः पीतांबरवद्दूषितोभवतीति । व्यपदेशादिति विहायोक्तेरित्युक्तयापि प्रतीत्यर्थयुक्तिरेवेत्यमुमर्थस्पष्टयति, व्यपदेशस्तु विशिष्यापदेशात्मांव्यवस्थापयत्येव विशेषमिति, उपन्यासपदमपीममर्थयुक्तंभयाति उपन्यस्तस्य विवक्षितार्थप्रतीतिमात्रविश्रान्ततया तात्पर्याविषयत्वात् अत्र श्रुत्या स्मृत्याचाक्षरमिति परापरसाधारणं विहायगुरुतरपक्षग्रहणं प्रत्युदाहरणाविष्करणाय अक्षरमंबरान्त इति वक्ष्यमाणार्थाय च प्रत्युदाहरणाविष्करणायैव भूतयोनिरित्यपि नोक्तम् । अदृश्यत्वादिकन्तु सन्निहितदृष्टान्तमवष्टभ्य प्रधानमेवोन्नमयति, नपरम् । व्यवाहितसर्वज्ञत्वाद्यनवष्टंभात्, एतेन गुणकइति धर्मोक्तेरिति चोक्तेर्विरुद्धमिदान्निर्विशेषवादिनामित्येतत्परास्तं, प्रत्युदाहरतापि वाक्यशेषगतस्यापि परलिङ्गस्य तत्रैव गतिसंभवे सैवादर्त्तव्येति परादक्षरात्परस्समष्टिपुरुषो हिरण्यगर्भोजीव इति पूर्वपक्षप्रणयनमपि पराहतम् ।

॥ विशेषणभेदव्यपदेशाभ्यां चनेतरौ ॥

कुतोऽत्रनैकवद्भावोविवक्षितः । द्वित्वावद्योतनायेति गृहाण, अथापि कुतोनक्लीबान्ततेतिचेत् श्रवणमात्रेण पुंसः प्रथममुपस्थितयेस्यात् । किमर्थं, यथोपस्थित्युभाभ्यामुभयोर्व्यावर्तनं, नतूभाभ्यामप्युभयोरपीति द्योतनार्थं, अतएवानपेक्ष्य लाघवं हेतावपि समासकरणं, काावितरौ, स्मार्तश्चशारीरश्चेति यौ पूर्वमुपात्तौ । एवंतर्हि कथं सूत्रे चकारः, नायश्चकारस्साध्यसाधनसंकलनाय प्रयुक्तः, किन्तु धर्मोक्त्यानयोस्समुच्चयार्थं । तथाचनायं स्वतन्त्रो व्यतिरेकः, किन्त्वन्वयमुखएव, तथाचभाष्यम् । "इतश्चपरमेश्वरएव भूतयोनिः, नेतरौशारीरः प्रधानंचे" ति ।

अथकथमेवंसत्येतत् क्रमव्युत्क्रमेण पूर्वपक्षप्रणयनंभाष्यइतिचेन्न न्याय्यत्वात्प्रकंस्यमानावलंबनापेक्षयाप्रक्रान्तावलबनस्य तथाच, ननुमास्त्वन्तर्यामीस्मार्त्तंवाशारीरोवा अयन्तुभवतितद्वाऽयंवेतिप्रक्रान्तसङ्गत्यापूर्वपक्षप्रणयनेकानुपपत्तिरिति कथन्तर्ह्युपक्रमव्युत्क्रमेणोपसंहरणं सूत्रकारस्येतिचेन्न श्रुत्यनुसरणात् श्रुतिस्तुप्रथमंशारीराद्विशिंषन्त्यन्तेप्रधानात्भिनत्ति भूतयोनिमितिसएवानुसर्तव्योऽनुसृतः क्रमइति । ननु विशेषणेनप्रधानमपिकुतोनव्यावर्त्येत, नव्यावर्त्येत, कुतः, शास्त्रकारानिष्टेः । नेच्छतोहिशास्त्रकारौविशेषणेनप्रधानस्यापिव्यावृत्तिं सूत्रभाष्यकारौ श्रुतिमनुरुन्धानौ असंभवाच्च नहिविषणेनप्रधानस्यव्यावृत्तिस्संभवतिभिन्नजातीयस्य समानजातीयंहिव्यावर्त्तयेद्विशेषणं , नहिनीलमुत्पलमित्युक्तेघटाद्व्यावृत्तिमभिप्रैतिकश्चित , तथादिव्योह्यमूर्त्तः पुरुषइत्युक्तेऽपिनकोपिप्रधानाद्व्यावृत्तिमध्यवस्येदिति । अथ कुतः पूर्वाधिकरणएवैवं क्रमोनादृत इतिचेत् , आद्रियेत, यदित्वच्छन्दोनुसर्त्तव्यस्स्यात् , न्यायोह्यनुसरणीयः , प्रबलाप्रबलयोर्मध्येऽप्रबलः प्रथमं प्रबलः पश्चात्पक्षोऽवलंबनीयइति हिन्यायः तत्रस्मार्त्तमतद्धर्माभिलापापनोद्यतयालघीयः

अत्रतु कथंचिदेवभूतयोनित्वाच्छारीरस्ताहशइति। अन्यदपीदमवधेयं, पूर्वन्तूपास्यकुक्षिप्रवेशार्हमव्यसंभूतिपदाभिधेयं प्रधानमतद्धर्माभिलापान्नात्रतदुपास्यतयोक्तमित्युपपाद्य, शारीरस्तु वस्वादिभावेनोपास्योऽप्युपासकएवतत्वेन, स्वरूपतस्तु शुद्धत्वान्नोपास्यस्वतंत्रतः, इत्युपपादनायभेदेनाध्ययनमुपात्तमुपासनपरिरक्षणार्थं, अत्र तु ज्ञेयविषये प्रधानाद्विभेद्यज्जडाच्चैतन्यमिति भेदव्यपदेशउपात्तः। शारीरस्तु स्वरूपतो ज्ञेयएवेति तत्वंनैवव्यावर्तितो विशेषणेनैवेति। ननु, सत्यप्येवमक्षरमिति प्रकृतिमक्षरात्परतःपरः पुरुषइति समष्टिपुरुषं हिरण्यगर्भञ्चैकराशीकृत्य प्रत्यवस्थानमत्रेति, सूचयतीतराविति समासकरणेन। तेन प्रकृतिपुरुषौवा प्रकरणप्रतिपाद्यौ उत परोवा प्रकरणीति द्विकोटिकएवात्र विकल्पः, ननु, त्रिकोटिक इति वर्णयति श्रीभाष्यकारः केन हेतुनेति चेत् सएव प्रष्टव्यः। नहि तत्रोपपत्तिं पश्यामः। नहि सूत्रे प्रकृतित्वपुरुषत्वाभ्यान्तावुपात्तौ, श्रुतावप्यक्षरत्वेनैव प्रकृतिरुपात्तेति वक्तव्यं, तत्र कथं सांख्यपरिभाषावलंबनावकाशः, किञ्च शास्त्रदृष्ट्यातूपदेशः, सर्वत्र प्रसिद्धोपदेशादित्युक्त्यनन्तरमपि सब्रह्मविद्यां, सर्वविद्याप्रतिष्ठामित्यस्यादत्तावकाशं कथं प्रकरणमेवान्यपरमिति प्रत्यवस्थातुं शक्यं, ततो नोपपद्यत एवेयं प्रक्रियेति, अस्तु कथं प्रतिकृतिः, उभाभ्यामप्युभयोरपि व्यावर्त्तनमिति, मिथ्यैवैतत्, कथन्नाम यादृशविशेषणविशिष्टतयोच्यमानोऽपि हिरण्यगर्भइत्युपात्तस्सकथं विशेषणइति वचनमात्रेण निराक्रियेत, विजातीयावा प्रकृतिः, अक्षराद्भेदव्यपदेशेनवा ततोभिन्नो हिरण्यगर्भश्च, नन्वक्षरात्परो हिरण्यगर्भः ततःपरतयोच्यतेऽयं दिव्यः पुरुषइत्यर्थावलंबनेन सोऽपि निराकृतइत्याह इदमपि मिथ्यैव, कथं, कथमव्यक्तात्पुरुषः परः, पुरुषान्नपरं किञ्चिदित्यनया समानार्थिकामेनामेवं व्याकुर्यादसति प्रयोजनान्तरे व्यावर्त्तितव्यावर्त्तनायैवे-

ति, समासोऽपि लाघवायैकेनैव वाक्येनोभावपि व्यावर्त्तयति श्रुतिरिति सूचनायच तेन वाक्यान्तरोक्तविशेषणोपादनमपि परकीयं पराहतमिति ।

तदेवं-यंधीराः परमुन्नयन्ति कवयो येनैव विद्या परा
पश्यन्तः परितस्तएव मुनयो यद्भूतयोन्यक्षरम् ।
यच्चादृश्यमतीव सूक्ष्ममधियन्नित्यं परादक्षरात्
सोप्राणोह्यमनाश्चकास्तु हृदये जीवेशसाक्षी शिवः ॥

॥ इत्यदृश्यत्वाद्यधिकरणम् ॥

॥ वैश्वानरस्साधारणशब्दविशेषात् ॥

वृत्तंच - निगमयन्वार्त्तिष्यमाणश्चोपसूचयन्नारचयत्याधिकरणं "वैश्वानरस्साधारणशब्दविशेषादि"त्यादिना साधारणशब्दोहि विशेषितोऽस्मिन् पादे सर्वत्र यथात्र, अत्र स्मर्यमाणमनुमानं स्यात्, यदिस्यात्, यतोऽत्रापेक्ष्यते विवक्षितत्वसाधकतयाऽनुमानमस्पष्टत्वात् ब्रह्मलिंगस्य, कुतोऽस्पष्टता, शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च, यथाचार्भकौकस्त्वात्तद्व्यपदेशाच्च, ततो नब्रह्मेतिचेत् कुतोऽनपेक्षा, अथ स्मृतेश्चेति कुतोनोच्यते,नोच्यते वैश्वानरपदघटनेनानुच्यमानत्वात् अथ कथं स्तुत्यर्थं स्मर्यमाणमनुमानं स्यात् स्यादित्येवहेतोर्विशेष्यतएवायं वैश्वानरशब्दोब्रह्मणि लक्षणयायथाकाशादिशब्दः, आत्मशब्दश्च शक्तिनियन्त्रणयायथा॰मनोमयादिशब्दः, यतो मूलभूतां श्रुतिमनवलोक्य न शक्यते केवलया पुरुषबुध्याऽभ्यूहितुमीदृशंरूपं, ततो वैश्वानरः परएवपरसंबन्धितया स्मर्यमाणरूपवत्वादिति स्यादेवानुमानमिति विचारश्चोपसंहरतीतीति । तथाच भाष्यं "वैश्वानरः परमात्मैवेत्यर्थ इत्युपसंहारसंसूचकम् ॥

ततः पुनर्विचारमारभते । शब्दादिभ्य इति शाखान्तरादाहृतेभ्यो विचारितोऽयं प्रथमं शब्दान्तरलाक्षणिकीकरणेन विचा-

रितश्च पुनस्साधारणानां विशेषणेन, विचारयिष्यतेच परं साधारणीकृतानां स्वशब्दीकरणेन चेत्युपसूचयन्। किञ्च पुनर्विचारएवायं। यत्रैवद्दष्टश्च श्रुतश्चेति संपादनीयं ब्रह्मेति निर्धारितं कौक्षेयके वै वैश्वानरे तेनैव विशिष्टस्योपहितस्य वाऽऽत्मनो दृष्ट्युपदेशवाक्य विचारणात्। एवं पुनर्विचारोपक्रमाय प्रक्रांतविचारोपसंहारपरेऽपीति पदेयादि शीर्षमिदं पादोऽयमित्यविज्ञाय इति एवं प्रकारं स्मर्यमाणं। अन्यत्र श्रुत्यादिषु प्रसिद्धमिह प्रत्यभिज्ञायमानमनुमानंस्यादिति पादेन शीर्षं ग्रथयन्नपि श्रीभाष्यकार इति प्रथेतकिमतोऽप्यस्ति विचित्रम्। अनुस्मृतेरिति सूत्रकृतैव वक्ष्यमाणत्वान्नाप्रसिद्धमस्मिन्नर्थे पदमिदमिति निर्लज्जमनुरहितमप्यनुसहितेन समानयन्ति, स्यात्पदमपि व्यर्थयन्ति, नेमां श्रुतिमनुमापयेद्वैश्वानर पदघटितान्तदघटितास्स्मृतिः, किन्त्वग्निमूर्द्धे त्यादिकामेवानुमापयन्त्यनुमापयेत्तद्विधुरामित्यस्मानपिदूषयन्ति। तेनमूलमूलिभ्यां शब्दतोप्यन्यूनानधिकाभ्यामेव भवितव्यमितिनिर्बंधश्च कुर्वन्तिपरे॥

अस्त्वत्र कस्साधारणश्शब्दः, नन्वस्त्यत्रात्मेति जीवेशसाधारणः, वैश्वानरइति जाठरादित्रयसाधारणश्च, न, एकेनैवहिपरापरसाधारणेन भवितव्यं पक्षीकृतेनच तथाहि मनोमयः, अत्ता गुहां प्रविष्टौ, अन्तरः, अन्तर्यामीति परापरसाधारणःपक्षीकृतस्सर्वत्रेति चेत् न प्रकृतेऽपि प्रकारान्तरेण साधारणीकरणात्, आत्मशब्दसमानाधिकरणोह्यत्र वैश्वानरशब्दः, सयद्यात्मशब्दं गौणयति तदा जाठरादित्रयसाधारणः, यदीतरइतरं लाक्षणिकयति तदा जीवेशसाधारणइत्येवं साधारणशब्दविशेषोयं पूर्वेभ्योविलक्षणः, गौणयत्येवात्मशब्दं विशेष्यवाचीवैश्वानरशब्द इति जाठरादयोवा, लाक्षणिकत्वपक्षेऽपि जाठरसन्निकृष्टो जीवोवावैश्वानर इति पूर्वपक्षे, साधारणशब्दविशेषादित्याह। लाक्षणिकीकरणं शक्तिनियन्त्रणश्चात्रविशेषः। अत्र वैश्वानरशब्दएव जीवेतरचतुष्टयसाधारणः, आत्म-

ब्दइत्याह। तथाच प्रकृतस्य प्रथमराशिप्रवेशः, इतरस्यतु पृथगुत्कीर्त्तनमिति स्थितिः, तत्रचानुगमेन प्रकृताप्रकृतत्वोभयसंभवात्प्रथमराशिप्रवेशनं स्वशब्देनोपादानञ्चेत्युभयमप्युपपन्नं। द्वितीयराशिप्रवेशनाभावस्तु न दोषावहोऽग्निशब्दस्य, शब्दत्वेनैव ग्रहणात्, अशक्यत्वाच्च प्रकृतशब्दानुप्रयोगपृथगुपादानयोश्च प्रकृते। तथाच प्रकृताप्रकृतसामान्यकोडीकरणेन पुनर्विचारएव सूत्रकारीया परिपाटीति। अहो कोऽयं व्यामोहोऽत्र भवतामपि ब्रह्मसूत्रव्याख्यातॄणां, यतो बलं लिंगद्वयमुपात्तमादिपदेनत्युपेत्याऽपि शब्दो नोपात्तइति कथयन्तस्तदनुसारेण परिपाटीमपि काञ्चित्कल्पयथ। लिंगस्येव शब्दस्यापि गतिरनूह्य कल्पनीयाहि प्रबलोऽयमिति पूर्वपक्षिणमभ्यन्तरीकृतवता, किञ्च यौगिक्येवहि वृत्तिराश्रीयते भवद्भिरपि परस्मिन्वैश्वानरशब्दस्य कृशानौ रूढस्य, तत्रभवन्तस्स्वयमेव व्युत्पन्नाः पूर्वमेव, वयन्तु पश्चादेव व्युत्पादिताः पक्षेण यतो जैमिनिनैवाचार्येण व्युत्पादिताः, ननु बादरायणेन, यतस्तेन तथा दृष्टिरेवोपदिष्टाऽस्मभ्यं, सूत्रकृन्मतावलंबनेऽपि लक्षणैवाभ्युपेतव्या। तत्र कथं परसाधारणं स्याद्वैश्वानरपदं, नहि पङ्कजपदं भवति कुमुदसाधारणं गंगापदंवा तीरसाधारणमिति, वैश्वानरावच्छिन्नं परं ब्रूतेऽयमिति वयमवादिष्म, विश्वनराकारइति परमयं ब्रूतेऽतो न विरोधइत्याह जैमिनिरिदमाह साक्षादपीति, अहहास्ति परतररूढं शब्दद्वयं पूर्वपक्षिणः, आत्मशब्दोऽपि नपरस्मिन्नेव, अथापि परएवेति हठात्करोत्ययं बादरायणइति कदाचिन्मन्येरन्न्यायवादिनइत्याशंक्य वयन्तु वैश्वानरमप्यभ्यन्तरयामस्म, जैमिनिस्तु तदपि नसहते, किन्तु साक्षादेव मूल परं शब्दद्वयमपीति ब्रवीतीति स्वस्यापि कश्चिद्वैदिकसार्वभौमं सहायीकुर्वतीव वदति सूत्रकारे वैश्वानरशब्दः परसाधारणः तस्यास्ति विशेषणद्वयमात्मशब्दोऽग्निशब्दश्चेति, तत्रात्मशब्दस्तूष्णीमेवास्ते अग्निशब्दस्तु ढगिति तर्जयति, ततोऽतिभीतस्सूत्रकारः कथ-

श्चित्समाधायमुन्यन्तरमपि सहायीकरोति स्मेति वदतान्नकोप्यस्ति प्रतिवक्तेति। प्रदेशविशेषकल्पनायागतिमुपपादयति अभिव्यक्तेरित्यादिना प्रवर्त्तिष्यमाणमर्थमुपक्षेप्तुमाम्नायोदाहरणपूर्वकन्निर्विशेषं ब्रह्मण्युपसंहरति आमनन्तिचैनमस्मिन्निति, यमानन्त्यध्यात्ममविमुक्ते जीवस्य साक्षिणं सएव विश्वात्मनोपासकः, अधिभूतश्चाविमुक्ते वाराणस्यामीश्वरस्य साक्षिणं सएव वैश्वानरात्मनोपास्यइत्युभयोरप्येकस्मिन्साक्षिणि प्रविलापनन्तस्यैव निर्विशेषस्य प्रधानतोऽनन्तरं विचारइत्युपसूचनञ्चास्य सूत्रस्य कृत्यमिति विभावनीयं ।

तदेवं-साळग्रामइवादिपूरुषममुं कौक्षेयवैश्वानरे
ध्यायेदत्र निविष्टमेन मथवाऽक्ष्यादौ निविष्टं यथा ।
इत्यादेशमनुस्मरन्ननुदिनंध्यायामि वैयासिकं
साक्षादेनमथान्तरंगकुहरे वैश्वानरं वा हरिम् ॥
विश्वनरसाक्षिभूतं वैश्वानरसाक्षिणश्चापि ।
तत्तदविमुक्तईशं वाराणस्यां प्रतिष्ठितं वन्दे ॥

इति श्रीमहामहोपाध्यायचतुस्तन्त्रस्वतन्त्रहरिहरगुरुचरण नळिनसंसेविनो वेदान्तविभूषणस्य कृष्णशास्त्रिणः कृतौ ब्रह्मसूत्रानुगुण्य सिद्धौ प्रथमाध्यायस्य द्वितीयः पादस्समाप्तः ॥

प्रथमं भौतिकाब्रह्मणि लाक्षणिकीकृताः । ततोऽध्यात्मसाधारणाः प्रायेणविशेषिताः, अथ स्वशब्दान् संकलयामीत्यारभते।

॥ द्युभ्वाद्यायतनं स्वशब्दादिति ॥

उपक्रम्यशब्दादेवेति मध्येप्युपन्यस्य पत्यादिशब्देभ्य इत्युपसमाहरणात् । यस्मिन्नामनंति चैनमुपासनाकर्तृकर्मभेदभिन्नन्तदुभयानुस्यूतमेकमात्मशब्दालंबनन्तदस्य ब्रह्मविषयः। आदिदैविकीच विभूतिरत्र प्रदर्श्यते । साचप्रशासनात् । भूतेश्चमहिम्न इत्यादिना, अतएवात्र देवताधिकरण प्रसंगोदेवा इत्येवनसंति तत्र कुल आधि-

शब्दस्तु परसाधारणेन वैश्वानरशब्देन विशेषितो नस्वातन्त्र्येण कस्यापि प्रतिपादकः, नहि गोशब्दविशेषितश्चतुष्पाच्छब्दोऽश्वपरो भवितुमर्हतीति जीवंविसृज्याधिकरणमेवोन्मूलयन्तिपरे । यतस्तथासत्यात्मशब्दाविशेषितो वैश्वानरशब्दः परस्मिन्नेव विश्राम्यति । नहि गोशब्दविशेषितश्शृंगिशब्दो महिषादि परोभवितुमर्हतीति भवत्यपूर्वपक्षमधिकरणम् । नचात्रायं गौणइति वाच्यम् । इतरएवतथेति जीवपरोभयशिराएवसंशय इति कुतोनस्यात्, नचविशेष्यवाचिनो गौणत्वमन्याय्यमिति वाच्यम् । तर्हि तस्यशक्तिनियन्त्रणार्थदत्तस्यापि तत्वन्दूरनिरस्तम् । अन्यथा कुत्रापि विशेषणेन शक्तिनियंत्रणन्नस्यादित्यहो महदिदं पाण्डित्यं प्रदर्शितं विशेषणेन विशेषेसंपादनीये नेदं कुत्रापीति प्रसञ्जयता । किञ्च सत्यप्यात्मशब्दविधुरेऽग्निशब्दघटितेच शाखान्तरीयेवाक्ये किमर्थन्तद्विपरीतमिदमादायविचारः प्रवर्तित इति कुतः कथंचिदपि नालोचितं भवता । किमर्थमुच्यतां उच्यते श्रूयताम् । अत्रैवोक्तयुक्त्याभवति साधारण्यं शब्दस्य, नशाखान्तरइति, भवन्मतावलंबनेतु तत्रास्त्यग्निशब्दोऽत्रास्त्यात्मशब्दइत्युभयसाम्ये कथंतद्बलेन पुनर्विचारः । नहि पुनर्विचारे विप्रतिपद्यते भवानित्यनुचितएव जीवपरित्यागोऽत्रभवतः । अत्रैव प्रथममाक्षिपामि, यदिप्रतिक्षिप्यते शाखान्तरवाक्यावलंबेन पुनर्विचारमापादयिष्यामीति हि मन्यतेऽत्र पूर्वपक्षी । कियद्दूरंगत्वापि शतवारविचारेऽपि नत्वञ्जेष्यसिमां, त्वामेवाहञ्जेष्यामीती वहिर्वर्तयति स्यादेवेति परिसमाप्यपूर्वविचारं पुनर्विचारं शब्दादिभ्यइत्यादिना सिद्धान्ती । एवंच सति स्मृत्यवष्टंभेन प्रबलीकृते सिद्धान्ते श्रुत्यन्तरावष्टंभेन पुनर्विचारमारचयतीति सुश्लिष्टं भवति । अन्यथात्मशब्दबलात् सिद्धतितेऽग्निशब्दबलात्पुनराशंकेति वक्तव्यम् । तच्चनानुमन्यते सूत्रकारः । यतोलिंगादेवायंविशेषितइत्याहस्यादेवेदमनुमापकं विशेषकमिति, अतएवभवानपि तथैवाहद्युमूर्द्ध-

त्वादिनाविशेषादिति । किंचवैश्वानरोविशेषादिति वक्तव्ये साधारणशब्दविशेषोऽयं लक्षणयारूढ्याच पंचानां साधारण्यात्, अथापिविशेष्यतेऽयं लिंगेनेति हि सूचयति विस्पष्टं साधारणशब्दविशेषादिति तथैवचसमादधाति लक्षणयातथादृष्ट्युपदेशादिति । लक्षणाचात्मशब्दसंवलनादित्यवोचाम, अथात्र पुनः पर्यनुयुञ्जते । अस्तु कथं शब्दशब्देन वैश्वानरशब्दोऽपि शब्द्यत इति शब्द्यतां, यतोऽत्र शाखान्तरादुपात्तमग्निशब्दं शब्दशब्देन लिङ्गंचान्तःप्रतिष्ठानं स्वशब्देनच संकीर्तयन् शाखाद्वयगतं लिङ्गद्वयमादिपदेनोपादत्त इति प्रतीयते काचिदत्र सूत्रकारीयापरिपाटीति । अत्रोच्यते, नेयमत्रसूत्रकारीयापरिपाटी, यतस्तथासति शब्दान्तः प्रतिष्ठानादिभ्यइति सूत्रयेत्, किन्त्वेषा, यातूपबलेन बलस्य प्रबलीकृतिः, तथाहि अत्र वैश्वानरशब्दः, त्रेताग्निकल्पनं, प्राणाहुत्या धारत्वश्चेति पूर्वपक्षिणो बलं, अथापि विशेषितो ब्रह्मलिङ्गेन शब्दश्शब्दान्तरसहितेन, त्रेताग्निककल्वनमपि नातीव बाधकं, यतः कल्पनमेव, आहुत्याधारत्वमपि न विरुद्धं सर्वाधारस्येति । ततोऽयं शाखान्तरादानीयाग्निशब्दं विशेषयामास वैश्वानरशब्दं लिङ्गमप्युपोद्बलयामास लिगान्तरेणान्तःप्रतिष्ठानेन, अतएव तस्यादिपदोपात्ताल्लिङ्गद्वयात्पृथगनुप्रयोगस्स्वशब्देन, तेन चोपबलेन प्रबलीकृतं भवति प्रकृतं लिङ्गद्वयं यतःप्रतिष्ठानं प्रातिस्विकरूपेण वर्त्तनन्नपरस्य संभवति । अतएव किलाहसूत्रकारस्तथादृष्ट्युपदेशादिति तदनुगुणगतिकल्पनेन, असंभवादिति तु पुनर्विचारपूर्वकमेवदं गतिकल्पनन्नतन्मात्रामित्यस्योत्तंभनमित्यवधारयितव्यं एवंशब्देनापि शब्दः प्रबलीकर्त्तव्यइत्यकामेनाप्यङ्गीकर्तव्यं तत्र यस्य प्रबलीकरणन्तस्यैवानुपादाने कस्य केन प्रबलीकरणं स्यात्, तदर्थं शब्दत्वेनानुगमध्यशब्दद्वयमुदाजहार शब्दादिभ्यइत्येवमभिप्रैति भाष्यकारः, यतश्शब्दौ तावदग्निवैश्वानरशब्दाविति वक्तव्ये शब्दस्तावद्वैश्वानरशब्दो न परमेश्वरे संभवति । तथाग्निश-

ब्दइत्याह । तथाच प्रकृतस्य प्रथमराशिप्रवेशः, इतरस्यतु पृथगुत्कीर्तनमिति स्थितिः, तत्रचानुगमेन प्रकृताप्रकृतत्वोभयसंभवात्प्रथमराशिप्रवेशनं स्वशब्देनोपादानश्चेत्युभयमप्युपपन्नं । द्वितीयराशिप्रवेशनाभावस्तु न दोषावहोऽग्निशब्दस्य, शब्दत्वेनैव ग्रहणात्, अशक्यत्वाच्च प्रकृतशब्दानुप्रयोगपृथगुपादानयोश्च प्रकृते । तथाच प्रकृताप्रकृतसामान्यक्रोडीकरणेन पुनर्विचारएव सूत्रकारीया परिपाटीति । अहो कोऽयं व्यामोहोऽत्र भवतामपि ब्रह्मसूत्रव्याख्यातॄणां, यतो बलं लिंगद्वयमुपात्तमादिपदेनेत्युपेत्याऽपि शब्दो नोपात्तइति कथयन्तस्तदनुसारेण परिपाटीमपि काञ्चित्कल्पयथ । लिंगस्येव शब्दस्यापि गतिरनूह्य कल्पनीयाहि प्रबलोऽयमिति पूर्वपक्षिणमभ्यन्तरीकृतवता, किञ्च यौगिक्येवहि वृत्तिराश्रीयते भवद्भिरपि परस्मिन्वैश्वानरशब्दस्य कृशानौ रूढस्य, तत्रभवन्तस्स्वयमेव व्युत्पन्नाः पूर्वमेव, वयन्तु पश्चादेव व्युत्पादिताः पक्षेण यतो जैमिनिनैवाचार्येण व्युत्पादिताः, ननु बादरायणेन, यतस्तेन तथा दृष्टिरेवोपदिष्टाऽस्मभ्यं, सूत्रकारमतावलंबनेऽपि लक्षणैवाभ्युपेतव्या । तत्र कथं परसाधारणं स्याद्वैश्वानरपदं, नहि पङ्कजपदं भवति कुमुदसाधारणं गंगापदंवा तीरसाधारणमिति, वैश्वानरावच्छिन्नं परं ब्रूतेऽयमिति वयमवादिष्म, विश्वनराकारइति परमयं ब्रूतेऽतो न विरोधइत्याह जैमिनिरिदमाह साक्षादपीति, अहहास्ति परेतररूढं शब्दद्वयं पूर्वपक्षिणः, आत्मशब्दोऽपि अपरस्मिन्नेव, अथापि परएवेति हठात्करोत्ययं बादरायणइति कदाचिन्मन्येरन्न्यायवादिनइत्याशंक्य वयन्तु वैश्वानरमप्यभ्यन्तरयामस्म, जैमिनिस्तु तदपि नसहते, किन्तु साक्षादेव मूलं परं शब्दद्वयमपीति ब्रवीतीति स्वस्यापि कश्चिद्वैदिकसार्वभौमं सहायीकुर्वतीव वदति सूत्रकारे वैश्वानरशब्दः परसाधारणः तस्यास्ति विशेषणद्वयमात्मशब्दोऽग्निशब्दश्चेति, तत्रात्मशब्दस्तूष्णीमेवास्ते अग्निशब्दस्तु ढगिति तर्जयति, ततोऽतिभीतस्सूत्रकारः कथ-

श्चित्समाधायमुन्यन्तरमपि सहायीकरोति स्मेति वदतान्नकोप्यस्ति प्रतिवक्तेति। प्रदेशविशेषकल्पनायागतिमुपपादयति अभिव्यक्तेरित्यादिना प्रवर्त्तिष्यमाणमर्थमुपक्षेप्तुमाम्नायोदाहरणपूर्वकन्निर्विशेषे ब्रह्मण्युपसंहरति आमनन्तिचैनमस्मिन्निति, यमानन्त्यध्यात्ममविमुक्ते जीवस्य साक्षिणं सएव विश्वात्मनोपासकः, अधिभूतश्चाविमुक्ते वाराणस्यामीश्वरस्य साक्षिणं सएव वैश्वानरात्मनोपास्यइत्युभयोरप्येकस्मिन्साक्षिणि प्रविलापनन्तस्यैव निर्विशेषस्य प्रधानतोऽनन्तरं विचारइत्युपसूचनश्चास्य सूत्रस्य कृत्यमिति विभावनीयं ।

तदेवं–साळ्ग्रामइवादिपूरुषममुं कौक्षेयवैश्वानरे
ध्यायेदत्र निविष्टमेन मथवाऽक्ष्यादौ निविष्टं यथा ।
इत्यादेशमनुस्मरन्ननुदिनंध्यायामि वैयासिकं
साक्षादेनमथान्तरंगकुहरे वैश्वानरं वा हरिम् ॥
विश्वनरसाक्षिभूतं वैश्वानरसाक्षिणश्चापि ।
तत्तदविमुक्तईशं वाराणस्यां प्रतिष्ठितं वन्दे ॥

इति श्रीमहामहोपाध्यायचतुस्तन्त्रस्वतन्त्रहरिहरगुरुचरण नळिनसंसेविनो वेदान्तविभूषणस्य कृष्णशास्त्रिणः कृतौ ब्रह्मसूत्रानुगुण्य सिद्धौ प्रथमाध्यायस्य द्वितीयः पादस्समाप्तः ॥

प्रथमं भौतिकाब्रह्मणि लाक्षणिकीकृताः । ततोऽध्यात्मसाधारणाः प्रायेणविशेषिताः, अथ स्वशब्दान् संकलयामीत्यारभते।

॥ द्युभ्वाद्यायतनं स्वशब्दादिति ॥

उपक्रम्यशब्दादेवेति मध्येप्युपन्यस्य पत्यादिशब्देभ्य इत्युपसमाहरणात् । यस्मिन्नामनंति चैनमुपासनाकर्तृकर्मभेदभिन्नन्तदुभयानुस्यूतमेकमात्मशब्दालंबनन्तदस्य ब्रह्मविषयः। आदिदैविकीच विभूतिरत्र प्रदर्श्यते । साचप्रशासनात् । धृतेश्चमहिम्न इत्यादिना, अतएवात्र देवताधिकरण प्रसंगोदेवा इत्येवनसंति तत्र कुत आधि-

दैविकी विभूतिरिति मतिव्यपोहनाय, तत्र प्रथममात्मशब्दं स्वशब्दी-कर्तुमुक्तं स्वशब्दादिति । ननु नेदमनुगुणम् । यस्तु लोके वेदे उभयोर्वाऽस्यैवायं शब्द इति निश्चितस्सएवहितस्य स्वशब्दः, सएवच-हेतूकर्तव्यस्सिद्धं हि साध्यायोपदिश्यत इति, तत्र कथं हेतूकृतस्य तथाकरणन्नाम, कथञ्चवाजीवसाधारणस्यास्य हेतुत्वमिति चेत् । एवन्तर्ह्यमृतत्वहेतुप्रतिपादकजानातिकर्म समर्पकोयं भवति स्वस्यैवेति नकोऽपि दोषइति चेन्न । शब्दादित्येत्र वक्तव्यत्वात् । लिङ्गादित्येववा, नह्यत्रायमस्य स्वशब्दः, अन्यत्रसाधारण इत्यस्ति समंजसोव्यवहारः । पुनरुक्तेश्च, पुनरुक्तोहि भवति तदा मुक्तोपसृप्य व्यपदेशादिति हेतुरिति चेन्न । समानत्वात् समानोह्ययंतद्धर्मव्यपदेशात्ताल्लिङ्गात् साधारणशब्दविशेषादित्येतैस्स्वशब्दादित्यपि हेतुः । यथासिद्ध इति हेतूकृतोऽपि धर्मांतरसमभिव्याहारात्संकुचन्निश्चलीकृतस्सर्वपाप्मोद्गमादिर्भेदव्यपदेशाच्चान्यइति । लिङ्गश्चशब्दात्संकुचद्वधारण बलेन, साधारणशब्दविशेषकोऽपि स्मर्यमाणमनुमानं स्यादिति । एवं सिद्धएवश्रुत्या परस्यैवाऽयं शब्दइत्यात्मशब्दः परिकल्प्यात्माभासान् साधारणीकृतो लोकैरिति संकुचन् हेतूकृत्यैव निश्चलीक्रियते मुक्तोपसृप्यव्यपदेशादित्यादिना । तदिदं स्पष्टमुपपादयामः, अस्यतु विषयवाक्ये यस्मिन्द्यौः पृथिवीचान्तरिक्षमोतमिति वाय्वात्मकं सूत्रं, ओतंमनस्सहप्राणैश्च सर्वैरिति प्राणभृत्, तमेवैकं जानथ आत्मानमिति परमात्मा । अमृतस्यैष सेतुरिति, प्रधानञ्चेति एवंतचत्वारः पदार्थाः, वस्तुतस्तु, ओतान्तेन त्रिलोकायतनंतदर्थः, ओतादिनात्वमर्थः । तृतीयेतु पादे एवकारेण विशेषणव्यपोहैकमित्यस्यर्थः, आत्मानमिति यस्यस्वशब्दं कर्तुमभिप्रेत्यात्म शब्दं सब्रह्माभिन्नोऽस्माकं प्रत्यगात्मा । जानथेति तमेवैकञ्जानथ । तेनेममेकञ्जानथेति ब्रह्मसाक्षात्कारः, ततश्चान्यावाचो विमुञ्चथेति तदुपायस्सन्यासः, अमृतस्यैषसेतुरिति तत्फलञ्च मोक्षउपदिश्यंते

तत्वमसिव्याख्यानभूतया विधिच्छायापन्नया यदमुत्रतदन्विहेति श्रुतिमनुसरन्त्याब्रह्मणः पारोक्ष्यमुन्मूलयन्त्यानिर्विशेषप्रकरणमिति दत्तहस्तयेव वेदाचार्येण बादरायणेनात्रावतरन्त्याऽनया श्रुत्या ।

अथ सूत्राक्षराणि विमृशामः । द्युभ्वाद्यायतनं ब्रह्म स्वशब्दादित्युक्ते व्यभिचरतिह्यात्मशब्दः प्राणभृति तत्साधारण्ये, नचसमभिव्याहारबलादव्यभिचारः, तथासति साधारणशब्दविशेषादित्येव वक्तव्यत्वात् । अतस्वशब्दादिति ब्रुवन्नपरेतरसाधारण्यं सहतेऽस्य सूत्रकारः, तथाचभाष्यम् । " आत्मशब्दश्च परमात्मपरिग्रहे सम्यगवकल्पते नार्थांतरपरिग्रह इति यथानुमानाद्यर्थांतरन्नात्मशब्दार्थ एवं प्राणभृदपि, तत्वेनानात्मत्वात्, तस्मात्तस्मिन्निवास्मिन्नपि नसम्यवकल्पते, कथञ्चिदवकल्पनंतु व्यतिरेके वारयामइत्यर्थकम् । अस्त्वेतत्पूर्वमिमं साधारणशब्दइत्युपवर्ण्य कथमिदानीं स्वशब्द इति वर्णयसीति चेत् तदानीमासमुपासक इदानीन्त्वस्मिनिर्धूतनिखिलद्वैतमतिरिति गृहाण, अपिच पूर्वाधिकरणेन कोऽपि पञ्चकसाधारणः, अथापि मिश्रीभूयशब्दद्वयमभूत् साधारणमिति विशेषितमित्यवादिष्म । तदस्योपक्षेपकमभूत्, यदसाधारणोऽपि ब्रह्मण आत्मशब्दोऽभूदात्माभासकल्पनया, सोऽस्यासाधारणीकरिष्यत इति । अथ द्युभ्वाद्याधारइत्यनिर्दिश्यायतनमिति निर्देशेकोहेतुः, अथ कोविशेष इति निर्देशे कानुपपत्तिरिति चेन्न । यतोस्ति विशेषः आयतनमिति वेश्मन्येवरूढं, आधारइति विधारकसामान्ये प्रयुज्यते यथापटलाधारस्तंभ इति । नतु पटलायतनं स्तंभइति स्वरसतइति । अस्तु ह्याधारइत्येवकुतो ननिर्दिष्टमिति चेत् अत्राह श्रीसुदर्शनाचार्यः दिवोध्वर्ब्रह्माण्डकपालन्तस्य भुवाधःकपालन्तस्यच ग्रहणमिति ग्राहयितुमिति । इदञ्च जगदोतत्वेन निर्दिष्टमिति भाष्येणैवोपदिष्टं, एवंतर्हि शिरसिजटान्धत्ते, कटौपीतमंबरमिति जटाद्याधारतयानिर्दिश्यमानं ब्रह्मजटादिना रूषितं प्रतीयते । मैवन्ध्यादिनारूषितमिति प्रतीयेत

नहि गृहं गृहिणारूषितमितिमतिर्भवति, यथा सुधादिना, यतोगृहं गृहिणन्धत्त इत्यप्रत्ययः तथाचारूषितविचारोऽयं, नतु पूर्वइव रूषितविचारइति गृह्येतेति स्यात् ।

सत्यमिदमेवास्य प्रथमं प्रयोजनमित्याहाचार्यवाचस्पतिः यदाहात्र ब्रह्मज्ञेयत्वेनोपक्षिप्यतइति, यदीदं प्रथमन्तर्ह्यन्यत्किं, यदि स्याद्वक्तव्यं, स्यादेवच सूत्रत्वात्, तर्हि सदायतनाइत्यनेनैकार्थ्यमुपक्षिपतीति स्यात्, सत्यमिदमेव स्यात्, अस्यापि तर्हि प्रयोजनं वक्तव्यं, अस्यतु यथा सर्वप्रजायतनं सदितिस्वशब्दे न गृहीतं एवन्द्युभ्वाद्यायतनमप्यात्मानमिति स्वशब्देनैव गृहीतं सत्पदमिवात्मपदमपि स्वपदं ब्रह्मणइति निर्धारणं प्रयोजनं, नहि तत्र विकित्सा, यतोऽसंभवस्तु सतइति वदिष्यतीति, अथ यदीदं किञ्चिदनुरणितन्तदप्युपादनीयं, सूत्रत्वादेवेतिचेत् इदमत्रानुरणितमित्याह भाष्यकारः, यत्किल अत्र नशब्दतएवायतनायतनवद्भावो विवक्षितः, किन्त्वर्थवशतोऽपि, तथाच ब्रह्मैवेदममृतं पुरस्तादित्याद्यपि भवति संगृहीतं एवञ्च यन्नपुंसकान्तं ब्रह्मेति स्वपदं, येन शास्त्रारंभं प्रतिजज्ञे, सोऽपि स्वशब्दादिति गृहीतः । तेनच यत्रयत्र श्रूयते प्रपञ्चायतनन्तत्र तत्र ब्रह्म स्वशब्देन कीर्त्यतइति व्याप्तिबलादत्र जगदायतनं कीर्त्यन्नात्मशब्दस्स्वशब्दएव ब्रह्मणइति निर्धार्यतइति, तथाह्यत्र भाष्यं स्वशब्देनैवचेह पुरस्ताद्ब्रह्म संकीर्त्यते ब्रह्मैवेदममृतं पुरस्तादिति ।

तत्रचायतनायतनवद्भावश्रवणादितिच । तत्रचेति सत्पदेनेदं समुच्चीयते, एवकारेणव्यापकत्वमुच्यते वह्निमानेवेतिवत्, तत्रचेत्यनेन व्याप्यप्रदर्शनं । धूमदर्शनादिवत् । श्रुतौ, ब्रह्मैवेदं विश्वमित्यनेन विश्वस्यब्रह्मव्यतिरेकेणाभाव उच्यते, रज्जुरेवायं सर्पइतिवत्, तथाचसर्पस्यायतनं यथारज्जुर्नियतावासः, यथाश्येनस्य कुलायः, एवं विश्वस्य ब्रह्मायतनमिति लभ्यते, नह्यायतनमायतनवतारूष्यते, व्यतिरेकेणाप्रतीतेः, व्यतिरेकेण प्रतीयमानोहि रूषयति स्वाश्रयं यथा

जटापीतांबरादिकं आयतनन्तु तद्वन्तं स्वात्मन्यन्तर्भावयति यथा कुलायश्श्येनं, अतो नतेनतद्दूषितं भवति, नहिकुलायश्श्येनेन रूष्यते स्वान्तर्भूतेनेति भाष्याशयः। सर्वश्चेदमुपपादयंश्चाहास्मदाचार्यवाचस्पतिः। अत्र च स्वशब्दादिति तंत्रोच्चरितमात्मशब्दादितिच, सदायतनाइति सच्छब्दादितिच ब्रह्मशब्दादितिच सूचयति, सर्वेह्येतेऽस्यस्वशब्दाइति। अथकथञ्चात्याद्यर्थान्तरसाधारणस्स्वशब्दस्स्याद्ब्रह्मशब्दो ब्रह्मणइतिचेत्। प्राज्ञोऽसि, परस्यापिहि स्वशब्दस्सन् ब्रह्मणोऽपि भवति स्वशब्दो ब्रह्मशब्दोहरिशब्दवदिति। एवंस्थिते अमृतस्यैषसेतुरिति परस्य ब्रह्मणोऽसाधारणश्शब्दः- आत्मशब्दश्चाप्नोतीति परस्मिन्मुख्यवृत्तः, सर्वज्ञइति वक्ष्यमाणश्च 'तदेतस्मात् स्वशब्दादिति व्याख्यानं सम्यग्विमृशन्तु विमर्शकाः तत्र प्रथमन्तावत् सामान्यात्त्विति गौणयिष्यति ब्रह्मणि सेतुशब्दं, संयदितस्य स्त्रशब्दस्स्यादग्निशब्दोऽपि माणवकस्य कुतस्तथा न स्यात् आत्मशब्दोऽपि जीवेश्वरसाधारणः कथमाप्तिबलात् ब्रह्मणि मुख्य वृत्तस्स्यात् अदनबलाज्जीवएव कुतस्तथा न स्यात् सर्वज्ञशब्दोप्यतच्छब्दग्राह्योऽत्र नग्राह्यइतिस्वशब्दएवात्रदुर्लभः परेषामिति। नन्वत्र कथं प्रधानपक्षस्संगच्छते कुतः पारवत्त्वसामान्यादत्र सेतुशब्देनप्रधानमादायधारणेन समाधाने सामान्यात्त्वित्यत्र कृतकरतापत्तेरितिचे न्न हृदयाग्रहणात्, नकथञ्चिदपि गृहीतं हृदयं सूत्रकारादीनां भवता तथाहि पारवाह्नि लोके सेतुः प्रख्यातः, न बन्धनहेतुमात्रं हडिनिगडादिष्वपि प्रयोगप्रसंगात् पारवत्वंच प्रधानस्य भवति न ब्रह्मणइत्येतदनूद्यसमादधाति नानुमानमतच्छब्दादिति न विधरणादिति कुतः स्वशब्दप्रस्तावे ब्रह्मणिगौणशब्दव्यवस्थापनस्यानवसरात्, प्रतिज्ञाभङ्गप्रसंगाच्च, अतो नानुमानमिति निराकरणमेव चिकीर्षितं सूत्रकारस्य एवन्निराकृते सेतुशब्दन्नप्रधानमित्युक्तं भवताधस्तात्, ततो ब्रह्मेति भवति ततः परमतोभवतीत्युत्तरत्राक्षेप

"सामान्या" त्विति वदिष्यतीति सुश्लिष्टं तत्रकुतः कृतकरतानामः भाष्यभामत्योस्तूत्सूत्रमेव समाहितं वक्ष्यमाणमेवार्थमाहृत्य सुखावबोधार्थमस्माकं व्यामोहार्थश्च युष्माकं । कथमन्यथा प्रधानं परित्यजेयुर्भवन्तः, अहहानुक्तमपि सूत्रेण कथञ्चिल्लब्धावकाशमाभिप्रायिकतयानुषज्जनीयमिति स्थिते, उक्तमपि स्फुटं परित्यजथेति विचित्र मेतत्, किञ्चादृश्यत्वाधिकरणे स्मृत्युक्तादृश्यत्वादिद्योतनार्थं स्मार्त्तमिति, अत्र स्वशब्दविचारे नास्ति वेदे स्वशब्दः प्रधानस्य, यतोनुमानमिति द्योतनायानुमानमितिच ग्रथितमपि न प्रधानन्निराकार्यमिति ब्रुवन्तः किं किंनब्रूयुर्भवन्तस्तदपि निराकार्यमित्यक्षराधिकरणे वदन्तः,ततस्सिद्धेन साध्यस्य व्यपदेशइति व्यपदेशमात्रमेव भवतां.अतश्छब्दात्, तच्छब्दाभावादित्ययमेवार्थः, अर्थाभावेऽव्ययीभावः अतोऽन्यथातुदुर्घटात्रव्युत्पत्तिः । तच्छब्दभिन्नशब्दादिति व्युत्पत्तेस्संभवेऽपि स्वशब्दादित्यनेन पुनरुक्ततेत्युक्तिस्तु सूत्रकाराशयाज्ञाननिबन्धना कुतः यतः प्राणभृन्निराकरणार्थमेवेदमिति प्राणभृच्चेत्यन्तं पठित्वा सूत्रमव्ययीभावएव केवलमभ्युपगम्यते सत्यात्मशब्देऽशब्दादित्येतावदेव वक्तव्यमेत्रमभिप्रायइत्येतदप्यजानद्भिर्भवद्भिः, तथाच तत्पुरुषोप्यवश्याभ्युपेयो भवति । तत्र कश्चिच्छब्दोऽपि ग्राह्यो भवति एवञ्च यदि सर्वज्ञशब्दोऽपि स्वशब्दशब्देन गृहीतस्तदाऽनेन कोवा गृहीतस्स्यादिति, किञ्चातद्धर्माभिलापादित्यत्र तद्धर्मान्यधर्मस्येवात्रापि तच्छब्दान्यशब्दस्य ग्रहणमावश्यकमिति वज्रलेपायितं । अथ कथमस्यापि तेन ग्रहणसंभवे त्यज्यतामयमितिचेन्नयतो नवयमिममत्याजाम अपितुसूत्रकारएव, यतोऽतच्छब्दादित्याह, कोऽभिप्रायइति चेत्, एवंह्यभिप्रैति सूत्रकारः, यत्किल, नायं ब्रह्मणस्स्वशब्दः, किन्त्वब्रह्मेतरशब्दः, यतोऽयं गुणप्रधानः, नतु स्वरूपप्रधानः, असंभवाच्चाब्रह्मण्यस्य गुणस्य स्वशब्दसदृशोयज्ञातो ब्रह्मणः, नहि व्याकरणज्ञो दैवज्ञइत्यादिशब्दा

भवन्ति स्वरूपप्रधानाः, भवन्तिच शंभुरीशइत्यादयस्स्वशब्दाः, अक्षरशब्दस्तु क्षरणाभावेन सदातनेन भवति स्वरूपप्रधानइति साधारणीकृतो भवत्यसाधारणीकर्त्तव्यं ईशानशब्दवदिति, निखण्डादरेतु स्यात् बुद्धोऽपि सर्वज्ञः,स्वशब्दसदृशत्वाद्वा निखण्डुरुपपद्येत, एवञ्चाव्ययीभावेन प्रधानन्तत्पुरुषेण तच्च प्राणभृच्चेत्युभयन्निराचकारेति सुश्लिष्टं, संभवत्यव्ययीभावेनापि प्राणभृन्निराकरणे तस्य स्वरूपतस्तेन तन्नसंभवतीति त्यक्तमिति ध्येयं । तथाचात्र भाष्यं यथा ब्रह्मणः प्रतिपादको वैशेषिको हेतुरुक्तोनैवमर्थान्तरस्य वैशेषिको हेतुः प्रतिपादकोऽस्तीत्यव्ययीभावाभिप्रायेण सर्वज्ञत्वाद्यसंभवेसत्यस्मादेवातश्छब्दात्प्राणभृदपि नद्युभ्वाद्यायतनत्वेनाश्रयितव्यइति तत्पुरुषाभिप्रायेणच । तदेवं

द्युभ्वाद्यायतनन्नवायुरिह यत्सूत्रंतु धत्तेऽखिल
न्नो सांख्यानुमितश्च शब्दितमतश्छब्दान्नच प्राणभृत् ।
किन्त्वात्मैव सएकएव विदितो मुक्तोपसृप्यः परो
जानामीतरवाक्विमोकसहितस्सर्वज्ञमेकं शिवम् ॥

इति द्युभ्वाद्यधिकरणम् ॥

यद्ब्रह्माण्डमण्डलायमानसर्वकार्यविधारकमधिभूतं वाय्वाख्यं सूत्रन्तदुपलक्षितस्य प्रत्यक्त्वेन ज्ञेयस्य ब्रह्मणो विचारोत्यवर्त्तत । अथ तस्यैव प्रत्यगात्मन्युपसंहरणेन प्राप्ताल्पत्वशङ्कानिर्हरणायाऽध्यात्ममेव सौषुप्तस्थानतया भूयसोऽपि भूयस्तयाप्रतिपादितं करणसामान्यविधारकं यत्प्राणाख्यं सूत्रन्तदुपलक्षिततया भूयस्त्वमुपपाद्यं एवं सदायतनशब्देन सत्त्वमिवात्मशब्दबलेन स्वयं प्रकाशचिद्रूपत्वमिवच सुखरूपत्वमप्युपादनीयं, भूयस्त्वमपि प्रत्यक्त्वापारित्यागेनैव संपादनीयं, अन्यथा प्रयत्नसंपादितस्यापरोक्ष्यस्य हान्यापत्तेरित्यादिकमभिप्रेत्याह —

भूमासंप्रसादादध्युपदेशादिति ॥

अस्य यत्र नारदेनापि देवर्षिणा सर्वस्मादप्ययमेव भूयानिति विश्रान्तं ततएव तत्र विश्रान्तंच ततोऽपि भूयांसं सुखरूपतयेतर दर्शननिषेधमुखेन प्रतिपादयन्ती भीतेव यदेवेहतदमुत्रेति श्रुतितो भूयःपरंपरासु प्रत्यक्षमस्पृशन्ती भगवती भूमविद्याविषयः, इयन्तु एषतुवाअतिवदति,यस्सत्येनातिवदति,योऽन्येनातिवदतिनतु सोऽतिवदतीति वदन्ती भूमेति सत्यस्य स्वशब्दइति मुक्तकण्ठमेवाह तथाहि अतिवादश्च भूयसो वादः, तत्र सत्यवादातिरिक्तवादस्यानतिवादत्वे नान्यत्र भूमशब्दइतिसिध्यति भूमत्वेऽतिवादत्वसंभवात्तद्वादस्येति।

अथात्र सूत्रं विमृशामः भूमाप्राणादध्युपदेशादिति वक्तव्यं, यद्यपि वक्तव्यं अथापि किमर्थमेवमुक्तं यथाश्रुतिहृदयं स्वस्थानविशिष्टवेषेणायमुपादेयइत्येवमर्थं किमस्य स्थानं सुषुप्तं अथ नजागरमस्य स्थानं तत्तु ममताहन्तानुस्यूतानां सर्वेषामपि स्थानं, नास्त्यैव स्वप्नस्थानन्तु तदपि सवासनान्तः करणसाधारण्यान्नास्यैव, सुषुप्तन्त्वनितरसाधारणमस्यैव स्थानं नतु प्राणोवावेत्येवह्याह श्रुतिः सत्यमेवमेवाह, अथापिस्वस्थानस्थमेवामुमभिप्रयन्त्याहयतआशायाभूयानित्याह, आशानाशेऽप्यवस्थानेहि ततो भूयान् स्यात्, ततःपूर्वमेववा सममेववा मर्त्यत्वेऽल्पत्वात्कथन्ततो भूयान् स्यात्, तन्नाशेऽप्यवस्थानश्चास्यसुषुप्तावेवेति, वक्ष्यमाणलक्षणसंभवाच्च,वक्ष्यमाणन्त्वितरदर्शनशून्यत्वं सुखात्मत्वश्चेति लक्षणमस्मिन्नेव स्थानेऽस्य संभवतीति भूमलक्षणस्य प्राणेऽपि संभवोपसूचनेन पूर्वपक्षोपक्षेपायच संप्रसादादित्युक्तिः, सिद्धान्तेऽपि यादृशेनभेददर्शनाभावाधीनेन सुखेन प्राणस्य भूयस्त्वमुक्तं किंतु वक्तव्यन्तस्यैव सुखस्य भूयस्त्वं, सुखत्वञ्चप्रियतमस्यैव, सचात्मैव, सच भूयसां भूयानित्याह श्रुतिः, तथाच निर्विशेषसुखात्मकभूमतासिद्धिरात्मनः प्रयोजनमिति परिच्छेदनिवृत्तिरस्मिन्नेव स्थाने संभवतीति, अत्र जीवोवा परोवेति वि-

शयः, प्राणोवावेति श्रुत्या जीवएवोच्यते प्राणसहचारी, जडेप्राणोऽपीतेत्याद्युक्तेरसंभवात्, पितृहा मातृहेति हिंसाऽपि चेतनएव प्रसक्ता, ततस्सम्प्रसादादिति सूत्रेजीवएवोपात्तस्सएषसम्प्रसादइति श्रुत्युक्त इति परे, अत्रगतप्राणन्दहन्तमपि स्तुवन्ति, स्थितप्राणन्तुभृशमिववदन्तमपिनिन्दति, प्राणिहिंसेत्येववदन्ति, नतु जीवहिंसेति भूमाजीवादधीति कुतोनसूत्रितश्चेति नविश्वसिमोवयममुमर्थं भूमात्वेवेति भूमाब्रह्म नामादिपरम्परया आत्मनऊर्ध्वमस्योपदेशादिति वृत्तिस्तुकेनापि बोधायननाम्नाप्राकृतेनैवलिखिता तेषामेव बहुमता। अस्तुनामाद्याशान्तं भूयोभूयइत्युक्तवत्याश्रुत्याप्राणपरित्यागे भवतां कोहेतुः, जीवपरित्यागे भवतां कः। उच्यते पूर्वन्द्युभ्वाद्यायतनस्य प्राणभृत्त्वापोहेनात्मत्वं व्यवस्थापितम्। इदानीन्तस्यैवापोढप्राणोपाधिकस्य तरतिशोकमात्मविदित्युपक्षिप्तस्य भूमत्वसाधने, नामाद्याशान्तात् भूयसःप्राणादधिभूमोपदेशएवभूमत्वंस्यादिति श्रुतिसूत्रयोरात्माग्रहणमिति। नचैतन्नविघ्नः। अधिकन्तुभेदनिर्देशादिति जीवादधिकमेववदिष्यति सोऽध्यक्षइत्युतुक्तेऽपि प्रदेशआवापयिष्यति, अत्रापि सम्प्रसादादितिवदन् प्राणशब्देन प्राणभृदपि विवक्षितश्श्रुताविति सूचयतीत्येतदेवविघ्नइति वाच्यम्। स्थानभेदात्, तथाहि। जीवाएवसन्ति। नाधिकमितिवदन्तं व्युत्पादयितुमधिकमिति सर्वसाधारणेप्रळयेक्रमविशेषप्रदर्शनाय सोऽध्यक्षइत्युपदेशेऽपीहात्मतत्त्वोपदेशेऽव्यक्तप्राणान्तोपाधिभ्योवहिर्भूतं ब्रह्मैवात्मेत्युपदेशेकोविरोधइति। तदेवम्।

प्राणादव्यक्तादधिभूमाब्रह्मेति बोधितन्तत्वम्।
धामास्म्यहमिहपरमन्नामाद्याशान्तवार्जितं विष्णोः॥

इति भूमाधिकरणम्॥

आत्मैवब्रह्मेति पारोक्ष्यमुत्सारितं प्रथमम्। ततो भूमैवात्मेतीतरदर्शनमात्रनिषेधेन परिच्छेदोनिराकृतः। इदानीं नामरूपसामा

न्यान्यभावस्यैव व्यावर्तनेनाखण्डमक्षराख्यमद्वैतं स्वरूपमवबोधयितु माह–

॥ अक्षरमम्बरान्तधृतेरिति ॥

किन्नामेदमक्षरं स्यात्, वर्णस्स्यात्, कुतः । स्वशब्दात्, स्वशब्दबलेनहिप्रवृत्तोऽद्यभवान्स्वार्थसमर्थने, तत्रकुतइति कथमुच्यते भवता, अथपरायया तदक्षर मधिगम्यतइति श्रुतंब्रह्मकुतोनस्यात्, नस्यात् । अतच्छब्दात्, नहितस्यायंशब्दः, वर्णस्यैवायंशब्दः प्रसिद्धोलोकेवेदेच, यथाब्रह्मादिशब्दाब्रह्मणि । ब्राह्मणाभिवदनलिङ्गाच्च । वर्णमेवहिप्रणवमभिवदन्ति ब्राह्मणास्सदावीतरागायतयो ब्रह्मचारिणोगृहस्थाश्च स्वाध्यायजपादिषु, एवंतर्हि अथपरायया तदक्षरमित्यत्रापि वर्णएवस्यादितिचेत् । स्यान्नामकानोहानिः, तत्राद्दश्यत्वादिगुणकइत्युक्तमिति हितूष्णीमासमिति अथचाकाशादेवसमुत्पद्यंत इत्यादावपि भूतमेवस्यात् । नस्यात् । स्पष्टेन लिंगेनापोदितत्वादिति ।

नन्वत्रप्रथममेव ब्रह्मवाप्रधानंवेति विशयानानां भास्करलक्ष्मणार्यप्रभृतीनां कथमुपपत्तिः । अनुपपत्तिरेवाद्दश्यत्वाधिकरणेनैव चरितार्थत्वात् । एवं प्राप्ते । आहांबरान्तधृतेः पृथिव्याद्याकाशान्तस्यधृतेर्नप्रणवः, किंतु ब्रह्मैवेति । अथाकाशेतिविहायांबरेति ग्रहणे किंकारणं । प्रासायस्यात् । कथमेवंस्यात् । श्रुत्यानुपूर्वीं विहायप्रासमात्रायैव पदविनिमयोब्रह्मसूत्र इति । अन्तेत्यश्रुतस्यापिग्रहणेकारणंवक्तव्यम् । नन्वत्राहश्रीमान्, श्रुतिप्रसिद्धापेक्षया प्रमाणान्तरप्रसिद्धंप्रधानमेव प्रथममस्मद् बुद्धिमधिरोहति, अम्बरान्तधृतेस्तन्निरसनेसतियदिदंसाङ्ख्यैः प्रधानमुच्यते तदस्माकं भूतसूक्ष्मत्रयम् । तत्तु जीवोधत्तइति ततोजीवोऽधिरोहतीति ॥

अहह विचित्रंहीदं वर्तते । एकैकप्रमाणसिद्धमप्येतेषां बुद्धिमधिरोहति, प्रणवः परंलोकवेदोभयप्रसिद्धोपि नाधिरोहतीति, अथ

कथञ्जीवावरोहः, प्रशासनात् । नहि प्रकृष्टंशासनञ्जीवस्यास्तीति । एवंतर्हि सुग्रीवजीवोनाधिरूढस्स्यात्, अस्माकन्तु दक्षदधीच्यगस्त्य विश्वामित्रादयोमुनयोबुद्धिमधिरूढास्ततोनावरोहन्तीतोपि प्रकृष्टस्य शासनस्य श्रवणेऽपि । अस्तु प्रकृतस्य प्रश्नस्य किमुत्तरम्? इदमुत्तरमुच्यते तैः । ब्रह्मैवाक्षरन्नप्रधानम् । कुतः अंबरान्तधृतेः । अंबरस्याकाशस्यांतः पारभूतं यदव्याकृतन्तस्यधृतेः, नहि स्वस्यस्वेन धारणंसंभवतीति । अयमाशयः, नहि श्रुतावाकाशपदेन वायुमदंबरं गृहीतं, किन्तु तदन्तोऽव्याकृताकाशएवेति सूचयति तैः प्रधानवाचकतयानभ्युपगतांबरपदविनिमयेनांतपदावापेनचेति । साधुश्रोतुं रमणीयमेतत्प्रणवस्य प्रथमंबुद्धावनारोहे प्रधानस्यैवारोहे, कथमन्यथा तस्य निराकरणमिति, अतएवात्र भास्करादिभिरेतैः कलहायमानाप्रत्याहैतान् भामती, कुतोऽयं क्रमोभवतामक्रमिणां, अक्षरं प्रशासनादित्येतावदेव वक्तव्यम् । अस्माकन्तु स्वशब्देन प्रणवे प्रथमं बुद्धिमधिरूढेऽबंरांतधृत्यावरोपिते प्रशासनेन पश्चात् प्रधानस्य परावर्तनमिति युज्यते क्रमइति । अस्तु किमुत्तरमुच्यतां प्रकृतस्य प्रश्नस्येति चेत् । इदमुत्तरमुच्यते, श्रुतावाकाशपदेनाव्याकृताकाशकथनेऽपि नवयन्तेन तत् गृह्णीमः, यतस्स्वशब्दबलेन स्वार्थसमर्थनेप्रवृत्तास्मः, तेनैवकृतकारिणोऽपि संवृत्तास्मः, तत्र कथं स्वव्यवस्थां स्वयमेवोल्लंघयामः । नोल्लंघयामः, अतोवायुमदंबरमेवगृह्णीमः, नच प्रणवस्यतद्यथाशंकुनेति शब्दसामान्यात्मत्वकथनेन शब्दतन्मात्राया अंबरकारणीभूतायास्तद्विधारकत्वसंभवेन कथमक्षरंपर इति वाच्यम् तदन्तधृतेरेवविवक्षितत्वादित्यत्रैवस्थित्वास्पष्टमाचष्टे स्वशब्दविचारोयं प्रवर्तत इति भगवान् सूत्रकारः, ततश्च प्रधाने व्यभिचारशङ्कायामाहस्म, साचप्रशासनादितीति । अयञ्च व्याप्त्याऽविकारित्वेनच स्वशब्दीकृतोक्षरशब्दोव्यवहारतोवर्णे रूढः । यथाऽऽत्माभाससाधारण आत्मशब्दः परामार्थतः, नचायमतस्स्वशब्दएवस्यात् सर्वज्ञशब्द-

ब्रह्मतुस्वशब्दइति वाच्यम् । स्वस्वरूपत्वात्, स्वरूपमेवहि व्याप्ति राद्वितीयस्य ब्रह्मणः, अतएवभूमेत्येव श्रुतिसूत्रे, नतु भूयानिति, रूढत्वाच्चान्यत्र नैवं सर्वज्ञशब्दोभवितुमर्हति सर्वाकारमायावृत्ति विशेषवचनः, यदिच तदवच्छिन्नचैतन्यवचन इतीष्यते तदाऽतच्छब्द- एवसन् स्वशब्दोऽपि भवति, नहि योगेनरूढ्यावान्यसाधारणोय सर्वज्ञशब्दइति । ननु सिद्धान्तेऽप्यक्षरं प्रशासनादित्युक्त्या प्रणव- निरासेनैव प्रधाननिरासस्यापि संभवेन क्रमस्यकोपयोग इति चेत्, नामरूपे व्याकरोदित्यनेनप्राप्तयोर्नामरूपभावयोः क्रमेणप्रणवप्रधान भावव्यावृत्तिमुपलक्षणीकृत्य व्यावृत्तेर्विवक्षितत्वेन तत्रोपयोगइति गृहाण, अतएवान्यभावव्यावृत्तेश्चेत्युपसंहारसूत्रम् । नत्वन्यव्यावृत्ते- रितीति । तथाच प्रथमाधिकरणेनात्मत्वसाधकेनापरोक्षीकृतस्य भूमा धिकरणेन जीवभावन्निरस्यानेननामरूपभावोव्यावर्तित इत्येतत् सहृदयाहृदि कलयन्त्विति । तदेवं–

परः प्रकृतिलीनस्य प्रणवस्य परेश्वरः ।
प्रशासितास्यसर्वस्य शिवएवास्मि केवलः ॥

इत्यक्षराधिकरणम् ॥

यदिदमधिकरणत्रय निर्धारितमखण्डमात्मतत्वन्निर्विकल्पकैक वेद्यन्तदिदन्द्रागिव ये साक्षात्कर्तुमशक्तास्तेषां सविकल्पकादपि त- द्विषयादुपासनाद्भवति तदध्यक्षं नच कथमेवं स्यादिति शंक्यं, य- तस्सएवात्रध्येयतयोपदिश्यमानः पश्चादीक्षतिकर्मतयाव्यपदिश्यतइति प्रत्यभिजानन्निवाहाचार्यः—

॥ ईक्षतिकर्मव्यपदेशात्सइति ॥

तदत्र नसंदेहः कर्तव्यः, परंहि ब्रह्मशब्दाद्युपलक्षणानर्हं सर्वधर्मवि- शेषवर्जितमतो नशक्यमतीन्द्रियगोचरत्वात् केवलेन मनसावगाहि-

तुं, ओंकारेतु विष्ण्वादिप्रतिमास्थानीये भक्त्यावेशितब्रह्मभावे ध्यायिनान्तत्प्रसीदतीत्यत्रगम्यते, शास्त्रप्रामाण्यादिति विस्पष्टमेवेदं व्याचकार प्रश्नोपनिषदि भाष्यकारः। यदप्येकएव परःपुरुषइति स्थिते सदापुरुषोऽहं पुरुषोऽहमित्यत्यन्तमेवान्याय्यमभिमन्यतेऽयं लोकस्तदपि द्रागेवापाकर्तव्यमिति तदपोद्धीमेवावतारयामासात्र श्रुतिं। अस्तु कः पुरुषः, योयोरेतस्सिक्स सर्वःपुरुषः, एवन्तह्यूर्ध्वरेतसां पुंस्त्वन्नस्यात् , ननुतद्योग्यताहिपुरुषपदप्रवृत्तौ निमित्तमुच्यते मया, तत्रकुतोऽयंदोषइतिचेन्न, वृक्षादिषु पुन्तालःस्त्रीतालइत्यादि व्यवहारस्येदानीमप्यनुपपत्तेः, शब्दतोऽलाभाच्चेत्याहश्रुतिःपुरिशयंपुरुषमिति, ननुभवति जीवस्यापिपुरिशरीरेशयनमितिचेन्न, तर्हिकुतस्त्रियोवयंपुरुषाइति नाभिमन्यन्ते भवन्तः परंपुरुषोहं पुरुषोहमिति सदाहठादभिमन्यन्ते, असाध्वीयमात्मानं पुरुषसदृशमभिमन्यत इति परिवदन्तिचयांकाश्चित्तथाभिमन्यमानामपीति। नन्वस्तु लौकिकोऽयं व्यवहारोयादृशस्तादृशोवा, पुरिशयनात्तुभवति जीवोऽपि पुरुषइतिचेन्न, शयनन्तुकटादावात्मानं पातयित्वानिर्व्यापारं वर्त्तनं, यतस्तादृशमेवावलोक्य शेतेऽयंकटइतिव्यवहरातिलोकः, तत्रशरीरेस्थित्वा सदासंकल्पादिव्यापारं कुर्वन्नयञ्जीवः कथं पुरिशयस्स्यात्, ननु सुषुप्तावास्तेनिर्व्यापारोयञ्जीवइतिस्यात् पुरिशय इतिचेन्न, अतिवृत्तत्वात्, अतिवृत्तोयञ्जीवस्त्वात्तदाब्रह्मीभूतइति, तत्र कुतः पुरुषभेदः।

अतएवाव्यक्तात् पुरुषः परः, पुरुषान्नपरं किञ्चित् साकाष्ठेतिश्रुतिः, तत्रयदि पुरुषभेदस्स्यात्तदाकथं पुरुषसामान्यमेव परत्वकाष्ठांब्रूयात्, यदि ब्रूयात्तदासांख्यएवहि विजयीस्यादिति। अथात्रकथं साध्यसाधनयोर्ध्याने क्षणयोस्समानविषयत्व नियममुल्लंघ्य ध्यायति कर्मणिसंशयोवाविपर्ययोवेति चेत्। अस्त्युत्सर्गतोऽयन्नियमः, अथापि वचनबलादपरमुपासीनोपितल्लोकं प्राप्यपरं

पश्यतीत्यभिमन्यतेऽयं पूर्वपक्षी , सिद्धान्ती तु नायन्नियमः कदापि भज्येत । अतः परमुपासीनएव वचनबलादपरब्रह्मलोकं प्राप्य-ध्यातमेवपरन्तत्रपश्यति , नचतथापि परध्यानादपरेक्षणमभ्युपेयतो भवति नियमभंगइति वाच्यं , अपरस्येक्षणाविषयत्वादेवमया तथाऽनभ्युपगमात् , भूतार्थविषयत्वात् प्रमाणस्य , नचापरमपिब्रह्मभूतार्थः, मायाह्येषा मयासृष्टायन्मांपश्यसिनारद , सर्वभूतगुणैर्युक्तन्नैवंमांज्ञातुमर्हसीति , परमपुरुषेणैव, तस्यमायिकत्वोक्तेः तस्मादपरस्मायतस्तत् साम्यापत्तिरेव , नतुतत्त्वापत्तिः । इतरत्रतुविपरीतं , अतएवोभयत्रापि भगवतीश्रुतिः , तं यथायथोपासते तथातथेतः प्रेत्यभवति , तद्योयोदेवानां प्रत्यबुध्यतसएवतदभवदितिच , नचेदानीमपिध्यानस्येक्षणैकविषयत्वन्नष्टमिति वाच्यम् । नहि वयंध्येयत्वमीक्षणविषयत्वव्याप्यंब्रूमः । अतथाभूतस्यापि ध्येयत्वात् , तथाभूतस्यैवेक्षति कर्मत्वात् , नापिविपरीतमपि, विनापिध्यानं , प्रमाणेनैवेक्षति दर्शनात्, किंतु साध्यसाधनयोर्ध्यानेक्षणयोस्समानविषयत्वं ब्रूमः । तत्रनापरध्यानमीक्षणहेतुः । परेक्षणहेतुत्वेनियमभंगात् , अपरस्येक्षणानर्हत्वात् , तस्मादीक्षतिकर्मत्वेन व्यपदिष्टोयः परः पुरुषस्सएवध्यायति कर्मेत्यभिप्रेमः , अथपरश्चापरश्च ब्रह्मयदोंकारइत्युपन्यस्यपरं पुरुषमभिध्यायीतेति ध्यानविधानेकुतस्संशयः कुतोवाविपर्ययइतिचेत् , नस्यात् , यद्येकतरमन्वेतीत्यरान्नेनस्यात् , स्यादपियदिपरं ब्रह्माभिध्यायीतेतिवास्यात्, इदमत्रसूत्रकारीयं हृदयम् । अत्रपरापरब्रह्मणी उभेअप्योंकारः तस्माद्विद्वानेतेनैवैकतरमन्वेतीत्युपन्यस्यैकमेवोपासनं विधायोभयमपि फलंव्यवदिष्टं, उपासनान्तरविधानन्त्वार्थिकमुभयोरपि नेष्टमावयोः , प्रतीकोपासनत्वात्, प्रतीकोपासनस्योपास्य प्रापकत्वमाहत्यवादेनैवह्युपेत्यम् । तत्र तेनैवैकतरोपासनस्यैव फलद्वयमभ्युपेयतां, किमश्रुतकल्पनयेति । तत्रस्वं ब्रह्मेत्यपोह्य पुरुषमित्यात्रापिनापरस्यापि पुरुषान्त-

रापेक्षया परत्वसंभवेन परंब्रह्मपरात् परंब्रह्मेतिव्यपदेशाभावेऽपि परंपुरुषंपरात् परंपुरुषमिति व्यपदेशसद्भावेन चापरमेवध्येयमभिपेषि । श्रुतेस्तु हृदयन्नविजानासि । एवं ह्यस्याहृदयं , कथन्नुजीवः पुरुषस्स्यात् , पुरिशयोहिपुरुषस्स्यात् कुतोनुजीवः पुरिशयस्स्यात् , पुराद्भिन्नोहिपुरिशयस्स्यात् , नहिपुरेणघनस्ततोभिन्नस्तश्च योवास्याज्जीवोजीवानांघनोवा , परोऽपिवाऽयंकथंस्यात् , सर्वस्मादपि परोहिपरस्स्यात् , पुरुषएवहिसस्यात् , यतस्ततोनकिञ्चित् परंस्यादिति, अस्तुतर्ह्यपरंब्रह्मेति वदपरःपुरुषइतिचेत् , एतदेववरं । यथाऽपरंब्रह्मनब्रह्म , बृहद्धिब्रह्म तत्रकथमपरमितिब्रह्मेतिचस्यात् , किंतु ब्रह्माभासएवस्यात् , तद्वत्कथमपरःपुरुषस्स्यात् , परोहिपुरुषस्स्यात् , पुरुषएवहिपरश्चस्यात् , अतएवाहसाकाष्ठेति पराश्रुतिः । किंतुपुरुषाभासएवस्यात् , एतदर्थमेवपुरुषमित्यावापः, तस्मात्तन्मनोरथमात्रमेवापरोऽपिपरः पुरुषइति, एवञ्चात्राधिकरणचतुष्टयेऽ"प्याभासएवचे" तिवक्ष्यमाणाभासवादोऽवलंबितः । प्रतिबिंबपक्षावलंबे नतुवदिष्यत्युत्तराच्चेदाविर्भूतस्वरूपस्त्विति ।

भाष्यकारस्तु , दोषापनयएवायंवादः नतूपदेशे । तत्रतुप्रतिबिंबपक्षएवज्यायान् , यतस्तदानीमेव निश्शंकमीक्ष्यंतब्रह्म , अतएवदोषनिरासावसरएवाभासएवचैषजीवः नसएवसाक्षात् नापिवस्त्वन्तरमित्यस्यावलंबः । उपदेशेतु ब्रह्मतत्वनिर्धारणप्रक्रियायांयत एवचायमात्माचैतन्यरूपोनिर्विशेषः परप्रतिषेधोपदेश्योऽत एवचास्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामाभिप्रेत्य जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेष्वितिवक्ष्य 'त्यतएवचोपमासूर्यकादिवदिति प्रतिबिंबपक्षावलंबन , बिंबात् प्रतिबिंबस्यभेदेहिप्रथमःपक्षः । अभेदेतुद्वितीयः , तत्रैवं सत्यत्रमोक्षसाधनध्यानविधाने प्रतिबिंबएवावलंबनीयो नत्वाभासोवादिनिरासायात्रसमाश्रितोऽपि, एवञ्चात्र-

परंपुरुषमिहध्यायीतेति हिरण्यगर्भएवाश्रयितव्यस्स्वरूपतः पुरुषो जीवान्तरापेक्षया परश्चजीवघनः । इष्यतएवार्थिकंपरोपासनविधानमपिसस्सामभिरुन्नीयमानोब्रह्मलोकेपरात्परंपुरुषमीक्षतेतन्ध्यायमानइति, इहैवध्यायन्निहैवेक्षतइतिच, नब्रह्मगत्याप्रतीकोपासन विशेषस्योपास्य प्रापकत्वमुपेतमिति यथा क्रतुन्यायोऽपिभंजनीयः । नचोभयात्मकोंकारोपासनत्वेन कुतोस्यन्यायस्यभंगइति वाच्यम् । अपरोपासनेऽप्यस्यसमानत्वात्, अस्तिचात्रतत्वमसीत्याद्युपदेशे शक्तिसंकोचात्मिकयाजहदजहल्लक्षणयालाघवं इतर त्रतुजहल्लक्षणैवोपेयाभवति, साचान्याय्येत्यतत् सर्वप्रश्नोपनिषत् भाष्येस्थित्वाभ्युपैति । आहुश्चाभासवादेगृहीतानुसन्धानपरेऽहं ब्रह्मास्मीत्यादौ प्रतीचः परिच्छेददोषपरिहाराय बाधायां सामानाधिकरण्यावलम्बेन जहल्लक्षणां "साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तदाहं शब्दोहंकारवाची भवति तु जहती लक्षणा तत्र पक्ष" इति । तत्वमसीत्युपदेशवाक्ये तु, तच्छब्दवाच्यगतमद्वयभागमेकं प्रत्यक्त्वमात्रमविरोधमपेक्षमाणः । त्वं शब्दवाच्यशबलस्थमुपाददानो वाक्यादखण्डमथ तत्वमसीति विद्यादि" ति ब्रह्मणः प्रतीच्युपसंहारेणापरोक्ष्यसंपत्त्येऽभेदे सामानाधिकरण्यावलंबेन भागत्यागलक्षणाश्च संक्षेपशारीरकाचार्या इति, एवंस्थिते यदत्र ध्यानेक्षणयोस्समानविषयत्वे स्थिते जीवएव घनोव्यष्टि जीवः, ततःपिण्डात् परात्परं पुरुषं हिरण्यगर्भमीक्षत इति पूर्वपक्षे जीवानां घनाज्जीवसमष्टिभूताद्धिरण्यगर्भात् परं पुरुषमित्येव श्रुत्यर्थः, तथाचेक्षति कर्म, सः परः, कुतः, तस्य यत्तच्छान्तमजरममृतमभयं परञ्चेति परत्वेन व्यपदेशादिति श्रीरामानुजीयं विवरणन्तदिदं विमृशन्तु विमर्शकाः, एवंसति भूमासंप्रसादादध्युपदेशात्, अक्षरमम्बरान्तधृतेः, दहरउत्तरेभ्यइत्यादाविवक्षतिकर्मव्यपदेशादित्येतावतैव कुतो न पर्याप्तं स्यादिति किमधिकेन, देवानां पूरयोध्या तत्र शेषे शेते परमः पुरुष इति तन्मते सति शयानत्वक्लिप्ते

कथं पूर्वपक्षस्यावकाशः । तदप्यन्यथानीतत्वतः कथं तदुक्तेन व्यपदेशेन समाधानमित्यादिकमिति

तदेवं — प्रणवं हीश्वरं विद्यादिति श्रुतिसमीरितं ।

ध्यायतः कर्म कुर्वीय परात्परतरं शिवम् ॥

ध्यायतेस्तदर्थे लक्षणा

इतीक्षतिकर्माधिकरणम् ॥

प्रथमन्तत्वमसीतिवत्तदात्मेत्युपदिश्यात्मशब्दस्स्वशब्दीकृतः। ततः प्राप्तपरिच्छेदायाहं ब्रह्मास्मीतिवदात्माभूमेति भूमशब्दः, ततः परमखण्डवाक्यार्थीभूतमक्षरं ब्रह्मेत्यक्षरशब्दः तावतैव पश्येयुः परं पुरुषं वाक्यार्थनिर्धारणेन प्रथमे प्रतिपत्तारः, मध्यमैस्तु तदेवेक्षति कर्म ध्येयं प्रणवेऽध्यक्षमनुभवितव्यश्चेदित्यनेन परः पुरुषइतिशब्दः, अयञ्च संघातः परस्परसान्निध्येन परस्मिन्ब्रह्मणि पर्यवसन्नः । परन्तु सगुणोपासनेषु प्रशस्यतमन्दहरोपासनमत्र ग्रथनीयम्मन्दप्रतिपत्त्रर्थं । ईक्षणासिद्धश्चापि स्वरूपाविर्भावोऽत्र प्रसंगात्प्रदर्शनीयः । तेनच तत्र प्रयुक्तोत्तमपुरुषशब्दस्सर्वजन्तुसामान्येन सुषुप्तप्राप्ये प्रयुक्तो ब्रह्मलोकशब्दो दहराकाशशब्दश्चेत्येतेऽपि संघाता ब्रह्मणस्स्वशब्दयितव्याइत्याशयेन दहराधिकरणमारचयति "दहरउत्तरेभ्य" इति। दहरवाक्यगतस्योत्तमपुरुषशब्दस्य जीवपरत्वभ्रान्त्यापरः पुरुषइति शब्दोऽपि तत्परएवेति प्रत्यवस्थानाच्च संगतिः ।

गतिशब्दाभ्यान्तथाहि दृष्टं लिंगं च ॥

किमत्र दृष्टं, गमनं, कुत्र श्रुत्यन्तरे लोकेच, किञ्च लिङ्गं, तदेव दृष्टं गमनं लिङ्गञ्च भवति कुत्र,ब्रह्मलोकशब्दस्य कर्मधारयइत्यत्रभाष्यं । गतिश्च शब्दश्चोभयमपि दृष्टं श्रुत्यन्तरे, उभयमपि लिङ्गञ्च भवति दहरस्य ब्रह्मत्वइति भाष्यान्तरं, प्रथममत्र चकारो नोपपद्यते लिङ्गंच भवति पुनः किञ्च भवतीत्यत्र समुच्चयाभावात्, नच

दृष्टत्वं समुच्चीयते, अत्रैव दर्शने किन्दर्शनान्तरसमुच्चयेन, नच समाससन्देहनिवृत्तिर्दर्शनान्तरादिति दृष्टमित्यस्यार्थइति वाच्यं । भवदुदाहृतस्थलेषु सर्वत्र ब्रह्मलोकइत्येव दर्शनात्, तस्यैव दर्शनान्तरेण समासनिर्णयेऽत्रैव ब्रह्मगतिरिति निर्णयान्नगतेरपि दर्शनान्तरमन्वेषणीयं । पञ्चम्यैव लिंगत्वप्रतिपादनाल्लिङ्गमित्येतदेव व्यर्थमिति, यदत्र निषादाधिकरणन्यायेन कर्मधारयसमर्थनन्तदप्यत्रात्यन्तमसन्नसं । उभयथा सन्देहे हितन्यायः, यथा निषादानां वास्थपतिर्निषादएव वायं स्थपतिरित्यत्र, नतथाऽत्र ब्रह्मालोको विष्णुर्लोकइत्यस्ति मनागपि प्रत्ययः, किन्तु तयोर्लोकइत्येव, अतइदानींमेव ब्रह्म गमनेन लिङ्गेन स्वशब्दयति ब्रह्मलोकशब्दं कर्मधारयसमाससाधनेनेत्यकामेनाप्यंगीकार्यमिति, उपाधिपरिच्छिन्नस्य जीवस्य नोत्तरे हेतवस्संभवन्ति उत्तराच्चेदाविर्भूतस्वरूपो ब्रह्मैव सइति नव्यभिचारइत्युत्तरसूत्रद्वयार्थः। प्रजापतिवाक्ये विद्ययाऽविर्भूतमपहतपाप्मत्वादिकंजीवस्य श्रूयते इहतु स्वाविकं, तच्च परस्यैवेति नव्यभिचारइति परकीयं भाष्यं, तदिदं सूत्रे स्वरूपाविर्भावएवोक्तः, स्वाभाविकत्वास्वाभाविकत्वकथैव नास्ति, जीवस्यापि स्वभाविकमेव तिरोहितमित्यभ्युपगतंचेति त्याज्यमेव अयञ्चात्रावश्यविमृश्यो विषयः, यत्किल दहरविद्यायान्दहरत्वमेवाधारदहरत्वकथनपुरस्सरमुपपादितंजीवातुः पूर्ववादिनइति सूचितन्दहरइति, तच्च प्रबलं साधनमिति वहुभिः प्रतिक्षिप्तमुत्तरेभ्यइति, ततस्तदुपबलमितरपरामर्शोऽप्यसंभवेन निराकृतः, ततःप्रजापतिवचनं शरणीकृत्य मृतस्येवामृतसेकात्पुनस्समुत्थानं पूर्वपक्षस्येत्यत्र नविवादः । तस्य च समाधानमाविर्भूतस्वरूपस्त्विति, तत्रानेन किञ्जीवे हेतुसंभवमभ्युपगम्य समादधे, उतासंभवमेव दृढीचकारेति । तत्र द्वितीयमेव पक्षमलम्बन्ते, श्रीभाष्यकाराः । वयन्तु, एवञ्चेदुत्तराच्चेत्तथापीतिवा न आविर्भूतस्वरूपत्वादितिवा क्रुध्यन्निव वदेत् । नैवंम्मृदुभाषीसान्निति म-

न्यामहे । किञ्च धृतेश्च महिम्नइत्यादिकमाविर्भूतस्वरूपेऽपि नास्ति तन्मतइत्युत्तराच्चेदित्युत्तरा शंकैव निरवकाशा, नचाद्वैती पूर्वपक्षीति वाच्यं, तथासति भेदव्यपदेशाच्चेत्येवहि वक्तव्यं, अप्रयोजनत्वाच्च, नह्यद्वैतिनो जीवस्योपास्यत्वसाधनेनास्ति किञ्चिदपि प्रयोजनञ्जीवस्यैवाभावमिच्छतो ब्रह्मव्यतिरेकेण, तस्मान्निर्विशेषप्रकरणे केवलसविशेषनिरूपणे संकुचन्निव जीवब्रह्मैक्यमुपचिक्षेप व्यभिचारवारणव्याजेनेतिच मन्यामहे, अभ्युपगम्यवादएवोपरितनं सूत्रद्वयमपि संगतं स्यात्, नत्वसंभवद्दढीकरणानन्तरमपीतिच ।

तदेवं-हृत्पुण्डरीकगृहमध्यगतं विपाप्मं
यद्दहमेव गगनन्निलयं समेषाम् ।
तच्छङ्कराभिधमुमासचिवं त्रिणेत्रं
सञ्चिन्तयामि परमादिनटं जटालम् ॥

इति दहराधिकरणम् ॥

अथ यदयं ब्रह्मादिस्तंबान्तो जीववर्गः अव्यक्ताद्यण्वन्तो जडवर्गश्च, सर्वोऽयं सालभञ्जिकेव पुरुषं ब्रह्मानुकरोति, नहितृणमपि तेन विना चलति, यथा रज्जुचलनएव चलति सर्पः, इत्येतदवश्यं वेदान्तसिद्धान्तिना वक्तव्यं, एवं यथा स्वपिति नामा जीवस्तथाभाति नामब्रह्म, जीवएवहि स्वपिति नजडमीशश्च, तथा ब्रह्मैव भाति नजडञ्जीवश्च तदाभासइत्येतदपि व्यवस्थापनीयं, तेनच दहराकाशं ब्रह्मचिदाकाशइति सिध्यत्यभीष्टमित्यभिप्रयन्नाह-

अनुकृतेस्तस्यचेति ।

तथाचेदं पूर्वशेषइति वदन्तमाचार्यमपिसन्तंनवयंबहुमन्यामहे। एवं ह्यत्राचार्यान्तरभाष्यं तस्य दहरस्य अनुकृतेः अनुकारात् साम्यापत्तेः अपहतपाप्मत्वादिर्मुक्तः नस्वतःअतोनदहरो जीवःमम सा-

धर्म्यमागता इति स्मर्यतेचेदमिति, तथाच सर्वं समाप्य विचारमाविर्भूतइत्युक्तं विवृणोति सूत्रद्वयेनेति फलितं दृश्यतेऽहिंसाम्यार्थेऽनुकूलः प्रयोगः ।

चन्द्रानुकारि वदनञ्जलजानुकारि नेत्रंच नीलजलदं किल केशपाशः।
बिंबंतथाधरपुटोऽनुकरोतियस्यास्तांसर्वलोकजननींप्रणमामिवाणीं॥

इति । अत्रानुकृतेश्चेत्येतावतैव कृतार्थतया तस्येत्यधिकं, अनुकरणसाध्यासाम्यापत्तिः, ननु सैवेति, अदृश्यत्वद्युभ्वाधिकरणाभ्यां प्रकरणस्य परविषयत्वस्य साधितत्वादधिकरणस्यानुत्थितिरित्येतन्मन्दं, त्रयाणामेवचेत्युपनिषद एव त्रितयान्यपरत्वनिषेधस्य करिष्यमाणतयागुहां प्रविष्टाविति बुद्धिपरत्वनिषेधस्य व्यर्थत्वापत्तेः, प्रकरणापेक्षया वाक्यस्य बलीयस्त्वेन पूर्वपक्षसमर्थनन्तूभयोरपि तुल्यं, अनुकृतिरनुकरणमेव नत्वनुभानमिति यत्तदपि मन्दं, अनुवदनेनुकरणशब्दवदनुभानेऽपि तत्प्रयोगोपपत्तेः, नचचवैय्यर्थ्यं, तस्य भासेति वाक्यार्थस्य तद्भानप्रयुक्तभानवत्वरूपहेत्वन्तरस्य समुच्चयार्थत्वात्, नचानुभानतोऽनन्यत्वादर्थान्तरालाभः, लोचनभानप्रयुक्तभानाभाववत्यादित्यादौ तद्भानानुभानदर्शनात्, नचातीन्द्रियस्य लोचनस्य कुतो भानमिति वाच्यं, तस्य तेन भानाभावेऽपि स्वतो भानात्, यथा घटादीनां प्रदीपेन भानेऽपि प्रदीपस्स्वतो भाति तद्वत्, नहि चक्षुष्मान्मम चक्षुरस्तिवा नवेति संदिग्धे, नन्वादित्यादयो विनापि चक्षुर्भानं भान्त्येव, नह्यन्धेन तेन दृष्टाइति नभान्ति, तत्र कथन्तेषाञ्चक्षुर्भानानुभानमितिचेन्न, तं प्रत्यभानात्, नह्यन्धं प्रतिभान्तिमात्रयापि ते, यं प्रतिभान्ति तच्चक्षुर्भानमन्वेवभान्ति, नन्वादित्यादिभानमन्वपि चक्षुर्भाति, अन्यथान्धकारेऽपि रूपग्रहणापत्तेः, वदतिच चक्षुष्मानन्धकारे मम चक्षुर्न प्रकाशतइति, न, तमसोदर्शनाद्विशेषं प्रत्युपपत्तेः, नह्यन्धकारे चक्षुर्नप्रकाशते तमसोदर्शनात्, अप्रकाशवचनन्तु रूपं प्रति नप्रकाशतइत्यर्थकं, एतदेवोक्तं ननु स्वप्रतिभाने सूर्यादयश्चाक्षु-

षन्तेजअपेक्षन्ते, नह्यन्धेनतेदृश्यन्तइति भामत्या, ननु नायमर्थस्संगच्छते । यत"स्तेजो धातूनां सूर्यादीनान्नतेजोधातुमन्यं प्रत्यपेक्षास्ति, यं भान्तमनुभायु रिति" भाष्यं, "नहि लोचनभानमनुभान्ति सूर्यादय" इति भामतीच विरुध्येते इतिचेन्न, हृदयाग्रहणात् । इदंहि हृदयं भाष्यभामत्योः, प्रकृतमन्त्रप्रतिपाद्यं ब्रह्म, स्वभानानुभानभान्वादिकत्वादित्यत्राब्रह्मणि चक्षुषि तादृशे व्यभिचारइति प्राप्ते, नहि वयं भानान्तरसापेक्षं कञ्चित्प्रतिस्वस्य भानं भान्वादीनां हेतुं ब्रूमः । तत्र भवतु भान्वादिभानन्नियमेन चक्षुर्भानसापेक्षं, चक्षुषोवा तमसस्साक्षिभास्यत्वपक्षे नियमेन भान्वादिभानेनाप्यायनमुलूकादन्यत्र, किंतु भानान्तराभिन्नभानकत्वं, तत्रच नतेजोधातूनां सूर्यादीनां स्वसमानतेजोधातुमन्यं प्रत्यपेक्षास्ति, यं भान्तमनुभायुः, नहि लोचनभानमनुभान्ति सूर्यादयः, तद्भानभिन्नस्वभानकत्वात्, इदमेवाह श्रुतिस्तृतीयश्चरणन्तुरीयेन चरणेन विवृण्वन्तीति सूचयति तस्येति सूत्रकारइति, तथाच तस्य भासेति तृतीयाऽभेदइति पर्यवस्यति, अत्र भाधातुना तेजोज्ञानञ्चेति द्वितयं विवक्षितं, तत्र सर्वमिदमित्यनेन प्रकृतभान्वादिमात्रग्रहणे प्राज्ञः प्रपञ्चमात्रस्य ग्रहणे शुद्धं ब्रह्म मन्त्रार्थः, एवञ्च सविशेषनिर्विशेषयोर्भिश्रीकरणेन विचारोयमिति संवृत्तं तेन भारूपस्सविशेषश्चिद्रूपं ब्रह्म, नभान्वादिः, नचाक्षुषादिकं ज्ञानंचेति फलितमिति भाष्याशयइत्यवधारयितव्यमिति तदेवं—

यत्तेजोंशइमे पतंगशशभृत्ताराग्नयो भौतिका
येनेध्वश्च तपस्युताम्बरमणिः प्राज्ञं भजामः परं ।
यद्भानानुभवत्स्वभानकमिदं सर्वञ्जगत्सन्ततं
भासा यस्य विभाति विश्वमनिदं ब्रह्मास्मि तत्केवलम् ॥

इत्यनुकृत्यधिकरणम् ॥

स्वशब्दादित्यारब्धं शब्दादेवेति निगमयितव्यं प्रासंगिकविचारप्रवर्त्तनायेत्यभिप्रेत्याह—

"शब्दादेवप्रमित इति ।"

शब्दादेव प्रमितः प्रमितः परइति द्युभ्वाद्यायतनंचेत्यहो सूत्रस्य गांभीर्यं, स्पष्टमधिकरणं। अनेन नाहं पाञ्चरात्रइति सुष्ठु सूचयति सूत्रकारः, तत्र वृथैव हठात्करोति श्रीरामानुजः । अत्रेशानशब्दादेवहि प्रमितस्य परत्वं प्रसाधितं। सच रुद्रएव रूढइत्यत्र नास्ति विवादोऽस्येति स्फुटीभविष्यति लिङ्गभूयस्त्वाधिकरणे, रुद्रस्य तु परत्वन्नास्येष्टं, विष्णोरेवेष्टत्वात् जीवएव रुद्रइत्येवेष्टः। द्वावीश्वरावितिच नघटते। तथाच हरिहरयोरैक्यमुपयन् कथं पाञ्चरात्रस्स्यात् बादरायणः, कुतोवाऽद्वैतीसन् पृथग्वैदिको नस्यात्। अथ भ्रान्तोयं लोकः परवाचिनमीशानशब्दन्देवतान्तरसाधरणीचकार, तमिमं परमपुरुषपरतया व्याचकारानेन सूत्रकारः अतएव यद्भूतं यच्च भव्यं, उतामृतत्वस्येशानइति पुरुषसूक्तश्रुतिः, कथमिदन्देवतान्तरमीशानस्स्यात् भूतेशः खण्डपरशुरिति परिपठ्यमानं, यस्तु भूतस्य भव्यस्य सर्वस्य चेशानस्सएवहीशानशब्दस्स्यात् परमपुरुषइतिचेत् अत्रेदमुच्यमानमुत्तरं परामृशन्तु पण्डितप्रकाण्डाः, पुरुषशब्देशानशब्दयोः परस्परं श्वेताश्वतरपुरुषसूक्तयोर्व्यतिषङ्गेऽपि ननःकिंचिच्छिन्नमद्वैतिनां, अथापि भेदवादमुपगम्यैव ब्रूमः, यत्र नास्त्येव विवादइत्यभिप्रयंत्येते तत्रतु परं पुरुषमभिध्यायीतेत्यत्र शब्दादेवेति नोक्तं यत्रतु विवदन्त एते तत्रैवमुक्तमिति स्थिते कथमेवमाशंक्यतां, भूताएव भवन्ति ब्रह्मविष्ण्वादयोऽपि तदधिकारसमयइति भूतेश उच्यते शिवः, नतु भव्येशत्वाभावेन, तथाचोक्तमत्ताचराचरग्रहणादिति, वक्ष्यति,चात्र पत्यादिशब्देभ्य इति, पत्युरसामञ्जस्यादिति चोत्तरत्र, श्रुतिस्तु, अन्यत्र भूताच्च भव्याच्चेति प्रश्नमनुसृत्य भूतभव्यस्येत्युक्तम्मया, तत्र ससंबन्धिकार्थप्रतीत्यारूढ्यनुन्मेषाल्लिङ्गश्रुतिरेवयन्नाभिधानश्रुतिः, प्रमितत्वंच श्रूयते ततः कश्चिज्जीवविशेषएव प्रतिपाद्यतइति नभ्रमितव्यं, किन्त्वीशानएवायं कथन्नाम जीवईशा-

नस्स्यात्, यस्स्वात्मानमपि वशयितुन्नेष्टे, तत्र कुतो भूतंच भव्यञ्च, अयन्त्वीष्टे कालकूटमपि कबळयितुं कालमपि कलयितुं काममपि कणशयितुं विधिविलेखमप्यलेखयितुं, त्रिपुरमपि दग्धुं, विधिहरी, अपि धूमायमानौ विधूनयितुं, यतस्स्वयमधूमकमात्मारामज्योतिः, अपिच कुतोत्रावकाशो जीवइति पक्षस्य, यतोऽतो नास्त्येव जीवइति व्यतिरेकेण अतएवायमेवाद्यायमुख्यो वर्त्तते वर्त्तिष्यतेच, यस्मादाहस्मायमेव परमेश्वरोऽहमेकः प्रथममासं वर्त्तामिच भविष्यामिच नान्यः कश्चन मत्तो व्यतिरिक्तइति, तस्माध्धृद्यपेक्षया तूक्तः प्रमित इति परएवेशानइत्याभिप्रैतीति ।

तदेवं-ध्येयश्शंभुर्भवभयहरोऽमानवैर्मानवैश्च
ध्यायीतेशानमिति वचनं व्याकरिष्णुर्महर्षिः ।
शब्दादेव प्रमितइतियत्सूत्रमुच्चार्य पश्चा-
द्देवादीनामपि तदुपरीत्याह चध्यातृभावम् ॥

इति प्रमिताधिकरणम् ॥

अथ यदि देवाइत्येव नसन्ति तदा कथमयन्देवदेवो महादेवश्शानः-केषां वा परमो विष्णुः कुतोवाऽऽधिदैवकीसंपत्परस्य कुतश्चवाऽस्य प्रशासनमित्याशंक्या रचयति देवताधिकरणम् ।

“तदुपर्यपि बादरायणस्संभवादिति”

अथ किमर्थमत्रापूर्वं स्वनामसंकीर्तनमाचार्यस्य, स्वसमानगुन्यन्तरविसंवादे प्रतिज्ञार्थं स्यात्, पूर्वंत्वशिक्षयदाचार्यान्तरपक्षीयान् इदानीन्तु साक्षादेवाचार्यान्तरेण विवदतइति स्वनाम संकीर्तयतिनन्वयमसावेवं वदतीति कुतःपूर्वञ्चपूर्वपक्षं गृह्णाति, साक्षात्प्रतिक्षेपायोगादिति वदामः नह्याचार्यान्तरनामनिर्देशपूर्वकं विरोधः कर्मणीति चे न, शब्दइति चे न्नेति साक्षात्प्रतिक्षेपो युज्यते, अतः परोक्षं प्रतिक्षिपति, यदाऽचार्यान्तरनाम कीर्तयति तदा विना साक्षात्प्रति

क्षसंयुक्तमेवगाढयास्वमतं निगमयतीति काचित्परिभाष्य धार्या, आस्तामेतत् मध्वादिष्वसंभवादनधिकारञ्जैमिनिः,किमनेन साधितमेव परावर्त्यते, उत विषयान्तरमाक्षिप्यते, अत्र कश्चिदाह, मध्वादिष्वनधिकारम्मन्यते जैमिनिराचार्यइति विषयान्तराक्षेपइति । अपरआह यद्ययमसंभवोऽसंप्रतिपन्नो बादरायणस्य तदोभयनामनिर्देशपुरस्सरमभ्युपेयेत । नहि साक्षादाचार्यद्वयस्य संभवासंभवाभ्यां विवादो युज्यते तान्त्रिकयोरिव वैदिकयोः, व्यवहितान्वयश्च, ज्योतिषि, ज्योतिर्विद्यायां भावाच्चेत्येतदपि व्यर्थं, नह्यसंभवादनन्तरमपि काचिद्युक्तिर्वक्तव्येति । नह्यन्यत्र भावोऽन्यत्राभवस्य साधकः, सिद्धान्तेऽपिस्वविद्यायामिव स्वदैवत्येऽपि कर्मणि कुतो देवा नाधिकुर्युः, किमर्थं वा तदुपर्यपीति सूत्रे स्वनामसंकीर्तनं भिन्नविषयत्वइत्यादिकमभिप्रेत्य प्रथमपक्षएवेति अपशूद्राधिकरणे तु नविषयवैषम्यं । अथाधीश्वरकृत्यञ्जगत्कंपनंप्राणशब्दलक्षितं नतु प्राणएवेति निर्धारणार्थं पुनः प्राणशब्दस्य लाक्षणीकीकरणं कंपनादिति धात्वर्थनिर्देशेन निर्गुणमुक्तिवाक्यस्थज्योतिश्शब्दस्य पृथक् ब्रह्मपरत्वसमर्थनमप्याव, श्यकम्मन्यामहे, ततइदमुभयमपि पूर्वशेषमुपयन्तो न संगच्छन्ते परे, शुद्धस्यैव नामरूपनिर्वोढृत्वन्तदन्तरनुस्यूतिश्च मिश्रीकृत्य विचारार्थं पुनराकाशाधिकरणं, इदंपरं पृथगुपयन्ति ते, परन्तु रूढिं परित्यज्य जीवइति पूर्वपक्षयन्त्यन्याय्यं, सर्वात्मना जीवभावव्यपोहेन परस्मिन् पत्यादिशब्दानुकीर्तनमाधिदैविकसंपदनुगुणं स्वशब्दनिर्धारणानुगुणंचैवं सन्ति बहवश्शब्दाः परस्येति बहुवचनेन सूचयित्वा समापनंच सुष्ठु विज्ञायते । तदत्रानयोराकाशाधिकरणशेषतापि नसम्यगवकल्पते किन्त्वधिकरणान्तरतैवावकल्पतइति शिवं ॥

इति श्रीमहामहोपाध्यायचतुस्तन्त्रस्वतन्त्रहरिहरगुरुचरण नळिनसंसेविनो वेदान्तविभूषणस्य कृष्णशास्त्रिणः कृतौ ब्रह्मसूत्रानुगुण्यसिद्धौ प्रथमाध्यायस्य तृतीयः पादस्समाप्तः ॥

नन्वस्ति प्रधानस्यापि स्वशब्दोऽव्यक्तमिति, अस्ति च जीवेश्वरादिसाधारणोऽजेति लिंगेन विशेषितोऽस्यैव प्रकृतेः, अस्ति च लिंगमपि पञ्चविंशतितत्वात्मकमनन्यसाधारणमस्माकं, अथचन विनापि प्रकृतिं परमोऽपि पुरुषश्शक्नोति केवलः प्रजाःप्रजनयितुं, ततो-ननिमित्तश्चोपादानञ्च चिन्मात्रं ब्रह्मेत्यादिकमाशंक्य तुरीयश्चरणमारभमाणः प्रथमं प्रधाने क्वचित् स्वपदाभिमानमपाकरोति ।

आनुमानिकमप्येकेषामितिचेन्नशरीररूपकविन्यस्तगृहीतेर्दर्शयतिचेति ।

ईक्षत्यधिकरणे ब्रह्मलक्षणस्य प्रधानेऽतिव्याप्तिराशंक्य निराकृतान्तिमेन सूत्रत्रयेण सैवात्र विस्पष्टं विचार्य निवार्यते आदिमेनाधिकरणत्रयेण, तत्राव्यक्ताजाशब्दतत्वसंख्या यथासंख्यन्निराक्रियन्ते, सैवात्रातिव्याप्तिरानुमानिकमपीत्यपि नाप्रकटीकृता, अत्र लक्षणविशेषणयोर्वैलक्षण्यं प्रथमतोऽवधार्यं, लक्षणन्नाम तत्, यत्तत्किमिति जिज्ञासामनुरुध्य कथ्यते, तस्य च प्रयोजनमलक्ष्य व्यावर्त्तनेन लक्ष्यसामान्यबोधनं, अतो नलक्षणलक्ष्यतावच्छेदके परस्परं व्यभिचरतः, इतरथाहि लक्ष्यबोधने न्यूनाधिकविषयतापत्तेः, यथात्र पृथिवीत्वगन्धवत्वे, विशेषणंतु तेषु किमिति जिज्ञासामनुरुध्य कथ्यमानं, अस्य च प्रयोजनं विशेष्यतावच्छेदकाश्रयान्तरात् स्वाश्रयपरिशेषीकरणं, इदन्तु तद्व्यभिचरत्यपि, यथैष दाशरथी राम इति, प्रकृतेतु सूत्रकृताऽद्रव्यवाचकमपि विशेष्यीकृत्य द्रव्यवाचकमेव विशेषणीकृतं, तत्र किं प्रयोजनं, अथ किमत्र प्रयोजनमन्वेष्टव्यं लक्षणत्वन्नकस्यापि भवति, विशेषणत्वन्तु शरीरस्यैव भवति, रूपकविन्यस्तान्तरस्य व्यावर्त्यस्य सद्भावादितिचेन्न, एवंसति केवलं शरीरगृहीतेरित्येव न्यासापत्तेः, नच प्रकरणोपस्थापनाय यथा सन्निवेश इति वाच्यं, प्रकरणादिति तदुपरिविन्याससंभवात्, व्याव-

त्यशरीराभावेऽपि प्रकरणोपस्थापनायैव रूपकाविन्यस्तशरीरगृहीतेरि-
त्येव विन्यासंभवाच्च,किन्तर्हिप्रयोजनं, इदमत्रप्रयोजनं, यत्प्रकृतप-
रिशेषीकरणन्नामेति, अत्र प्रकृतेषु रूपकाविन्यस्तेषु किञ्चित्परिशेषी-
कर्तव्यं विशेषणेन नतु शरीरेषु,अशक्यश्च तथाकर्तुं रूपकाविन्यस्त-
स्य शरीरस्याभावात्, यतः किञ्चित्परिशेषीक्रियेत रूपकाविन्यस्त-
त्वविशेषणेन, सन्ति चाशरीरा अपि बहवो रूपकविन्यस्ताः येभ्यइदं
परिशेषीक्रियतेशरीरं,एवञ्चप्रकरणोपस्थापनंपरिशेषीकरणश्चेत्युभय-
मपि कृतं भवति, नन्वेवमपि किं भवति, इदमिदानीं भवति, यत्प्रक-
रणेन परपक्षनिराकरणं,उभाभ्यां शरीरग्रहणमिति, ननु प्रकरणादेव
शरीरपरिग्रहोऽपि स्यात्, न स्यात्, प्रकृतान्तरसद्भावेन शरीरमे-
वाव्यक्तपदमिति नियन्तुमशक्यत्वात्, अथ परिशिष्टिरेव स्यादुभया-
र्था, न स्यात्, सर्वस्यापि केषु चित्परिशिष्टिसंभवेन प्रधानस्यापि
महदव्यक्ताहंकारेषु परिशेषसंभवात्, अतः परिशेषादित्यपि नोप-
न्यासो भवति, तथाच भाष्यं, प्रकरणनिरूपणायाश्चनपरपरिकल्पि-
तं प्रधानंप्रतीयते, प्रकरणपरिशेषाभ्याश्च शरीरमव्यक्तशब्दमिति च,
तत्र प्रथमं सांख्यस्य स्वतन्त्रप्रसिध्या स्वतन्त्रे प्रधाने रूढमव्यक्त-
पदमवलम्ब्य प्रत्यवस्थानं, ततो यौगिकमजापदं, पश्चात्तु स्वतत्व-
संख्यां, तत्र प्रथमं क्रमसचिवं सत्साधकं, द्वितीयन्तु समभिव्याहृत-
पदसचिवं, संख्या तु स्वतन्त्रैव सती साधिका, सिद्धान्ती तु स्वत-
न्त्रसिद्धौ रूढिक्रमौ नात्र क्रमेते, अतोऽव्यक्तमित्यतिक्रान्तरूपकवि-
न्यस्तशरीरमेव कारणात्मना गृह्णाति, तथाच यौगिकमेवेदं पदं नतु
योगरूढं, अजेतितु गौणं, नतु यौगिकमत्र विवक्षितं, तथाचाति-
शयोक्तिः, पञ्चजनइति नसंख्यापरं किन्तु रूढमित्यादिमध्यावसाना
वलंबनः प्रतिक्षिपतिस्मेति प्रतिभाति काचिदत्र परिपाटी, तत्र प्रथ-
ममव्यक्तपदस्यावयवशक्त्युपपादनार्थं सूत्रं सूक्ष्मन्त्विवति, अत्र कथं
स्थूलं शरीरमव्यक्तशब्दार्हमित्याक्षेपप्रतिक्षेपाय प्रवृत्ते सूत्रमिदमि-

स्यत्र नकोऽपि विवादः, तत्र सूक्ष्मन्तु तदर्हं, कथं स्थूलस्य शरीरस्य तेन गृहीतिरित्याक्षेपे स्वयमपि सिद्धान्ती, सूक्ष्मन्तु तदर्हत्वादिति वदतीतिचेत् कोऽभिप्रायइति विमर्शनीयं भवति। ननु किमत्र विमर्ष्टुं शक्यं, यन्नुभावपि सममेव वदेतां, न भेदसद्भावात्, क्वभेदः अभिसन्धौ, कथं, इत्थं, सूक्ष्मन्तु, तदर्हन्नहि स्थूलं, ततः कथन्तेन तद्गृहीतिरितिसांख्यस्याभिसन्धिः, सचैवंसति प्रधानएव पर्यवस्यतीति फलांशे निगूढः, सूक्ष्ममेव ग्रहीतन्नस्थूलं, यतस्तदेव तदर्हन्ततो नकोऽपि दोषइति समाधाय सूक्ष्मन्तु ग्राह्यं, तस्यैव तदर्हत्वात्, नहि सूक्ष्मविशेषः, यतोऽर्हता नाम योग्यता साच योगविषयता, सच नव्यक्तमव्यक्तमिति सूक्ष्मसामान्ये, तत्र कथं प्रधानमिति विशेषयितुमाभिप्रैषीत्युद्भेदयामास गर्भमाभिसन्धेस्सिद्धान्ती स्वयमपि साध्यांशे निगूढाभिसन्धिः, ततः केवलयोगेनाऽपि प्रधानएव पर्यवस्यतीत्यनभिसन्धाय सिद्धान्त्यभिसन्धिं स्वाभिसन्धिमेव प्रकटयति सांख्ये, आह तदधीनत्वादिति, नस्वतन्त्रे प्रधाने पर्यवसानमिति शेषः, ततः किमर्थमेवं हठात्कुरुषे तदधीनत्वादिति वचनमात्रेण, किमर्थश्चेष्येत किञ्चित्सर्वशक्तेन ब्रह्मणेतिप्राप्ते,आहार्थवद्भूतसूक्ष्ममव्यक्तमिति, अयमाशयः, यथान्तःकरणञ्जीवाश्रयन्तदधीनमर्थवत्, यथा वा तत्सामान्यम्महानात्मा जीवघनाश्रयस्तदधीनएवार्थवानेवं सर्वकारणतयाभिप्रेतमव्यक्तमपि ब्रह्माश्रयन्तदधीनमर्थवदिति, यदुक्तं सर्वशक्तेनेति तत्र या शक्तिस्सैवेदमव्यक्तपदं, तत्र कथं किमर्थमिष्येत सर्वशक्तेनेत्याक्षेपइत्यमुमर्थमुद्घाटयत्यर्थवतीहि सेति भाष्यम्।

अत्रास्ति श्रीभाष्यं सूक्ष्मन्तु, शरीरावस्थंभूतसूक्ष्मन्तु अव्यक्तशब्देनोच्यते, तस्यैवतदर्हत्वात्, रथवत् पुरुषार्थसाधनप्रवृत्त्यर्हत्वादिति, अत्र सूक्ष्मन्तु गृहीतन्तस्यैवाव्यक्त शब्दार्हत्वादिति स्वरसतः प्रतीयते, नतु प्रवृत्त्यर्हत्वादितीति विदन्तुस्वरसवेदिनः। तथाच पूर्वोक्तानुपपत्ति परिहाराक्षमतयैवेत्थं प्रवृत्तं श्रीभाष्यमिति

विभाव्यतेस्पष्टम् । यतस्सूक्ष्मंहितदर्हमित्याक्षेपे सूक्ष्मंन्तु तेनोच्यत इत्युक्तवतानकिञ्चिदपि प्रत्युक्तं भवति, न च न किञ्चिदपि प्रत्युक्तमित्येवोपेत्यं, यतोमन्मतमेव भवताप्युपेतं भवतीत्युपरिप्रत्यवतिष्ठतइति वाच्यम् । स्यादेवं, यदिसूक्ष्मंत्वित्येतावदेवस्यात्, तदर्हत्वादिति नस्यात्, ततस्सूक्ष्मसामान्यस्य तदर्हत्वोपन्यासेन तद्विशेषस्याव्यक्तशब्दत्वान्निराकृतमविज्ञायैव पुनः प्रत्यवस्थानेनिराचकार प्रधानत्वन्तदधीनत्वादितीत्यवधारयन्त्येव सूक्ष्मयाटष्ट्याऽवधारणनिपुणा इति । ब्रह्माधीनत्वादर्थवत् कार्यकारिभूतसूक्ष्ममित्युत्तरसूत्रमुपवर्णयन्ति परे । अत्र प्रधानमेवाभ्युपगतं भवतेत्युक्ते, न, ब्रह्माधीनत्वाभ्युपगमेना प्रधानत्वादित्येतावतैव निर्वाहेऽर्थवदिति कथमर्थवदिति विवेचनीयम् । ज्योतिरूपक्रमा--परमेश्वरकारणिकेत्येकएवार्थो वर्णितः, नतु भाष्यवत्परमेश्वरादुत्पन्ना ज्योतिः प्रमुखेति चार्थद्वयं, अस्तुनाम नाविरोधः, अथापि संभवति सूत्रस्यार्थद्वये प्रकृतोपयोगिनिच नैकस्त्यक्तुं युक्तः, तथाह्यधीयतएके, अत्र तत्तेजोऽसृजत, यदग्नेरोहितं रूपमिति भाष्योक्तं प्रकरणं परित्यज्याणोरणीयानिति तैत्तरीयमुदाहृत्य सप्तप्राणाः प्रभवन्ति तस्मादिति प्राणादिसृष्टिसन्निधानेऽजाम्नित्याभिहितत्वात् कार्यरूपेण ब्रह्मकारणकत्वमधीयतएकइति वर्णयन्ति, वयमपि कार्यरूपेणैव ब्रह्मकारणकत्वमधीयतएकइत्युपैमः, तत्रोदाहरणान्तरोपादानेऽस्मदुक्तद्वितीयार्थपरित्यागं विना किमपि प्रयोजनमेषान्नपश्यामः । कल्पनोपदेशादित्यस्य पूर्वाधिकरणइवाजात्वरूपककल्पनयोपदेशादिति स्वरसतोऽर्थे प्रतीयमाने, कथमेवं श्रुतिर्निर्हीनमर्थं ब्रूयादित्युक्त्वा कल्पनं क्लृप्तिः सृष्टिः, अस्मान्मायी सृजते विश्वमेतदितिसृष्ट्युपदेशादिति कथञ्चिदर्थं कल्पयन्ति, तेनैते बृहदारण्यकाष्टमाध्यायादिकन्नाधीतमस्माभिरिति सूचयन्ति, पूर्वोक्तपरिपाटीविशेषाज्ञानञ्च । उत्तराधिकरणे–

प्राणादयो वाक्यशेषात् ।

ज्योतिषैकेषामसत्यन्ने—इति सूत्रे, तत्र तद्देवा ज्योतिषांज्योतिरिति समानः पूर्वमंत्र उभयेषां, प्राणस्य प्राणमित्युत्तरमन्त्रे तु नास्तिकाण्वानामन्नं, ततस्तेषां पूर्वस्माज्ज्योतिरादाय संख्या पूरणीयेत्यस्मत् सिद्धान्तः । परे तु नेदं सहन्ते अतोऽन्यथा व्याकुर्वन्ति। पूर्वमन्त्रे ज्योतिषामिति विषयप्रकाशकानीन्द्रियाण्युच्यन्ते, ज्योतिरिति तेषामाधारं ब्रह्म, उत्तरमन्त्रे तु प्राणइति वायुसंबन्धात् त्वगुच्यते, ततश्चक्षुश्श्रोत्रे, अन्नमिति पृथिवीसंबन्धात् घ्राणं तत् समीपस्थं रसनञ्च तन्त्रेणोच्यते, अथाप्यन्नशब्देन क्रोडीकरणान्नपञ्चत्वविघातः, मनश्चेति पञ्चपञ्चजना उच्यन्ते, एतएव पूर्वमन्त्रेणाप्युक्ता इत्युपप्रदर्शनार्थमेव प्रथमं सूत्रं, तथाच ज्योतिषैवोभयेषामपि पञ्चजनग्रहणमवैषम्येणेति, एतदुक्तं भवति, ज्योतिषांज्योतिरित्यस्य विवरणं प्राणस्य प्राणमिति, तत्रैकेषामन्नत्वेनैकीकृतयोर्घ्राणरसनयोरग्रहणेऽपि न दोषः, समस्योक्तस्य विभज्य विवरणेऽगृहीतभागस्य गृहीतभागेनैवोपलक्षणात्, तथाचोभयेषामपि ज्योतिषैव पञ्चपञ्चजनसंभवइति, अहोऽत्र किमर्थमियान् क्लेशः, यद्यन्नन्नास्त्येकेषान्तर्हि ज्योतिषा भवन्ति पञ्चैतेषामिति सतिप्रसंगतेऽर्थे । वैषम्यदोषस्तु परिहृतएव भाष्यकृता, उभयेषामपीत्यद्ध्याहारश्च भवतीति ।

इत्यानुमानिकाद्यधिकरणत्रयम् ।

यदेतदेकेषां कापिलानां प्रधानं सर्वेषामन्नादिभोग्याकारेण परिणमतइति मतन्तन्न क्वचिदपि वेदान्तेप्रतिपाद्यमानं पश्यामः,ततस्तदसदेव असति च तस्मिन् यज्ज्योतिषामपि सर्वेषांज्योतिरवभासकश्चिन्मात्रं ब्रह्म तेनैव मायासचिवेन सृज्यते सर्वमिदञ्चराचरं पाल्यते पुनरप्युपसंह्रियते चेति स्थितमेतावता, ततोऽद्य यद्गतिसामान्यादित्युक्तं कारणविषये संगानन्तत्र विगानमाशंक्य प्रतिक्षिपति कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः समाकर्षादितिच । साधिते च

प्रधानमल्लभिराकृत्य ब्रह्मण्येव समन्वये कर्मण्यपि जीवानां स-मन्वयमन्विच्छन्मीमांसकदर्दरूटः, सर्वक्रियाशक्त्यधिष्ठाने प्राणेवा तमन्विच्छन् संख्यश्च निराक्रियेते जगद्वाचित्वादिति । अत्र, यदिज-गदेवकर्मपदस्यार्थस्तदा जीवप्राणपरामर्शोब्रह्मार्थएव भवितुमर्हतीत्य-भिप्रैति जैमिनिरित्याहान्यार्थत्विति । तथाचेदं प्रतर्दनवाक्यमिवोपहि-तबोधकमिति सूत्रकारीयम्मतं । आनन्दवल्लीव साक्षादेवोपलक्षितबो-धकमिति जैमिनीयम्मतमिति विवेक्तव्यं । अत्र पूर्वाधिकरणे कारण-वाक्यानां विगानं पूर्वपक्षबीजमित्यत्र नविवादः, तत्र किन्ततो न वेदान्ताः कारणप्रतिपादनपराः, किन्तु कथञ्चित्कर्मपरावा, जप-मात्रोपयोगिनोवा, यदि कारणमप्येकमावश्यकमितीष्यते तदा स्मृ-तिन्यायप्रसिद्धं प्रधानमेवेष्टव्यमिति पूर्वः पक्षः, उत ब्रह्माणि कारणे विगानात् प्रधाने व्याकृताव्याकृतात्मनि सदसच्छब्दोपपत्तेस्संगान-संभवेन तत्पराएवेति । तत्र न वेदान्तानां सर्वात्मनाऽप्रामाण्यमन्य-शेषत्वंवा शंकितुं युक्तं, साधितत्वात्सिद्धेऽपि कारणे पृथक्प्रामाण्य-स्य समन्वयाधिकरणान्तेन, ततः प्रधाने संगानमेव पूर्वपक्षयितव्यं, प्रमाणान्तरसिध्यापि नतदवलम्बनन्न्याय्यं, वैदिकवाक्यार्थविचारे तथावलंबनस्यान्याय्यत्वादिति द्वितीयमेव पक्षं रोचयन्ते श्रीभाष्य-काराः ।

नैवेदं रोचयामहे वयं, सिद्धे प्रामाण्यस्यैवाव्यक्तादिशब्द-लिङ्गानामन्यपरत्वस्यापि साधितत्वात्, प्रधानइव ब्रह्मण्यपि कथ-ञ्चित्संगानस्य संभावनीयत्वाच्च, कथमन्यथा सिद्धान्तसिद्धिः, अ-तः क्रुध्यन्निव विगानादप्रामाण्यं वाऽन्यपरत्वमेव वापादयतीत्यव-श्यमुपेयं, तत्र कस्ते लाभः, कर्ममीमांसको ह्येवंसति विजयी स्या-दिति सिद्धान्तिनश्शंकामाशंकमानस्सांख्यस्स्यान्नाम सएव विजयी, त्वदनिष्टसिद्धिस्त्वस्ति मम परमो लाभः, अथवा सिद्धेच वेदान्तानां ब्रह्माणि पृथक्प्रामाण्याभावे स्वयमेव सिद्धत्यप्रतिबन्धं प्रधानं कारण-

मस्माकं स्मृतिन्यायाभ्यामित्येवं प्रथममेव पक्षं रोचयामहे । निराकृतेच सिद्धान्तिनाकारणपदविगाने साधितेच संगाने, कर्मठेन सहितः कापिलो विहाय कारणपदमादाय कार्यपदं पुनः प्रत्यवतिष्ठतइति प्रवृत्तञ्जगद्वाचित्वादितीति युक्तं । तत्र प्राणावष्टंभः कापिलस्य जीवावष्टंभः कर्मठस्येत्येव न्याय्यं, यतस्सांख्यमते जीवस्य शुद्धदृग्रूपतया प्राणसमवायिन्या क्रियया तत्समवेतमेव पुण्यापुण्यात्मकं कर्म जगदुत्पत्त्यादिहेतुः, पूर्वतान्त्रिकमतेतु जीवस्यैव कर्तृतया तत्समवेतमेव तत्तथेति, । तथाच केवलसांख्यस्यैव पुनः प्रत्यवस्थानमित्येतदपि परेषां मन्दं, पदमात्रसमन्वयार्थोऽयं पादइति प्रक्रियापरित्यागोऽप्यनुचितस्तेषां । एवञ्जगद्वाचिपदमादाय यत्प्रतिज्ञातञ्जन्माद्यस्ययतइति, व्यावर्त्तितश्चान्यस्मादीक्षतेर्नाशब्दमिति प्रसाधितश्च हेतूकृत्याकाशस्तल्लिंगादिति, दृढीकृतश्च नसंभावयितुमपि शक्यमिदमन्यस्मिन् जडे, यतः पादेनैवेदं श्रूयते, नहि जडं पादेन परिणम्य स्वयमवशिष्येत, परिणामयित्वावाऽवशेषीक्रियेतान्येन प्रयोजनाभावादित्यभिप्रायकतया ज्योतिश्चरणाभिधानादिति, तदेतन्निगमयितव्यमद्य निगमितं, पराकृतश्च पदाभासावष्टंभोऽपि । अथेदानीं यज्जीवमेवोपक्रम्य जीवत्वापनयनेनावशेषितमिति व्यवस्थापितमानन्दमयाधिकरणे तस्मिन्नेतस्मिन् प्रत्यगभिन्ने ब्रह्मणि तदुपक्रममत्र वाक्यमादाय वाक्यान्वयो निगमयितव्य इत्यभिप्रेत्याह,

वाक्यान्वयादिति ।

अत्राऽऽश्मरथ्यः पाञ्चरात्रः, यतो जीवोपक्रमस्य प्रतिज्ञासिद्धेर्लिंगत्वसिद्धये कथञ्चिज्जीवस्य ब्रह्मकार्यत्वं वक्तव्यन्तेन तथाच भेदाभेदयोर्यौगपद्यमुपेतं भवति तेन, औडुलोमिस्तु कालभेदेनैतावुपैति, ननूत्क्रमिष्यत एवंभावादित्यनेन कोऽर्थः प्रतिपाद्यते । यदोत्क्रमिति तदैवं भवतीति स्वरसतोलभ्यते, तथा चोत्क्रमणपूर्वकालएवैवंभवतीति भवति । तत्कथं संगच्छते, उत्क्रान्तस्य ह्येवंभा-

वो वक्तव्यो भेदाभेदयोरयौगपद्यायेति चेन्न, उत्क्रमणमत्र ध्याना-दिसंपादनीया मुक्तिः तथाच भविष्यन्मोक्षस्यैवंभावादिति भवति। एवंच भविष्यन्मोक्षानन्तर मस्यैवंभावसंभवान्नानेनोपक्रमो दोषावह इत्यर्थस्संपद्यते, नच मोक्षे भविष्यत्वविशेषणं व्यर्थमिति वाच्यं। अस्य भविष्यन्तं ब्रह्मभावमिदानीमादायानेनोपक्रमइत्येवमर्थत्वात्, तथाच भामती, भविष्यन्तमभेदमुपादाय भेदकालेऽप्यभेदउक्तइति, अत्रायन्दृष्टान्तः, यथा बुभुक्षितं भोक्ष्यमाणश्चोद्दिश्य तृप्तोऽयमि-त्युक्तिमवलम्ब्य कथमेवमुच्यतइति विशये, भोक्ष्यमाणस्यैवंभावसं-भवादिति, इममपि पाञ्चरात्रपक्षकुक्षिप्रविष्टमेवाभिप्रैति भामती, य-दाहात्र, यथाहुः पाञ्चरात्रिकाः, आमुक्तेर्भेदएव स्याज्जीवस्य च परस्य च। मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः इति। परन्तु अ-विभागोवचनादित्यत्राविभागोऽपृथक्भावः, पृथग्व्यवहारानर्हसंसर्ग इति श्रीभाष्यं। अविभागेन दृष्टत्वादित्यत्र स्वरूपैक्यव्यावृत्त्यर्थमाहे-ति श्रुतप्रकाशिकाच दृश्यते, तस्मादुक्तकारिकायां भेदएव, भेद-व्यवहारएव, नभेदोऽस्ति, न भेदव्यवहारोऽस्तीति चोपेतव्यं भव-ति, अथवा कश्चिन्नवीनपाञ्चरात्रिकोऽयं श्रीभाष्यकारइत्युपेयं, उ-त्क्रमिष्यतः परमात्मैक्योपपत्तेरिति तु भाष्यं वस्तुतस्तु शैवसिद्धांतकु-क्षिमिव प्रवेष्टुमर्हत्ययमौडुलोमिः, न तत्कुक्षिमेव, यतश्शैवाएवाणव कार्मिकमायिकमलत्रयोपेतोभिन्नएव शिवाज्जीवस्संसरति, ततस्त-त्प्रणिधानादिना तदभेदमनुभवतीति वदन्ति, परन्तु विद्यमानए-वायमभेदस्संसृतौ तिरोभूतः, मुक्तौतु मलत्रयनिवृत्तावैक्यमभिव्यक्तं भवति, भेदोऽपीषत्सत्यएव सन्ननुवर्तते, तस्येपत्त्वञ्च संसृतौ सर्वा-नर्थबीजस्यानुभाव्यानुभावकताप्रयोजकत्वमात्रतयावर्त्तनं स्वरूपत-एवायं भेदइति च भाषन्तइति, न चैवंभूतस्यास्य कथमुत्तरत्र चि-ति तन्मात्रेणेति पक्षावलंबनं युज्येतेति वाच्यं। इदानीमेवंभूतस्या-पि पश्चात्परमाद्वैते व्युत्पादितस्य तत्र तादृशपक्षावलंबनसंभवात्, क-

थमन्यथा शेषत्वादिति विवदमानस्य जैमिनेः परञ्जैमिनिरित्यादिपक्ष-भेदावलंबनं, शैवकुक्षिमिव प्रविष्टत्वाच्चेति । तत्रैवंसति काशकृत्स्नी-यमेव मतं स्वमततया वर्णयन्ति परे, अवस्थितेः, जीवे तस्यात्म-तयाऽवस्थितेः, तस्य शरीरितयावस्थितेरिति, यावदिति, तत्र यत्र यस्यात्मत्वाभिमानस्तत्तस्य शरीरमित्यापामरसाधारणमहम्मनुष्यइ-त्याद्यनुभवसिद्धमर्थमेते नोपयन्ति, तथासति परमात्मनो जीवात्म-न्यात्मत्वाध्यासएव शरीरितानियामकस्स्यात्, यथा जीवस्य मनु-ष्यादिशरीरे, तत्र परस्यैव जीवात्मनावस्थानाज्जीवो द्रष्टव्य इत्यु-पक्रमो न परस्मादन्यो जीवोनाम कश्चिदस्ति, यथा शुक्तिकातो रज-तमित्येवमर्थइति स्यात्, नतु तत्रावस्थितेरिति, किन्तु मनुष्योहमि-त्यत्रापि मनुष्यस्वामित्वमेव विषयइत्युपयन्ति, तत्र कुतोऽभेदः, कुतश्चवा जीवेनोपक्रमोपपत्तिस्ततः प्राथमिकमेव पाञ्चरात्रम्मतमिति वाङ्मात्रमेव काशकृत्स्नीयम्मतं स्वमतमित्येतदेतेषां, अस्माकन्तु य-द्द्रष्टव्यं शुद्धं ब्रह्म तदेव जीवस्य पारमार्थिकं स्वरूपमिति भवति काशकृत्स्नीयम्मतमस्मन्मतं, अन्तर्यामिब्राह्मणन्तु विशिष्टेश्वराभिधा-यि यथा जीवः कार्यकरणयोरन्तरस्तेयमयति, यथावा सुलभाना-मयोगिनी जानकं शरीरमाविश्यतेनाज्ञातायमयामासस्वपक्षप्रवचनेऽपि तमेवमयं यमयति सोपाधिकं जीवात्मानं । य एषोन्तर्यामी सएव ते स्वरूपत आत्माऽमृतइत्यन्तर्नियमनमात्रेणैव जीवस्यापि शरीरिण-माह महायोगेश्वरमीश्वरमिति न तस्य ज्ञेयत्वं, किन्तूपास्यत्वमेवेति सिद्धान्त इति ।

इति वाक्यान्वयाधिकरणम् ।

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ।

कोऽत्र प्रत्यवस्थाता, ननु सेश्वरसांख्यो योगी, यदाह श्री-भाष्यकारः, एवन्निरीश्वरसांख्ये निरस्तेसति सेश्वरसांख्यः प्रत्य-वतिष्ठतइति, न्याय्याच्चेश्वराभ्युपगन्तुरेव निमित्तमात्रं सइति वादस्ये-

तिचेन्न, सांख्यस्यैव प्रथमं प्रधानमेव कारणमिति प्रत्यवस्थाय परिभूतस्य पुनः प्रतिबन्ध्याऽस्तु प्रधानमपि कारणमिति सामान्यतएवावस्थितस्य प्रशिथिलीकृते तस्मिन्नपि प्रकारे पुनरपि विशेषेणेदृशमेव स्यात् कारणं ब्रह्म, यदि स्यान्नेदृशमितीदं कुतः प्रत्यवस्थानन्नस्यात्, न स्यादभ्युपगमवादापेक्षयाऽभ्युपगतवादस्य, युक्तत्वादितिचेन्न यतो न योगिनोऽपि प्रधानं परिणामयति ब्रह्मेत्यस्त्यभ्युपगमः, कथमन्यथा "पूर्वेषामपि गुरुः कालेनानवच्छेदादि" त्येवलिलक्षयेद्ब्रह्म, नतु जन्माद्यस्यतइति, अतो जन्मादिसूत्रोक्तं कारणत्वं विशदीकर्तुं प्रकारान्तरेण पुनः परावर्त्य व्यवस्थाप्यत इत्येतदेव वरं। अतएव युक्त्यैव प्रत्यवतिष्ठमानन्तयैव समाधाय समुच्चीयतएव श्रुतिरन्तर्योनिश्चहि गीयतइति। अयमाशयः, किमर्थमिदानीं भवता ब्रह्माभ्युपगतं, श्रुतिसमन्वयस्यानिवार्यत्वादिति चेत्, तर्हि कुतस्तत्रैव समन्वयो नेष्यते, अनेककारकपूर्वकत्वात्सृष्टेरितिचेत्, नैवंभवतावक्तुं पार्यते प्रधानमेकमेव निरपेक्षं परिणमतइत्युपगतवता, चेतनस्य कर्तृत्वमेव स्यान्नोपादानत्वमिति चेन्न, यतो न केवलंतर्कावष्टम्भेणेदानीं भवता प्रत्यवस्थातुं युक्तं, किन्तु श्रुत्यनुसारेणैव, तत्र किंनिमित्तत्वमात्रएवास्ति श्रुतौ लिंगमिति तावन्मात्रमिष्यते, उत विद्यमानमपि प्रकृतित्वे तात्पर्याभावादन्यथा नेयमिति, अथवा कर्तुरवश्यं कारकान्तरसापेक्षत्वात्, आहोस्विदुभयोरेकत्र विरोधात् उताहो प्रकृतित्वावेदकपदाभावात्, नाद्यः, प्रतिज्ञादृष्टान्तानुपरोधात्, न द्वितीयः, अभिध्योपदेशात् नहि तत्र तात्पर्याभावे परस्य बहुभवनाभिध्योपदिश्येतेति, नापि तृतीयः, यतआकाशादेवेति साक्षादेवाम्नायेते सर्गप्रळयौ, नहि पाञ्चरात्रपक्षइव परिणममानायाः प्रळयाधारभूतायाश्च प्रकृतेस्संसर्गमात्रेणैवाम्नायेते सर्गप्रळयौ, किन्तु साक्षान्निरपेक्षमेव, नापि चतुर्थः, आत्मकृतेरात्मानं स्वयमकुरुतेति, नहि विरोधआत्मकृतिरसंभवन्ति, तत्र कथं साभिधीयतेति किमर्थ-

न्तर्हि भवतोपेता प्रकृतिस्तधीनतयेति चेत्, न, परिणामात्, नहि कि- श्चिद्विना प्रकृत्या परिणमति, नहि क्षीरमिवांबुदध्यात्मना परिणमते, सिकतं वा तिलमिव तैलात्मना, तत्कस्य हेतोः, तयोरेव तत्स्वभा- वत्वात्, इतरयोरतथात्वात्, न चैतावता स्वभावस्यैवायं परिणा- मो नतु तद्वतइति भवति, नहि देवदत्तस्य स्वभावएव कार्यकारी, नतु सइति सन्दिग्धे कश्चित्, नच तर्हि भवति तत्रापि समन्वयइति वाच्यं, तदनन्यत्वात्, नहि ततोऽन्यो भवति तत्स्वभावः नहि देव- दत्ताय किञ्चिद्दीयते तत्स्वभावाय च किंचिद्दीयते पृथङ्लोके, नन्वे- वन्तर्हि विवर्तोपादनत्वमेव स्यादिति चेत्, अस्तु नाम का नो हानि- र्ब्रह्मण्येव समन्वयमुपेयतामिति, अतएवाहात्र भगवान्वाचस्पतिः, इयंचोपादानपरिणामादिभाषानविकाराभिप्रायेण, अपितु यथा स- र्पस्योपादानं रज्जुरेवं ब्रह्म जगदुपादानन्द्रष्टव्यमिति, नापि पंचमः, यतो योनिश्च गीयतइति च प्रकृत्यधिकरणं ।

एतेन सर्वे व्याख्याता व्याख्याताः ।

के सर्वे, जगत्कारणप्रतिपादनपरा अवशिष्टास्सर्वे वेदान्तवा- क्यविशेषाः, एवन्तर्ह्येतेन पादचतुष्टयोक्तन्यायकलापेनेति व्याख्या- तव्यं, एवमेवैतद्व्याख्यातं भगवता श्रीभाष्यकृता, अस्तु किमर्थमेवं व्याख्यातन्तैर्निरर्थकं, कुतो निरर्थकमिदं व्याख्यानं, यतो गति- सामान्यमुपन्यस्य कारणत्वेनच, समाकर्षात्, जगद्वाचित्वादिति समर्थितन्ततः परं किमवशिष्टं वाक्यान्तरेष्वतिदेशस्येति, न, शिवपारम्यपराणांश्वेताश्वतरादिमन्त्राणान्नारायणपरत्वप्रतिपादनार्थ- त्वादस्याधिकरणस्येति श्रीमता सुदर्शनेन बहुशो विवृतत्वात् । नहीदं युक्तं, यत्रानादितया प्रवृत्तो वर्त्तमानो वर्त्तिष्यमाणश्चासर्वमुक्तेर्वि- वादो लोकानान्निरूढश्च विवादान्तरापेक्षया श्रुतिस्मृतीतिहासपुरा- णेषुच सन्तन्यमानः, तत्रैव यदिकश्चित्पक्षं समर्थयितुं प्रवृत्तोयं सूत्र- कारस्तदा कुतस्तद्विवादास्पदं वाक्यं विशिष्योदाहृत्य नविचारयेत्,

कुतोवा निगूढमतिदिशेत्, कुतश्चवा तदपि पक्षद्वयम्मतान्तरनिराकरणपरे पादे घटयेत्, अस्त्वेतत्, अत्र वरं भगवान् श्रीकण्ठाचार्यः यस्त्वसत्यपि शिवशम्भ्वादिशब्दे तत्र तत्रैवाभिप्रायकृतया आनन्दमयश्शिवः,आकाशश्शिवः,नतु नारायणइत्येवाधिकरणानि रचयामास, नायं, योयमेतावन्तं कालं सुषुप्तः प्रायेणाद्वैतभाष्यमेव व्याकृत्य वामदेवपदमपि परित्यज्यातिदेशसूत्रेणैव प्रबलं पक्षं परिच्छेत्तुमुद्युङ्क्तेति, कथं तर्हि सूत्रार्थः, एतेन सांख्यमतनिराकरणकारणेनावशिष्टास्सर्वे वैशेषिकबौद्धार्हतशैवपाञ्चरात्रपक्षाअपि व्याख्याता वेदितव्याइति, नन्वत्रापि गतिसामान्यनिर्धारणेनैव कृतकृत्यता स्यादिति चेन्न, यतस्सर्वेषां वेदान्तानां ब्रह्मण्येव कारणेन गतिसामान्यं दृश्यते, न प्रधानेनेत्येवोक्तं, नान्येनेति नोक्तमतोऽस्त्येवावसरो वादान्तरस्य, उपक्षेपयोगाच्च, एवञ्चेदत्र ह्युपक्षिप्तो भवत्यनन्तराध्यायार्थस्सर्ववादान्तरनिराकरणरूपस्तत्र तत्र पादावसानेऽप्यनन्तरपादार्थमुपक्षिपन्तेति ॥

इति सर्वव्याख्यानाधिकरणम् ।

इति श्रीमहामहोपाध्यायचतुस्तन्त्रस्वतन्त्रहरिहरगुरुचरण नळिनसंसेविनो वेदान्तविभूषणस्य कृष्णशास्त्रिणः कृतौ ब्रह्मसूत्रानुगुण्यसिद्धौ प्रथमाध्याये चतुर्थः पादस्समाप्तः ।

प्रथमाध्यायश्च समाप्तः ॥

॥ श्रीः ॥

अथ द्वितीयाध्यायः प्रारम्भः ।

अथाविरोधलक्षणस्य द्वितीयाध्यायस्य प्रथमस्स्मृतिपादः। योनिश्च हि गीयतइत्यन्तेनब्रह्मैव जगतो योनिरिति प्रसाधितेऽप्यविश्वसन्तः परमर्षिप्रणीतं कथमप्रमाणं स्यात्तन्त्रमिति तत्र बद्धश्रद्धाः पुनरपि प्रत्यवतिष्ठन्ते सांख्यादयः । अथापि तेषां संग्रहणीया सन्मार्गे मतिरिति मन्वान आह भगवान् बादरायणः ।

स्मृत्यनवकाशदोषप्रसंगइति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगादिति ।

अयमाशयः, सांख्यस्मृतेरनवकाशत्वं ब्रुवता वक्तव्यं, प्रमाणस्यैव हि प्रमाणान्तरेण विषयापहारे निरवकाशत्वन्दोषः । तत्र स्मृतेः प्रामाण्यं किं प्रमाणान्तरमूलकतयोतस्वतन्त्रतया, आद्ये श्रुतिर्वामूलमुतानुमानं, नाद्यः, तन्मूलकमन्वादिस्मृतेरनवकाशप्रसंगात्-नच धर्मांशे सावकाशासेति वाच्यं, तत्रापि श्रुतिमूलकतयैव तस्याः प्रामाण्यस्य वक्तव्यतयां शब्दान्तरेश्रुतिमनुसरन्त्याअपि तस्यास्तत्राप्रामाण्येधर्मेऽपि तथात्वापत्यासर्वांतनैरानवकाशप्रसङ्गात्, नचाविगानात्तत्रसाप्रमाणम् । अत्राप्यविगानात्, विगायन्त्याश्च साङ्ख्यस्मृतेरवश्याप्रमाणत्वात् , सज्ञानात् सत् कारणत्वांशेऽस्यापि सावकाशत्वात् , प्रत्यक्षश्रुतिविरोधेन समानार्थकमूलश्रुत्यनुमानस्य सुदूरनिरासाच्च । नचद्वितीयः । तस्याभासयिष्यमाणत्वात् । नचस्वतन्त्रंप्रमाणम् । मन्वादिस्मृतेरपि तथात्वापत्तेः । नचेष्टापत्तिः । तथा सति तयाविसंवदमानाया अप्रामाण्यावश्यंभावात् । नचेदानीन्धर्मांशेसावकाशासा । ब्रह्मांशइव तत्राप्यप्रामाण्यापत्त्याऽवश्यानवकाशप्रसङ्गात् , नचश्रुतिसंवादात्तत्रसाप्रमाणमितीदानींवक्तुं शक्यम् । स्वतस्त्वपराहतेः । तद्विसंवादादितरस्य अप्रामाण्यावश्यंभावाच्चेति।

अथास्तीतरेषाञ्चानुपलब्धेरिति सूत्रम् । तत्रकस्मादितरेषां केषामिति भवति वीक्षा, अत्रतावदाहकपिलादितरेषाम्मन्वादीनामिति, अथमन्वादीनामनुपलब्धेः कथमभावस्साध्येत, किंवास्यप्रयोजनमिति चेत्तत्रप्रत्याह, नेयङ्कर्मणिषष्ठी, किन्तुकर्त्तरि, तथाचमन्वादीनां कपिलोक्तप्रकारेण तत्वानुपलब्धेरिति सूत्रार्थइति, ततः किमितिचेत्, तत्राप्याह, ततःकपिलोपलब्धिभ्रान्तिमूलेति, एतावता बहूनाम्मुनीनामुपलब्ध्याविसंवदतेकपिलोपलब्धिः, अथवानसंवदतइत्युक्तं भवति । तदिदन्नसहतेभामती, यातुप्रथमसूत्रमेव "नैवं स्मृतीनामविगानमस्ति प्रधानइति व्याकृतवती नहिविगानोत्तयनन्तरमसञ्ज्ञानमपिवक्तव्यं भवतीति, किञ्चानुपलब्धेरित्युक्तेऽभावमेवसद्योवगाह्यकस्येति तस्य प्रतियोगिनमेवोपलब्धिविषयं प्रथममाकाङ्क्षते स्वरसतोऽयं लोकइतिमन्वाद्यभावएव साध्यतइति स्यात्, अपिचेदमत्रात्यन्तमनुचितं, यत्सहसैवकपिलोभ्रान्तोहिरण्यगर्भोऽपिभ्रान्तइति भाषणं, नहिकपिलकणभुगादयोऽविदित परावरतत्वाः, येत्वशिष्टशिक्षणायैव तन्त्राणिवितेनुः यथारुद्रविष्णूपाशुपतपाञ्चरात्रे, तत्रकथं भगवति हिरण्यगर्भेऽपिभ्रान्तिं वक्तुं प्रसार्यताञ्जिह्वा सूत्रकारोऽप्येतेन शिष्टापरिगृहाअपि व्याख्याताइत्येववदिष्यत्य सत्कार्यवादं प्रत्यपि, अथकस्मादितरेषां केषामितिचेत् प्रधानादितरेषाम्महदादीनामनुपलब्धेर्लोके वेदेचेत्यस्ति भाष्यं, अत्रमहतः परमित्युपलंभेसति कथमनुपलंभः, अब्रह्मात्मत्वेनानुपलंभस्तु प्रधानस्यापि समानइति कथमितरेषामितीति चोदयति । अत्रास्तिभाष्यं प्रधानादितराणियानि प्रधानपरिणामत्वेन स्मृतौकल्पितानिनतानि वेदेलोकेवोपलभ्यन्तइति । तत्र प्रधानमानुमानिकमिति पूर्वसूत्रेणैव निराकृतमितीतरेषाञ्चेत्युक्तिरिति गृहीतव्यं दुष्परिहरश्च चकारवैयर्थ्यं श्रीभाष्यमतइति विज्ञेयम् ।

इति स्मृत्यनवकाशाधिकरणम् ॥

अथैतेनयोगः प्रत्युक्तइति ।

सूत्रं । अत्र वेदोदितयोगाभिधानमधिकाशंकाबीजमुक्तं भाष्ये । ईश्वरोपगमोमहापुरुषहिरण्यगर्भकर्तृकत्वश्चेत्युभयमपि समुच्चितं श्री भाष्ये । तत्र योगइति सूत्रेण सूचितमुपलक्षणीकृत्यैवमुक्तमिति वक्तव्यम् । भाष्यकारस्त्वीश्वरोपगमो गौतमादिस्मृति साधारणः । महापुरुषकर्तृकत्वमपि पाशुपतपाञ्चरात्रादि तंत्रसाधारणमिति नोपलक्षणीयमित्यभिप्रैति । अथेदं सर्वात्मना पोद्यमुतांशेनेति विवेचनीयं । यत्र यस्मिन्नंशेनविगानन्तत्र तन्नापोद्यमिति भाष्यम् । एवञ्चेत् सत्कारणवादमादायस्यात् कापिलमपि तंत्रं प्रमाणमिति पर्यनुञ्चते परे । स्यान्नामकानो हानिरितीवाह । " येनत्वंशेननविरुध्यते तेनेष्टमेव, सांख्य योगस्मृत्योस्सावकाशत्वमित्यनेन भाष्यकारः, एवमविशेषे किमतिदेशेनेति पुनःपर्यनुयुङ्क्ते लक्ष्मणार्यः । इदमपि प्रत्युत्तरयतीव सांख्ययोगस्मृत्योरिति समासकरणेनैव, अयमाशयः । नहि परैरुक्तइत्येतावतैवापवदनीयोऽस्माकमभिमतोप्यर्थः । यानि येनांशेन न विरुध्यन्ते तेनेष्टमेवास्माकन्तेषान्तन्त्राणामपि सावकाशत्वमित्यवश्यमेवोपेत्यं सूत्रकारेण । तत्र प्रधानकारणवादोमहदादयश्च तत्परिणामाविरुद्धा इत्यपोदिताः पूर्वाधिकरणेन । ततस्तत्वज्ञानोपायतया श्रुतावत्यादरेणोपपादितो यो योगश्च संन्यासश्च तावुभावपि सप्रपञ्चं प्रपञ्चयन्ती सांख्यस्मृत्यतिरेकेण योगस्मृतिः कथमप्रमाणं स्यात्तथाच तस्याः प्रामाण्ये सांख्यस्मृतिरपि प्रमाणमेवेत्याशंकां योगइत्यनेनोद्बोधयन् एतेन, येनांशेन विरुध्यते तदंश एव सांख्यस्मृतेरपि प्रत्युक्तत्वेन, योगोऽपि तदंशे प्रत्युक्तो वेदितव्यः, अंशान्तरेतु नसाऽपि प्रत्युक्ता, तथायोगोऽपि न योगांशे प्रत्युच्यते, एवमेव लोकायतिकोऽप्यविरुद्धांशे प्रमाणं भवान्ननिवार्यतइत्येतत्सर्वमत्रैव स्थित्वाऽह सूत्रकारइति, नन्वेवंसति शिष्टाकोपाधिकरणाविरोऽधः, शिष्टं वेदोपदिष्टन्नकोपयाति, न बाधते, यो

ऽहिंसाशमदमदयादिबोधकोंऽशस्तस्मिन्नविरुद्धं शाक्यादिस्मृतेरपि प्रामाण्यमितिचेन्न, शास्त्रपरिमाणत्वात्, परिगणितानिहि चतुर्दशेति धर्मशास्त्राणि, तत्र शाक्यादिस्मृतेरपरिगणनादितिहि तदधिकरणं, यदाहुर्वार्त्तिककाराश्शाक्योक्ताहिंसनन्नधर्मो नहि पूतं स्याद् गोक्षीरं श्वदृतौ धृतमितीतिचेन्न, वैदिकत्वात् कपिलादीनां, अन्यथा पूर्वतन्त्रस्यापि ब्रह्मांशे विगानेन धर्मांशेऽप्यप्रामाण्यापत्तेः, अथापि कथञ्चार्वाकोऽपीत्युच्यतइतिचेत्, बृहस्पत्युपज्ञत्वादिति गृहाण, शिष्टाकोपाधिकरणमुल्लङ्घ्याप्यविरुद्धांशे सर्वेषां प्रामाण्यस्य बादरायणेनाभ्युपगन्तुं शक्यत्वाच्च, किञ्च धर्मांशे तादृशनियमेऽपि मोक्षसाधनविज्ञानतदुपाययोरविरुद्धांशे सर्वस्यापि प्रामाण्योपगमे दोषानवकाशादमत्याख्येयमेवतत्र सर्वेषामपि प्रामाण्यम् ।

अत्र सर्वात्मनाऽयोगोऽप्रमाणमेव,ध्यानात्मकस्य योगस्य ध्येयैकनिरूपणीयस्य जगदुपादानतादि कल्याणगुणगणाकरध्येयविशिष्टवेषेणानिरूपणात् । तथाच भ्रांतिमूलाहैरण्यगर्भीस्मृतिरिति श्रीमान् न हि ध्यानस्यध्यानत्वान्मोक्षोपायत्वं, गर्दभध्यानादिषु व्यभिचारादिति सुदर्शनश्च । तदिदन्नसाधीयः । यतो ध्यानत्वेनैव मोक्षोपायतामाह भगवान् पतञ्जलिः । "यथाभिमतध्यानाद्वेति" नचैतदप्यप्रमाणम् । ईश्वरप्रणिधानाद्वा, क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरइति ध्येयविशेष विशिष्टवेषेणापि ध्याननिरूपणात् । नच तस्य जगदुपादानत्वेनानिरूपणादप्रमाणमेवेति वाच्यम् । निर्विशेषसाक्षात्कारस्यैव साक्षान्मोक्षोपायतया तदुपायस्य ध्यानस्य सर्वात्मनापि प्रयोजकत्वसंभवात् । तथाहि, ध्यानंतु चित्तैकाग्र्यहेतुः । तच्च प्रसीत्येवप्रयोजनं कथञ्चिदपि क्रियमाणं, इदमेवोक्तं, " यथाभिमतध्यानाद्वेति । तथाच ।

सुमेरुशिखरारूढः काकोऽपि कनकायते ।
तथाध्यानसमारूढो गर्दभोऽपि सुखायते ।

कथमन्यथा तदालंभेन शुध्येदवकीर्णीभिक्षुकः ।
इति योगप्रत्युक्त्यधिकरणम् ।

अथ तर्कावष्टंभेन प्रत्यवतिष्ठते सांख्यः,

नविलक्षणत्वादस्येति ।

अस्तिचिदंशोऽपि कार्ये सर्वत्र, तेन स लक्षणमपि भवति कार्यं कारणेनेति शंकां वारयति ।

तथात्वञ्च शब्दादिति ।

शब्देनैव पुनरुक्तंभितान्तां प्रत्याह ।

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यामिति ।

अयमाशयः, अभिमानएव जडेषु चितस्संबन्धः, तत्र जडमेव मृदादिघटादिजडात्मना विकासमापद्यते, पुनरपि परित्यज्य घटादि भावं पूर्वावस्थं भवति, नतु चिदात्मा चिदात्मनापि विकासमाप्तु-मीष्टे, तत्र कुतस्त्यमस्यजडात्मना विकसनं, नहि स्वाभिमानविषय कर्तृकं कार्यं स्वस्य भवितुमर्हति, अतिप्रसंगादिति ।

सिद्धान्ती तु, किं केषु चिदेवाभिमानिनमुपैषि, उत सर्वत्रापि, आद्ये सचेतनाद्विचेतनं विचेतनाच्च सचेतनमुत्पन्नं पश्यामः, द्वितीये-तु स्पष्टास्पष्टचेतनतया द्वैविध्यमवश्यमुपेत्यं, तत्रापि स्पष्टचेतनाद-स्पष्टचेतनमितरस्माच्चेतरदुत्पन्नं पश्यामः, अतो नायमस्ति निर्बन्ध-स्सर्वात्मना सदृशाभ्यां भाव्यं कार्यकारणाभ्यामितीत्याह ।

दृश्यतेत्विति ।

ततस्तु सांख्ये चिच्चेत्ये परस्परं व्यावृत्तस्वरूपे, न मनागप्य-स्ति तयोस्स्वरूपे परस्परं वस्तुतस्सांकर्यं दृश्यतेतु व्यवहारे मिथुनी-भूयोभयं, तत्र कथञ्चितश्चेत्योत्पत्तिः, तथासति प्रागसिद्धिस्यादुत्प-त्तेश्चेत्यमित्याक्षिपति प्रत्याह सिद्धान्ती ।

नप्रतिषेधमात्रत्वादिति ।

अयमाशयः, वस्तुनोऽवस्थान्तरापत्तिः कार्यमित्युभयोरप्यविशिष्टं, सलक्षणादेवकार्यमित्यत्रैव विवादः, तत्र कथं प्रागसत्वं कार्यस्य, ततः प्रतिषेधमात्रमेवेदं, न ह्यस्य प्रतिषेधस्य प्रतिषेध्यमस्तीति, यदि व्यवहारो मिथुनीभावाधीनस्तदा कार्यकारणभावोऽपि कुतस्तदधीनो न स्याद्व्यावहारिकत्वाविशेषादिति, यदि चेत्यश्चिदात्मना वर्त्तेत तदाचितोऽपि चेत्यात्मता स्यात्तुल्यन्यायादिति स्वाभिसन्धिरुद्घाट्यते पराभिसन्धिमजानता ।

अपीतौ तद्वत्प्रसंगादसमञ्जसमिति ।

जडत्वप्रसंगाच्चिन्मात्रं ब्रह्म जगतोयोनिरिति तव मतमसमञ्जसमित्यर्थः, स्थितौतु चिच्चेत्यश्चेत्युभयं विभाव्यते, अपीतौतु चेत्यस्य चिदात्मतायामितरस्यापीतरात्मताऽनिवार्येत्यभिमानेनापीति ग्रहणमिति गृहीतव्यं, अत्यन्तसमञ्जसेऽसामञ्जस्य प्रसञ्जनमसहिष्णुरिनाह सिद्धान्ती "नतु दृष्टान्ताभावादिति" स्वाभिसन्धिमुद्घाटयन्, दृष्टानुसारेणैव ह्यप्ययमपि कल्पयसि, तत्र कुतो दर्शनकालं परिहरसि, दृष्टेषु यादृशीरितिस्सैव सर्वापीतावपि भवति, दृष्टा हि विलक्षणरज्वात्मना स्थितस्यैव सर्पस्योत्पत्तिः, अथापि नत्वपीतौ तद्वद्भावइत्यर्थः, तथाच भाष्यं "स्थितावपि समानोयं प्रसंगः, तत्र यः परिहार" इति । अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वं, नतु कारणस्य कार्यतमत्वमितिच, यथा सर्पस्य रज्जुरात्मा भवति, त्रैकालिकत्वात् , नतु रज्जोस्सर्पः, रज्जुकालाव्यापनात्, नहि कस्यचित् कश्चित् कदाचिदात्मा भवति सत्यपि स्वस्मिन्, अतो यथान रज्जोस्सर्पवद्भावएवन्नचितश्चेत्यवद्भावइत्यत्र दृष्टान्तस्य सर्पस्यासंप्रतिपन्नस्य साध्यतया दृष्टत्वादित्यनुपन्यस्य दृष्टान्तस्य भावाद्भवनादित्युपन्यासः, तथाच भवत्यत्र दृष्टान्तइति भावशब्देन स्वाभिसन्धेरुद्घाटनं, परिहृत्याप्येवं स्वपक्षसाधारणमेव परेणो-

द्भावितन्दोषमाचार्योऽपि मृदुर्हि परिभूयते, विप्रलंभप्रवृत्तानामित्यादिनीतिमनुसृत्य प्रत्यावर्त्तयति तथैव केवलतर्काधीनो दोषो नोद्भावनीयोवैदिकं प्रतीत्येतस्यार्थस्याभिव्यञ्जनायाभ्युपगमवादेन ।

स्वपक्षदोषाच्चेती ।

त्युपरितनं भाष्यं, तदुपरि,

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति
चेदेवमप्यविमोक्षप्रसंग इति सूत्रं ।

अहो किमिदमस्य गांभीर्यं, यदिदं कथञ्चिदपि नविमुञ्चति सांख्यं, अस्य ह्ययमर्थः, नहि भवदीयस्तर्कस्समाधेयो मया जात्यैवाप्रतिष्ठानदोषदुष्टत्वात्, ततोऽपि नमन्मतदूषयितुन्त्वन्मतं साधयितुं वा शक्यते त्वया तर्केण, यथा स्वपक्षदोषाच्च, एवंहि तर्कोऽप्रतिष्ठितः, यथा मन्मतदूषकोऽपि समाहितस्त्वन्मतसाधकश्च पराहतो मया त्वदुत्प्रेक्षितस्तर्कस्तर्कान्तरेण, अतो नोद्भावनीयस्तर्कस्स्वपक्षसाधको वा परपक्षदूषकोवा त्वया, किन्तु तूष्णीमेव गन्तव्यमित्युक्ते, आहापरः, अन्यथानुमास्यामहे वयं स्वपक्षपरिरक्षणाय, कथं स्वसिद्धान्तविरुद्धमन्यथानुमीयतां भवतेतिचेन्न, प्रकारभेदेनापि दूषितस्य स्वपक्षस्य प्रतिष्ठापनावश्यंभावात्, तर्काप्रतिष्ठानादप्यन्यथानुमानस्यादोषत्वात्तार्किकपक्षस्य, अतोऽन्यथानुमेयमेव मयेति, तत उत्तरमाह सिद्धान्ती, "एवमप्यविमोक्षप्रसंग" इति स्वसिद्धान्तविरुद्धमन्यथानुमेयत्वादेवनानिर्मोक्षप्रसंगः, किन्तु तर्काप्रतिष्ठानादप्यन्यथानुमेयामितिचेदप्यनिर्मोक्षप्रसंग इति, एवञ्च, तर्काप्रतिष्ठानादपि, तर्काप्रतिष्ठानादप्यन्यथानुमेयं, तर्काप्रतिष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्षप्रसंग इति त्रियापरिणतो भवत्ययं योगश्शृंखलान्यायेनाविश्शृंखलमिति भाष्यान्निर्गळितोर्थः, तत्रैवंसति, तर्काप्रतिष्ठानादित्यारभ्यानिर्मोक्षइत्यन्तन्नैकं सूत्रं, किन्तु तर्काप्रतिष्ठाना-

दपीत्येकं सूत्रं, तदुपर्यपरं, ऐकसूत्र्ये सूत्रकारशैलीविरोधः, तथा हि, प्रयुक्तहेतुशैथिल्याशंकापरिहारौहि सूत्रान्तरेण कृतौ दृष्टौ, यथा, ईक्षतेर्नाशब्दं, गौणश्चेन्नात्मशब्दात्, आनन्दमयोऽभ्यासात्, विकारशब्दान्नेतिचेन्न प्राचुर्यात्, ज्ञेयत्वावचनाच्च, वदतीतिचेन्न प्राज्ञोहि प्रकरणादित्यादौ, तथात्रापि भवितव्यमित्येवं सूत्रभेदसाधनमेतं सूत्रकारीयगांभीर्यानवबोधमूलकं, यतोऽनुधाव्यानुधाव्यविद्रावयति सांख्यन्तदेवतर्काप्रतिष्ठानं स्वयमप्यवलंबमानन्तेनैव तर्काप्रतिष्ठानेनेति विलक्षणैषा तार्किकप्रधानमल्लायोधनपरिपाटीति न ज्ञातं, नचोदाहृतस्थलेष्विव प्रयुक्तहेतुशैथिल्यमाशंकितं, किन्तु तमेवादाय स्वपक्षसाधनमित्येतदपि न ज्ञातं, अतः पूर्ववादिनस्तर्काप्रतिष्ठानानवलंबनेनास्त्येवावसरोऽन्यथानुमानस्यात्रेति नशक्यमेव तदुक्तरीत्या सूत्रभेद साधनं गीर्वाणगुरोरपीति विज्ञेयं, उदाहृतेषु सर्वत्र पञ्चम्यन्तेनैवावसानं; अत्रतु प्रथमान्तेनेत्यतोपि विलक्षणैवेयं परिपाटीतिविज्ञेयं।

एवं, प्रतिषेधमात्रत्वात्, सालक्षण्यनियमप्रतिषेधमात्रंहि पूर्वसूत्रेऽभिप्रेतं, नतु कारणात्कार्यस्य द्रव्यान्तरत्वं, तत्र कथमसत्कार्यं प्राग्प्रसञ्जयसीति विवरणमपि परेषां परिहासास्पदमेव, यतो नैतादृशी रीतिर्दृश्यते प्रधानमल्लायोधने, यत्तव शिरस्येवहिमया ताडितं, नतूरस्यपि, तत्र कथन्तत्रापि ताडितमित्यभिप्रेत्य प्रवृत्तोसीत्यनुनयेन संभाषणं, एवन्तु दृश्यते, यथाकिल किमंग स्वाभीष्टे प्रतिहते तत्परित्राणाक्षमः पराभीष्टं प्रतिषेधसि न प्रतिषेद्धुं शक्नोषि, ततः प्रतिषेध्यालाभात् प्रतिषेधमात्रएवायन्ते प्रतिषेधइति, विप्रकृष्टस्वाभिमतार्थप्रपञ्चनपरत्वापेक्षया सन्निकृष्टपरोक्तार्थदूषणपरत्वस्य युक्ततरत्वाच्च। एवमेवापीतौ अपीति पूर्वकसूत्रेचौतद्वत्प्रसंगइति विवरणमपि क्लिष्टतरतया हेयमेव ।

एवन्नविलक्षणत्वाधिकरणम् ।

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ।

कोऽर्थः, ब्रह्मणस्सर्वशरीरित्वे जीववद्भोक्तृत्वापत्तेस्तयोर्भोक्तृत्वाभोक्तृत्वस्वभावविभागोनस्यादिति चेत्, स्यादेवायं विभागो लोकवत् । यथा लोके राजशासनानुवर्तनातिवर्तनाभ्यां सुखदुःखभोक्तृत्वेपि प्रजानां शरीरिणोऽपि राज्ञोनतद्भवति तद्वत् शरीरित्वमभोगहेतुः, किन्तु पुण्यापुण्ये, नतदस्ति भगवतीति भावइति श्रीभाष्यम् । तेअपिशरीरित्वेनस्यातामितिचेन्निरुत्तरमिदं। ब्रह्मणः कारणत्वाक्षेपसमाधानप्रस्तावे शरीरित्वनिबन्धनदोषादोषविचारोऽप्रसक्तः, किञ्चात्र भोगापत्तेरित्येव वक्तव्यं, नतु भोक्त्रैक्यापत्तेरित्यर्थकतया भोक्त्रापत्तेरिति, भोक्तुरापत्तेरिति संभवदर्थान्तरमपि नत्यक्तुं युक्तं, यदत्र संभोगप्राप्तिरित्यनेन पौनरुक्त्यमाशंक्य शरीरस्थितिमात्रनिबन्धना सा इयन्तु शरीरित्वनिबन्धेनेति परिहृतं, तदपरिहार्यमेव, यतो नतावन्मात्रेण तत्राप्यापत्तिः, यतो न वैशेष्यादिति परिहारः, तच्च शारीरात्, अतस्ततोऽवैशेष्यमेव तत्रापि पूर्वपक्षे बीजं, अहह तत्राप्येवमेव व्याख्यातवतां कथमत्रैवं व्यामोहो भवतां स्मृतवतामपि तदर्थमिति विस्मयामहे, राजदृष्टान्तोऽपि नास्मन्मनो रञ्जयतीति भोक्त्रापत्त्यधिकरणं, अथ

तदनन्यत्वमारम्भणशब्दादिभ्य इति सूत्रं

किमनेनाभेदस्साध्यते, उत भेदो निरस्यते, किञ्चातः, यद्यभेद स्साध्यते, यदि वाभेदो निरस्यते, एतदतो भवति, यत्कार्यकारणतादात्म्यायत्तदोषपरिहाराय तयोरभेदसाधनं सृगालवनात् प्रभीतस्य व्याघ्रवनप्रवेशइति, यच्च तयोर्भेदमादाय परिहार्याय तन्निरसनं क्षुधार्त्तस्य प्रधावनमिति, अत्राह श्रीमाल्लक्ष्मणाचार्यः, नेदं प्रसक्तदोषपरिहाराय प्रवृत्ते सूत्रं, किन्त्वसदिति चेन्नप्रतिषेधमात्रत्वादित्यत्र परोद्भावितदोषपरिहारायोपात्तमभेदमिदानीन्निरस्यभेद-

वादिनो वैशेषिकादीन् साधयितुमिति, अत्रोच्यते, तत्र भवता प्रतिषेधमात्रं हि पूर्वसूत्रेऽभिप्रेतं, नतु द्रव्यान्तरत्वं, द्रव्यैक्यन्त्वस्त्येव, न परित्यक्तमित्युक्तं, तत्र यदनभिप्रेतं स्वपक्षबाधकमिति सिद्धान्तिनोऽभिप्रेतश्च वैशेषिकादेस्तदेव निरस्यतान्द्रव्यान्तरत्वं, किमभेदसाधनेन, सामर्थ्याच्च, भेदनिरसनएवहि समर्था भवन्ति प्रयुक्ता आरम्भणशब्दादयो हेतवः, अयि भोः कार्यस्य प्रागसत्वप्रसङ्गनपरिहारायाभेदोवा साधनीयो भेदोवा निरसनीयइत्येतन्निपुणन्निभालय, नन्वभेदएव साधनीयः, साधितंच तस्मिन् प्राक्कारणस्य सत्वेन कार्यस्यापि सत्वं सिध्यतीति चेन्न, तत्र कारणे कार्याभेदसाधकः कोमळप्रज्ञः, यतः कारणगतो धर्मस्तत्रैव किञ्चित् साधयितुन्ततएव किञ्चिद्वारयितुं वा शक्नोति, नत्वन्यत्रान्यस्माद्वा, यथातद्गतः कार्याद्भेदस्तत्रचैतन्यं साधयति. ततो जडत्वं वा वारयति, तत्र कारणगतः कार्याभेदः कथं कार्यस्य प्राक्सत्वं साधयेत्, व्यधिकरणत्वात् नचान्यत्वाभावात् कथं व्यधिकरणतेति वाच्यं, कस्य कुतोऽन्यत्वान्निरस्यते, नच कारणस्य कार्यात्, पूर्वदोषापत्तेः, अशक्यत्वाच्च, नहि पूर्वकालिकमवरकालिकादन्यन्नस्यात्. यदिन स्याच्चदा कारणं प्रागसत्, कार्यादनन्यत्वात्, कार्यवदिति कारणमपि ग्रस्तं हि स्यात् प्रागसत्वपिशाचिकया कारणे कार्यादभेदस्य साधने भेदस्य वा निरसने नच किमनया वाचा पश्चिकया, कार्यस्य हि कारणादभेदस्सिषाधयिषितइति वाच्यं, यतस्तदाकार्यमेव कारणं, कारणमेव कार्यमिति स्यात्, स्यान्नाम कानो हानिरिति चेन्न, तथासति यथा कार्यस्य कारणत्वात् प्राक्सत्वमेवं कारणस्यापि कार्यत्वादवरत्वेनप्रागसत्वंहि स्यात्, अतोऽन्यत्वमेव निरसनीयं कारणात्कार्यस्य, यद्बलात्प्रागसत्वं प्रसजति, ननु निरस्तेऽन्यत्वे कारणस्यापि हि स्यात् प्रागसत्वं, नस्यात्, यतःकारणस्य कार्याद्भेदमुपगच्छामः, माभेदं, कार्यस्यापि कारणान्नाभेदं ब्रूमः, किन्तु

भेदमेव व्यासेधामः, अथ निरस्ते भेदेऽभेदएव स्यादिति चेन्न, यतो न मृदो घटोऽभिन्नः, कदाचिदेव घटइत्युपलब्धेः, नहि मृदेवसन् घटः कदाचिदेव घटइत्युपलभ्येत, अतोऽवरोऽयं घटो नमृदोऽभिन्नः, नापि भिन्नः, भावे चोपलब्धेः, नहि घटाद्भिन्नः पटो घटाभावएव भवति, घटोपलब्धावेवोपलभ्यते, घटस्तु मृद्भावएव भवन्मृदुपलब्धावेवोपलभ्य मनोनमृदोऽन्योभवितुमर्हति ।

अथ कथन्तदपि नततोऽन्यदपि नेति स्यात् । यदि स्यात्तदपि स्यात्ततोऽन्यदपि स्याल्लाघवादिति चेन्नैवंस्यात् । कुतः । अवरत्वान्नतत्स्यात् । न हि तदेवततोऽवरंभवितुमर्हति । एवन्तर्हि ततोऽन्यदेवस्यात् । नस्यात् । सत्वाच्च प्राक्तदात्मनाऽवरस्य, नहि कारणात्मनासत्वे विप्रतिपद्यसे त्वंकारणादवरत्वेच कार्यस्य, नचास्ति लाघवं । यतस्तत्वमुपेयताततोऽन्यत्वं पक्षे तत्वमुपमृद्यैव साधनीयं । एवन्ततोऽन्यस्मिन्नपि तत्वं, नैवम्मयातत्वाभावमुपमृद्यैव तदन्यत्वन्निरसनीयं, तस्मिंस्तदनिरासात् । तदनन्यत्वमुपमृद्यवातत्वमपि निरसनीयं । तदन्यस्मिंतदनिरासात् । अथकथन्ततोऽनन्यत्ततएवावरं स्यात्, नहि तत्तादृशन्तथाभवतीति चेत्तत्वाभावादिति गृहाण, अथकथन्तत्वाभावे तदात्मनासत्स्यात् तद्धितथास्यादिति चेत्, यतस्ततोऽन्यन्नततएवेति गृहाण । किञ्च कथन्तदात्मनासत्वे तत्वं हेतुः ततोऽन्यस्यापि भवतातदंगीकारात्, कथंवा ततोऽवरत्वे तदन्यत्वं हेतुः । तस्यैवसतोभवता तदंगीकारात् । भवति तदन्यत्वाभावस्तदात्मनासत्वेहेतुः, तदन्यस्मिन्मयातदनङ्गीकारात्, एवन्तत्वाभावोऽपि भवति ततोवरत्वेहेतुः, तस्मिन्नेवमयातदनंगीकारात्, एतेनभेदमादाय निरसनीयोदोषः कथं भेदनिरासेन निरस्येतेति निरस्तं, यतोवयन्नाभेदमुपगच्छामो भेदमेवव्यासेधामः, ततोऽभेदानुपगमेन दोषास्पर्शात्, किञ्चेमानिविमर्शनीयानि सूत्राणि कथं प्रवृत्तानीति, तत्रैवं हितानि विमृष्टान्यस्माभिः, किंविलक्षणात् कार्य

स्योत्पत्तिंवारयसि उततथासतितस्य प्राक्सत्वंप्रतिषेधसि, अथवा-तस्मिन् सतिकारणे दोषमुद्भावयसीति त्रिधाविकल्प्य, नाद्यः, दृश्यतेहि, नापिद्वितीयः, परिणामत्वमेवहि प्राक्सत्वेहेतुः, सतुदृश्यते, तत्रकथमिदं प्रतिषेधसि, यतस्त्वामपि स्पृशति, नहित्वं प्रागसत्वमुपैषि, ततोनास्ति तव प्रतिषेधस्य प्रतिषेध्यमिति, नचापि तृतीयः, नहिकारणस्यकार्यवत्वं प्रसजत्यपीतौप्राक्सत्वमात्रेण कार्यस्य, कारणात्मनैवसत्वात्, नापिसर्गेयथाकारणे कार्यभावमापन्ने कार्येकारणगुणसंक्रमणमेवमपीतौ कार्येकारणभावमापन्ने कार्यवत्वं प्रसजतिकारणस्य, कार्यात्मता प्रहाणस्यैव प्रतिसर्गत्वात् नाप्यभेदात्तद्वत्वं अभेदेसादृश्याप्रसक्तेः नचतस्यैवायं कार्यगतोदोषइति प्रसजतीति वाच्यं, सर्गेपि तुल्यत्वात्, नचतथैवस्यादिति वाच्यं, दृष्टान्तभावात् । सन्ति हि दृष्टान्ताबहवोऽस्मन्मतानुकूलाः । स्वपक्ष दोषाच्च । तर्काप्रतिष्ठानादपीति । ततो भेदमेवनिरसितुं प्रवृत्त इदं सूत्रं पूर्वपक्षिणापि दोषोद्भावनायोपात्तमिति वज्रलेपायितम् । यतस्ततः प्रसंजितं लोकवदिति कथञ्चित्प्रतिक्षिप्यदोषं पुनरपि प्रतिक्षेपायप्रवृत्ते तदनन्यत्वमारंभणशब्दादिभ्य इत्यादिनेति ।

नचैवं वेदान्तावष्टंभेन प्राक्सत्वं समर्थयितुं शक्यते कार्यस्य। यतोऽसदेवेदं कार्यं प्रागुत्पत्तेर्व्यपदिशति श्रुतिरिति चेन्नधर्मान्तरेण वाक्यशेषात् ॥

इत्यारम्भणाधिकरणम् ।

जडोपादानमपि ब्रह्म न जाड्येन स्पृष्टं, चिदेकोपादानकस्यापि न जडा जडविभागोऽनुपपन्नः प्रपञ्चस्येत्येतावति साधिते, सर्ग एव नोपपद्यते, स्रष्टृव्यतिरेकेण भोक्तुरेवाभावात्, सचिववैधुर्यात्, अवश्यदुष्टत्वात्, करणविकलत्वात्, प्रयोजनाभावात्, वैषम्यनैर्घृण्यप्रसंगाच्चेत्याशंकां पर्यहार्षीत् बादरायणः, तत्राभेदव्यपदेशप्रसक्तदोषपरिहाराय भेदव्यपदेशमात्रमेवोपन्यसनीयं, अधिकंतिव-

त्यधिकं, नचाऽभेदव्यपदेशादभेदइव भेदव्यपदेशात् भेदोप्युपेयएवेति व्यपदेशायेदमिति वाच्यं । अर्थसिद्धत्वात्, नच नायं भेदव्यपदेशोऽन्यथासिद्धइति शंकनीयं, यतो जीवादधिकं सर्वज्ञं स्रष्टृब्रह्मेत्येवमर्थायस्यादिति वाच्यं । सर्वप्रमाणविरुद्धाभेदव्यपदेशस्याप्यनाशंकमेव पूर्वपक्षबीजत्वे कुतोभेदव्यपदेशेऽन्यथासिद्ध्याशंकेति, एवन्तर्हि स्वेतरनिखिलप्रमाणोपमर्दकचिन्मात्रब्रह्ममात्रप्रवणवेदान्तप्रमाणराजपरायणोऽयं भगवान् बादरायणः कथमभेदव्यपदेशप्रतिद्वंद्वीकुर्यात् भेदव्यपदेशं, ततो जीवादधिकं सर्वज्ञन्ततस्ततोऽन्यत् ब्रह्मस्रष्टृ ब्रूमो वयं, ततो नायन्दोषः, कथमेवमुच्यते ब्रह्मैकत्वपरायणेन भवतेतिचेत्, भेदव्यपदेशादित्याह, तथाच व्यावहारिकोऽयं सर्गस्सोपाधिकभेदनिबन्धनः, परमार्थतस्तु चिन्मात्रमेव सर्वमित्येवमर्थं स्यात्, नचाधिकं व्यापकन्ततोऽन्यदित्येवमर्थमेव स्यादिति वाच्यं । सिद्धवत्कृत्यैव जीवस्याणुत्वमेवं वक्तव्यं, तत्र हिताकरणादिदोषप्रसक्तिरितिचेन्नाधिकव्यपदेशादित्येव वक्तव्यत्वात्, किमर्थमियान्वा क्लेशः, भेदसिद्धेरित्येतावन्मात्रस्य कर्त्तव्यत्वादितिचेत्।

ॐएवंस्थिते, अधिकमन्यदेव जीवाद्ब्रह्मेतिश्रीभाष्यब्रसूत्रानुगुणं भवति । अस्त्वेतत्, असदितिचेदित्यत्र, द्रव्यैक्यमस्त्येव, तदनन्यत्वमित्यत्र, तदेवानन्यत्वमाक्षिप्य समाधीयतइत्यभिहितवतात्राश्मादिवच्च तदनुपपत्तिः, यथात्यन्तहेयानामश्मकाष्ठलोष्टादीनां ब्रह्मणैक्यन्नोपपद्यते तथा खद्योतकल्पस्यास्य जीवस्यापि तेनैक्यन्नोपपद्यतइति कथं तद्विरुद्धमभिधीयतां श्रीभाष्यकारेणेतिचेत्, एवमेवानेकत्राभिधीयते तेन, किं कुर्मो वयं, अस्तु सिद्धान्तिनापि पूर्वं भेदाभेदौ निराकृतवता कथमत्र तदुभयव्यपदेश ऊरीक्रियतामिति चेन्न, तत्र जडस्यानिर्वचनीयत्वव्यवस्थापनात्, अत्र जीवस्य पारमार्थिकत्वव्यावहारिकत्वाभ्यां भेदाभेदोभयोपगमादित्यदोषात् अस्त्वथाप्युपसंहारदर्शनान्नेति चेन्नक्षीरवद्धीत्युक्तवता कथं सर्वोपे

ताचेत्युच्यतां सूत्रकृतेतिचेत्, यतोऽनन्य,वमित्यन्यत्वन्निराकृतन्तेनेति गृहाण। अस्तु कुतस्त्रीलिङ्गनिर्देशः, देवतात्वपरिस्फूर्त्यै, किन्तेन, व्यावहारिकोयं सर्गः, यतआराध्यादेवताराधकानां कृते सृजति प्रपञ्चमिति सिध्यति तेन, अथापि सर्वोपेतेयं प्रकृतिरित्यनेन कुतो नोपक्षीणं स्यात् प्रकृतिश्चेत्युक्तत्वात्, तत्र कुतो देवतात्वपरत्वयोः प्रसक्तिरितिचेन्न, देवादपीति सन्निहितमुक्तत्वात्, तर्हि सर्वोपेतश्चेति वक्तव्यं, न वक्तव्यं, गौरवापेक्षत्वात्, नहि परादेवतेत्युक्तिरिव परो देवइत्युक्तिगौरवमाविष्कृणोति, अतएव, भगवती श्रुति "त्वं वा अहमस्मि भगवो देवते" इति शुद्धस्य शक्तिरेवेदं स्रष्टृ ब्रह्म, नतु शुद्धमेवेत्यर्थाविष्करणार्थश्च, अतएव सर्वोपेतत्वव्यतिरेकेण सर्वधर्मोपपत्तेश्चेतत्येदपिभवति सार्थकं,सर्वशक्त्युपेतद्वारा सर्वधर्मोपपत्तेरित्यर्थकत्वात्, यदत्राद्वैतभाष्यतद्विवरणानुवादतत्खण्डनाभासाभ्यां श्रीभाष्योदरप्रपूरणन्तदद्वैतसिद्ध्यादिना चूर्णीकृतमिति न पृथक्प्रयत्नार्हं ॥

इत्यानुगुण्यसिद्धौ द्वितीयाध्यायस्य प्रथमः पादस्समाप्तः ॥

॥ द्वितीयाध्यायस्य द्वितीयः पादः ॥

सर्वधर्मोपपत्तेश्चेति स्वपक्षेनुपपात्तिं परिहृत्य परपक्षेतामुद्भावयति ।

"रचनानुपपत्तेश्चनानुमानमि" त्यादिना ।

समयपादोयं, यतस्समया अत्र परीक्ष्यन्ते तर्कपादश्चायं, यतस्तार्किकाएवात्रपरीक्ष्यन्ते, नतु वैदिकः, तदिदमनुमानमित्यनेनोपक्षिप्तं, यद्यपिवादकथारूपमेवेदं कात्स्न्र्येन शास्त्रन्तत्वनिर्धारणस्यैव प्रधानत्वात्, अथाप्यवान्तरार्थपर्यालोचनया पूर्वपक्षिणोजल्पः पूर्वः पादः । यतोविजिगीषयैव प्रवृत्तोऽसदित्युद्भावयामास दोषं स्वपक्षसाधारणमेव पूर्ववादी, तदिदमभिव्यञ्जयामासाभ्युप-

समवादेन वैतण्डिकतामप्य वलम्बमानस्स्वपक्षदोषाच्चेति सूत्रकारः, अयन्तुसिद्धान्तिनोजल्पः, तदिदमभिव्यञ्जयिष्यति स्वपक्षसाधन-उदासीन इवाभ्युपगमेप्यर्थाभावादिति, तृतीयतुरीयौ पूर्वपक्षिणोवितण्डेति विवेक्तव्यम्।

एवञ्चात्रविजिगीषु कथायांरचनानुपपत्तेश्चनानुमानं, प्रवृत्तेश्चानुपपत्तेनानुमानमित्यनुपपत्त्यभ्यासआवश्यकइत्यकामेनाप्यंगीकार्ये, तत्रैवंसति, चेतनानाधिष्ठितस्य कार्यारम्भानुपपत्तेर्दर्शनात्तदधिष्ठितस्य तदारंभप्रवृत्तेश्च दर्शनान्न प्रधानं कारणमित्यैकसूत्र्याभ्युपगमेनान्वयव्यतिरेकाभ्यां प्रधानकारणनिराकरणपरतया विवरणं प्रकरणानवबोधनिबन्धनं, अनुपपत्तेरेव हेतुत्वसंभवे तद्दर्शनपर्यन्तानुधावनं वृथानुधावनं, अशक्याच द्रष्टुमारंभानुपपन्नता, अनधिष्ठित रचनानुपपत्तिग्रथनेनैवाधिष्ठितप्रवृत्त्युपन्याससिद्धे र्नपृथक्प्रयत्नापेक्षा, चकारेणैवप्रवृत्तिसमुच्चयसंभवेनप्रवृत्तेश्चेति पुनर्ग्रथनायोगश्च, अथापि प्रथमश्चकारोऽनतिप्रयोजनः। अनुपपत्तेरित्येकदेशानुवर्तनभयेन दर्शनादित्यध्याहरणन्तु सृगालवनभीतन्यायमेवानुरुणद्धि। अतः प्रथमं पार्श्वबन्धं शिथिलीकृत्य तदनुषंगेणैव पश्चान्मूलबन्धं शिथिलीकरोतीत्यस्मद्भाष्यार्थमालोचयतामवहेळनास्पदमेत्र श्रीभाष्यकारीयं विवरणं, ततो

व्यतिरेकानवस्थितेश्चानपेक्षत्वादिति सूत्रं।

अत्र को व्यतिरेकः, अत्राह श्रीमान्, व्यतिरिच्यतइति व्यतिरेकोऽन्यः, सच सर्गादिति प्रतिसर्गलाभः तथाचानपेक्षस्य कारणत्वे प्रतिसर्गानवस्थितिश्च प्रसजतीति, यद्यपि रमणीयएवायमर्थः, तथापि लघूकृतं सूत्रं, वयन्तु वदामः, ननूपपद्येतेएव प्रधानस्यापि रचना प्रवृत्ती, यतस्तः पुण्यापुण्ये तन्निमित्ते इतिचेत्, नैवं भवता वक्तुं पार्यते "निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततःक्षेत्रिकवदि"

ति प्रतिबन्धापनयएव पुण्यापुण्यकार्यमित्यभिहितवता, ततोऽनपेक्ष-मेव स्वकार्ये प्रधानं, तस्मान्नास्त्येव स्वव्यतिरिक्तं प्रयोजकमवस्थितं प्रधानस्य, तदभावाद्व्यतिरिक्तयोः परस्परप्रतिद्वंद्वीभूतयोस्सर्गप्रति-सर्गयोर्नास्त्यवस्थितिर्नियतकालस्थितिः अतश्च न प्रधानं कारण-मिति एवञ्चानपेक्षत्वमपि प्रसाध्यव्यतिरेकानवस्थितिरप्यावर्तनीयेति भवति। पुण्यापुण्ययोस्तु जडत्वात् सदैव प्रतिवन्धापनयेन भावित-व्यं, सिद्धान्ते तु न कोऽपि दोषः, तदुक्तमभियुक्तैः, फलसंविभ-क्तया हि कर्मभिरात्मानं पिप्रीणंति सप्रीतोऽलं फलायेति शास्त्र-मर्यादेति।

इति रचनानुपपत्त्यधिकरणम्।

महद्दीर्घवद्वाह्रस्वपरिमण्डलाभ्याम्।

असमञ्जसमित्यनुवर्त्तते। वाशब्दश्चार्थे द्व्यणुकपरिमण्डाला-भ्यान्त्र्यणुकोत्पत्तिवदन्यदपि कणादाद्युपगतमसमञ्जसमित्यर्थः, नचेदं ब्रह्मकारणवाददूषणपरिहारपरं सूत्रं, तस्य पूर्वपादे कृतत्वेन कृतकरतापत्तेरिति श्रीभाष्यं। सांख्योद्भावितस्यैव दोषस्य पूर्वमु-खतो विशिष्य परिहारेणेदानीं विशिष्य काणादवादपरीक्षायां स्वे-तरसर्वमतोपमर्दनपूर्वकं स्वमतं व्यवस्थापितमित्यभिमन्यमानस्य तस्यात्र प्रसंगादेवाशंकायास्तत्परिहारस्य च युक्तत्वात् कुतः कृत-करतानाम, कणादादीत्याद्यपि कटु। अथ महद्दीर्घवद्वेत्यत्र कुतो नात्वं, कथमिदञ्चोद्यंचोद्यतां पारमर्षे ब्रह्मसूत्रे, अस्तिचेत् प्रयोजनं वक्तव्यं, अत्रास्ति भाष्यं। द्व्यणुकसहितो वा परमाणुः कार्यमार-भते, यथावा द्व्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घंच त्र्यणुकञ्जायते, नाणुनोह्रस्वमिति च अयमस्याशयः द्व्यणुकशब्दगतोऽणुशब्दः परि-मण्डलवचनो भवति। त्र्यणुकशब्दगतस्तु द्व्यणुकवचनइति वक्तव्यं, द्व्यणुकत्रयारब्धत्वोपगमात्त्र्यणुकस्य। तथाचद्व्यणुकपरिमण्डलसाभ्या-

रणोऽणुरिति भवति । तत्र त्र्यणुकइति द्व्यणुकत्रयघटितः, नपरिमण्डलत्रयघटितइत्यत्र किंवाविनिगमकं, इदमेवोक्तं यद्यपि बहवः परमाणवः, बहूनि वा द्व्यणुकानीति भाष्येण, तत्र परिमण्डलत्रयपक्षे त्र्यणुकस्त्र्यणुकएव, द्व्यणुकत्रयपक्षे तु षडणुकोऽपि स्यात्, द्व्यणुकसहितो वा परमाणुरिति ह्रस्वपरिमण्डलाभ्यामित्यस्य विवरणं, तत्र ह्रस्वं च परिमण्डलंचेति समासे ह्रस्वेन परिमण्डलेन च घटितइति भवति । तत्र ह्रस्वस्य द्व्यणुकत्वेन त्र्यणुकइतिवदणुत्वेन च द्व्यणुकोऽपि भवति त्र्यणुकः, एवं द्व्यणुकद्वयारब्धस्यापि द्व्यणुकत्वसंभवेन पञ्चाणुकोऽपि भवति, द्व्यणुकेन सहिते परिमण्डले इति सौत्रपदसमासेतु चतुरणुकोऽपि भवति अयश्च पक्षो द्व्यणुकसहितो वेति वाकारेण द्योतितो भाष्ये, एवमव्यवस्थितरूपं भवति· त्र्यणुकमिति सौत्रेण वाकारेण प्रद्योतितोऽर्थः, एवमत्र पञ्चपक्षाः, तत्र द्व्यणुकत्रयकल्पस्तदभ्युपगतइति प्रथमः, परिमण्डलत्रयपक्षो द्वितीयः, सच सूत्रे ह्रस्वपरिमण्डलाभ्यां वेति वाकारेण विकल्पितः, ह्रस्वेन परिमण्डलेन चेति तृतीयः, ह्रस्वाभ्यां परिमण्डलेनचेति चतुर्थः, ह्रस्वेन परिमण्डलाभ्याञ्चेति पञ्चमः, तदिदं सर्वं ह्रस्वत्रयपक्षएव तदभ्युपगते ह्रस्वपरिमण्डलाभ्यामित्यनेन विकल्पितमिति वेदितव्यं ।

द्व्यणुकपरमाणुभ्यामिति विहाय ह्रस्वपरिमण्डलाभ्यामित्युत्कीर्त्तनमेवमव्यवस्थामेव सूचयितुं, तद्यथा, परमाणुः परिमण्डलमिति सुष्ठूच्यते,द्व्यणुकं ह्रस्वमितितु न सम्यगुच्यते, शृंखलाकारेण हिपरिमण्डलाभ्याञ्जायमानञ्जायेत द्व्यणुकं नहि जंबीरफलवत् परिमण्डलाकारेण, पारिमाण्डल्यादनतिवृत्तेः, त्रसरेणोरप्येवमेव जनने तत्र महत्वसंभवेऽपि दैर्घ्यानुपपत्तेः, महत्वं हीहाणुत्वप्रतिद्वंद्विस्थूलत्वापरपर्यायमधिकायामवति विस्तारावच्छेदेन वर्त्तमानमभिप्रेतं, तत्र परिमण्डलाकारे,नहिजंबीरफलम्महद्दीर्घञ्चेत्युच्यते, किन्तु महदित्येवं परमुच्यते, उच्यतेतु महद्दीर्घञ्चेदमिति स्थूलं कदलीफलं, तत्र कुतो

द्व्यणुकं ह्रस्वं, यदि त्र्यणुकादीर्घात्तदा परिमण्डलात् कुतो दीर्घन्न स्यात्, नच त्र्यणुकादपि ह्रस्वं द्व्यणुकं, नाळिकेरनयनत्रयसन्निवेशाकारेण किल जायमानञ्जायेत द्व्यणुकपरिमण्डलाभ्यां त्र्यणुकं, नतु शृंखलाकारेण, उक्तमहत्वानुपपत्तेः, नहि पूर्वावस्थातो दीर्घीकृता सूचिका स्थूला भवति, तथाच त्रिकोणाकारेण जायमाने तस्मिन् द्व्यणुकांशेनैव दीर्घत्वन्तथैव महत्वञ्चोपेत्यं, तत्र कथन्त्र्यणुकान्तर्गतस्य द्व्यणुकस्य दैर्घ्ये स्वतन्त्रस्य तस्यैव ह्रस्वत्वं, प्रत्युत द्व्यणुकमेवाण्वपि सूचिकेव दीर्घं स्यात्, नतु समानायामविस्तारन्त्र्यणुकं, एतेनेदन्ततो दीर्घं तदतो ह्रस्वमिति प्रवर्त्तमानस्य व्यवहारस्याह्रस्वपरमाण्ववधिकत्वाभावेऽपि नक्षतिः, एवं स्थितेऽपि तव मां प्रति कथं प्रत्यवस्थानमिति सूत्रार्थः । तत्राभ्युपेत्यापि ह्रस्वपरिमण्डलाभ्यां त्र्यणुके महत्वदीर्घत्वे व्यभिचारनिरूपणवत् ह्रस्वान्महदिव ततएव दीर्घवद्वा परिमण्डलाभ्यान्दीर्घवद्वेत्यर्थनिरूपणायात्वन्नविवक्षितमिति।

तदेवं स्वपक्षदोषाचेत्येतत्सदृशं बहुशः परपक्षावहेळनपुरस्सरन्नकोप्यस्ति दोषोऽस्मत्पक्षे, यदिनामविलक्षणात्कार्योत्पत्तिन्दोषमेवमन्यसे, तदास्तुत्वन्मतमिव मन्मतमपीत्येतदर्थप्रतिपादनानुगुणवाक्कारघटितमिदं सूत्रन्नैवं परमप्रसक्तत्वादिति वक्तुं कानामशक्तिः परपक्षनिराकरणपरेपादे स्वसिद्धान्तसाधनमुपवर्णयतश्श्रीभाष्यकारस्य स्वपक्षदोषानभिज्ञस्येति ।

महद्दीर्घाधिकरणम् ।

किमत्रान्यदसमञ्जस मित्यत आह ।

उभयथापि नकर्मातस्तदभावः ।

उभयथापि, अदृष्टस्य परमाणुगतत्वासंभवेन स्वगतादृष्टकारितत्वेन, व्यधिकरणतयाऽऽत्मगतादृष्टकारितत्वेन वोभयथाऽपि परमाणुषु नकर्मसंभवति । अतस्तत्पूर्वकजगदुत्पत्यभाव इति श्रीभाष्यं अत्रातश्चेति चकारवैधुर्यान्न्यूनता, तदभाव इत्यधिकम् । उभयथापि

कर्माभावाच्चेत्येवापेक्षितं अत इदानीमेवारभतेऽतस्तदभावइति तन्मत निराकरणम् । सूत्रार्थस्तु, अनिमित्तकार्योत्पत्त्यभावादनिमित्तकत्वेन सनिमित्तकत्वेन वोभयथापि न कर्म, अतः कर्मजन्यसंयोगाधीन सर्गासंभवात्तस्यपरमाणुकारणत्वादस्याभावः । कुतस्सनिमित्तकत्वे नापि नकर्मेतिचेत्, दृष्टस्य निमित्तस्य तदानीमसंभवेन तदधीनत्वे नादृष्टाधीनत्वेन वोभयथापि नकर्म, अदृष्टाधीनत्वेन कुतोनेतिचेत्, स्वगतत्वाभावात् स्वगतादृष्टवशेनात्मगतादृष्टवशेनवोभयथापि नकर्म, अदृष्टवदात्मसंसर्गेण कुतो नेतिचेत्, नियामकाभावेनादृष्टवशतोऽपि नियमेन, नियतकालंप्रति सर्गाभावप्रसंगेनानियमेनवोभयथापि न कर्म, एवमदृष्टस्य भोगैकसाधनतया तदधीनप्रतिसर्गासंभवेन सर्गहेतुतया, प्रतिसर्गहेतुतयावोभयथापि नकर्मेति, एवं ह्युपर्युपर्युभयथापि कर्मासंभवमुत्पश्यामो भाष्यार्थपर्यालोचनया ।

समवायाभ्युपगमाच्च, साम्यादनवस्थितेः ।

केन साम्यं, जात्यादिना, कस्य, समवायस्य कुतः, जात्यादेरिव व्यक्त्याद्यपृथक्स्थित्युपलब्धिकत्वात्, नैतत्साधु श्रीभाष्यं, साम्यादनवस्थितेः, समंहीदमनन्यत्वस्यापि भावेचोपलब्धेरित्युक्तमपृथक्स्थित्युपलब्धिकत्वं, अतस्तत्रापि सममनवस्थानं, नचानन्यत्वम्मया न कारणादन्यतयोपेतं, तेन तु समवायस्तथोपेतइति कुतस्साम्यमिति वाच्यं, तर्हि सैवान्यताशरणीकरणीयासाम्याय, संयोगेन साम्यमप्यादरणीयं, ब्रह्मसूत्रत्वात्, अन्यथाहि लघूकृतं स्यात् ।

नित्यमेवचभावात् ।

समवायस्य नित्यत्वात्तत्संबन्धिनो जगतोपि नित्यमेव च भावादसमञ्जसान्नित्यं वर्त्तमानस्य परमाणुकारणजन्यत्वासंभवात्, नहि नित्यसंबन्धिनं विना संबन्धो नित्यो भवति, ननु तादात्म्यमपि किं कार्यात्मकं, उत कारणात्मकं, अथवोभयात्मकं, आहो-

स्विदतिरिक्तं, नान्त्यः, साम्यादनवस्थितेः, नाद्यः, सत्वाच्चावरस्येति सूत्रविरोधात्, कार्योत्पत्तेः प्राक् कार्यात्मकेन संबन्धेन कार्यस्य कारणेसत्वानुपपत्तेः, नच द्वितीयः, नित्यमेवच भावात्, नापि तृतीयः, एकतरविनाशे उभयात्मकसंबन्धाभावेनाद्यपक्षोक्तदोषापत्तेः, समवायस्य नित्यत्वाभ्युपगमेऽपि एकत्वोपगमेन नित्यजातिव्यक्त्यादिकमवलंब्य कार्यनाशेऽपि तस्य नित्यत्वानपायात्, यथेशेन नित्यानित्येशितव्यानामेकमेवेशनं संबन्धः, जन्येशितव्यार्थेशनान्तरमभ्युपगम्यते, तन्नाशेनेशनस्य नाशोवा जन्यानान्नित्यमेव भावोवोपेयते, नचास्माकमपि नित्यानित्यसाधारणमेकमेव कारणात्मकन्तादात्म्यमवलंब्यैवमेव भवत्युपपत्तिरितिचेत् भवतु कामं, नैवं काणादादिमते दोष उद्भावयितुं शक्यते श्रीलक्ष्मणसुदर्शनाभ्यां युवाभ्यामित्येतत्परं वक्तव्यमुच्यते मया, पूर्वसूत्रोक्तदोषस्त्वस्त्येव काणादमते, सतु पाञ्चरात्रमतेऽपि प्रसजति, यतः कारणात्कार्यस्य पृथक्सत्वमुपेयते ततस्ततोऽन्यत्त्तत्स्वरूपतोऽपीति भवति। तत्र कारणमेव तस्य संबन्धइत्युक्तौ प्राक्कारणमेव वर्त्तते नतु तदात्मना कार्यमिति काणादपक्षान्नकोऽपि विशेषः, तस्मात्सत्कार्यत्वसंपत्तये कारणस्वरूपापेक्षया कार्यात्मतेव कारणात्मतेति कश्चिदतिरिक्तो धर्मोऽभ्युपेयः, तस्यापि कारणे तादात्म्यान्तरमभ्युपेयमिति साम्यादनवस्थितिरेवेति औपनिषदानान्तु स्थितिसमयेऽपि कारणव्यतिरेकेणाभावएवानन्यत्वं, सतु सुतरां संपद्यते प्रागुत्पत्तेः, तथा च ब्रह्मान्यत्वावच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववत्वसंबन्धेन सद् प्रपञ्चो ब्रह्मनिष्ठः, सच स्वरूपएवेति नकोऽपि दोषः।

प्रकृतसूत्रार्थस्तु भाष्योक्तएव, चोदयत्यत्र सुदर्शनः, ननूभयथेतिवत् सर्वथेतिवच्च विकल्पद्योतकपदाभावात् कथं चतुर्धा विकल्प्य दूषणपरतया व्याख्यायतां, ब्रह्मकारणवादेऽपि सुवचोह्ययं विकल्पः, चेतनस्य ब्रह्मणस्सुघटा नियता प्रवृत्तिरितिचेत्तर्हि तदधीनानां

परमाणूनामपि घटते सा, आनुमानिकेश्वरासिद्धिरधिकयुक्तिरिति चेत्तदोभयथापि नकर्मेत्यत्रैव सा विवक्षितेति सूत्रवैयर्थ्यमिति इदञ्च सूत्रकारीयपरिपाट्यज्ञानविजृंभितं, नहीश्वरकारणवादिनइदानीं प्रतिक्षिप्यंते, किन्त्वेते, तेऽहि द्विविधाः परस्परं विभिन्नेश्वरवादिनः पाशुपताः पाञ्चरात्राश्च, तत्र यो यो निमित्तमात्रेश्वरवादी स सर्वोऽपि पाशुपताधिकरणविषयः, तदत्र निरीश्वरवादिपरीक्षायां वैशेषिकः परं परीक्ष्यते, तत्र यत्तव भाष्यकृतोभयथापीति सूत्रे 'नहीश्वरेच्छाहितेति भाषितन्तदपि नभाषितव्यमेव, ब्रह्मकारणवाददोषस्तु परिहृतमेव भवता, कस्यचिन्नित्यमेवच भावादित्यपेक्षया सर्वथाऽपि तथाभावादित्यस्य प्रबलदोषत्वेनावश्याध्याहार्यतया सर्वथेति पदाभावो नदोषायेति भाष्योक्तएव सूत्रार्थः ।

उभयथाच दोषात् ।

नकेवलं परमाणूनां रूपादिमत्वएव दोषः, रूपादिविरहाभ्युपगमेऽपि त्र्यणुकादौ रूपाद्यभावप्रसंगाद्दोषएवेत्युभयथाच दोषादसमञ्जसमिति श्रीमान्, अत्राभ्युपगमेऽपीतिवदितरथाऽपि दोषादित्येव वक्तव्यं, अत्रापि चोदयति, उपचितगुणानाम्मूर्त्युपचयापादनं पूर्वसूत्रोद्भावितस्थौल्यादनतिरिक्तमिति पुनरुक्तमिति, उच्यते। रूपादिमत्वादणुत्वविपर्ययो भवति, नकेवलमयमेव दोषः, रूपाद्युपचयापचयावप्यवश्यमुपेतव्यौ भवतः, इतरथा दोषात्, तदुपगमेऽपि भवति दोषइत्युभयथाच दोषादित्यत्र कुतः पौनरुक्त्यं, कुतोवा नैवन्दूषणीयमिति निवेदयावः परपक्षप्रतिक्षेपकाणान्धुरीति ।

पुनरप्याह, मूर्त्युपचयहेतुरयं गुणोपचयः किं गुणबाहुल्यं, उत गुणोत्कर्षः, उत तदुत्पत्तिः, नाद्यः, सार्वज्ञाद्यनेकगुणवतीश्वरे मूर्त्युपचयाभावेन व्यभिचारात्, जीवापेक्षयोत्कृष्टगुणवति तस्मिन्नेव व्यभिचारान्नद्वितीयोऽपि, उत्पन्नज्ञानाद्यनेकगुणवति जीवे व्यभिचारान्नापि तृतीयइति तदेतन्मूर्त्तेषु मूर्त्युपचयहेतुतया दृष्टं रूपादि-

चतुष्टयमेवावलंब्य मूर्त्तत्योपेतपरमाणुषु दोषमुद्भावयतामस्माकन्धुर्यकाण्डताण्डवमेव ।

इत्युभयथापीत्यधिकरणं ।

समुदायउभयहेतुकेऽपि तदप्राप्तिः ।

अत्रैकोऽणुहेतुकोभूतभौतिकसमुदायः, अपरः कः, नन्वपरस्स्कन्धहेतुकः पञ्चस्कन्धी रूपः, न यतस्स्कन्धानामुपपन्नत्वे तद्धेतुकोऽयन्नदुष्यति, स्कन्धानामेव निराचिकीर्षितत्वे तद्धेतुकसमुदाय शब्देन तेषामुपस्थापनमतिक्लिष्टमित्याह सुदर्शनः, न कुतः, यतइदं स्वपक्षपरितोषणायैव यत्किञ्चिदुक्तन्तेन नाविजानतैव, अनुभूयमानाएव विविक्ताः पदार्थाः पञ्चराशयः पञ्चस्कन्धा उच्यन्ते वैनाशिकैः, तत्र कानुपपत्तिरिति कोवा नजानाति, परन्तु तेषां संहतिरेव स्थिरस्य संहन्तुरभावात्तन्मते दुष्यति, अस्त्वत्र कथं श्रीभाष्यं, तेनैवायमनर्थस्संपादितश्श्रीभाष्यकृताणुहेतुकः पृथिव्यादिभूतसमुदायोऽपरस्तद्धेतुकश्शरीरेन्द्रियविषयरूपइति विवृण्वता एवन्तर्हि "समुदायेऽणुहेतुकेतदप्राप्ति" रित्येव वक्तव्यं, तदप्राप्तौ तद्धेतुकाप्राप्तेस्स्वतस्सिद्धेरित्येतदजानताचेत्यपि वक्तव्यम् ।

अत्रेदं शास्त्रकारयोर्हृदयं, भूतानि पृथिव्यादीनि भौतिकानि गिरिसमुद्रादीनि, तस्य संहन्ता स्थिरः परमेश्वरः, द्वितीयस्य तु पुण्यापुण्यद्वारा तादृशो जीवः, उभयोस्त्वन्मतेऽभावादुभयविधसमुदायाप्राप्तिरिति "इतरेतरप्रत्ययत्वादुपपन्नमितिचेन्नसंघातभावाऽनिमित्तत्वात्" कस्येदं साधारणजनस्येव वाक्यं, न, इदमेवाकृत्रिमं वृत्तिसिद्धं बादरायणीयं सूत्रमित्याह सुदर्शनः, न, यतो न कदाचिदप्येवं स्यात् बादरायणीयं सूत्रमिति शप्तुमपि शक्यते ।

सर्वथानुपपत्तेश्च ।

किंशून्यवादिमतमसमञ्जसं, पुनः कस्मात्, कुतोपीति न, तत्र कथञ्चकारः, येनैवं विवृतं सएव प्रष्टव्यः, एवं परमतनिराकरणे

सर्वोऽपि सर्वत्र विजयी स्यात्, विज्ञानवादपरीक्षायामुक्तयुक्तीनामत्रापि संभवादलमिदमेकमेवेतिचेत्' तर्हीदमपि तत्परमेवेति कृत व शून्यवादिमुखानवलोकनमेव वरमिति ग्रहीतव्यम् ।

इति सर्ववैनाशिकमतनिरासकरणम् ।

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ।

कस्य केनाविशेषः, कदेति प्रष्टव्यन्नतु केनेति अस्तु कदा, प्रागपि मोक्षाज्जीवपरिमाणस्य, कुतः, अन्त्यस्य मोक्षावस्थागतस्य तस्यावस्थितत्वान्मोक्षावस्थजीवतत्परिमाणयोर्नित्यत्वाद्,

अथ शरीरपरिग्रहापरिग्रहकृते सति विशेषे कथमविशेषापादनमितिचेत्, जन्यस्य नित्यत्वासंभवेन पूर्वमपि तत्सत्वावश्यंभावआपाद्यतइति गृहाण । अथाप्यात्मनो नित्यत्वकथनं क्वोपयुज्यत इतिचेत्, विपर्यये तस्यानित्यत्वप्रसञ्जनसूचनइति गृहाण, अथ विकारादिभ्यइति स्पष्टमेव प्रतिपादितत्वेन किमत्रास्य सूचनेनेति चेत्, एवन्तर्हि नास्माभिरेवं विवृतं, किन्तु पाञ्चरात्रेणेति गृहाण ।

अथ नित्यो जीवः, तस्य धर्मभूतं ज्ञानं पर्यायेण सङ्कोचविकासावाप्नोति, अन्त्यन्तु तदवस्थितं यथार्हतानां परिमाणमिति ब्रुवता पाञ्चरात्रेण कथमिदमेवं व्याक्रियतइतिचेत्, निर्लज्जत्वादिति गृहाण, अथ कथमुभयोरादिमध्यमयोरित्येतदपि घटतामनादेर्जीवस्य परंपरया परिमाणपर्यायस्यानादित्वेनादित्वासंभवइति चेत्, परित्यज्य पुत्तिकाशरीरं हस्तिशरीरं प्राप्तवतः परिमाणयोरुत्तरापेक्षयाऽदिमध्यमत्वसंभवादिति गृहाण, शिष्टं भामत्यां स्पष्टम् ।

इत्यार्हताधिकरणम् ।

पत्युरसामंजस्यात् ।

कोऽर्थः पत्युर्म्मतन्नादरणीयमसामञ्जस्यादिति, धिक्, पाञ्चरात्रस्यैवेदं भाति व्याख्यानं शिवविद्वेषिणः, कथं कपिलकणादसुगतादिनामनिर्देशोऽपिन न्याय्यो निराकरणइति मन्वानस्य ब्रह्म-

वित्पुण्डरीकस्य भगवतो बादरायणस्येदं सूत्रमेवन्तदन्यो व्याकुर्या-
त्पत्यादिशब्देभ्यइत्युक्तिमप्यविगणय्य ।

वयन्तु व्याकुर्महे, अहह, अस्तुनाम जगतउत्पत्त्यादिषु दोषा-
वहं कापिलादिकम्मतं, योयं श्रुतिस्मृतीतिहासपुराणादिषु द्विपदां
चतुष्पदाञ्च पशूनां पतिरितिगीयते जगत उपादानश्चनिमित्तश्चेतिच
तस्यैव हि भवत्यसामञ्जस्यं भवतो मतावलंबने, अतो नैवेदं श्रद्द-
ध्महे इति ।

इति पाशुपताधिकरणम् ।

उत्पत्त्यसंभवात् । नच कर्तुः करणम् ।

ब्रह्मणो वियदाद्युत्पत्त्यसंभवं वारयिष्यामि, ततएव करणा-
नामप्युत्पत्तिमुपपादयिष्यामीति च सूचयत्येवमुपन्यासवैचित्र्येण ।

विज्ञानादिभावेवातदप्रतिषेधः ।

कोऽर्थः, वेति पक्षो व्यावर्त्यते, विज्ञानञ्च तदादिच विज्ञा-
नादि परं ब्रह्म, तद्भावे सति संकर्षणादीनान्तस्य पाञ्चरात्रपक्षस्य
प्रामाण्यन्नप्रतिषिध्यते, भागवतप्रक्रियामजानतामिदञ्चोद्यमिति या-
वत्, "विप्रतिषेधाच्च, विप्रतिषिद्धाहि तस्मिन्नपि तन्त्रे जीवो-
त्पत्तिरित्यर्थइति"। अत्र विज्ञानादिशब्दस्य परब्रह्मपरतया विव-
रणं क्लिष्टात्क्लिष्टतरं, तच्छब्दस्याप्युपात्तोत्पत्त्यसंभवपरत्वापेक्षया-
ध्याहर्त्तव्यपरत्वन्नातीवहृद्यं, विज्ञानादिभावश्चेत्तदप्रतिषेधइतिफलि-
तार्थकथनमपि न कुतूहलितयोपेतमिव, विप्रतिषेधाच्चेत्यस्यास्मिन्
प्रकरणेन कथञ्चिदप्येवमर्थत्वं संभावयितुं युक्तं तस्माद्भाष्योक्तएवा-
धिकरणार्थः, उत्तरारंभाय वेदविप्रतिषेधाच्चेत्यर्थस्य गीर्वाणगुरुणा
प्यशक्यवारणत्वाच्च, ।

इत्युत्पत्त्यधिकरणम् ।

ब्रह्मसूत्रानुगुण्यसिद्धौ द्वितीयाध्याये द्वितीयः पादः ॥

अथ द्वितीयाध्यायस्य तृतीयो वियत्पादः ।

पतिदोषकरम्मतन्तदीयं प्रतिषिद्धमिदम्मतन्त्वदीयम् ।
इति पाशुपतेन पाञ्चरात्रं प्रतिषिध्य मतं शुशुत्सति स्वम् ॥

उत्पत्त्यसंभवाद्विप्रतिषेधाच्चेति प्रतिक्षिप्ते पाञ्चरात्रपक्षे सएव वैष्णवतान्त्रिकस्तान्त्रिकान्तरैस्सह वैतण्डिकीभूय वेदेऽपि वियदुत्पत्त्यादिविषयं विप्रतिषेधमुद्भावयन् प्रत्यवतिष्ठते ।

न वियदश्रुते रित्यादिना ।

नन्वत्र विप्रतिषेधएव प्रतिषिध्यते, पाञ्चरात्रएवात्र प्रधानवैतण्डिकइति कथं विज्ञायतइतिचेत्, शैलीविशेषात्, आर्द्रावमानात्, वेदविप्रतिषेधाच्चेति वदामः, तथाहि, नह्यत्राश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः, अग्न्यादिगतिश्रुतेरिति चेन्नभाक्तत्वादित्यादिवत्पक्षप्रतिक्षेपप्रणाळिका परिगृहीता । किन्त्वश्रुतेरस्तित्वितिच पक्षद्वयमुपन्यस्य, गौण्यसंभवादित्यादिनैकदेशिमुखेन समाधाय, प्रतिज्ञाऽहानिरित्यादिनैकदेशिनं व्युत्पादयामास साक्षाद्वेदवैतण्डिकविसंवादपरिहाराय भगवान् वेदाचार्यः,ततश्शैलीविशेषाद्विप्रतिषेधएव विषयः पादद्वयस्येति विस्पष्टं विज्ञायते । पाञ्चरात्रएवात्र प्रधानवैतण्डिकः । आर्द्रावमानात् । आर्द्रावमानोह्यसहिष्णुता हेतुः, विप्रतिषेधाच्च, सएवहि हरिहराद्यनेकपारम्यप्रतिपादनेन विगीतार्थो वेदइति विप्रतिषिध्य वेदमवालंबत वैष्णवन्तन्त्रं शैवइव पाशुपतं, अतएव सूत्रकारः प्रधानपक्षातिरिक्तेषु कणादादिपक्षेष्वनुद्भावितमपि विप्रतिषेधमसामञ्जस्यंच विभज्य नियोजयामास विनिमयेनाद्यन्तयोः पाशुपतपांचरात्रपरीक्षायामुत्तरसंगत्यर्थम्मध्येऽप्यनुषंगार्थं कृतनिगमनार्थंच, इदंच गतेषु पादेषु तत्र तत्र विस्पष्टमुपपादितमस्माभिः, अभिप्रेत्यैवेदं सर्वं भाष्यकारोऽपि पूर्वापरविप्रतिषेधव्यतिरेकेण वेदविप्रतिषेधाच्चेत्यर्थान्तरमपि क्रोडीचकारोत्तरसंगत्यर्थं पाञ्चरात्राधिकरणस्यान्तेऽस्य निवेशनमिति ध्वनयन् ।

उत्पत्त्यसंभवादिति दूषणमपि वियदाद्युत्पत्तिविप्रतिषेधारंभोत्तंभनमिति पूर्वमेवोक्तं, एवंस्थिते कथं पाञ्चरात्रस्यैव सतोऽत्र विवरणाधिकारः, कथंवा तत्र तत्र वैदिकमतविदूषणञ्च संगच्छेयातामित्यधिकारविदोवदन्तु । इदमेकन्तु संगच्छते । यदत्र स्वानधिकारं प्रच्छादयितुं नात्रविप्रतिषेधो विषयइति युक्त्याभासेनास्मान् प्रतिप्रत्यवस्थानं । इदमस्य प्रत्यवस्थानं । नविप्रतिषेधस्य पूर्वपक्षत्वं युक्तं । साक्षात्साध्यत्वाभावात् । अतः प्रधानादिग्राह्यत्वेवा वेदाप्रामाण्येवापर्यवसानं वक्तव्यम् । नहि विप्रतिषेधादिनाऽभासीकृतं पुनर्ग्राह्यं भवति । नच पूर्वतंत्रेणैव व्यवस्थितप्रामाण्यस्य वेदस्याप्रामाण्यं शक्यशङ्कमिति । अत्रोच्यते । सिद्धेसंगतिग्रहाभावान्न ब्रह्मणि वेदान्ताः प्रमाणमित्याक्षिप्य शास्त्रारंभं समर्थितवतस्तव वेदाप्रामाण्यन्नशक्यशङ्कमित्येतत्कथं शक्यशङ्कम् । विधिशेषत्वेन प्रामाण्यमुपेत्यवेदान्तानामेव ब्रह्मण्येवाप्रामाण्यमाशंकितमित्यस्यात्रापितुल्यत्वात् । किञ्चेश्वरकृष्णमिश्रादिभिर्व्यवस्थितप्रामाण्ये कपिलादि तंत्रे कारणादेरन्यत्रानवकाशे कथं सर्वात्मनाऽप्रामाण्यमास्थीयतां भवता । ततोनप्रच्छादयितुं शक्यं वैतण्डिकत्वं भवादृशानां भवतेति ।

अत्रैकविज्ञानेन सर्वविज्ञानसमर्थनार्थं प्रवृत्ते सृष्टिप्रकरणेऽवश्यं श्रावयितव्याया अप्यश्रुतेर्नवियदुत्पत्तिश्श्रुत्यभिप्रेतेति प्रथमसूत्रार्थः । तथा ह्येतदर्थकंभाष्यन्नह्यस्योत्पत्ति प्रकरणेश्रवणमस्तीति । एतेनाश्रुतेरित्यस्य श्रवणसामान्याभावार्थकत्वे तैत्तरीयकेश्रवणात् स्वरूपासिद्धिः । छान्दोग्येऽश्रवणन्त्वप्रयोजकमिति सुदर्शनोक्तंभाष्यार्थादर्शनमूलकमिति सिद्धं । यत्रावश्यं श्रावयितव्या तत्राश्रुतेरिति हि भाष्यार्थः । अन्यथा छान्दोग्येऽश्रवणादिति हिब्रूयात् । कथमुत्पत्तिप्रकरण इति ।

नवियदुत्पद्यते, गगनकुसुमायितस्य वियदुत्पादस्य श्रुति प्रतिपाद्यत्वासंभवादिति भावत्कन्तुभाष्यंगौण्यसंभवादित्यनेन पुन-

रुक्तार्थः । नवियदसंभवात्, श्रुतत्वान्नेति चेन्नभाक्तत्वादिति न्यासापेक्षश्च ।

अस्तितु ।

अत्रोत्पत्तिप्रकरण इति न भाषितम् । तैत्तरीयकाहि समामनन्ति, "सत्यंज्ञानमनन्तं ब्रह्मे" ति प्रकृत्य "तस्माद्वा एतस्मादात्मन आकाशस्संभूत" इतीतितु भाषितम् । अयमाशयः, गुहानिहितत्वोपपादनायात्मत्वं ब्रह्मणोवक्तव्यमिति ब्रह्मेति प्रकृत्यात्मन इति प्रतिनिर्देशः कृतः । तत्र न्यात्मककोश पञ्चकश्चानुक्रमणीयं गुहासिद्ध्यपेक्षितम् । तच्च तेज आद्युत्पत्तिप्रतिपादनेनापि पर्याप्तं भवति अथापि विद्यमानत्वादेवसत्यत्वोपपादनाय "यदिदं किंश्च तत्सृष्टे" ति वक्ष्यमाणावियदाद्युत्पत्तिरत्रानुक्रान्ता । अतस्साश्रुत्यभिप्रेतेति । एवं विप्रतिषेधे आहैकदेशीनैय्यायिकोन वियदुत्पद्यतेऽश्रुतेरेवेत्येवकारं घटयन् । एतेनैकदेशिनः प्रतिज्ञालाभ इति परोक्तं प्रत्युक्तम् । बाधकमपनयति "गौण्यसंभवात्" नह्याकाशस्योत्पत्तिस्संभावायितुमपि शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्स्वस्मास्विति, साधकमुपनयति, "शब्दाच्चे" तीत्यत्रभाष्याशयः; असंभवादमृतत्वशब्दाच्च गौणीतिभाष्यान्तरं भात्रस्याजत्वं विनामृतत्वमनुपपन्नमिति साक्षादजत्वसाधकेन तदुपपादकगौणत्व साधनन्तद्धेतुन्यायग्रस्तम् । अतएव नैकसूत्र्यमपि तदभिप्रेतम् । गौणत्वाक्षेपं समादधाति "स्याच्चैकस्यापि ब्रह्मशब्दवदि" ति । अत्र विरोधानुवादेन कथञ्चिदित्यर्थे चकारमुद्योजयन्तमपि परित्यज्याति लघुकृतं परैरुत्तरसूत्रम् । तथाहि, कथमेकस्यैव शब्दस्य विलक्षणं व्यापारद्वयमित्युत्सूत्रमाक्षेप । भवति कथञ्चिदेकस्यापि व्यापारद्वयं ब्रह्मशब्दस्येवेति जित्वापि परं विषममिदं व्यक्तवेकत्व बहुत्वाभ्यामिति विलज्जमानमुपजिगमिषुं वैतण्डिकविद्रावणेन परमोपकारिणमनुजिघृक्षन्निव तत्वोपदेशं नाहसूत्रकारः ।

प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ।

इत्युत्तरं सूत्रम् । ननु प्रतिभटमिव प्रतिक्षिपन् । तथासति प्रतिज्ञाहानादिति हि सूत्रयेत् । कथं सुहृदिवतदहानिमुपदिशेत् । एवं किलात्रहृदयं प्रतीयते । अनुत्पत्तिमवलंब्यापि शक्यतएव विप्रतिषेधः प्रतिक्षेप्तुम् । अथापि नसाश्रुत्यभिप्रेता । भवतापि यतः प्रतिज्ञापरिपालनायावश्यं श्रावयितव्याया अप्यवचनादिति विवेचितम् । अतस्सानकथञ्चित्समर्थनेन हातव्या । किन्त्व व्यतिरेकात् सम्यगेवसमर्थनीया यतस्सम्यगेव समर्थयति बहुभिश्शब्दैर्भगवती श्रुतिः । ततः कर्तव्यमेव वचनच्छान्दोग्येपीति तदिदमतिलघूकृतं भवति पूर्वमप्यभावे सूत्रम् ।

अत्र भाष्योक्तदृष्टान्तमाक्षिपत्यदर्शन इव सुदर्शनः । तद्यथा, अन्नं ब्रह्मेत्यादिषु प्रयुक्तस्य ब्रह्मशब्दस्यान्नादिविशेष्यकतादात्म्यविषयकप्रतीत्यभिलापकवाक्यघटकस्य प्रतीतिपरतन्त्रस्य स्वातन्त्र्येण गौण्यामुख्ययावा वृत्त्या किञ्चिदर्थाबोधकत्वादिति । तदिदं शब्दन्यायाविद्याविजृंभितम् । यतः प्रतीत्यभिलापकस्याप्यस्मान् प्रतितां बोधयतो वाक्यस्यान्नं ब्रह्मेतिभागेन ब्रह्मसदृशमन्नमिति । आनन्दोब्रह्मेति भागेनानन्दएवब्रह्मेति प्रथमतः प्रतीमोवयम् । पश्चाद्विशिष्टैकार्थबोधे, भृगुसमवेतभ्रमप्रमात्मकप्रतीतयोभासन्त इति चेत्, भासन्तांकामं, अवान्तरबोधोदयमादाय प्रकृतोपपत्तेः । अतएव भृगोर्भ्रमनिमित्तसादृश्योपपादकम् । " अन्नाद्ध्येवखलु, अन्नं प्रयन्त्यभिसंविशन्ती " त्येवमादि " विज्ञानं प्रयन्त्यभिसंविशन्तीत्येवमन्तं वाक्यन्तादात्म्योपपादकश्चानन्दवाक्यम् ।

नन्वेतदयुक्तं, यत् भृगोर्भ्रममुपपादयति वाक्यशेष इति, कुतः, अन्नाद्ध्येवेत्यवधारणात्, यदिजायमानभूतप्रकृतित्वेन ब्रह्मसादृश्यपरं वाक्यन्तदाकथमवध्रियेतान्नाद्ध्येवेतीति चेत्, जायन्तएवेत्यर्थ इत्यवध्रियतांभवता । अथ भूतप्रकृतिरेवब्रह्मेति कथम-

न्नं ब्रह्मेत्यादिर्भृगुप्रत्ययोर्भ्रमइति चेत् , अनन्यव्याप्तैव साब्रह्मेत्यत इति गृहाण , अतएव "तेनैषपूर्णस्तेनैषपूर्ण" इत्यन्याश्रुतिः । अथवास्तुभृगोर्भ्रमान्तरप्रत्यायकमेव तदपिवाक्यम् । अस्तुचान्ययोगव्यवच्छेदार्थ एवान्वयसन्निकर्षवशादेवकारः । भवतु चेतिशब्दोऽपीत्यभिप्रायेणेत्यर्थकः , नतुहेत्वर्थः , अथापि भाष्योक्तस्य दृष्टान्तत्वेनकाप्यनुपपत्तिः । नन्वेवं कथमानन्दवाक्योपपत्तिः , अन्नादीनामपि भूतहेतुत्वादिति चेत् , यदधीनमन्नादीनांहेतुत्वन्तस्यास्यानन्याधीनत्वात्तत्वस्येति गृहाण । तदेतदुक्तन्तदधीनत्वादिति , एवञ्चपूर्वपूर्वहानेनाऽऽनन्दं भृगोरुत्तरोत्तरोपायनमानन्दवाक्यस्य भृगुप्रमाप्रत्यायकत्वञ्चोपपद्यतेतराम् !

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ।

इदं गौणत्वनिरासकतयाऽपि नीतं भाष्यान्तरे । तदिदमुत्पत्त्यसंभवोचंभिते गौणत्वे तत्संभवोपपादनं विना कथन्तन्निरसनंघटेतेत्यनादेयमेव । चकाराभावेऽपि शब्देभ्यइति पृथक्कृत्योत्पत्तिसाधकतयैवोपवर्णयतान्निरंकुशाप्रवृत्तिरितिनतान्प्रतिकस्यापिचोद्यस्यास्त्यवकाशः । अथविनेयभूतमपि जातिचापलेन विवदमानन्यायेनापि व्युत्पादयति परमकारुणिकोभगवान् बादरायणः ।

यावद्विकारन्तु विभागो लोकवदिति ।

तदिदं क्वचिदुपपादितमिदमीयज्ञातिचापलमपुच्छश्रृङ्गैस्तार्किकबलीवर्दैराकुलीक्रियतेयं वैदिकमार्गइति वदता भगवता भाष्यकृता पुच्छच्छेदेऽपि श्रृंगभंगेऽपि तर्काप्रतिष्ठानादिना व्याकुलीकरोत्येवायमस्मान्नैय्यायिकबलीवर्दोनायं विश्वसनीयइत्यभिप्रयता,अस्य चायमर्थस्सूत्रस्य, यावान्विकारस्तावानेव विभागः-विकारत्वव्याप्यो विभागइति यावत् । आकाशस्तु दिगादिभ्यो विभक्तस्ततो विकारइति, अत्र यद्यद्विभक्तं ससर्वोऽपि विकारः, यथा घटघटिकोदञ्जनादीति सूत्राक्षरस्वरसलब्धार्थप्रतिपादकं भाष्यं ।

अत्रैवश्चोदयन्ति, आकाशो विकारो विभक्तत्वादित्यत्राज्ञाने व्यभिचारः, तदन्यत्वे सति तत्त्वमप्यात्मनि व्यभिचरति । तदन्यत्वस्यापि दाने विशेष्यस्य वैय्यर्थ्यं, तत्यागे तु सूत्रविरोधः । अत्रैव तस्य तात्पर्यमित्युक्ता वाकाशादित्रितयभिन्नत्वमुपाधिरिति ।

तदेतत्सूत्रभाष्याशयानवबोधमूलकं, तथाहि लोकवदिति सूत्रभागः, सचाकाशस्योत्पत्तिसंभवप्रदर्शनार्थः । अतएवाकाश उत्पद्यतएवेत्यनुक्त्वा, न खल्वाकाशस्योत्पत्तावसंभवा शङ्का कर्त्तव्येति भाष्यं । तथाच कारणोपलंभे सति विभक्तत्वं, हेतुः । अतएवात्मनि व्यभिचारशंकोत्तरं भाष्यम् । न आत्मनआकाशस्संभूत इति श्रुतेरिति दृश्यते चायन्न्यायो लोके, घटघटिकोदञ्चनादौ कटककुण्डलकेयूरादौ सूचीनाराचनिस्त्रिंशादौ तत्र केदानीं व्यभिचारः, नचैवं कारणोपलंभएवालमिति वाच्यं ।

सत्यपि श्रवणे विवदमानं प्रति तावन्मात्रोपन्यासायोगात् । अयमाशयः कुतो नेच्छस्याकाशस्योत्पत्तिं । अमूर्त्तद्रव्यत्वादितिचेत्, तर्हि पार्थिवादिपरमाणोरुत्पत्त्यापत्तिर्मूर्त्तस्य । ननुमूर्तद्रव्यमुत्पद्यतएवेति केनोक्तं, अमूर्त्तन्तु तन्नोत्पद्यतएवेति किलोक्तमितिचेत्, अहो कोऽयं व्यामोहो भवतोऽपि न्यायानिष्णातस्य,यस्त्वममूर्त्तद्रव्यन्नोत्पद्यतएवेति वदसि, मूर्त्तन्तु तदुत्पद्यतएवेति न वदसि, मूर्त्तमिव किञ्चिदजायमानममूर्त्तमप्यस्तु किंचिज्जायमानन्द्रव्यमितिचेत्, किं वदसि । किञ्च कुत्रेदन्दृष्टममूर्त्तन्द्रव्यमनुत्पन्नमिति भवता । दृष्टाऽऽत्मादावनुत्पत्तिस्तादृशइतिचेत्, अहह किमिदं विप्रतिषिद्धं वदसि, यतो दृष्टआत्मानुत्पन्नइति धीरं गर्जसि, मृत्योश्च बिभेषि, पाञ्चरात्रः किलात्मोत्पद्यते वियदादिवन्नोत्पद्यतइति विप्रतिषिद्धं वदति, विप्रतिषिद्धमिदमित्युक्ते तर्हि तवापि मतं विप्रातिषिद्धमेवेति वितण्डयति । अस्तु पश्य लोकं, यानि समानजातीयानि परस्परं विभक्तानि तान्येकस्मात्कारणादुत्पन्नानि दृश्यन्ते, यथा घटघटको-

दञ्जनादीनि मृदः, कटकमुकुटकेयूरादीनि हेम्नः, सूचीनाराचनिस्त्रिंशादीनि चायसः, तथेमानिच पृथिव्यप्तेजोवाय्वाकाशानि भूतान्येकजातीयानि द्रव्याणि। तत्र वाय्वन्तमुत्पद्यते, नाकाशः परमुत्पतइति किमेवमस्मान्व्याकुलयसि । अतो विभक्तानि विकाराइत्युत्सर्गः, बाधस्तु प्रबलेन प्रमाणेन, तत्र श्रुतिरन्त्यं प्रमाणन्न बाधते वियदुत्पत्तिं, प्रत्युतानुवदति चात्मनस्तां । उपबृंहिताच प्रतिज्ञापरिपालनाय सर्वस्याप्यव्यतिरेका वेदकैर्बहुभिश्शब्दैः। अमृतत्वश्रुतिस्त्वेका वायुमप्यमृतं वदति, आत्मनस्तूत्पत्तिरश्रुतेरनवस्थानाच्च बाध्यते। यातु तस्याप्युत्पत्तिमिव वदति सा सोपाधिका । उपद्रुताच बह्वीभीरात्मनो नित्यत्ववादिनीभिर्निलीयतेचेति ।

एवमुद्बोधितस्समुद्बुद्धोभूदेकदेशी नैय्यायिको हित्वा नैसर्गिकमपि चापलं । अव्याकृतन्तु कार्यानुरोधेन कल्प्यमानन्नकार्येभ्यो विभक्तन्नवाऽत्मनोव्यतिरेकेण विद्यमानमिति कव्यभिचारः कुतोवा वैय्यर्थ्यं, साधनवद्विपक्षाव्यावर्त्तनात् कुतश्च वोपाधिरिति। अत्र यदि ह्यात्माऽपि विकारस्स्यादित्युत्तरं भाष्यन्दृश्यते, तच्च विप्रतिषेधवादिनामुपर्युपरि वितण्डायास्तत्समाधानस्यच प्रदर्शनार्थं ।

तथाहि, यद्यसंभावितमपि संभावयसितदाऽत्मनोऽपि स्यादुत्पत्तिरिति वितण्डा। तत्र शून्यवादेप्रसञ्जिते, इष्टापत्त्यावितण्डा। ततस्तामपनेतुमात्मत्वाच्चात्मनो निराकरणानुपपत्तेरित्यादि भाष्यमिति। अतः परकीयंभाष्यं विमृशामः। तु शब्दश्चार्थे, किञ्चेत्यर्थः, ऐतदात्म्यमिदं सर्वमिति यावतां सामान्यतोविकारत्ववचनेनाकाशस्यापि विभागोब्रह्मण उत्पत्तिरुक्तैवभवति। यथालोके एतेदेवदत्तपुत्रा इत्यभिधायायन्तस्यपुत्रोयन्तस्यपुत्र इतितेषु केषाञ्चित्तत उत्पत्तिवचनेन सर्वेषामपि सोक्तास्यादिति ।

अहहनायमर्थस्सूत्रार्थ इति तन्नायः पीठमप्यारोढुंशक्नुमः अस्तु कथन्तुशब्दश्चार्थइति विद्वतं, यतस्सर्वेऽपिचस्त्वर्थे इति विद्व-

ण्वन्त्यतस्तुथार्थ इति विवृणोमीति स्यात् । अथ सर्वएतेऽस्यपुत्रा इत्युक्त्यनन्तरं किं केषाञ्चिद्विशेषतो वचनेनेति चेत् , यद्यप्ययमस्य पुत्रोऽयमस्य पुत्रइत्युक्त्यनन्तरं किमेतनविशेषतोवचनेन , सर्वएतेऽस्यपुत्रा इत्येवसम्यगवकल्पते , अथापिकएतइति कथञ्चिदप्याकांक्षावशेनैवमपि संभवतीति नात्यन्तमिदमसमञ्जसं ।

अथ श्रुतौ तत्तेजोऽसृजतेतिविशेषतो वचनानन्तरमेवैतदात्म्यमिदं सर्वमिति सामान्यतो वचनं दृश्यते, तत्रापि योऽयञ्जेष्ठपुत्र आकाशस्तदनन्तरश्च वायुस्तावुभावप्यप्रत्यक्षजन्मानाववश्यवक्तव्यौ विहाय तदनन्तरजातमारभ्यैवोक्तोत्पत्तिः, एते तु सामान्यतोऽभिधायेत्यादिना कथन्तदननुगुणन्दृष्टान्तं प्रणयन्तीति चेत् , अत्र तएव पृष्टव्याः । तस्मात् सामान्यतोऽभिधाय विशेषतो वचने विप्रतिपन्नस्यावचनमनुत्पत्तेरेव साधकमिति विपरीतमेवैषां विवरणमिति चेत् , सत्यमतएव तप्तायःपीठमप्यारोढुं शक्तुमइत्यभिहितम्

इति वियदधिकरणम् ।

अथ एतेनमातरिश्वा व्याख्यात इति सूत्रं ।

अत्रामृतमनस्तमिता देवतेति चाभ्यासस्त्वमेव प्रत्यक्षं ब्रह्मासीत्यादिना महाभागत्वश्रवणश्चाधिकाशंकाबीजं । तथाच वायोरप्यनुत्पत्तौ तत्कारणत्वेन श्रुतस्याकाशस्य सा कुतस्त्येति मन्दधियाम्माभ्वसदृशानामाशङ्कायामयमतिदेशइति भाष्यं । प्रसंगात्सतोऽपि संभवमाशंक्य प्रतिषेधति ।

असंभवस्तु सतोऽनुपपत्तेरिति ।

अत्राधिकाशङ्काहेतावत्र प्यन्दोऽतिदेशसूत्रत्वमसहमाना वियता सह वायोर्ग्रथनसंभवेऽपि तेजोऽतइत्यनश्शब्देन वायोर्ग्रहणार्थं पृथक् सूत्रं, अतो वियदधिकरणशेषएव, असंभवसूत्रमपि तथैव, तु शब्दोऽवधारणे, तथाचासंभवस्सतएव, तद्भिन्नानामसंभवस्या-

न्नुपपत्तेः । एवं च सर्वस्यापि ब्रह्मभिन्नस्य संभवस्साधितो भवतीति वर्णयन्ति परे । अत्रोच्यते, वायुरिति लघुना वक्तव्ये मातरिश्वपदेन मातरि वियति श्वयतीति विवक्षयाऽऽकाशस्याप्युत्पत्तौ किमुततदधीनस्थितिकस्य वायोरित्यतिदेशत्वे स्फुटीकृते कथन्तरयक्तुं युक्तं, असंभवसूत्रंतु वाय्वंशे पुनरुक्तं, तेजआदौ व्यर्थश्च, मातरिश्वतेजस्सूत्रयोर्नैरन्तर्याय एतेनेति पदेनासंभवसूत्रोक्तहेतोरपि संग्रहायच तयोः पौर्वापर्यवैपरीत्यापातश्च, श्रेष्ठश्चेतिवद्वायुश्चेति न्यासापत्तिश्च, अहह असंभवसूत्रमपि वियदधिकरणशेषमभिप्रयन्ति, मातरिश्वसूत्रन्तु तदुत्तरतेजस्सूत्रार्थमितिच वदन्ति, एतेन वियदुत्पत्तिहेतुना वायोरप्युत्पत्तिर्व्याख्यातेतिच व्याकुर्वन्ति, अतिदेशत्वमपि नाभ्युपयन्ति, एतेनेति वियदुत्पत्तिहेतुसामान्यसंग्रहार्थमसंभवसूत्रम्मातरिश्वसूत्रात्प्राङ्न प्रक्षिपन्ति, अहो कीदृश्येषामेषा भाष्यप्रणयनपरिपाटी, नूनमतोऽन्यत्र विश्वासोपजननायैवात्र सूत्रक्रमविपर्यासाकरणमेतेषां, ततइदमेकमेवालमधिकरणं बादरायणो न पाञ्चरात्रइति विश्वसितुं विवेकिनां, यतआहासंभवस्तु सतोऽनुपपत्तेरिति, किञ्चातः, एतदतोभवति, यदुत नास्ति वियदादेस्सत्वमिति, तत्कथं, एवं, ननु यदि वियदपि कुतश्चिदुत्पद्यते तर्हि तदपि कुतश्चिदुत्पद्यतामितिचेन्न, यतस्सदिति श्रावयति वियत्कारणं श्रुतिः, नहि सतस्संभवउपपद्यते, संभवात् पूर्वं प्रध्वंसात् परश्चासत्वप्रसंगात्, न ह्यान्तरालिकेन भावेन सत्वोपपत्तिः, पूर्वोत्तराभ्यामभावाभ्यामसत्वस्यैवापत्तेः, नहि कदाचित्सदन्यदाऽसदिति किञ्चिद्भवति, असत्यदर्शनात्, सर्वदा सर्वत्र सर्वात्मनाप्यभावादेव ह्यसदित्युच्यते शशशृंगादि, तत्र सर्वदा सर्वत्र सर्वात्मनापि भावादेवहि सता भवितव्यन्तद्विपरीतेन वस्तुना, तथाहि किलाह भगवान् परमेश्वरो, "नासतो विद्यते भावो नाभावो विद्यते सतः" इति । तत्र कथं सतस्संभवस्योपपत्तिः, अतो यदुत्पद्यते वियदादि न त-

त्सदिति, एवञ्च सतइति ब्रह्म निर्दिशन्वियदादेस्सद्विविक्तत्वं किल मिथ्यात्वं सूचयति सूत्रकारः, यथा तदनन्यत्वं भावे चोपलब्धेरिति तदात्मनोपलभ्यमानत्वे सति तद्व्यतिरेकेणाभावरूपमसुसूचत्, एतदर्थमेवात्रेदं प्रासंगिकमधिकरणं, वियदादेरपि सत्वे कथमसंभवस्तु सतइति द्रागिव वक्तुं शक्येत महता प्रयासेन वियदादेस्संभवं साधितवता, एवञ्च सति रज्जुसर्पस्यापि सत्वमुपेयतोऽत्र कथंकारं विवरणाधिकारइति न कोपि पृच्छतीति हा कष्टं खल्विदं संवृत्तमित्यसंभवाधिकरणम् ॥

अथ तेजोऽतइत्यारभ्यात्माधिकरणान्तान्यधिकरणानि विमृशामः, कथमधिकरणानीत्यभिधीयते अधिकरणमित्येवाभिधातव्यं, तथाह्याह श्रीभाष्यकारः,

तेजोऽतस्तथाह्याह ।

इदं पूर्वपक्षसूत्रं, किं केवलाद्वायोस्तेजउत्पद्यते, उत वायुशरीरकात् ब्रह्मणइति विशये, केवलादेवेति तावदाह तेजोऽतइति । नन्वभावं बादरिराह ह्येवमितिवत्तथाह्याह, यथाऽयमर्थस्स्यादिति सिद्धान्तसूत्रमिवेदं प्रतिभाति, ननु सन्ध्ये सृष्टिराह हीतिवत्, तत्र कथमिदं पूर्वपक्षसूत्रं स्यादितिचेन्न, पूर्वपक्षदृढीकरणायास्याप्येवं विन्याससंभवात्, अस्तु वायोरग्निरित्येव श्रवणे कथं केवलाद्वायोरिति प्रत्यवस्थानं, वायुशरीरकादात्मनइत्यश्रवणादिति गृहाण, अथापि वायुरतइत्यारब्धव्ये सकथन्त्यज्यतामितिचेत् किमुत्तरं, सूत्रकारः किल तत्याज, स कथं पर्यनुयोक्तुं शक्यइत्युत्तरम् ।

"आपः" केवलादेव तेजसः ।

ननु पूर्वसूत्रेणैव चरितार्थमिदं, किं पुनर्वचनेन, किमेवं पुनःपुनः पर्यनुयुङ्क्षे ब्रह्मसूत्रे, अद्वैतिनामपि हीदं भवति व्यर्थं, नन्वनन्तरं पृथिवीं ग्रथयिष्यति, तत्र मध्येऽपोन्तरयामीत्यन्तरयती-

ति ते व्याकुर्वन्ति, भवतान्तु कथमितिचेत्, किंकेवलेनान्तराकलनेन यदि तूष्णीमेव श्रोतुमिच्छसि शृणु कथ्यमानं, अस्माकमपि कुतस्तथा न स्यात्।

"पृथिवी" केवलाभ्यएवाद्भ्यः।

नन्विदमपि भवति व्यर्थं भवतां, अद्वैतिनान्तु न किञ्चिदपि व्यर्थं, सर्वस्यापि क्रमसंपादनार्थत्वात्, कथमन्यथा विपर्ययेणत्विति प्रतिसर्गक्रमो निरूपयितुं शक्येतात्र सर्गक्रमानिरूपणे, अस्ति च तत्वनिर्धारणेन विप्रतिषेधप्रतिषेधोऽपि तेजःपृथिवीसूत्रयोरिति चेन्न, कुतः, तूष्णीमेव श्रोतव्यमिति दत्तोत्तरत्वात्।

अथ कथं पृथिवीति ब्रवीषि, ता अन्नमसृजन्त इति हि श्रूयते श्रुत्यन्तरइत्याक्षिप्य पूर्वपक्षिमुखेन तत्वन्निर्धारयति।

"अधिकाररूपशब्दान्तरेभ्य" इति।

पृथक्सूत्रमिदं। तथाच यथाकथञ्चित्तत्वनिर्धारणएवाहं प्रवणो न विवादइति सूचयतीति प्रतीयते। एवं परमोपकारिणमपि प्रतिक्षिप्य पूर्वपक्षिणं सिद्धान्तयति "तदभिध्यानादेवतु तल्लिंगात्स" इति। सएव पुरुषोत्तमस्तत्तदनन्तरवस्तुशरीरकः कारणं, तदभिध्यानात्, बहुभवनविषयाभिध्यानरूपात् तल्लिंगात्, ब्रह्मलिंगादित्यर्थः।

एतस्माज्जायते प्राणइत्यादावप्याकाशादिक्रमेण ब्रह्मवंश्यत्वमादायैव ब्रह्मजत्वमुच्यतइति पूर्ववाद्यभिमतं प्रत्याह "विपर्ययेण तु क्रमोऽतउपपद्यते चेति। तुशब्दोऽवधारणे च किञ्च तैत्तिरीयक्रमविपर्ययेण श्रुतो मुण्डकक्रमोऽतएव ब्रह्मणस्साक्षादुत्पत्तेरेव उपपद्यते। एतच्च साक्षाद्ब्रह्मणस्सर्वकार्योत्पत्त्युत्तंभनम्।

अत्र पुनरप्याशंक्य समाधत्ते "अन्तराविज्ञानमनसीक्रमेण तल्लिंगादितिचेन्नाविशेषादि" ति प्राणखाद्योरन्तराळे क्रमेणेन्द्रियमनसी पठ्येते, तादृश पाठरूपाल्लिंगान्न साक्षाद्ब्रह्मजत्वमिति चेन्न,

एतस्माज्जायतइत्यस्य सर्वत्रान्वयाविशेषादित्यर्थः, ननु विज्ञानमनसीनक्रमेण पठ्येते, मन स्सर्वेन्द्रियाणि चेति विपरीतक्रमदर्शनात्, अतोऽन्तरा मनोविज्ञाने क्रमेणेति क्रमेण भवितव्यं, किञ्च यथाश्रुतितैत्तरीयमवलंब्य मुण्डकक्रमोप्येतदनुसारेण नेयइति पूर्वपक्षे लिंगेन समाहिते मुण्डकवाक्यस्य समाधानमेव नात्यन्तमपेक्षितं, कृतेऽपि तस्मिन् पुनरपि पाठक्रममादाय कथं शंकोदयः, कथं वा स्फुटमेव प्रतीयमानेऽन्वयाविशेष तस्योपन्यसनीयता, अपिच यथा विज्ञानमनसीक्रमेण पठ्यमाने खादीनां साक्षाद्ब्रह्मजत्वं रुन्धतस्तथा प्राणोऽपि रुणद्धीति किन्तत् परित्यागे बीजं, कुतोवा विज्ञानमनसोरपि स तन्नरुन्ध्यादितिचेन्न, कुतः, सर्वस्यापि तूष्णीमेव श्रोतव्यत्वात् ।

अथाकाशाद्वायुरित्यादौ सर्वत्र तत्तच्छरीरकाद्ब्रह्मणइत्यर्थोपगमे लोकसिद्धस्याकाशादिमात्रबोधकत्वस्य कागतिरितिचेदाह– चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तः, ब्रह्मण्यभाक्तः, ब्रह्मभावभावित्वात्, यथा घटभावभाविनीलपीतइत्यादिव्यपदेशइति, यदि सूत्रकारः पाञ्चरात्रइति प्रमाणान्तरेण निर्णीतस्तदैवायमेवार्थोऽस्येति स्यादितिचेत्, ओम्, शृणु सूत्रानुगुण्यं, अतइति सतोमातरिश्वतइतिच परामृश्यते, एतदर्थमप्यत्रासंभवसूत्रं, तथा च तेजोऽतस्सतस्तथाह्याहेत्यादिमं विप्रतिषेधसूत्रं, अतो मातरिश्वतस्तथाह्याहेति द्वितीयं, अतो मातरिश्वतएवेति तृतीयं प्रतिषेधसूत्रं, आपइत्यन्तराकलनं विपर्ययक्रमनिरूपणापेक्षितसर्गक्रमनिरूपणार्थं, अत्र पदार्थतत्वनिरूपणवशादेव क्रमलाभोऽपि भवति ।

ततः "पृथिव्यधिकाररूपशब्दान्तरेभ्य" इति सूत्रं, अन्नमित्यध्याहार्यं । अतस्तथाह्याहेत्यनुवर्तते, अन्नमतोद्भ्यस्तथाह्याहेति प्रथमं सूत्रं, तथा पृथिवीति द्वितीयं, एवं विप्रतिषेधे, पृथिव्येवातः, अधिकाररूपशब्दान्तरेभ्यइति प्रतिषेधसूत्रं, तथाहि भाष्यं "पृथि-

व्येवेयमन्नशब्देनाद्भ्यो जायमाना विवक्ष्यतइत्येवकारघटितं, "ततश्च श्रुत्यन्तरेणाद्भ्यः पृथिवी, पृथिव्या ओषधयइत्यादिना विरोध इति पूर्वः पक्ष" इति भामती च ।

तदभिध्यानादेवतु तल्लिंगात्सः ।

प्रासंगिकमितआरभ्याधिकरणत्रयं, क्रमनिरूपणमुपजीव्यप्रवृत्तत्वात्, अत्रापि विप्रतिषेधादिकमुपपादितं परिमळे, सइत्यनेन वियदधिकरणेऽस्तित्विति सूत्रोदाहृतश्रुतिघटकात्मशब्दोपात्तः परा मृश्यते, यद्यपि सतइति शब्दतउपात्तं ब्रह्म, तेजोऽतइत्यत्राप्यनुवृत्तमथापि तस्य न साक्षाद्भूतकारणत्वमुक्तन्तत्र, तत्तेजोऽसृजत इत्यत्रापि वायोस्तेजसउत्पत्त्युपपादनात्, तथाच पुल्लिंगोपपत्तिः, तदभिध्यानादित्यनेन बहुस्यां प्रजायेयेत्यस्य स्मारणात् सइत्येतदपि तत्पूर्ववाक्ये सोऽकामयतेति तत्पदेनैव प्रस्तुतं स्मारयति । तदभिध्यानादिति सृज्यमानाभिध्यानं कृत्वेत्यर्थः, तथाच तत्तदभिध्यानलाभः, अभिध्यातृपुरुषलाभेनेश्वरइति विभाव्यते, व्यवस्थापितक्रमाभञ्जनाय तत्तदात्मनाऽवस्थितइति हठादायाति, तल्लिंगादित्यनेन भाष्योक्तं श्रुतिलिंगं सर्वमप्युपस्थापितं भवतीत्येतत्सर्वमत्र विभावनीयं , तदभिध्यानरूपाल्लिङ्गादिति विवृण्वतां द्वितीयस्तच्छद्बोऽव्यर्थ इतिच, विपर्ययसूत्रस्य भाष्योक्तएव स्वारसिकोर्थइतितएवविदुः , यदिनासूयेयुः , दृश्यते , उपपद्यतेचेत्यर्थ एवोपपद्यतइति चकारोप्यनातिप्रयोजनस्तन्मते , अन्तरेति सूत्रार्थस्तु, आत्मखाद्योरन्तराळे विज्ञानमनसीकेनचित्क्रमेणानुक्रमणीये, तत्रानुक्रमणरूपाल्लिंगात्, ततो विशेष्यते विभज्यते भूतोत्पत्तिक्रम इति चेन्न, अविशेषात्, भौतिकत्वात्तेषां भूतक्रमापेक्षया क्रमविशेषाभावात्, तेनैव चारितार्थ्याद्भूतक्रमाभञ्जनात्, अभौतिकत्वेऽपि भूतक्रमवत्पृथक्क्रमान्तरश्रवणेन तेन भूतक्रमाभञ्जनादिति ।

तत्र एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिचेति क्रमविपर्ययेणेन्द्रियाणां विज्ञानपदेनोपादानं, "बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेवच । इन्द्रियाणि हयानाहुरि" त्यत्र मनसः पूर्वमुपात्ता बुद्धिरप्यनुगमय्य गृहीतेति सूचयति, तत्रच कठवाक्यमुपस्थापितं भवति, तेनच क्रमेणानुक्रमणसंवादः, अनुगमय्य द्वित्वेनोपादानन्तु मुण्डकवाक्योपस्थापनाय, तेन चात्मखाद्योरन्तराळानुक्रमणलिंगोपस्थापनं, न चान्तराविज्ञानानीति न्यासापत्तिः, तावन्मात्रेणैव भूतक्रमभञ्जनेऽपि क्रमेणानुक्रमणसूचनालाभात्, विज्ञानपदेन संकल्पविकल्पात्मकमनसो ग्रहणासंभवाच्च, इन्द्रियपदेन ग्रहणे बुद्धेर्ग्रहणासंभवेन संवादसूचनालाभाच्च, प्राणस्यान्तराळे श्रवणेऽपि वायुविशेषात्मकेन तेन न भूतक्रमभंगप्रसंगइत्यादिकमूहनीयम् ।

इत्यन्तराविज्ञानाधिकरणम् ।

यस्ये मे विज्ञानमनसी स किमुत्पद्यते, उत नेति विशये उत्पद्यतएव, यतः स्पष्टमेव व्यपदिश्यतइत्येतत्परिहरति श्रुतिविप्रषेधप्रसञ्जनार्थं ।

चराचरव्यपाश्रयस्तु स्यादिति ।

चराचरव्यापाश्रय आकाशादि पदव्यपदेश आकाशादिषु भाक्तस्स्यात्, ब्रह्मणितुमुख्यः, ब्रह्मभावभावित्वात्, घटभावभाविनीलःपीत इत्यादिव्यपदेशवदित्यर्थः, एतेन ननु ब्रह्मण आकाशादि सर्वशरीरित्वे कथन्तेष्वाकाशादिपदव्यपदेश इति शंकापरिहृतेत्येतन्नाधिकरणार्थः । कुतः यतस्तत्भावभावित्वादित्यत्र तत्पदेन पूर्वोपात्तमेव परामर्शनीयं, पूर्वन्तु चराचरव्यपाश्रय आकाशादिपद व्यपदेशस्तेषु भाक्त इत्येववाचनिकोऽर्थः परिगृहीतोभवता, ननु ब्रह्मणीति, त्वदुत्प्रेक्षित पूर्वपक्षानुसारेण तथा गृहीतुमशक्यत्वात्, तत्र कथं ब्रह्मभावभावित्वादिति हेत्वर्थस्स्यात्, किञ्च ब्रह्मणि मुख्यत्वपक्षे,

आकाशोमुख्यत्वात्, चराचरव्यपाश्रयस्तुस्यादित्यादि प्रकारेणाकाशाद्यधिकरणं कुतोनव्यरचि, अहह चराचरेति जननमरणेहिसूचयति, उक्तश्चात्ता चराचर ग्रहणादिति सर्वसंहारसाधनावसरे, व्यपाश्रयइति च तत्र मुख्यत्वं। यत्भावभाविनी जननमरणे तत्र तद्व्यपदेशस्य भाक्तत्वं ज्ञापयति, दृश्यते चायन्न्यायो यथा योधव्यपाश्रयमायोधनन्तत्र मुख्यं राजभावभावित्वाद्राज्ञिभाक्तमिति तद्व्यपदेशोऽपि तथेति, तत्र कथन्तत्रभाक्त इत्यर्थान्तरतया क्रोढीकरणं युज्येत। तत्तद्व्यपदेश इत्यनुक्तिरपि गण्डस्योपरिपिटकेवहित्वर्त्तते, ततः किमर्थमेवं शारीरकन्यायास्सर्वेऽप्यपन्यायाः क्रियन्ते प्रथमप्रवृत्त भगवत्पादीयभाष्य प्रद्वेषमात्रेणेति।

इति चराचराधिकरणम्।

अथात्माधिकरणम्।

नात्माऽश्रुतेरिति विप्रतिषेधप्रथमपक्षोपन्यासः। अश्रुतेरिति हेतुः। नञ्वियुक्तेन भागेन द्वितीयपक्षोपन्यासः। श्रुतेरितिच्छेदः। उत्पत्तिपक्षमवलंब्य विप्रतिषेधं प्रतिषेधत्येकदेशी प्रतिज्ञाऽहानिमनुरुन्धानोविभक्तत्वश्चानुचिन्तयन्। नैवोत्पद्यत आत्माऽश्रुतेः। नह्यस्योत्पत्तिप्रकरणे श्रवणमस्तिभूयस्सुप्रदेशेष्विति भाष्यं। नायमत्र भूयोन्यायोऽवतरत्यभावरूपत्वादश्रवणस्य। नहि घटवतिघटाभावो नेतुं शक्यते, शतेष्वपि घटाभाववत् सुशक्यंते यतोनेतुं घटाइत्याशंक्याह। नित्यत्वाच्ताभ्य इति। स्यान्नामजायमानोऽपि नित्यश्श्रुतिबलादित्याशंक्याह चेति। अजत्वाच्चताभ्यइत्यर्थः। कथन्तर्हि प्रतिज्ञायाअहानिरित्यस्यापि चेत्येवप्रत्याह। अव्यतिरेकादेवचताभ्य इत्यर्थः। अव्यतिरेकश्चतत्वमसीत्यादिना बहुशउपदिश्यमानं ब्रह्मात्मनोरैक्यं, तेन विभाग औपाधिकइत्यर्थसिद्धोऽपि ताभ्योदृश्यत इति दृढीक्रियतेऽव्यतिरेक इति, परेतु श्रुतेरिति छित्वोत्पत्तिनिषे-

धश्रुतेरिति व्याकुर्वन्ति । वयमेवैवं छिंद्मः । अश्रुतेरित्येवछिन्दन्ति सर्वेऽपीतरइतिच वदन्ति । तच्चप्रथममपथगमनं । महाजनोयेनगतस्स पंथा इति न्यायात् । वियदधिकरणप्रक्रमविरोधश्च यतस्तत्रानुत्पत्ति साधनायाश्रुतिरेव हेतूकृता । अत्रेदमपि भाषन्ते । कथन्तर्हि प्रतिज्ञासिद्धिः । जीवस्यापि कार्यत्वात् । एवन्तर्हि कथमनुत्पत्तिसाधनं एवं । सदाचिदचिन्मिश्रं ब्रह्म । प्रळये सूक्ष्मतन्मिश्रं । सर्गादौतु वियदाद्याकारेण परिणमते प्रकृतिरचिदंशः । चिदंशास्तु जीवास्सुखदुःखानुभवानुकूलं स्वीयविज्ञानविकासमाप्नुवन्ति । इयमेवैषामुत्पत्तिर्धर्मान्यथाभावरूपा । सातु वियदादेस्स्वरूपान्यथाभावरूपासास्य नेति निषिध्यते । तत्तदवस्थचिदचित्संवलनमेव ब्रह्मणः कार्यकारणभावइति । एतावतावियदिवव्यापि परन्तु चेतनत्वाद् सर्वज्ञं सर्वशक्तिच ब्रह्मनियतकालं प्रकृतिं परिणामयति, जीवांश्च सुखदुःखे अनुभावयतीत्यायातं, तत्र कथमेकविज्ञानेन सर्वविज्ञानं, न च सर्वं विशेषणं, विशिष्टन्तु ब्रह्म, नास्त्येवा विशेषणमिति कुतोविशिष्टविज्ञानेन न सर्वविज्ञानमितिवाच्यं, तथा सतिवाचारंभणं विकारोनामधेयम्मृत्तिकेत्येव सत्यमिति किमियताश्रुतेः कोलाहलेनेति कृतधियोविदांकुर्वन्तु । उत्पद्यतेनोत्पद्यत इतिच विप्रतिषेधप्रतिषेधप्रकरणएव विप्रतिषिद्धं ब्रुवन्तो न प्रतिषेद्धुं शक्यन्त इत्युपरम्यते ॥

इत्यात्माधिकरणम् ।

ज्ञोऽतएव ॥

ज्ञप्तिरतएवेति कुतोनसूत्रितम् । ज्ञाताऽतएवेति यतोनसूत्रितन्ततएवनसूत्रितं । कोऽभिप्रायः । अयमभिप्रायः । पूर्वं विप्रतिषेधोपन्यासार्थं श्रुतेरित्यपि विवक्षितम् । अनुत्पत्तिस्तु साधिता । साच प्रतिज्ञाऽहानये ब्रह्माभेदमन्तरयति । तथाचाऽतोऽनुपसर्गेक इति ज्ञो ज्ञाताऽतएव श्रुतेरेव, घञर्थेक विधानमिति ज्ञोज्ञप्तिरतएवश्रुतेरेवेति

विप्रतिषेधे, ज्ञोज्ञप्तिरेव , कुतः , अतएवानुत्पत्त्याज्ञप्तिरूपब्रह्माभिन्नत्वादेवेतित्रिरावर्तते सूत्रमिति, तथात्त्वाहकल्पतरुः, "आत्मैवास्य ज्योतिरित्यादि श्रुतीनां पश्यंश्चक्षुश्शृण्वन् श्रोत्रमित्यादिश्रुतिविरोधः परिह्रियत " इति कथन्तर्हि " वादिविप्रतिपत्तेस्संशय " इति भाष्यमिति चेदेवं , नन्वनुत्पत्त्याज्ञप्तिरूपब्रह्माभेदेसिद्धे , कुतोज्ञातावाज्ञप्तिर्वेति विकल्पस्यावकाशः । तदभावेच कुतो विप्रतिषेधप्रसङ्गइति प्राप्ते , ज्ञातैवेति धीरं गर्जतिकाणादः , ज्ञप्तिरेवेति तर्जयतितं कापिलः , ततस्तुसंदिग्धेमध्यस्थः । तथाचोभयथा प्रतिपादयन्तीविप्रतिषिध्यते श्रुतिर्व्यवस्थापितार्थोपमर्दने नेति ।

विप्रतिषेधानङ्गीकारे श्रुतेरित्यभावात् कथं ज्ञोज्ञाताऽतएव श्रुतेरेवेति श्रीभाष्यमिति चेदसङ्गतमेव किञ्चजाग्रत्यां ज्ञप्तित्वप्रतिपादिकायां श्रुत्यां कथं श्रुतेरेवेति निर्धारणं शक्यम् ।

इति ज्ञाधिकरणम् ।

कथमणोरात्मनोऽव्यापकेन ब्रह्मणाऽव्यतिरेक इत्याशङ्क्यसमादधाति ।

" उत्क्रान्तिगत्यागतीनामि " त्यादिना

श्रवणादिति झटित्येवापतति , द्रागित्येवाकाङ्क्षोदयात् , दर्शनस्याभावादन्यथाचापूरणात् , आत्मेत्यनुवर्त्तते नाणुरतच्छ्रुतेरिति चापकृष्यते । तथाचाऽत्माऽणुरुक्तानां श्रवणात् , नाणुरतच्छ्रुतेरिति विप्रतिषेधेऽणुरेवोत्क्रान्तिगत्यागतीनां श्रवणादित्यादिनैकदेशि समाधाने , तद्गुणसारत्वादित्यादिना सिद्धान्तः , अस्य सर्वस्याप्युपष्टंभक " मित्येवञ्जातीयकाहि श्रुतिरात्मनोऽणुत्वे विप्रतिषिध्येतेति नाणुरितिसूत्रस्थं भाष्यं , नात्रविभुत्वं साध्यते , किंत्वणुत्वमेव निषिध्यते , अणुत्वेन ब्रह्माव्यतिरेकाक्षेपस्य तन्निराकरणमात्रेण " प्रतिक्षेपसंभवात् , अतएव नाणुरिति विप्रतिषेधकोव्यन्त-

रानुवादः, प्रतिज्ञाहानिरव्यातिरेकादितिवच्चराचरव्यपाश्रयस्तुस्या-त्तद्व्यपदेशइतिवच्च तद्गुणसारत्वात्तुतद्व्यपदेश इत्युपपत्तिमात्रप्रदर्शन-श्च, यत्त्वत्रपूर्वमतएवेत्यनेन श्रुतेरित्यस्वीकारे कुतोऽत्रश्रवणादि-त्यस्य लाभइति परोक्तन्तत्तुच्छं, उक्तरीत्यातस्य स्वयमेवोन्मेषात्, विप्रतिषेधार्थमात्माधिकरणे सम्भावितस्य श्रुतेरित्यस्य पूर्वाधिकरणे तदर्थमेवानुवृत्तेश्चेति ।

अथ तदीयं विवरणं विमृशामः, ज्ञाधिकरणमेव कर्त्रधिक-रणपर्यन्तं गच्छति, ज्ञातृस्वभावस्य विभुत्वे सर्वदासर्वत्रोपलब्धि-प्रसङ्गमणुत्वसाधनेन समादधात्युत्क्रान्तीत्यादिना, कथमणोस्सर्व-शरीरव्यापिवेदनोपलंभ इत्येतन्मतान्तरेण समादधात्यविरोधश्चन्द-नवदिति, स्वमतेन समाधानं गुणाद्वेति, अथकथं विज्ञातुर्विज्ञान-पदेन व्यपदेशोविज्ञानं यज्ञन्तनुतइतिचेदाह, तद्गुणसारत्वात्विति सचासौगुणश्चेति विग्रहः, यावदात्मभावित्वाच्च विज्ञानस्य नायं-दोषः, प्राज्ञस्याऽनन्दगुणसारत्वेन तत्पदेनव्यपदेशवत्, कथं याव-दात्मभावित्वं सुषुप्तावभावादितिचेदाह, पुंस्त्वादिवत्त्विति, सर्व-गतज्ञानस्वरूपात्मवादे दोषमाह, नित्योपलब्धीति, शरीरएवा-त्मोपलभ्यते, अन्यथाविभुत्वपक्षे आत्मन उभयहेतुत्वे सर्वदासर्व-त्रोभयप्रसंगः, अन्यतरहेतुत्वेऽन्यतरप्रसंग इति तदीयंविवरणम् ।

अत्र "गुणाद्वालोकवदित्यादिना साक्षादणुत्वसाधने प्रा-प्तानुपपत्तिपरिहारार्था प्रवृत्तिरिवप्रतीयते, नतु स्वाभाविकविज्ञान-साधनायाणुत्वसाधने, तथासति " ज्ञोऽतएव, पृथगुपदेशात्, त-द्गुणसारत्वात्तु, यावदात्मभावित्वाच्च, पुंस्त्वादिवत्त्वस्य, नि-त्योपलब्ध्यनुपलब्धिप्रसङ्गइति चेन्नाणुत्वात्, उत्क्रान्तिगत्यागती-नां । स्वात्मनाचोत्तरयोः, नाणुरतच्छ्रुतेरिति चेत्, स्वशब्दोन्मा-नाभ्याञ्चेत्येवं क्रमेण भवितव्यमित्येतत् सहृदयाहृदिकलयेरन्, किञ्चप्रथमं श्रुत्यानित्यविज्ञानगुणसाधनं, ततश्च तस्याणुत्वेनसमर्थनं,

अणुत्वस्यतुगुणाद्वेति तेनेत्यपरिहार्यः परस्पराश्रयः, नचगुणस्य नित्यत्वमणुत्वमपेक्षते, तत्तुगुणमात्रमपेक्षतइति कुतोऽयदोषइति वाच्यम्, तर्हि व्यतिरेकोगन्धवदित्यन्तेनैव समापनीयं, नतु तदुपरिपृथगुपदेशादित्यादिकं कथनीयं, यतः काणादएवात्रप्रत्यवस्थाता, सचविज्ञानगुणेन विप्रतिपद्यते, तथैवावतारितत्वादुत्क्रान्तिसूत्रस्य, नचकापिलप्रत्यवस्थानमपेक्ष्य पृथगुपदेशाद्यारम्भइति वाच्यं, ततःपरं विज्ञानस्य नित्यत्वसाधनानवकाशात्, अहहविपरीतंहीदं वर्त्तते, यस्तुगुणेन विप्रतिपद्यते, किन्तु तस्य नित्यत्वे, तेन सहविवादेन नित्यत्वंसाध्यते, यस्तुगुणएव, तेन विवादेगुणस्तन्नित्यत्वश्चेति, अतः पूर्वोक्तः क्रमोऽवर्जनीयोभवतां, गुणाद्वेत्युक्त्वापृथगुपदेशादित्यनन्तरं प्रसक्ताशङ्कानिवर्त्तनायतत्सारत्वादित्येतावतिकर्त्तव्ये गुणेतिचव्यर्थं, नचत्वन्मतेऽपि कथमप्रसक्ताबुद्धिस्तत्पदेन परामृश्येतेति वाच्यं, हृदिहीतिहृदय प्रसङ्गेनैव तद्गताया बुद्धेरुपस्थापनात्, यस्य गुणेनाणुत्वमुपपादयति श्रुतिस्तस्य तत्पदेनझटित्येव बुद्धावारोहाच्च, त्वन्मतेतु तद्गुणसारत्वन्न प्राज्ञैकरूपमात्मनः, अपिच मणिद्युमणिप्रदीपप्रभादृष्टान्तोऽपि नतरांसंगच्छते, साहिस्वाश्रय समीपदेशावच्छेदेनाधिकं प्रकाशयति यतोऽतिसूक्ष्ममपि केशादिकं प्रकाशयति, विप्रकृष्टदेशावच्छेदेनत्वग्रभागेनाल्पम्। यतोऽतिमहान्तमपि नस्पष्टंप्रकाशयति । यतस्तादृशमप्यग्रभागावलीढमानीयसमीपे प्रदीपं पश्यन्ति लोकाः। ततश्शिरस्ताडनोरस्ताडनयोर्वेदनावैलक्षण्य प्रसंगस्त्वन्मते। नचेष्टः प्रसंगः । प्रभायाइव वैरल्यनैबिड्यप्रसंगेन गुणत्वहान्यापत्तेः । ततोगुणाद्वेति पूर्वपक्षसूत्रमेव। यत्तुचिन्मात्रस्वरूपस्य विभुत्वपक्षे, तस्योपलब्धिहेतुत्वे सर्वदासर्वत्रोपलब्धिप्रसंगः अनुपलब्धिहेतुत्वे तथा तत्प्रसंगः। उभयहेतुत्वेतु तथैवोभयप्रसंगइति भाषितन्तन्नसंभाषितम्। नह्येकस्यैव भावाभावोभयहेतुत्वं कश्चिच्छङ्केत । अत उपलब्धिहेतुत्वे

सदातत्प्रसङ्गः । तदहेतुत्वेतु सदातदभावप्रसङ्गइत्येव भाषितव्यम् । सर्वत्रेति सूत्रानुक्तार्थकथनम् । नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरस्य वान्यथेति न्यासापादनमपि गीर्वाणगुरुणाप्यशक्यनिवारणम् । अन्यथा चैतन्यरूपगुणानङ्गीकार इत्येव भवता भाषितव्यम् । सन्निकृष्टत्वात्, नतु विप्रकृष्टस्याणुत्वस्यानङ्गीकारइति वार्थिकस्य पूर्वपक्ष्यभिमत विभुत्वस्याङ्गीकारइति वा ।

यत्तु चिन्मात्ररूपत्वेजडत्वेजडाजडत्वेवेति शिरस्त्रयमिति समर्थनं सुदर्शनस्य तदपि जडत्वजडाजडत्वयोः पूर्वपक्षाविषयत्वान्न समर्थनम् । अथकथमन्यतरंत्यात्मेन्द्रियान्यतरग्रहणंभाष्य इति चेत्, उपलब्धिपदेनेन्द्रिय विषयोपलब्धेर्ग्रहणादिति गृहाण ॥

इति तद्गुणसारत्वाधिकरणम् ।

"कर्त्ताशास्त्रार्थवत्वात्"

सत्यपि कर्त्ताविज्ञानात्मापुरुष इति श्रवणे किमर्थापरत्या, अत्राह, यद्यप्यस्तिश्रवणं, साधितश्च ज्ञातृत्वं श्रुतेरेवेति, अनुवर्त्तैतैव ततोऽतएवेति चेति कर्त्तेत्येतावदेववक्तव्यं, अथापि नस्वरूपादस्त्यतिरिक्तं ज्ञानन्नामगुण इत्येतदपाकरणार्थमुदाहृता तत्प्रतिपादिका तत्र श्रुतिरतएवेति, कर्तृत्वन्तु बुद्धिस्थमात्मन्यध्यारोपितमित्यभिमन्यते साङ्ख्यः, नतत्रश्रुतिरुदाहर्त्तव्या भवति, यतस्तदेवानुवदतीतिद्रागिवबदेत्, अतोऽर्थापरत्यादरश्शास्त्रार्थवत्वाच्छास्त्रस्य योयमिष्टसाधनीभूत कर्मोपासनबोधनद्वारा तदनुष्ठापकत्वस्वार्थः प्रयोजनन्तच्चभोक्तुश्चेतनस्य विनाकर्तृत्वन्निर्वहति, नहिजडात्मिका बुद्धिर्बोधयितुं शक्येति ।

नेदंसाधु, बुद्धिगतकर्तृत्वेना निर्वाहपूर्वकश्चेतन गतकर्तृत्वस्यानेनसिषाधयिषितत्वे, आत्मनः कर्तृत्व सर्वदातत्प्रसङ्ग इत्येतदपाकरणार्थं यथा च तक्षेत्यस्यावश्यकत्वेऽपीतरेषां षण्णामनति

प्रयोजनकत्वात् अतोविप्रतिषेधवशादेव विद्यमानस्यापि श्रवणस्याग्रहणं, विप्रतिषेधश्च, नह्ययमात्मास्वयं कर्त्ताभवितुमर्हत्यसङ्गोह्ययं पुरुषइति शास्त्रार्थवत्त्वायेति कश्चित्पक्षः, कर्त्तायमात्माभवितुमर्हति कर्त्ताविज्ञानात्मापुरुषइति शास्त्रार्थवत्त्वायेत्यपरइति, तत्र प्रथमपक्षमवलंब्यबुद्धिगतेन समाधानं सांख्यस्यैकदेशिनः, तमिमं व्युत्पादयितुं प्रथमंकर्तृत्वमेवायं साधयितुं प्रवृत्तेसिद्धान्ती कर्त्ता चैवायञ्जीवस्स्याद्यथोपलब्धा, कुतः, यजेतजुहुयाद्दद्यादिति शास्त्रार्थवत्त्वात्, कथमिदं कर्त्रपेक्षितोपायविधायकं शास्त्रमर्थवत्स्यात् कर्त्तुरभावेकंप्रति किमर्थं किंविदध्यादिति, तदुक्तं पुरस्तात्, "शास्त्रफलं प्रयोक्तारितल्लक्षणत्वादिति, तथेदमपि" कर्त्ताविज्ञानात्मेति शास्त्रमसतिकर्त्तर्यभिधेयवन्नस्यादिति। अथ पक्षान्तरव्यावृत्त्यर्थमेवकारघटनेऽपि कथं कर्त्ताचैवायमिति चकारावापइति चेन्न, "उपलब्धिवदनियमइति वक्ष्यमाणेन संसूचनादुपलब्धिमुपगच्छसि कुतः कृतिंपरन्नोपैषीति तन्नोपलब्धृत्वं कर्तृत्वञ्चभाविकमौपाधिकंवेत्यन्यदेतत्, तस्मात् कर्त्ताचैवायञ्जीवस्स्यादिति, अथ नास्त्येव कर्त्तेति नब्रूमः, अपितु बुद्धिस्थेनैव कर्तृत्वेन भवति शास्त्रमर्थवदितिब्रूमइति चेन्न, "विहारोपदेशात्" उपदिश्यतेहिसन्ध्ये सञ्चारोजीवस्य सईयतोऽमृतोयत्रकामं, यथाकामं परिवर्ततइतिच, नह्ययमर्थवान् भवत्यसञ्चारेजीवस्य प्रयोजनवांश्च सन्ध्येसञ्चारोपदेशः, अथ नविहारपरोऽयन्तदुपदेशः, अपितुमर्त्याच्छरीराद्व्यतिरेकप्रदर्शनपरः, अतएवामृतइति स्वेशरीरइतिचोपदेशः, अयञ्च कथञ्चित्कर्तृत्वेनापि स्याच्चरितार्थइति चेन्न, "उपादानात्" उपादानंहिसङ्कीर्त्तयति शास्त्रंविज्ञानेन विज्ञानानाञ्जीवस्य प्रसार्यायञ्जाग्रतिविज्ञानेन, विज्ञानानिरत्वाचारित्वाथतेन तान्युपादाय परिवर्त्ततेसन्ध्य इत्येतदर्थप्रदर्शनार्थं, अतएव व्यपदिशतिजाग्रत्यपि कर्तृत्वं क्रियासु "विज्ञानं यज्ञन्तनुते, कर्माणित-

नुतेऽपि चे''ति , इमौचावस्थाभेदेन विलक्षणक्रिया व्यपदेशोपदेशौ कथं संगच्छेयातामसति कर्तृत्वेजीवस्य करणत्वेनैव विनियोगेबुद्धेश्च , माचात्रविज्ञानशब्दो बुद्धिवचनइति शङ्केथाः , तथासति निर्देशविपर्ययोहिस्यादिति, एवमवस्थाद्वयविलक्षण कर्तृत्वसाधनोपष्टंभकतयाऽन्तरोपादानसङ्कीर्त्तनमिति सतिसुसङ्गतसूत्रार्थे , उपादानाद्विहारोपदेशाच्च , उपादानपूर्वकविहारोपदेशाच्चेति व्यत्यस्यैकसूत्रीकरणश्चकारोपनिबन्धनश्च परेषां किन्निबन्धनमिति विमर्शनीयं व्यपदेशानङ्गीकारेदण्डस्सूत्र खण्डेनेत्युभयोस्समानं , ततस्तदुद्भावितं बाधकमपनयत्युपलब्धिवदानियम इतीति भाष्यं , यथानुपलब्धृत्वेदोष उद्भावितस्तथाऽकर्तृत्वेऽपि भवतीत्याहेति भाष्यान्तरन्तु , तत्र नित्येत्युपलब्ध्येर्नियमोदोष तयोद्भावितोऽत्रानियम इति वर्त्तते , ततः किंकेनसंङ्गतमिति सुदूरन्निरसनीयं , बुद्धेः कर्तृत्वेदण्डश्शक्तिविपर्ययादिति , आत्मनोऽकर्तृत्वेदण्डस्समाध्यभावाच्चेति क्रियासामान्य कर्त्र्याबुद्धेः करणशक्तिर्विपर्ययात् , विपर्ययगात् , गतैवभवेत्, नह्येकस्यामेव क्रियायां कस्यचित् कर्तृत्वंकरणत्वञ्च भवति , आत्मनोऽकर्तृत्वेत्वात्मानमुपासीतेति विहितसमाधिरात्मनोनभवेदित्यर्थः बुद्धेः कर्तृत्वेतस्याएव भोक्तृत्वमपि स्यादित्यात्मनो भोक्तृत्वशक्तिर्हीयेत , एवं मोक्षसाधनीभूतः , प्रकृतेरन्योऽस्मीत्याकारसमाधिरपि तस्याएव वक्तव्यः । नच प्रकृतिस्तथा समाधातुमलमिति तदभावश्चस्यादिति श्रीभाष्यं , इदन्तुतन्मतदूषणमिव भवति , नहीदानीन्तन्मतन्दूषयितुं प्रवृत्तस्सूत्रकारः , किन्तुस्वमतं शोधयितुं , अतोस्मदुक्तार्थे एवसूत्रे , ततः प्रथमसूत्रएव यन्मोक्षसाधनोपायविधानार्थवत्त्वमप्याकलितं तैस्तत्रानाकलनीयमेव ।

इति कर्त्रधिकरणम् ॥

" यथाचतक्षोभयथा "

यावताशास्त्रस्यार्थवत्तानिर्वहति तावदेवास्य कर्त्तुः कर्तृत्वं, व्यवहारपरमेवहिशास्तिशास्त्रं, नसुप्तम्मुक्तंवा। ततोव्यावहारिकमेवास्य कर्तृत्वं, सोपाधिकत्वात्, ततउपरमेतैवमुक्तः कृतकृत्यः, यथाचतक्षा, नहितक्ष्णस्तक्षत्वं स्वाभाविकं, वास्याद्युपाध्यधीनत्वात्, उपलब्धृत्वमप्यस्यौपाधिकमेव, नतुभाविकं, तत्समानाधिकरणमेव कर्तृत्वन्नतुतद्व्यधिकरणमित्यस्मत् सिद्धान्तः।

अत्र स्वपक्षेऽपरिहार्यं परेणद्रागिवपरिहार्यश्च दोषमुद्भावयामास सांख्योनन्वात्मनः कर्तृत्वेन कदाप्युपरमेतात्मेति, तश्चतक्षेवेच्छानुगुण्येन करोतिनकरोतिचात्मा, बुद्धिस्तुजडानतथेति द्रागेवपर्यहार्षीदित्याह श्रीभाष्यकारः।

अत्रोच्यते, इदञ्चकर्तृत्वनियमापादनमनियममुपन्यस्य सूचयित्वा तदुपगतमेव दृष्टान्तीकृत्यसमादधावित्ययं सुसंगतोऽर्थः, अत्रत्वसंगतएव, सुषुप्तावपि क्रियाह्यापाद्यते, तस्याबुद्धिगतत्वे बुद्धिस्तदाविलीनेति कथमिदमापादनन्तं प्रतिपरावर्त्तयितुं शक्येत, आत्मस्वभावत्वेतु तदाप्यस्ति स इति कथं परिहर्त्तुंवाशक्येत। तक्षदृष्टान्तोऽपि दुर्घटः, नचेच्छानुण्येना नियमोपपादनं भवति, इच्छाया अपि सदातनत्वापादने उपलब्धेरेव शरणीकरणीयतया घट्टकुट्यामेव प्रभातसम्पादनात्, तदातुसांख्येन किंकरणीयं, उपलब्धेरप्यौपाधिकत्वमभ्युपगमनीयं, नतूपाधिनिष्ठत्वमेव, तस्यात्मनिष्ठत्वाभ्युपगमात्, तद्वत्कर्तृत्वमपि स्यादिति निगूढमुपक्षिप्तोर्थस्तक्षदृष्टान्तेन स्फुटीचकारेति सर्वमनाकुलं भाष्योक्तमिति।

इति तक्षाधिकरणम् ॥

" परात्तुतच्छ्रुतेः। "

इदमपि प्रासंगिकं, नह्यत्रपरेषामस्माकञ्च विषयेवैषम्यं, सूत्रार्थ प्रतिपादनप्रकारस्तु विषमः। अथापि विषयावैषम्यान्नतन्निरूपणे प्रयत्यते। परन्तु जीवपरयोस्स्वरूपैक्यमुपेयतां स्वानन्यतयाजीवान् जानतः परस्यानुमन्तृत्वेहिताकरणादिप्रसक्तिरनिवार्या, अत इदमाधिकरणं विरुद्धं, ननुशरीरशरीरिभावेऽपि प्रसजेदयंदोषः, न, शरीरगतदोषाणां शरीरिण्यप्रसंगादित्यस्ति श्रुतप्रकाशिका, तत्रोच्यते, यद्यप्यान्ध्यादिदोषोन साक्षाच्छरीरिण्यस्ति, अथापि तत्प्रयुक्तगर्त्तपतनादिजन्य दुःखादिकन्तुशरीरिणएव, तस्यैवमनोवाकाय कर्मभिः पूर्वोपात्तपापफलत्वात्तस्य, नह्यान्ध्यादिकमपि स्वरूपतोदोष इत्यवर्जनीयमेव हिताकरणादिपरस्य भवन्मते, अस्मन्मतेदोषः परिहृतएवभाष्ये, परिहरिष्यते चानन्तराधिकरणे भेदएव व्यवहारप्रयोनक इति।

इति परायत्ताधिकरणम्॥

" अंशोनानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके। "

नन्विदं कथं संगच्छते, कुतः, उपकार्योपकारक भावप्रयोजकसंसर्गापेक्षया किलेदं प्रवृत्तं, बाढं, तर्ह्युपकार्योपकारकयोर्भेदस्य नान्तरीयकतया सिद्धत्वात् प्रथमन्नानाव्यपदेशादिति व्यर्थं। अतोंशोऽभेदोपदेशाच्चेति सूत्रयितव्यं, सत्यं, अथाप्यंशोभेदव्यपदेशाच्चेत्येतावति कर्तव्येकिन्नानाव्यपदेशादन्यथाचापीति गुरुतरेणच सूत्रेणेतिचेत्तर्हि तदपि समाधेयमेव। उच्यते, उपकार्योपकारक भावोद्विधादृश्यते। तत्रोभयथा श्रवणादनिर्णयइति विप्रधिषंधेस्वामिभृत्यवत् संबधइत्येकदेशिनि, अंशइति सिद्धान्तयितुं प्रवृत्तेसूत्रकारः, अत्रभेदव्यपदेशः प्रथमन्निवेशनीयः, तत्रांशोभेदत्युक्तेभेद-

नित्राऽभेदेति वेतिनिर्णयोनस्यात् , ततोनानेतिव्यपदेशः , नह्यंशो नानेत्युक्त नानेतिवाऽनानेतिवेति काश्चित्सन्दिग्धे, किञ्चास्तिभेद प्रतिपादकयोरपि भिन्नपदनानापदयोर्महद्वैलक्षण्यं , यदुतपरस्परभेदमेव , प्रतिपादयति नानापदं , नभेदमात्रं , भिन्नपदन्तुभेदमात्रं प्रत्याययतीति यतोघटात् भिन्नःपटइति व्यवहरन् लोकोघटात् पटोनानेति नव्यवहरति , घटपटौनानेतिवत् घटपटौभिन्नाविति चव्यवहरति , अपिचान्योप्यास्ति विशेषः , योयन्नानाजनसमुदायइति स्थानेभिन्नजनसमुदाय इति न समस्तिव्यवहार इति , विभिन्नजनसमुदाय इति समस्तिचेति , तस्माज्जीवेश्वरयोः परस्परभेदप्रत्यायनार्थन्नानेति व्यपदेशः , अस्य च प्रयोजनं जीवेशधर्मयोरव्यतिकरः, अस्तु तस्य प्रथमनिवेशनेन किं भवति । इदमनेन भवति , यदंशइति प्रतिज्ञाते कथमेवं प्रतिज्ञायते यावतातत्वमस्यहं ब्रह्मास्मीत्यादिना ब्रह्मैवजीव इत्युपेयते भवतत्यभिप्रायमजानताऽऽक्षिप्यत इत्याक्षेपविशेषसंसूचनन्नामेति , इदमेवानुभाषितं " कस्मात् पुनर्निरवयवत्वात् स एव न भवतीति " तर्हि ब्रह्मैवजीवइति तवपक्षः प्रतिहतोभवतीति प्राप्तं परिहरन्नाहा"न्यथाचापी"ति , इममेवार्थमभिप्रेत्योक्तं ननु चायन्नानाव्यपदेशस्स्वामिभृत्य सारूप्येयुज्यत इत्यत आहेति " नन्वेतावता भेदाभेदोभयव्यपदेशादंशइत्युक्तं भवति, तच्चब्रह्मैवजीव इत्येतन्निरुणद्धीतिचेन्न , तथा सति किमेतावतावागाडंबरेण , अंशउभयव्यपदेशान्नाना व्यपदेशाचेति वा कृतेन कृतत्वात् , अतोऽन्यथाचापि नानात्वविपरीततयाचापीति तयोर्विरोधोपक्षेपः किलकृतोभवति , अतएव कथन्तर्ह्युभयोपजीव्यंशत्वं कथंवाव्यपदेशयोरप्युपपत्तिरित्याशङ्क्य "दाशकितवादित्वमधीयतएक" इत्यप्युक्तं , यतोनि हीनानपिजन्तून् ब्रह्मेत्यधीयतएके , अतस्सर्वेऽपि जीवाब्रह्मैवेत्यभेदव्यपदेशो बलीयान् , अनधिगतार्थबोधनात् , भेदव्यपदेशस्त्वधिगतानुवादी व्यवहारासिद्धमेवानुवदति , तावतैव

भेदसमकक्ष्यस्यांशत्वस्य सिद्धेः, सचकथं व्यावहारिकोभेदोवास्तवेनाभेदेन विरुध्येत तद्व्यपदेशोऽवातद्व्यपदेशेनेति, इदमेव सर्वमनुभाषितं श्रुतिहृदयाविष्करणपरेण "निहीनजन्तूदाहरणे नेत्यादिना भाष्येण। यदि भेदाभेदौ समसत्ताकौ, जीवा अपिस्वतएव परस्परंभिन्ना इत्यभिप्रायस्तदाऽनुज्ञापरिहार सूत्रस्यानुत्थितिः, सत्यपि तस्मिन्नदेहसम्बन्धोपपाद्यावनुज्ञापरिहारौ, तदेतत् भेदाभेदयोर्भिन्न सत्ताकत्वोत्तंभनं भवति।

"प्रकाशादिवन्नैवंपरः"

इदञ्चाभेदांशमादाय जीवस्य दोषेणपरोऽपि दुष्येदिति दोषपरिहारार्थमित्यत्र नविवादः, तत्रैवञ्जीववत् परोनदुष्यति, प्रकाशादिवदिति साध्यपक्षएव दृष्टान्तं प्रणयति भाष्यं, प्रकाशस्सवितुरिव जीवः परस्यांशः, अतः परोनैवञ्जीववन्न, यथासविता प्रकाशवन्नेति व्याकुर्वन्तिपरे, तत्र प्रकाशादिवज्जीवोऽतोनैवं पर इति भवति, तथाच साध्यव्यधिकरणो हेतुर्भवति।

"आभास एवच"

कृतप्रयत्नापेक्षत्वोपपादकतयोक्त विधिप्रतिषेधावैय्यर्थ्यादिकमसङ्गतं, ब्रह्माभेदेन जीवस्याधिकारिण एवाभावादित्याशङ्क्यदेह सम्बन्धात्तस्यैवाधिकारिभावस्समर्थितः, ततः प्रतिशरीरं भिन्नानामप्येक ब्रह्माभेदेन भोगव्यतिकरमाशङ्क्य तेनैव देहसम्बन्धेनासन्तत्याव्यतिकरोऽपि समार्थितः, तत्रैव समाधानान्तरमाहाभासएव चेतीति भाष्यम्।

तदिदमसन्ततेरणुत्वादव्यतिकरः, अथ भ्रान्तब्रह्मजीव वादेऽप्या विद्यकोपाधिवशादुपपद्यतेऽयमव्यतिकर इति चेदाहाभासएव चेति, चिन्मात्रस्वरूपतिरोधानपूर्वकोपाधिभेदोपपादक हेतुराभासएवेत्यर्थ इति वर्णयन्ति परे, तदेतद्वर्षाश्रितवेश्म विवादन्यायमनुसरति, यतोऽत्र भवतामनधिकारस्तन्त्रदग्धानां वेदान्तवाक्या-

र्थ विचारणायां , तत्राप्यत्रवियत्पादे , अमर्षवशादेव प्रवृत्तिरुपपद्यते , किञ्चाणत्वश्चेज्जीवाः प्रसाधितास्तदानास्त्येवेदं युष्मद्दृष्ट्या सूत्रं , भोगव्यतिकराप्रसङ्गात् नच नीलोघटोगुरुर्महानित्यत्र नीलाभिन्नघटाभिन्नानां गुरुत्वादीनां परस्परमिवैकस्मिन् ब्रह्मणि विशेषणीभूतानाञ्जीवानामपि परस्परमभेदप्रसङ्गेन प्रसजत्येव भोगस्य व्यतिकर इति वाच्यं, नीलगुरुमहतामभेदेऽपि नीलरूपादीनां कदाप्यभेदाप्रसङ्गात् अपिच भ्रान्तब्रह्मजीववादो यदि विरुद्धपक्षकुक्षिंगतस्तदा कुतो मतान्तरनिराकरणावसरे न निराकृतः , किञ्च परायत्ताधिकरणञ्जीवब्रह्मैक्यवादिनां हिताकरणादिदोषानिवारणात् विरुद्धमित्युपवर्ण्यतन्मतेऽप्युपाधिभेदावलम्बनोऽव कल्पतेऽव्यतिकर इतीदं कथमवतार्यताम् । अपिच मतान्तरनिराकरणार्थश्चेदिदं सूत्रन्तत्र प्रथमतएव चकारः क्वोपयुज्यते । तस्मादाभास एव भवतामत्र सूत्रार्थः । पारमार्थिकोपाधिभेदाज्जीवब्रह्मभेदवादिमतेऽदृष्ट नियमादुपाधिभेदो नवक्तव्यः । सतुभेदंविना न नियतोभवतीति परस्पराश्रय इति दूषयत्यदृष्टा नियमादित्यादिनेति शेषसूत्रावतरणिकाव्याभासैव भवतां । यतोऽनादित्वेन सुलभसमाधेयोयन्दोषः । अतोभाष्योक्तएव शेषसूत्रार्थ इत्यंशाधिकरणम् ॥

इति वियत्पादस्समाप्तः ।

अथ प्राणपादः ।

वियदाद्युत्पत्त्यादि श्रुतिविप्रतिषेधं प्रतिषिध्यप्राणाद्युत्पत्त्यादिश्रुति विप्रतिषेधं प्रतिषेधति " तथा प्राणा " इत्यादिना , वियत्यर्थात् संसूचितञ्जन्म श्रुतेर्गौणत्वासम्भवमत्र मुक्तकण्ठमाह वियतोऽप्युत्पत्तौ कथमियं गौणीस्यादितीव " गौण्यसम्भवादि "ति, स्याच्चैकस्यापीति तत्र पूर्वबाद्युक्तमत्र साक्षात् प्रतिक्षिपन्मुख्यत्वं साधयति ।

" तत्प्राक्श्रुतेश्चेति "

वियति मुख्यतया वक्तव्यस्यैव जायत इत्यस्य प्राक्प्राणेष्वे तस्माज्जायते प्राणोमनस्सर्वेन्द्रियाणि चेति श्रुतेश्चेत्यर्थः । यत्राश्रुतिमादाय पूर्वपक्षस्तत्रैव प्राणोत्पत्यभिप्राये लिङ्गश्रुतिमाह ।

" तत्पूर्वकत्वाद्वाच " इति ,

अन्नमयं हीत्यादिना भूतप्रकृतिकत्वाभिधानादित्यर्थः , वाचइति वाक्प्राणमनसामुपलक्षणम् । श्रुतावेवं क्रमाभावेऽपि तेज आदिप्रकृति क्रममपेक्ष्यसूत्रेवाच इत्युक्तिः , गौणमपि तत्पूर्वकत्वाभिधानं प्राणानां ब्रह्मजत्वोक्तंभनं भवेत् , अन्यथाऽभिधानवैयर्थ्यात् , मुख्यत्वेतुसुतरामिति वियदधिकरण प्राणाधिकरणयोरनुगुणगुपदेशातिदेशभाववर्णनं भाष्येस्पष्टं , अत्र प्रथमं सूत्रमुत्पत्तिप्रतिज्ञा द्वितीय तृतीयेऽनुत्पत्तिप्रतिषेधार्थे , अतस्तृतीयेचकारः , तुरीयन्तूत्पत्तौ साक्षाद्धेतु प्रतिपादकमिति विवेकः ।

अतः परकीयमधिकरणं विलिख्यते , यथा जीवोनोत्पद्यते तथा प्राणाअपीति पूर्वपक्षसूत्रं , वियदधिकरणातिदेशत्वे विप्रकर्षोदोषः , वियदधिकरणोक्त सिद्धान्तयुक्तिजातमत्राभिप्रायिकं , प्राणावावऋषयइति श्रुतिगतबहुवचन गतिकल्पनार्थमेवेदमधिकरणं , ऋषिशब्दस्य द्रष्टृरिस्वारस्येन दर्शनकरणे स्वारस्याभावात्तत्समानाधिकरणं प्राणपदं परमात्मपरमेवेत्यत्र न कस्यापि सन्देहः , बहुवचनस्य परंगतिमाहगौण्यसम्भवादिति , चकारान्तमेकं सूत्रं , चोऽवधारणे , तस्य परमात्मन एव सृष्टः प्रागवस्थानश्रुतेरेव बहुर्थासम्भवात् बहुवचनश्रुतिर्गौणी , इतश्च प्राणपदं परमात्मपरं , वाचः प्राणादिनामधेयस्य प्राणादिसृष्टिपूर्वकत्वात् , तद्धेदन्तर्ह्यव्याकृतमासीदिति श्रुतेस्तदानीन्नामरूपभाजामभावात्तत्प्रयुक्तकार्याभावाच्च तेन सन्तीत्यर्थ इति परकीयमधिकरणम् ।

अहह कोऽयं कुटिलभावः ।

सूत्रेणैव कृतस्य पूर्वपक्षस्य न प्रतिसूत्रेण समाधिः, अवधारणार्थकस्य चकारस्य समासघटकतत्पदेनाप्यन्वयः, यथा सन्निवेशान्वयमात्रेण प्रळये परेतरानवस्थानालाभात्, सोऽपिच चकारस्तत्पदेनान्वितस्तदर्थेतरं व्यवच्छिन्दन् श्रुतेरेवेत्यन्वितश्श्रुत्यभावमेव व्यवच्छिनत्ति। प्रळये परमात्ममात्रसद्भावप्रतिपादकस्मृत्यादेस्सद्भावात्। चकाराभावेऽपि चरमं सूत्रमितश्चेत्यवतारितम्। तच्चासन्देहादजिज्ञासितेऽप्रतिज्ञातेऽपिचपूर्वं प्राणपदः परइत्यत्र हेत्वन्तरमुपपादयति। हेतुश्च प्राणादिसृष्ट्युत्तरकालिकत्वं प्राणादिशब्दस्य, तस्य च प्रकृतसाध्यसाधकत्वन्तद्धेदन्तर्ह्यव्याकृतमासीदिति श्रुत्यर्थसिद्धस्य प्रळयेवाचोविषयाभावस्योपष्टंभात्, इंद्रियकार्याभावात्तानि नसन्तितदेति पिण्डितार्थ इत्येतादृशमर्थजातं कथमेतेषां सूत्राणामिति विवेचनीयं विवेचकैः। एवं शिरोवेष्टनेऽप्यस्मत् भाष्यं शिरोवेष्टमायमानमित्युक्तन्तदीयव्याख्याने। धिग्जितंकालिना।

अथ प्राणसंख्याविषयं विप्रतिषेधं प्रतिषेधति।

"सप्तगतेर्विशेषितत्वाच्चे"त्यादिना।

"हस्तादयस्तुस्थितेऽतोनैवम्"

अत्र नेत्यप्रतिषिध्यनैवमित्युपदिशन्निवाह। अतो विप्रतिषेधस्यैकदेशिसमाधानं प्रथमसूत्रेणैवकारघटितेन। तथा च भाष्यं "सप्तैवप्राणा"इति। तेनात्रतुकारः पक्षान्तरपरिग्रहार्थः। पक्षान्तरञ्चैकदेशि प्रतिपन्नसंख्यातिरेकविषयम्। विप्रतिषेधे सप्तत्वसंख्याया एव पूर्वावधित्वात्। तस्याएवलाघवापरनामकेन स्तोककल्पना न्यायेनैकदेशिना ग्रहणात्। एवञ्चतुकारस्ततोऽतिरेकार्थोभवति। साच संख्यैकादशत्वमिति सूष्टुसूच्यते सूत्रकृता। यतोहस्तादिष्वितिनाह। तथासति विप्रतिपत्तौ गापरमात्रयोदशत्वादि संख्यातावत्पर्यन्तानुधावनप्रसंगात्, अथकुतोद्वित्वमादायननिर्वृणुयादितिचे-

त्र । यतस्तथासति हस्तादीत्वित्येव वक्तव्यं स्यात् । न तु बहुवचनान्ततया । बहुवचनन्तु यावत्यानिर्वृणुयात्तावतीमादाय निर्वृणोतीति कपिञ्जलाधिकरणन्यायेन हस्तादित्वप्रतियोगित्वेन प्राणत्रयमवलंबते । तेच तद्गुणसंविज्ञानबहुव्रीहिणाहस्तेनसाकञ्चत्वारोभवन्ति प्राणाः । नचात्रविनिगमकन्नास्ति । यतोऽन्यपदार्थप्रधानस्य समासस्य स्वातन्त्र्येण प्रधाने बहुत्वाभावे तत्र बहुवचनविवक्षायान्यूनतास्यात् । नच ब्रह्मादयोऽपि नेशतइत्यत्रेवाहत्यैव त्रित्वमादाय कुतोयं प्रयोगो ननिर्वृणुयादिति वाच्यम् । तस्य स्तोकातिरेककल्पनान्यायमूलक विप्रतिपत्तिमूलकत्वाभावात्, अस्यतु तथात्वात्, उदाहरणानुसरणाच्च । यातूदाह्रियतेऽनेनाष्टौ ग्रहाइत्यादिकाहस्तौ वैग्रहइति प्रतिपादिकाचश्रुतिस्तस्यामेकदेश्यभिमतप्राणातिरेकेण चतुर्णां प्राणानामुदाहरणाच्च प्रदर्शितेन प्रकारेण चत्वारएवसंगृहीता अत्रप्राणाः । नन्यूनानाधिकाश्च । एवञ्चैकदेश्युक्तसंख्यया साकमेकादशसंपद्यन्ते प्राणाः तथाचभाष्यम् ‘ उत्तरसंख्यानुरोधात्वेकादशैव ते प्राणास्स्युरिति ’

अथ सप्तप्राणाइत्यत्र चतुर्णामेव ग्रहणात्कथन्तदवलंबनेन सप्तैवप्राणाइति विप्रतिषेधसमाधानमेकदेशिन इतिचेत् । सोऽपि कश्चिन्मन्दः । यस्त्वतिरेकप्रापकश्रुतेः प्राबल्यन्नविजानाति । पुनः कोपि मन्दः । त्वमपि कश्चिन्मन्दः कुतः । यतस्त्वमियन्तएवप्राणाएतएवत इत्यत्र विप्रतिपन्नास्विव श्रुतिषुसप्तप्राणाइति श्रुतिमनादृत्य चतुष्टयतया निश्चिन्वन्नाक्षिपासि । संख्याविषयएवाद्यविवादः । संख्येयतत्वनिर्धारणन्तु संख्येयत्ताप्रतिपादनप्रणाळिकयैवभविष्यतीति भ्रमप्रतिपन्नाया अप्येकदेश्यभिमतसंख्याया अतिरेकेण चतुष्ट्वसंख्यां संकलयतीतिच नजानासि । तइन्द्रियाणीति मुख्यप्राणातिरेकेणप्राणान्तराणि परमेवसाधयिष्यन्त इत्येतदपि नालोचयसि ।

अथकथमेवं सति मनोबुद्धिसहितानां ज्ञानकरणानां सप्ताना-मेव येषु चरन्तिप्राणा गुहाशयानिहितास्सप्तसप्तेति जीवेनसहगति-श्रवणात्तेषामेवयदापञ्चावतिष्ठन्ते ज्ञानानिमनसासहेति ज्ञानत्वेन विशेषितत्वाच्चेति श्रीरामानुजीयं विवरणं, कथंवा नन्विदं सूत्रव्या-ख्यानमसंगतं । सप्तप्राणाः प्रभवन्तीति धीन्द्रियवाङ्मनसां सप्तत्वा-वगतिः । सप्तशीर्षण्याइति चतुर्णामेव विशेषितत्वमिति हेत्वोर्वैय्यधि-करण्यादित्यरुचेराह, इयमपरेतीति श्रीरामानन्दीयं वर्णकान्तराव-तारणमिति चेत् । उच्यते । उत्पत्तिसाधनानन्तरं यतस्सप्तैव तत उत्पन्नत्वेनावगम्यंते । यतश्च त एव सप्तेत्युत्कीर्त्यशीर्षण्या इति विशेष्यन्तइति पूर्वपक्षविरचनस्यैव सुसंगततयाऽसंगतमेव रामानु-जीयं विवरणम् । येषु चरन्तीति गोळकेष्वेव सप्तसु सञ्चारस्य प्रति पादनेन जीवेनसह भूरादिसप्तलोकसञ्चाराप्रतिपादनाच्च । सप्तशीर्ष-ण्याः प्राणाः प्रभवन्ति तस्मात् ब्रह्मणइति मुण्डकभाष्यविरोधेन न रामानन्दीयमप्यवतारणं श्रद्दधीमहि परंतु सौत्रं सप्तपदमादृत्यगति-पदस्यावगतिपरतामुपेत्य प्राथमिकं वर्णकम् । गतिपदमादृत्य वर्ण-कान्तरमिति विवेक्तव्यम् । यतआह सूत्रकारो हस्तादयस्त्विति । एवं किलव्युत्पादयत्येकदेशिनं सूत्रकारः । किं सप्तेत्युत्कीर्तनात्ता-वन्त एव प्राणाउपेयन्ते । उत तावतामेव गतेर्विशेषितत्वाच्च । नाद्यः सप्तप्राणाइतिवदष्टौग्रहाइत्यप्युत्कीर्तनात् । तस्यापि विप्रतिषेधवा-दिना प्रदर्शितत्वात् । नचोत्कीर्त्योत्पन्नतया शीर्षण्यतयाच विशेष-णात् सप्तैवेति भवन्ति । उत्पन्नानामेवग्रहत्वस्य वक्तव्यतयाऽष्टावि-त्युत्कीर्त्यग्रहत्वस्य द्वाववाञ्चाविति तत्रैव द्वयोरर्वाक्त्वस्य चोक्ततया विशेषणस्यान्यपरत्वोत्तंभनात् । दक्षिणेनाक्षणापश्यतीत्यस्यतु वामा क्षिनिषेधपरत्वे बाधकाभावात्, प्रकृतेतूभयत्राप्युक्तबाधकसद्भावात् ।

नचगतेः । यैस्तुगृहीतोजीवनसमये जीवोग्रहैस्सर्वेषामेवतेषा-न्तस्य प्रायणसमये तेन सहगतेरावश्यकतयानतयासप्तैवेति भवेयुः

प्राणाः । नचसप्तानामेव गमिष्यतां विशेषणादेवमितिवाच्यम् । अत्राष्टानामपि गृहीष्यतामतिग्रहेण गृहीततयाविशेषणात् । नचोभयोस्समबलता । यतोयथाहस्तौ वैग्रहएवश्चक्षुर्वैग्रहश्श्रोत्रं वैग्रहएवनतु ग्रहाविति स्थिते कथमेवं वक्ष्यसि छिद्राण्येव सप्तसप्तप्राणाइत्युक्तीर्र्येति शिक्षयतीयं श्रुतिरन्यान्त्वदभिलपितां श्रुतिम् । नह्यत्र स्तोककल्पनान्यायोऽप्यवतरति प्रमाणसिद्धेऽतिरेक इति । सर्वोऽप्ययमर्थस्सूत्रारूढएव । यतोहस्तादिष्विति नोक्तम् । तथासति श्रुतेषु हस्तादिषु भवतित्वतिरेकइति श्रुतिरुपसर्जनीकृतास्यात् । नतु हस्तादयस्तु श्रूयन्तेऽतोऽतिरेकेणेति स्वातन्त्र्येण प्रमाणीकृतास्यात् । अतइत्येतदत्राप्यन्वेति सप्तभ्यइत्यर्थकतया । तुकारोऽप्यतिरेकेणेत्यर्थकतया । तत्र सप्तशीर्षण्यप्राणपक्षे जिह्वात्वङ्मनोहस्ताश्चेति चत्वारोऽत्रातिरेकेण गृहीताइति हस्तादयइति बहुवचनेन व्युत्पाद्यते संख्यामात्राभिप्रायेण । वर्णकान्तरपक्षेतु धीन्द्रियवाङ्मनोऽतिरेकेण हस्तौवाइत्युपलक्षिताः पाणिपादपायूपस्थाख्याश्चत्वारो बहुवचनेन संसूचिताः । नचोपलक्षणे बीजाभावः । सकर्मणातिग्रहेणेति सामान्यतोनिर्देशात् । नचवाचः पृथगुत्कीर्तनान्नैवमिति वाच्यम् । साधारण्येऽपि कर्मातिग्रहग्रहणस्य पञ्चानां शब्दाशब्दविषयभेदेन कर्मभेदमादाय वाचः पृथगुत्कीर्तन सार्थक्यात् । अथवा प्रथमवर्णकेप्येवमेव याथातथ्येन व्युत्पादनप्रकारः । वर्णितेन प्रकारेणोदाहरणप्रदर्शनप्रणालिकयैव तत्पक्षीयसंख्याविषयभ्रमस्यापोहनात् । हस्तादयस्त्वतइतिनोक्तम् । तथासति साधितएवस्यादतिरेकः । नतु निगमितश्च । अतोऽतस्सप्तभ्यस्त्वतिरेकेण श्रूयन्ते हस्तादयः । अतोहस्तादीनां श्रवणात्यतिरेके स्थितेसतीत्येवमर्थं स्थितइत्यप्यधिकमुक्तम् । अथाप्यतइतिकिं । नन्वतस्सप्तभ्योऽतोहस्तादीनां श्रवणादित्युक्तेप्यर्थद्वये कथमेवं पृच्छसि । ननु किमस्त्युत्तरत्र प्रयोजनमितिहि पृच्छामि। एवन्तर्ह्युच्यते, शृणु अर्थद्वयस्यैव स्थितत्वादति-

रेकस्येत्यस्याप्यनुवादः प्रयोजनम् । किमर्थोनुवादः । नियमार्थः । कोयं नियमः । कथंवास्यानुवादेन तत्सिद्धिरितिचेत् । एवं । अत इत्यभावे स्थिते प्रामाणिकेऽतिरेकेन लाघवात् स्तोककल्पनया सप्तैवप्राणाइत्येवमर्थोभवति । तत्र प्रामाणिकस्यातिरेकस्यादोषत्वादित्ययमेवार्थः प्रतिपादितस्यात् । ननु तत्रत्योनियमोपि, कोयन्नियम इतिचेत् । ननु विप्रतिपन्नेविषये लाघवात्स्तोककल्पनैव ज्यायसी । तच्च लाघवं यद्यपि पक्षान्तरप्रापकात्प्रमाणान्तरात् बाध्यते, यथातमसो द्रव्यान्तरत्वसाधकेन तेजस्सामान्याभावत्वसाधकं अथापि प्रबलप्रमाणान्तरासहकृतमेव तत्तथाबाध्यते। नतुतत्सहकृतमपि, प्रकृतेतु सप्तानां गतेर्विशेषितत्वाच्च कथमतिरेकप्रापकप्रमाणान्तरेणस्तोककल्पनाया बाधइत्याशंकायामुक्तमतोनैवमिति, अतः, प्रमाणान्तरेणातिरेकस्य स्थितत्वान्नैवं । प्रमाणान्तरसहकृतेनापि लाघवेनं स्तोककल्पनेत्येवन्नेति । अयमाशयः । संख्यातिरिक्तविषय एवासहकृतमेव लाघवं बाध्यते । नतु सहकृतमपि, अनन्तर्भावात् । नहि लाघवसाचिव्यानुमानसिद्धं प्रपञ्चस्यैकेश्वरकर्तृकत्वन्नानाजीवकर्तृकत्वेऽन्तर्भवति । यद्यन्तर्भवति तदाप्रत्यक्षादि सिद्धकुलालादि हिरण्यगर्भान्त नानाजीवकर्तृकत्व मेवेष्येत । यतस्तत्रेश्वरकर्तृकत्वस्याप्यन्तर्भावेण तत्प्रापकं प्रमाणमप्यनुगृहीतंभवेत् , प्रकृतेतु हीनाधिकसंख्याविप्रतिपत्तावधिकासंग्राह्याभवति, यतस्तस्यां हीनान्तर्भवति, नतु हीनायामधिका, अतः प्रमाणान्तरस्याप्यनुग्रहसंभवेन तत्सहकृतमपि लाघवं बाध्यतएवेति, एतादृशनियम प्रदर्शनार्थमतइति पुनरनुवादः । वस्तुतस्तु सप्तत्वप्रापक प्रमाणान्तरस्याभासीकरणात् प्रामाणिकं गौरवन्नदोषायेत्यनेनैवेष्टंसिद्ध्यति, अथाप्यभ्युपगमवादे न तत्रैवास्य नियमस्य साधनाय पुनरनुवादः । अत एवातश्च नैवमित्यत्र चकारघटितं भाष्यम् । न चैवं यापरमा त्रयोदशत्वादि, संख्या सैवापतेदिति वाच्यं । तस्या अप्यनेनैव समाधानात् ,

कथं, अतोनैवं । अतः,संख्यान्तर प्रापक प्रमाणान्तरपरीक्षा पुरस्सरं हस्तादि श्रावकप्रापितातिरेकस्य स्थितत्वा दविचाल्यत्वादेव न ततोऽप्यतिरेकस्स्यादित्येवं मन्तव्यमिति, अन्यथातिरेकस्त्वतोनैवमित्येवहि सूत्रयेत्, ततस्स्थित इत्येतदस्यार्थस्य विस्पष्टमेवोपष्टंभकं भवति, एवमित्यभावे पक्षप्रतिपक्षप्रणाळिकेयमिति भ्रमस्स्यात्, तन्मा भूदित्येव मित्येकदेशिव्युत्पादन प्रकारोपक्षेपः ।

अथात्र कथन्तुशब्दः पक्षं व्यावर्त्तयतीति भामतीतिचेत्, अतिरेकार्थत्वेऽप्यर्थात् पक्षान्तरव्यावृत्तेस्संभवादिति गृहीतव्यं । अथाप्यतोऽस्मिन्नतिरेकेस्थितेसति, सार्वविभक्तिकस्तसिरितिकथमतः पदविवरणन्तत्रेतिचेत्, कथमिति मयापिनज्ञायत इतिविज्ञेयं अथवा तथापि वक्तुं शक्यत इति स्यात् ।

अथैवं प्रतिपदं स प्रयोजनेन्यायद्वयगर्भितेऽतिप्रसंगवर्जिते सुसंगते च सति सूत्रार्थे, तु न सप्तैव, अपित्वेकादश कुतः, अतः, हस्तादीनामपि स्थिते शरीरे जीवे तस्य भोगोपकरणत्वात् कार्यभेदाच्च, अतो हस्तादयोऽपि सन्त्येव, अतो नैवं, ते नसन्तीति नमन्तव्यमिति बह्वध्याहार दुष्टमत इत्यस्या प्रसक्तार्थ परत्व प्रतिपादकं स्थितेत्वतोहस्तादय इत्यन्यथा क्रमापादकन्नैवमित्यस्य नैरर्थक्योपपादकश्च श्रीभाष्यमत इत्येतत् काकाक्षिन्यायेनान्वेतीति स्वमतेऽपि कथञ्चित् कश्चिन्न्यायः प्रदर्शनीय इतितत् प्रतिपादकन्तद्व्याख्यानञ्च कथमिव प्रवर्त्तत इतिचेत् ।

कथमेवं प्रवर्त्तत इति कथञ्चिदपि न जानामि ।

इति सप्तगत्यधिकरणम् ।

"अणवश्च" नविवादः

"श्रेष्ठश्च"

अधिकाशंकाभावान्नाति देशोयं । किन्तूत्तरार्थं । पूर्वसूत्रेण समानाधिकरणश्चेतिपरं । श्रेष्ठत्वमेवाधिका शंकाबीजमिति सूत्रेणैव

सूचितं । किञ्च भवदीय प्रणाळिकानुसरणेऽणुश्चेति सूत्रस्य स्थानेऽणवश्चेत्येकमेव सूत्रं कर्त्तव्यं । न चात्राणवश्चेति तत्र चाणुश्चेतिद्वयं । अथैकादशेभ्योऽतिरेकेण प्राणास्यैवाभावे कुतश्श्रेष्ठः । तत्र कथं श्रेष्ठश्चेतिभण्यत इत्येतदपाकरणायाह,

"नवायुक्रिये पृथगुपदेशादिति"

कुतोनास्तिश्रेष्ठः । यतश्श्रुत्यावा युक्त्यावाऽयमेव श्रेष्ठइति न निर्धारयितुं शक्यते । कुतो न श्रुत्या । यतो "यः प्राणस्सवायुः, स वायुनाज्योतिषाभाति च तपतिचेति च वायोर्भेदाभेदाभ्यान्तत्र विप्रतिपद्यते श्रुतिः । अथ युक्त्यापि कुतोन निर्धार्येत, न निर्धार्येत - यतो युक्त्यैकनिष्णातौ कणादकपिलौ शरीरान्तस्सञ्चरणात् प्राणोनामभण्यते वायुः, करणसामान्यव्यापारएव प्राणोनामभण्यत इति च परस्परं विप्रतिपद्येते इति ।

तत्राह पृथगुपदेशात्, नहि वायुरेव संस्ततः पृथगुच्येत । करणसामान्यव्यापार एववासंस्तेभ्यः पृथगुच्येत परस्मादुत्पत्तिप्रकरणइति । अथकोयं प्राणइति निर्धारितः । ननु प्राणेषु श्रेष्ठः प्राणइति निर्धारितः । अथ किं स्वरूपइति पृच्छामि श्रोत्रादयस्तु किं स्वरूपाइत्यहमेवत्वां पृच्छामि । अधिभूतमाकाशोऽध्यात्मं श्रोत्र भावमापन्नः । तर्हि यथानाकाशमात्रं श्रोत्रन्तथा नवायुमात्रं प्राणः । किन्त्वध्यात्मं प्राणभावमापन्नो वायुश्रेष्ठः प्राणोनामभण्यत इति गृहाण । अत्रोत्सूत्रं काणादमतरीत्याऽभेदश्रुत्यावायुरेवास्तु । इतरातु गौणी । सांख्यमतरीत्या भेदश्रुत्याकरणसामान्यव्यापारोवास्तु, वायुत्वश्रुतिस्तु भवतु गौणीत्येकदेशिसमाधानं द्रष्टव्यम् । अथकथन्तन्त्रान्तरीयमर्थमवलंबतामेकदेशीति चेन्न श्रुतिरप्रमाणं भवितुमर्हतीति कथञ्चित्तां समाधातुमिति गृहाण । अथ कथं करणव्यापारोपरमेऽपि प्राणनव्यापारदर्शनात्तत्वाशंका, विशेषव्यापारोपरमेपि सामान्यव्यापारसत्वे कोबाधः । तर्हि जागरव्यापारद्वयं

करणानामुपेयं स्यात्। तच्च नसंभावनीयं। शुकपञ्जरचालनन्यायेन कुतोनसंभावनीयं। अथशुकानां प्रत्येकव्यापारेणैव पञ्जरश्चलति, नतु तदर्थं पृथक्संभूयैकं व्यापारान्तरमपि ते कुर्वन्तीतिचेत्, तर्हीहापि करणानां प्रातिस्विकव्यापारैरेव प्राणिति शरीरमितिचेत्। तर्हि सुषुप्तौ दर्शनाद्यभावाच्छरीरस्याप्राण्यात्। जागरणे विषयविच्छुरणेन दर्शनादिभावमापन्नानां प्रातिस्विककरणव्यापाराणां सुषुप्तौ विषयवियुक्ततया विद्यमानत्वादेव कुतोनप्राण्यात्। अथैवञ्जागरणेविषयपञ्चकविच्छुरणे दर्शनादेर्यौगपद्यमापद्येत। मनोऽनुवेधनस्याप्यपेक्षितत्वेननैवापद्येत। अथैवमप्यनपेक्षस्य मनसोऽन्वालोचनस्य सदातनत्वापत्तिरितिचेत्। तस्यापि तत्तद्वासनाद्युद्बोधसापेक्षत्वेन नैवेयमापत्तिरित्येकदेश्यभिप्रायात्। एवमभिमन्यमानोऽयमेवं किलव्युत्पाद्यते। यत्किल, सर्वोप्ययं प्रपञ्चो भोक्तृभोग्य भोजयितृकक्ष्याः प्रविशंस्त्रिविधो भवति, यथापरोऽपि जीवात्मना भोक्ता, वियदाद्यात्मना भोग्यम्। ईश्वररूपेण भोजयिताच, एवं वियदादयोऽपि। तत्र नवायुरेवेति वदन्वैशेषिकस्संगच्छते। नापि करणव्यापारइति वदन् सांख्योऽपि तथासति प्राणानानुकूलाः करणव्यापारास्समानरूपावक्तव्याः। तत्र विद्यमानेष्वेव समानाकारेषु विषयविशेषविच्छुरणनियमोनस्यात्। तत्र कदाचिल्लोचनव्यापारे गन्धविच्छुरणमन्यत्रान्यविच्छुरणमिति विषयवैपरीत्यं ह्यापतेत्, किञ्च ज्येष्ठश्च श्रेष्ठश्चेति करणानांतं प्रति गुणभावस्तस्यचतानि प्रति प्रधानभावश्च प्रतिपाद्यते, तौचप्राणस्य करणवृत्तिमात्रत्वेनावकल्पेते इति। अत्र प्राणोनवायुमात्रन्नवावायुक्रिया, एतस्माज्जायतेप्राणः खं वायुरिति वायोः पृथगुपदेशादिति भाष्यान्तरम्। तत्र वायुतत्क्रिययोर्भेद एव द्वितीयस्य पक्षस्योत्थानं स्यात्, तदावायोः पृथगुपदेशेन कथं द्वितीयस्य पक्षस्य निरासः। नच ततः पृथग्द्रव्यतयोपदेशादिति तस्यापि निरासइति वाच्यम्। तत्र ततः पृथगितीतरत्र

द्रव्यतयेति चव्यर्थत्वात् । लक्षणाप्रसंगाच्च । नच वायोर्भेदाभेदश्रुतिभ्यामन्यतरत्वे प्राप्ते तदभावस्सिषाधयिषितः । तत्र परस्परस्मिन्व्यभिचारवारणाय निरुक्तो हेतुरपेक्षितः । लक्षणापि सूत्रे लाघवायादृतेति नदोषावहेति वाच्यम् । भाष्यान्तरे तथाऽननुभाषणात् । नचात्रैवतस्य तात्पर्यम् । संभावनामात्रेण तत्र तत्रास्मदनिर्धारणपूर्वपक्षन्दूषयतस्तस्य तादृशतात्पर्यकल्पनानवकाशात् । नचात्र सूत्रकृतैवानिर्धारणनिराकरणादस्त्यवकाशइति वाच्यम् । अन्यत्र न निराक्रियतइति केनतुभ्यमभ्यधायि । यद्यत्रवाचनिकोऽन्यत्राभिप्रायिकस्यात् । किञ्च क्रियाक्रियावतोर्भेदाभेदवादिमते वायुक्रियात्वमेव शंकार्हम् । नतु वायुत्वमपि, भेदाभावात् । तत्र नवायुक्रिया द्रव्यत्वादित्येव सूत्रयितव्यं स्यात् । अपिच मास्तु वायुरेव, माचास्तु तत्क्रियापि । अस्तु करणसामान्यव्यापारएवेति परस्तादपि सांख्यस्य प्रत्यवस्थाने किं कुर्याः । अस्तु वायुक्रियेति प्रत्यवस्थाने त्वमपि वाकिंकुर्याः नास्त्येव तादृशः प्रत्यवस्थाता सत्यपि पृथगुपदेशात् । नहि वायुक्रियैव सन्प्राणोवायोः पृथक्परस्माज्जायत इत्युपादिश्येतेत्यनेनैवतत्प्रतिक्षेपमपि कुर्यामिति गृहाण ।

अथैवं सत्येकदेशिना वायुक्रियात्वमवलम्ब्यापि समाधातुं शक्यत्वे करणक्रियात्वस्यैवालंबने कोहेतुः । नकोपि तथोपैति वायुत्वमिव करणत्वन्नोपदिश्यत इत्युभयमपि हेतुः । यथा वायुत्वोपदेशेन तत्क्रियात्वन्नशंकार्हं तथा करणत्वोपदेशे तत् क्रियत्वमपि नशंकार्हं स्यात् । तदभावात्तु तत्वमादृतमिति गृहीतव्यम् । अथवायुत्वोपदेशेऽपि कुतस्तत्क्रियात्वन्नशंकार्हमितिचेत्, भेदाभेदोपदेशयोरन्यतराश्रयणेन विप्रतिषेधं प्रत्यसेधदेकदेशीति हि सूचयति वायुक्रियात्वेइति द्विवचनेन सूत्रकारः । तत्राभेदसहिष्णुवायुक्रियात्वन्तत्प्रातिद्वंद्वितया कल्पान्तरोत्थापकं भेदोपदेशमवलंब्य कथं कल्पान्तरतामियात् । नेयादिति गृहाण । अपिच

सत्यप्यभेदोपदेशे कथं पृथगुपदेशं प्रमाणीचकार सिद्धान्ती । उच्यतां । सति पृथगुपदेशेऽभेदोपदेशोऽकिञ्चित्करः । नहि सएवसंस्तेन भातिच तपति चेति पृथगुपदिश्येत । वायुक्रियात्वेतु स्यादुभयथोपदेशोऽपि । नापिच कोपि तथोपैति । सांख्यस्तु करणव्यापारतामुपैति सोऽपि निराकरणीयइति नवायुक्रिये इति व्याजहारेति सुष्टु संगच्छते । नन्वेवं कुतउभयोपदेशेन वायुक्रियात्वं परमवलंव्य न समाहितमेकदेशिना । कुतश्च नद्रव्यतयोपदेशादिति व्युत्पादितं सिद्धान्तिनेति चेन्न । विप्रतिषेधविषयत्वात्पादस्य । विप्रतिषेधोह्युद्भाव्यते पाञ्चरात्रादिभिः पादद्वयेऽप्यस्मिन् । तत्र सवायुनाभातिच तपतिचेति भेदव्यपदेशः कोप्यन्तरोत्थापकः । सचभेदोनाभेदसहिष्णुः । नहि वायुक्रिया वायुनाभाति चतपति चेति भवति । भवति चाग्नेर्ज्वलनक्रियावायुना दीप्यते तेन भातिच तपतिचेति । एवं करणक्रियापि भवति वायुना भातिचतपतिचेति प्रत्युतवायुरेव स्वक्रियया भायाच्च तपेच्च । यथाग्निर्ज्वलन क्रिययाभातिचतपतिचेति । सर्वञ्चेदमभिप्रेत्यैवश्रुतिमिमां ज्येष्ठश्चश्रेष्ठश्चेति श्रुतिश्च प्रधानतयैतस्माज्जायते प्राणइत्यादिकाश्च तत्सहकारितया प्रमाणयता प्रवृत्तं भाष्येण प्रसन्नगंभीरेण । प्राणोद्रव्यमिति विस्पष्टमुपदेशसद्भावेहि सिद्धान्तिनापि तथाहेतुरुपन्यस्येतेति । नन्वेवं करणेभ्योऽपि प्राणस्य पृथगुपदिश्यमानतया तुल्ययुक्त्या तेषामपि ततः पृथगुपदेशसिध्या कथमुपरित इंद्रियाणीत्यधिकरणस्य प्रवृत्तिरिति चेत्तत्रैवास्य प्रति ब्रूमइति वायुक्रियाधिकरणम् ।

" चक्षुरादिवत्तु तत् सहशिष्ठयादिभ्यः । "

वायुविकारत्व प्राप्तमग्निवत् भूतान्तरत्वं वारयति चक्षुरादिवत् भावेनेति मन्यन्ते । अस्तुकोदोषः ।

अयमेवदोषः, यदुतश्रेष्ठश्चेति प्राणश्रेष्ठत्वेऽभिहिते कथं भूतत्वमाशंक्यतां । नहि भूतं प्राणेषु श्रेष्ठं व्यपदिश्येत, नहि गोषुमहिषश्श्रेष्ठ इति व्यपदेशभाग्भवतीति । अथ कथं वायुत्वमाशंकितमिति चेत्, श्रुतिबलादिति ब्रूमः । श्रुतिबलादाशंक्यते चेदाशंक्यतां, तदभावेन कथं भूतान्तरत्वमाशंक्यतां । आशंकितमपि कथश्चक्षुरादिवत् भावेन तन्निराक्रियेत, उपकरणत्वेन चक्षुरादिसदृशोऽपिस्यात् भूतान्तरं प्राणः, नहिवाहनत्वेन गवादिवत्वेऽपिहीयतेऽश्वस्याश्वत्वं । अथ चक्षुरादयो यथानभूतानि तथा प्राणइत्यर्थ इति चेन्न, तेतु यथा नरासभास्तथा प्राणइति कुतोनेष्यतां, बाह्यास्तइति तथा नेष्यत इतिचेत् समन्तेजसोऽपि बाह्यत्वं, अस्त्यध्यात्मपि तेजइति चेद्रासभत्वस्यापि तदध्यात्मं सत्वात्, अथवायुरेवास्त्वध्यात्मं प्राणः, केन तुभ्यमभ्यधायिवायुजः प्राणइति, वायुत्वनिराकरणान्न तत्वमितिचेत्तर्हितेजस्त्वा नुदाहरणान्नतत्वमपि, तत्व निराकरणमात्रेण तज्जत्वे शरीरत्व निराकरणेनस्यादात्मनोपि तज्जत्वं, अत श्श्रेष्ठत्वकथनेन प्राप्त स्वतन्त्रत्वमेव वारयति चक्षुरादिवत् भावेनेति युक्तमवधारय, श्रुणुष्वात्र तत्वमुपदिशामि । त्रिगुणात्मिकाया मूलप्रकृतेर्यासात्विकी शक्तिस्सात्वन्तःकरणमुपारुह्य चक्षुरादिद्वाराबहिः प्रसरति । राजसीतु प्राणमुपारुह्यत्रागादिद्वारा । यातुतामसीसापि भूतसूक्ष्ममुपाश्रित्यस्थूलशरीराकारेण परिणतावर्तते, तत्र राजस शक्त्युपष्टंभो वायुस्सुवर्णस्येवपीति मगुरुत्वाश्रय पार्थिवभागः प्राणोनामभण्यते, न वायुमात्रमित्युक्तमिति, तत् सहसिष्ट्यादिभ्य इत्यत्रादिपदेन विशेषाभिधानमात्र मभिहित मित्युपवर्ण्यसौत्रं बहुवचनन्त्यक्तं परैः, तस्य च विशेषाभिधान बहुत्वमादायोपपत्ति रभ्यूहितातदीयैः, तदुभयमपि पण्डितपरिहासास्पदमिति न जानन्त्येवेत, विशेषाभिधानं हि वैलक्षण्योपपादकं स्यात्, कथन्तद्वत् भावस्य, मुख्यः प्राणोमध्य-

मःप्राण इत्यभिधानं प्राणत्वमेवहि साधयति, तत्तुतस्यस्थितमेव, तदधीनत्वादितरेषां प्राणत्वस्य, प्राणत्व प्रयुक्तन्तूपकरणत्वन्त-स्यैव प्रथमं सिद्धमिति न चक्षुरादिसादृश्याय तत् संपाद्यन्ते नच न भूतान्तरत्वमपि व्यावर्त्तनीयं,

तस्मात् भाष्योक्ताएवादिपदग्राह्या इति सिद्धं ।

" अकरणत्वाच्चनदोषस्तथा हिदर्शयति "

ननु करणत्वोपकरणत्वयोः कोभेदः, येनोपकरणमपि प्राणोऽकरणमित्युच्यते, ननु सुप्रसिद्धएवायं भेदोलोके, यथान्नंकरणं-तृप्त्यै शलाटुकमुपकरणमिति, वेदेऽपि "यस्य ब्रह्मक्षत्रञ्च उभेभवतओदनः, मृत्युर्यस्योपसेचनमिति, न, यतस्तत्रोपकरणन्नकरणं । करणन्नोपकरणं । प्रकृते तूपकरणान्येव चक्षुरादीनि करणानीति । न, तत्रान्नमेवसाधकतमन्तृप्ताविति तदेवकरणं । तत्तु यत्सहभावात्तथाभवति तदुपकरणमेव शलाटुकं। इहापि जीवस्य दर्शनाद्येकादश सु कार्येषु साधकतमतया चक्षुरादीनि करणानि । तानियमाश्रित्य तथा भवन्ति स उपकरणमेव प्राणः, परन्तु स्वकार्याधीनञ्जीवस्य विषयोपरागाख्यं फलं प्रतिकरणान्यपि भवन्ति चक्षुरादीन्युपकरणानीति दोषलेशस्याप्यभावात्, अथकथं सूत्रार्थः। यदि चक्षुरादिसहशिष्यादिना श्रेष्ठोऽपि सन्नतानीव स्वतन्त्रस्तर्हि तेनापि तैरिवकुत्राचिद्विषये यतितव्यमध्यक्षार्थन्तच्च न संभवति । तदर्थं विषयान्तराभावादिति चेन्नायंदोषः । यतस्तानीवनकरणं प्राणः । अकरणत्वे कार्याभावो दोषोऽपिन । तथाहि दर्शयति श्रुतिर्देहेंद्रिय विधारणरूपं कार्यमनितरसाधारणं श्रेष्ठस्येति । अत्र चक्षुरादिसादृश्यप्रयुक्तदोषनिरासकतयोपन्यस्तमकरणत्वंदोषान्तरोत्थापकतयाप्युपन्यसितुन्तस्य प्रथमतोनिबंधनमिति सूचयति 'नचैतावताकार्याभाव एवेति भाष्यं । तथाच चक्षुरादिवत् भावान्नदोषोऽकरणत्वात् । अत्र

रणत्वाच्च दोषोन तथाहि दर्शयति दोषाभावं श्रुतिरिति सूत्रार्थस्सं-पद्यते। तदिदमस्यसूत्रस्य भाष्यस्यच गांभीर्यमजानन्तः करणं क्रिया, अक्रियत्वाच्च योयंदोषस्सचनसंभवति यथाभूतान्तरत्वदोषः। तथाहि दर्शयतिश्श्रुतिस्सक्रियत्वं प्राणस्येति विवृण्वंति परेक्लिष्टकल्पनया। केनाक्रियत्वमुक्तं प्राणस्य। येनसिद्धवद्धेतूक्रियेत। तथाचाप्रमाणमेवाक्रियत्वं पूर्ववाद्युक्तम्। श्रुत्यासक्रियत्वं प्रदर्शितं सिद्धान्तिनेत्यतिलघूकृतं भवति सूत्रं परैः।

"पञ्चवृत्तिर्मनोवद्व्यपदिश्यते"

इदञ्च पूर्वसूत्रे द्वितीयदोषोपसूचकम्। पूर्वसूत्राच्चकारोऽनुवर्त्तते। तथा चेतश्चसक्रियः प्राणइति भाष्यम्। नन्वेवं सत्यत्रैव चकारोग्रथनीयः। न पूर्वसूत्रे प्रथमदोष निरासकहेतुमवलंब्योद्भावित दोषान्तरसमुच्चयाय चकारस्यावश्यकतया तस्यैवानुवृत्ति संभवेनात्रतदनावश्यकत्वात्। नन्वेवन्नामभेदात् कार्यभेदाच्चापानादयोऽपि तत्वान्तराणि स्युरित्याशङ्क्याह पञ्चवृत्तिरिति। एतस्यैव वृत्तिभेदास्त इति समाधिरिति परे। अत्र पञ्चवृत्तिर्हिव्यपदिश्यते तत्र कुतोऽक्रियतेति दृढतरो भवति हेतुः।

अथ प्राणस्यैव हि वृत्ति भेदाएते। तत्र कथं तत्वान्तराणिस्युः। यदि स्युस्तदामनोवृत्तयोऽपि ततस्तत्वान्तराणिस्युरिति दृष्टान्तोऽपि तेषां सुसङ्गतो भवति। भवतान्तु तस्यकोपयोग इति चेत्, पञ्चवृत्तिर्हिव्यपदिश्यते। सत्स्वपि पञ्चसुवृत्तिषु कथमक्रियत्वमाशङ्क्यते। यद्याशङ्क्यते मनसोऽपि कुतस्तन्नाशङ्क्यते। तथाच तत्र प्राणस्याक्रियत्वाशङ्का सुतरान्नयुज्यत इत्येनमर्थं हि स्वहस्तयति पञ्चेति प्रयोगः। तन्मतावलम्बनेतु तद्वृत्तयस्तुव्यपादिश्यन्त इत्येतावन्मात्रमपेक्षितन्तुकारघटितम्। आशङ्कान्तर निराकरणार्थत्वात्, अत्र नमनोवदिति घटते। नहि मनसो वृत्तयोऽपानादिनाम्ना व्यपदिश्यन्ते। अथ मनसो यथा बह्व्यो वृत्तयो व्यपदिश्यन्ते-

तथा प्राणस्यैवेमाबह्वयो वृत्तयो व्यपदिश्यन्ते, तत्र कथन्तत्वान्तराणिस्युरिति तन्मतेऽवश्यमेव दृष्टान्तोपादानमिति चेत्, अथापि पञ्चवृत्तिरिति वृत्तिमत्प्रधानतयोपन्यासस्य प्रयोजनं वक्तव्यम्। अस्ति सूत्राक्षरलाघवम्। पञ्चापि वृत्तय एवैकस्येत्येवमर्थं पञ्चेतिच सार्थकमिति चेत्तथापि तुकाराभावान्नायमर्थो घटते। अधिकरणान्तरताचा वर्जनीयास्याद्विषय भेदात् अक्रियत्वनिरासक हेत्वन्तरतया विनियोगे नैवास्याप्यर्थस्य सिद्धेर्न कथञ्चिदप्यस्मिन्नर्थेऽस्य विनियोगो घटते। अस्यार्थस्य साधनेऽप्यर्थात् सक्रियत्वं सिद्ध्यतीतिमाशङ्किष्ठाः। यतः क्रियमाणकरणधोरण्यैव कर्तव्यान्तरमपि साधयति क्रियाकुशलः। अथ सिद्धान्तेऽपि दृष्टान्त समर्थनन्नातीव समञ्जसम्। अकरणत्व प्रयुक्ताक्रियत्व परिहाराय बहु वृत्तित्वव्यपदेश प्रदर्शने तादृशेनापि करणेनविपर्यये दण्डस्य समर्पयितुमशक्यत्वादिति चेत्।

अस्तु तर्हि यथामनस्स्वकीयैर्दर्शनादिभिर्यीन्द्रियाणां विनियोजकमेवं प्राणोऽपि कर्मेंद्रियाणामित्येवमर्थो दृष्टान्तोपन्यासः। अथैतदपि विषममेव। नहि मनोवृत्तिव्यतिरेकेण सन्ति चक्षुरादीनां वृत्त्यन्तराणि। किन्तुताएव तन्निमित्ताश्चाक्षुषादि शब्दैर्व्यपदिश्यन्ते। तथा हि भाष्यं श्रोत्रादिनिमित्ताश्शब्दादिविषया मनसः पञ्चवृत्तयः प्रसिद्धा इति। कर्मेन्द्रियाणान्तु सन्ति प्राणनादि व्यतिरेकेणाभिवदनादयोवृत्तय इति चेत्, एवन्तर्हि प्रमाणादिवृत्ति पञ्चकेनैवास्तु मनोवदिति निदर्शनम्। सन्ति चात्रश्रोत्रादिनिमित्त श्रावणादिप्रमाणवृत्ति व्यतिरेकेण विपर्ययादयोऽपि वृत्तयः ताश्च प्राणानादिवृत्तयइव देहेन्द्रियविधारकाः। अथापि बहुवृत्तित्वमेव प्रकृतोपयोगीति पञ्चेति निरर्थकमिति चेत्। एवन्तर्हि पञ्चेति विद्यमानानुवादः। बहुत्वमेव विवक्षितम्। मनोवदिति कामसङ्कल्पादि बहुवृत्त्यभिप्रायेणैव, अनुवादस्तु वृत्तिपञ्चकेनैवप्राणे बहुवृत्तित्वम्। नातोऽप्यस्ति

वृत्तिरधिकेतिसूचयितुम् । अतएवावसाने बहुवृत्तित्वमात्रेण वामनः प्राणस्यनिदर्शनमिति द्रष्टव्यमिति भाष्यमिति सर्वं समञ्जसम् ।

इति नवायुक्रियाधिकरणम् ॥

" अणुश्च " ।

" ज्योतिराद्यधिष्ठानन्तुतदामननात् "

नन्वत्र श्रीभाष्यकारादन्ये सर्वेऽपि ज्योतिराद्यधिष्ठानामननात्तत् साधयन्ति । तत् कथं सङ्गच्छेत । ननु सूत्राक्षरस्वारस्य नैवास्यार्थस्य लाभे कुतोऽयमाक्षेपः । न । यतोऽभिमानिव्यपदेशस्त्विति सूत्रं विस्मृत्य विवृण्वन्ति । सर्वे ॥

अस्तु कथन्तदीयं विवरणम् । एवं शब्दादित्यन्तमेकं सूत्रम् । तथाच प्राणवतासह ज्योतिरादीनामधिष्ठानन्तदामननात्तस्य परमेश्वरस्याभिध्यानाधीनं , शब्दादिति सूत्रार्थ इति । अहहाभिमनिव्यपदेशस्त्विवतीत एवापकृष्य पूर्वपक्षिणोपन्यस्तमादाय पौनरुक्त्यमाशङ्कसे , ननु तदभिध्यानादेवत्विति जडानां परात्विति चेतनानानाञ्च क्रियासामान्यं पराधीनमिति सिद्धान्तिसाधितमिति धिक्कृजितं कलिना । प्रथमान्तं परित्यज्यपञ्चम्यन्तस्य रूढ्यर्थं परित्यागपुरस्सरं हेतु प्रतिपादकत्वं विहायसाध्यवाचकत्वं सर्वैरपि सूत्रान्तरतयोपेतंनैक सूत्र्यन्तत्रत्यसहार्थ तृतीयान्तस्य साध्यपदात् पूर्वतनपक्षप्रतिपादक समासघटकैकदेशेन व्यवहितान्वयञ्चाभिनन्दसीति विजृंभितञ्च पापेन ।

प्राणवतैव सहसंबन्धोन्यास्यः प्राणानान्तु ज्योतिरादिनेति सूचनाय प्राणवतेत्युक्तमित्यपि न जानीषइति व्याप्तश्च मौढ्येनेत्यलमधिकेन । नच प्राणवतोऽपि पराधीने प्राणाधिष्ठाने किमुतज्योतिरादीनान्तदधिष्ठानमित्येवमर्थं कुतोनस्यात् , नस्यात् , यतो जैवीयप्रवृत्तिसामान्यस्य पराधीनत्वस्य व्यवस्थापितत्वेन ज्योतिरा-

दिदेवताधिष्ठानस्यापिततएवतत् सिद्धेरसाधितमेवापूर्वन्तदधिष्ठानं प्रतिष्ठाप्यते ।

इति ज्योतिराद्यधिकरणम् ।

"तइन्द्रियाणितद्व्यपदेशादन्यत्रश्रेष्ठात्"

किमत्रसाध्यम् । श्रेष्ठव्यतिरिक्ताएव तइन्द्रियाणि , श्रेष्ठादन्येष्वेव तेषु तस्येन्द्रियशब्दस्य व्यपदेशादिति श्रेष्ठपर्युदासेनतरेषामिन्द्रियत्वमनेन साधयति श्रीभाष्यकारः । एवं सतीन्द्रियाण्यन्यत्र श्रेष्ठात्तद्व्यपदेशादित्येव वक्तव्यम् । एतावतैवेष्टसिद्धेः । नच प्राणैकशब्दत्वात् सर्वेऽपितइन्द्रियाणीति पूर्वपक्षसूचनाय प्राणवताशब्दादित्युपात्ता द्वादशापि प्राणास्तइति परामृश्यन्त इति वाच्यम् । यतस्तदेकशब्देन तथाविधेन भवितव्यमिति नास्ति निर्बन्धो व्यवस्थिते व्यक्तिभेदे । नहि मनुष्यैकशब्दा इति स्त्रियोऽपि पुरुषा भवन्ति ।

अतएवान्येतु भेदशब्दाध्याहारभियाभेद श्रुतेरित्यनेन पौनरुक्त्यभियातच्छब्दस्य चानन्तरोक्तपरामर्शकत्वादन्यथा वर्णयांचक्रुरिति भवदीयमधिकरणमवतार्यन प्राणैकशब्दत्वमत्र पूर्वपक्षबीजं भवितुमर्हतीत्य स्वरसादिन्द्रलिङ्गत्वमिन्द्रियत्वम् । तच्चश्रेष्ठस्यापि साधारणमिति परिष्कृत्य पूर्वपक्षमिन्द्रियाणि वागादीनि श्रेष्ठात् प्राणादन्यत्र , कुतः , तेनेन्द्रियशब्देन तेषामेव व्यपदेशादिति सिद्धान्तमप्यन्यथोपवर्ण्यत इत्येतदधिकमस्मिन्मतइति स्फुटीचकारपक्षसाध्यहेतुषु कुत्रापि तदनुपाददाना भामती ।

तथाहिश्रेष्ठादन्यत्रेति पक्षनिर्देशः । वागादिनीति तस्य प्रतिनिर्देशः । इन्द्रियाणीति साध्यनिर्देशः । प्राणादिति श्रेष्ठादित्यस्य विशेष्यनिर्देशः । तथाच त इत्यस्यानिर्देशः । नच त इत्यस्य विवरणं वागादीनीति कुतो न स्यात् , यतोवागादय इत्यनिर्दिष्टन्ततोन[illegible] तथाहि निर्दिष्टन्तेवागादय इति रामान-

न्दीये परिमळेच स्पष्टप्रतिपत्यर्थं । ततस्त इत्यधिकमेव श्रीभाष्यमते । एवं , श्रेष्ठादन्यान्येवेन्द्रियाणि तेषामेवेन्द्रियशब्देन व्यपदेशाल्लोके वेदेचाविस्पष्टं प्रतिपादनादित्ययमेव सुसङ्गतः प्रयोगः । नतु तेष्वेवतस्येति । शब्दस्य व्यपदेशोनामविस्पष्टमुच्चारणम् । नह्युच्चैरुच्चारणं कस्यचिदर्थस्य साधकं भवति । तथाच नविद्यमानेनैव श्रेष्ठादन्यत्रेत्यनेन हेतुनिर्वाहः । किन्तु तेषामित्यध्याहर्त्तव्यमेव । तद्व्यपदेशादित्यत्र तच्छब्देन नप्रकृतमेव परामृष्टम् । यत इन्द्रियत्वमेव साध्यतयाप्रकृतं, नतु तच्छब्दः । ततः कुतोभेदशब्दाध्याहारेण भाष्यात्भीतिः , कुतश्चप्रकृतस्यैव परामर्श इति तजर्यतीवश्रीभाष्यश्रियं भामती ।

अपिच भाष्यकारीयन्त्वधिकरणं भेदश्रुतेरित्यादिषु सूत्रेषु नेयमिति तस्यावश्यकतामावेदयति । तेन सूत्रत्रयमपि सुप्रसिद्धार्थसाधकतया विनियोजयन्तीन्तां परिहसति । अतएव तन्मतसिद्धान्तोपपादने भामती नहिमुख्येप्राण इन्द्रियशब्दोदृष्टचर इति कथमदृष्टचरं पूर्वपक्षीक्रियतामित्यभिप्रायगर्भिणी । अत्र सूत्रयोरिति वक्तव्येसूत्रेष्विति वदन्ती भाष्यविरुद्धासमञ्जसार्थानुवादेनानवधानपराहतेव लक्ष्यते । अथवा भाष्यमते हेतु समर्थनवशेनैव भवदीयार्थसिद्धेर्वृथैवाधिकरणभेद इत्यवहेळयतीति मन्यामहे । ननु तद्व्यपदेशात्तस्येन्द्रियशब्दस्य व्यवहारादिति कुतोनार्थस्स्यात् , तत्र कुतोध्याहारश्श्रीभाष्यमत इति चेन्न । तथापि हेतावप्येवकाराध्याहारावश्यम्भावात् , अद्ध्याहृतत्वाच्चतैः । तच्छब्दस्यप्रकृतपरामर्शकत्वाभावस्स्थित एव । यातु पुनरुक्तिर्भीतिस्साप्यनुपदमेवापनेष्यते । अथात्र भाष्यं विमृशामः । तथा प्राणाः , प्राणवताशब्दादित्युभयत्र प्राणशब्देन प्राणाः प्रकृताः । तत्र प्रथममेकादश । पश्चाद्द्वादश । तएतेतइति तन्त्रेण पुंलिङ्गतच्छब्देन परामृश्यन्ते पुल्लिङ्गबहुवचनान्त प्राणशब्दनिर्दिष्टाः । अत्रोभयत्रोपक्षेपकं "मुख्यश्चैक इतरेचैकादश

प्राणाअनुक्रान्ताः । ते प्रकृताः प्राणाश्श्रेष्ठं वर्जयित्वे " ति च भाष्यम् । नच द्वितीयेऽपि भाष्ये प्राणशब्देनैकादशैव सङ्कलिता इति वक्तुं शक्यम् । एकादश मुश्रेष्ठस्यानन्तर्भावेन तेषु तद्वर्जनायोगात् , नच श्रेष्ठवर्जितास्तइति योजयामीति वाच्यम् । श्रेष्ठंवर्जयित्वेत्यस्य विधेयेघटनावश्यम्भावात् , पाठक्रमभङ्गापत्तेश्च नचैवन्तर्हिकथन्तत्वान्तराण्येव प्राणाद्वागादीनीति साध्यनिर्देशभाष्यम् । तेवागादय इति हि वक्तव्यमिति वाच्यम् । सङ्गतिप्रदर्शकभाष्यएवपूर्वोक्तस्यार्थस्योपक्षिप्तत्वेन तत्वान्तराणीति विधेयानुसारेणैवं भाषणात् , श्रेष्ठादिति भाषितव्येप्राणादिति भाषणं पूर्वपक्षावसरे प्राणशब्दस्य पञ्चवृत्तौमुख्यत्वमितरत्रलाक्षणिकत्वमापद्येतेत्युक्तस्याभ्युपगम सूचनार्थम् । अन्यत्रेत्यस्य विवरणन्तत्वान्तराणीति । तथाहि श्रेष्ठादन्यत्र , नतु श्रेष्ठएव विद्यमानास्तद्वृत्तय इति स्फुटन्त्वलन्ते न सूच्यते । अन्यथेन्द्रियाणि श्रेष्ठादन्येतथा व्यपदेशादित्येव हि सूत्रयेत् , तत्वन्तुस्वरूपम् । श्रेष्ठवृत्तित्वेसएव हि तेषांतत्वं स्यात् । तदा ततोऽन्यत्र कथन्तेस्युः प्राणाः । कथं वातेषु सश्रेष्ठः । नहि स्ववृत्तिषु स्वयं श्रेष्ठइति भवति । नचेत्युच्यन्तइति पदद्वयाध्याहारो भवति भाष्यकारीयेमतइति वाच्यम् । सूत्रकारीयत्वात् , तिङन्तस्यावश्याध्याहर्तव्यत्वात् , भवतामपि श्रेष्ठादन्यएव तेवागादय इन्द्रियाणि भवन्तीति तदध्याहारावश्यम्भावात् , तिङन्तेनैव पर्यवसानाद्वाक्यस्य, यदीतीति भवद्भिर्नाध्याह्रियते ततोऽस्माभिरपि नाध्याह्रियत एव तेप्राणाश्श्रेष्ठं वर्जयित्वेन्द्रियाण्युच्यन्तइति वक्तुंशक्यत्वात् , तथाच स्पष्टप्रतिपत्त्यर्थमेव भाष्यइति शब्दप्रयोगः । तथाचकवाभेद शब्दाध्याहारोऽस्माकम् । नच व्यपदेशभेदादित्यध्याहृतो भेदशब्दोभाष्यइति वाच्यम् । अर्थापरिज्ञानात् , नहि भाष्यार्थः परिज्ञातोभवता । तद्व्यपदेशादिति तदानवायुक्रिये पृथगुपदेशादित्यत्रोक्तं पृथगित्येतद्धिपरामृष्टम् । नचविप्रकृष्टं कथमेतत्तदापरामष्टुं युक्तमितिवा-

न्यम् । स्मारितत्वात् , स्मारितं हि पूर्वपक्षिणामाभूत् प्राणोवृत्तिरिन्द्रियाणाम् । इन्द्रियाण्येवास्य वृत्तयोभविष्यन्तीति । तथाच कुतोभेदशब्दाध्याहारः । नन्विन्द्रियेभ्यः पृथगुपदेशान्न प्राणस्तद्वृत्तिरित्युक्तम् । बाढम् । ततस्तुल्ययुक्त्या प्राणात् पृथगुपदेशान्नतान्यपि तद्वृत्तयस्स्युः । न । तदात्मताख्यापनात् प्राणात्मतांहिख्यापयति श्रुतिरिन्द्रियाणांत एतस्यैव सर्वेरूपमभवन्निति । नैवंप्राणस्येतरात्मताख्यापितेति ।

अत्रायं विषयविवेकः । प्राणस्य वायोर्भेदाभेद श्रुतिभ्यां विप्रतिषेधे वायुकरणक्रियान्यतरत्वेनैकदेशि समाधानम् । न तत्र वायुक्रियात्वमादाय भवति तत्समाधानमिति तत्रैव प्रतिपादितम् । तत्र पृथगुपदेशएव प्रमाणीकृतः । अत्रतुसत्येव पृथगुपदेशे तदात्मताख्यापनेन तद्वृत्तित्वमाशङ्कितम् । नतु तत्वमेव । पृथगुपदेशविरोधात् । ननु तद्वृत्तित्वमपि ततः पृथगुपदेशेन निरस्तम् । सत्यन्निरस्तम् । अथापि तदात्मताख्यापन विधुरेणैव तेन तन्निरस्तं , नह्यस्तिप्राणस्य करणात्मतयाख्यापनम् । तत्वनिरसनन्तु सत्यपि तदात्मताख्यापने भवति ततः पृथगुपदेशेन । अतोऽत्र पृथगुपदेशं परित्यज्य पृथग्व्यपदेशं प्रमाणीचकारसूत्रकार इति । अथ कोवानयोर्भेदः । अयम् । पृथगुपदेशोनामपरस्परं केनापिशब्देन भेदनोत्कीर्त्तनम् । यथाचेतौ गच्छतः । अयञ्चायञ्चागताविति च । पृथग्व्यपदेशस्तु विलक्षणतया व्यवहारः । यथा रामोऽयं लक्ष्मणोऽयमिति । व्यपदेशपदस्य विशिष्टव्यवहारपरत्वात् , अतस्तस्य शब्दस्य व्यपदेशादित्येतन्मन्दम् । नचोपदेशादित्य त्रयानामश्रुतिरुदाहृतासैवात्र कथमुदाह्रियतामिति चेत् प्राज्ञोऽसि । उपदेशोनामाज्ञात ज्ञापनम् । तत्र प्राणस्य करणानाञ्चब्रह्मणः पृथगुत्पत्तिकथनमुपदेशशब्दार्थः । तथाचतत्रभाष्यं " नहिकरणव्यापारएव सन्करणेभ्यः पृथगुपदिश्येतेति । व्यपदेशस्तुव्यावृत्ताकारेण व्यवहरणम् । अस्त्यत्रापिच

भाष्यम् "सएवैकस्सन्प्राणइन्द्रियव्यपदेशं लभतेनलभतेचेति विप्रतिषिद्धमिति" कस्यचिद्विप्रतिषेधस्यपरिहारायैवं प्रवृत्तस्य तव विप्रतिषेधान्तरं ह्यापततीति भाष्याशयः। तथाच तस्याएव व्यपदेशत्वेन ग्रहणेकोदोषः। भेदश्रुतिस्तुभेदेन श्रवणम्। प्रकरणभेदेन श्रवणादिति भाष्येस्पष्टम्।

तत्र किमर्थं पुनरुक्तेर्बिभेति पाञ्चरात्रस्तस्याअभावे। अथापि विलक्षणव्यवहारान्तर्भूतस्य वैलक्षण्यस्य कथं वैलक्षण्याच्चेति भूयोऽपि हेतुतयोपन्यासइति चेत्। इदन्तावत्पृष्टव्यो देवानां प्रियः। कथं पृथग्व्यपदेश उपपादितोभाष्यइति। प्राणइतीन्द्रियाणीति। सएवैकस्सन् प्राणइन्द्रियव्यपदेशं लभतेनलभतेचेति च। तत्र लाभेकोहेतुः। वृत्तिवृत्तिमतोरभेदेनेन्द्रिय व्यपदेशोवक्तव्यइति तं लभते। प्राणात् पृथगिन्द्रियाणीति व्यपदेशान्नलभते चेति। तथाच तत्वान्तराणीन्द्रियाणीति भवति। तत्र प्राणादेवविलक्षणतया व्यपदिष्टानीन्द्रियाणि। नतु तेभ्यः प्राणः। मुख्यामुख्यसाधारणतया प्राणशब्दप्रयोगात्तत्र तत्र। अतएवश्रेष्ठादिति सूत्रम्। एवञ्च गौर्गच्छति वृषभोगच्छतीति व्यपदेशसदृशोऽयं व्यपदेशः। तत्र यथा व्यक्तिभेदस्तथैवात्रापि। वैलक्षण्यश्च परस्परमिति स्पष्टमेवभाष्यइति नकाप्यनुपपत्तिः।

अन्येतु वर्णयाञ्चक्रुरित्यारभ्योक्तमाचार्यस्य स्वमतमित्याह कल्पतरुः। तत्र वर्णयन्तीति विहाय वर्णयांचक्रुरित्युक्त्याव्रत्तिकारमतोपन्यासः। सोऽपि तत् खण्डनायैव, तत्स्वरूपव्याक्रियाप्रणालिकयैव तत्खण्डनलाभादित्युपपादितं परिमळे। भाष्योपरिकल्पतरूक्तदोषगणोऽपि परिहृतः। तत्रैवास्ति बहुशोदोषइत्युपपादितंच। अथापि किंचिदस्तिवक्तव्यंममापीति विलिख्यते॥ तत्रावतरणिकार्थमुक्तन्दोषत्रयन्दूरीकृतम्। अथ यदुक्तन्ननुप्राणइतीन्द्रियाणीतिच संज्ञाभेदस्तद्व्यपदेशादित्युक्त इत्यादिनादूषणं कल्पतरौतन्नप्रसजति।

संज्ञाभेदादित्यभाषणात् , श्रेष्ठंवर्जयित्वेन्द्रियाणीति व्यपदेशादित्येव भाषणात् । कारकव्यपदेशस्तु क्वचित्क्रियायामन्वयायैव । तत्र न तद्वृत्तिस्ततः पृथग्व्यपदिश्येत । नहि देवदत्तोवर्त्तते । तद्रूपञ्चवर्त्ततइति पृथग्व्यपदिश्यते । नच देवदत्तं पश्यतद्रूपञ्चपश्येत्यस्ति व्यपदेश इति वाच्यम् । तद्रामणीयकाभिप्रायात् , रूपमात्रस्य वा क्रियामात्रस्य वा तदाश्रयव्यतिरेकेण व्यपदेशस्तु नातीव शोभते । तथाच प्राणवृत्तित्वेकरणानान्तत् करणत्वस्य प्राणकरणत्वत्वेन कथमेतस्माज्जायते प्राणोमनस्सर्वेन्द्रियाणि चेति पृथग्व्यपदिश्येतेति सूत्रभाष्यकारयोराशयः । अत एवाहभाष्यहृदयज्ञो भगवान् परिमलकारो " ज्येष्ठोत्पत्तिव्यतिरेकेणेन्द्रियाणि जायन्त इति शब्देन व्यपदेशादिति तस्मात्तत्रोक्तन्दोषान्तरमपि नैवस्पृशति भाष्यम् । अस्तिचास्यैवार्थस्य विस्पष्टमुपपादकं भाष्यमेतस्माज्जायते प्राणोमनस्सर्वेन्द्रियाणि चेति ह्येवञ्जातीयकेष्विति । इन्द्रियत्वेऽपि मनसो यथा कर्मेन्द्रियोपष्टंभः प्राणस्तथाज्ञानेन्द्रियोपष्टंभकम्मन इति प्राणादनन्तरमेव पृथगुक्तिः । हस्तादिग्राहकश्रुत्या मनसोऽपीन्द्रियान्तर समानयोगक्षेमतया ग्रहणेनेन्द्रियत्वसिद्धेः । तत्र प्राणस्य तद्वद्ग्रहणान्नेन्द्रियत्वम् । सर्वविधारक इति प्राणस्य मनसोऽपि पूर्वमुपादानमिति गृहीतव्यम् ।

यदपि भाष्यदूषणायैव प्रवृत्तेयं भामतीत्यभिप्रेत्य तस्यावार्त्तिकत्वं साधयितुं कथमत्रदुरुक्तिचिन्ताटीकायां वार्त्तिकेहि सायुज्यत इत्याशङ्क्यतर्हि वार्तिकमेवास्तु नहि वार्त्तिकस्य श्रृङ्गमस्तीत्युक्त्वाभिहितमत एवमान्त्रवर्णिकसूत्रभाव चोपलब्धेरिति सूत्रेचभाष्यमतिलंघ्य प्रवृत्तमत्रापि निबन्धात्तद्व्यपदेशं विष्ट्पवन्मृत्युप्राप्ताप्राप्तत्वेत्यादिना प्रकरणभेदमेव वर्णयांबभूवेति ।

तत्र मान्त्रवर्णिक सूत्रस्थाभामती वृत्तिकारमते दोषाविष्करणपरतया तत्रैवव्याख्याता मया । भावेचेति सूत्रेतु भाषोक्तमेवार्थं

24

पिण्डीकृत्य प्रथममुपवर्ण्य " तत्र यथो क्तहेतोरेकदेशाभिधानेनोप-क्रमते भाष्यकार इति भाष्यमवतारितम् । अंशान्तरन्तरन्तु पश्चाद-भिधास्यतीति सावशेषेत्र हि प्रतीयते भामती अभिहितश्च पश्चात् भाष्येतत्भावानुरक्तांच बुद्धिमिति बुद्धिमपि घटयित्वाऽम्शान्तरम् । अत्रतु वदात्मताख्यापन समाधानाय तद्व्यपदेश उपात्तः । कथन्त-दात्मतायान्ततो विलक्षणतया व्यपदिश्येतेति । तद्वृत्तिगतमिन्द्रिय-त्वं कुतस्तदीयन्नस्यात् । नहि रूपगतं रामणीयकं रूपिणि नस्यात् । यदि नस्यात्तदा कथं रूपवतीवनितारमणीति व्यपदिश्यते । तथाच ख्यापनस्य प्रतिद्वंद्वितयाख्यापनान्तरं हेतूकृतं भवति ॥ ततः प्राणैक-शब्दत्वं समाधातुं भेदश्रुतिरुदाहृता । यदि प्राणैकशब्दत्वेन तद्वृत्ति-त्वमिष्यते तदाकथं प्राणश्रुतिव्यतिरेकेण तद्वृत्तीनां करणानां स्वत-न्त्राश्रुतिस्स्यात् । नहि ज्योतिष्टोम इयताप्रबन्धेनश्रावितः इतःपर-न्तदीयाधर्माश्राव्यन्त इति भवति । यावत् प्रकारोपेतस्यैवज्योतिष्टो-मत्वात् , यदि भेदेन श्राव्यते तर्हि तदीयोधर्मोनस्यादिति ॥ नन्वने-कार्थत्व लक्षणाभ्यां भीत्या तदात्मताभ्युपगन्तुं युक्तासतिकार्यवै-लक्षण्ये । नहि वृत्तिकार्यं वृत्तिमतोनस्याद्वृत्तिमत् कार्यं वा वृत्तेर्नस्या-दिति वक्तुं पार्यते । स्ववृत्तिद्वारैव वृत्तिमताकार्य निर्वाहादित्येतद्धे-तुत्रयं यथासूत्रं यथाभाष्यं यथा क्रमंचोपवर्णयन्ती कथं भाष्यातिलं-घिनीस्यात् भामती । भाष्यार्थशरीरिणी हि साशङ्करीव शङ्करार्ध शरीरिणी । तथा ह्युक्तमाचार्यकृति निवेशनमिति । अतोभाष्यत्व-मप्यस्ति भामत्याः , किमुतवार्त्तिकत्वम् । तस्मात्भाष्यादपि ज्या-सी भामती । यातु भाष्याब्धिहृदयं गतमद्वैतात्मतत्वम्महामणिमुद्धृ-त्यास्मभ्यं प्रदर्शयतीत्यन्तेवासिनोऽस्मन् बोधयितुमेवेयं प्रवृत्तिराचा-र्याणामिति मन्तव्यम् ॥

इति त इन्द्रियाधिकरणम् ।

एवन्तावद्वियदाद्युत्पत्त्यादिविषये प्रथमं विप्रतिषेधोद्भाव-नन्तदनुतस्यैकदेशिना समाधानपश्चाच्च तस्मै तत्वोपदेश इति त्रिदृता कृतोविचारोऽत्यवर्तत । सच भूतभोक्तृभोगोपकरणाश्रितः । परन्तु भोगायतनविचारो वर्तिष्यते । तच्चऽव्यात्मकं रूपं येननाम्ना-व्यवहृियते तयोर्नामरूपयोर्व्याकरणमत्र प्रसक्तम् । तेच ऽव्याकृतेन व्याकृतेचेति नास्ति श्रुति विप्रतिषेधः । किन्तु ऽव्याकर्तर्यस्ति । संशयोजीवोवा परोवेति । तदपाकरणायोपदिशत्याचार्यस्साक्षादेव ।

“ संज्ञामूर्त्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशादिति ”

अथ“मांसादिभौमं यथाशब्दमितरयोश्चे”ति सूत्रम् ॥ अत्रा-स्ति भाष्यम् “ तदिदानीमाचार्यो यथा श्रुत्येवोपदर्शयत्याशङ्कितं कश्चिद्दोषं परिहरिष्यामित्येतत्सूत्रावतरणिकार्थम् । उत्तराधिक-रणेप्येवं प्राप्ते पठत्याचार्य इत्युत्तरपक्षोपक्रमार्थं भाष्यम् । तादिदं वेदान्तप्रमाणराजप्रामाण्योपघातकैस्तान्त्रिक वैतण्डिकैरुद्भावितेभ्य-स्तत्तत् स्थलीयविगानादि दोषगणेभ्योमुक्तोऽस्मि । व्यवस्थि-तश्च शब्दस्य शब्दत्वम् । अतो यथा शब्दमेव मांसादिभौममभ्युप-गन्तव्यं भवतीतरयोश्च । परन्तु कश्चिदवास्तित्राद दोषः । तमपि परिहरिष्यामीति सूचयति यथा शब्दमिति वैशेष्यात्तु तद्वादस्तद्वाद इति दोषोद्भावनप्रकरण समापनेन । परन्तु व्यवस्थापित प्रमाण-प्रामाण्य आचार्यः प्रश्ननिरूपणाभ्यामेव विचारं वर्तयिष्यति । नतु त्रिवृता । यतः प्रतिबन्दीप्रतिक्षेपेण व्यवस्थितमाचार्यस्याचार्यत्वमि-त्याद्यर्थं जातमावेदयत्यवसानारम्भयोराचार्यपदघटितं भाष्यम् ॥ एवमेव तत्रतत्रावसाने वृत्तवर्तिष्यमाण वस्तुनी उपसूचिते इत्यावे-दितमप्यत्र सङ्कलयामस्सूत्रानुगुण्य सुखावबोधार्थम् ॥ तद्यथा । प्र-थमन्तावत् सर्वज्ञं ब्रह्मजगद्योनिरिति वृत्तन्दृढीकृत्य शास्त्रप्रमाणक-त्वमवतारितं पूर्वापरानुषंगेण शास्त्रयोनित्वादिति ॥

ततोगति सामान्यात् , श्रुतत्वाच्चेत्युपसंहृत्य तदेव ब्रह्मणि श्रुतेर्गतिसामान्यं प्रपञ्चयिष्यामीति सूचितमभ्यासादिति ब्रह्मपदाभ्यासोपन्यासेन। तथा भेदव्यपदेशाच्चान्य इति जीवादन्यत्व वचनेन पुच्छादन्योऽयमुपास्य इति वृत्तमिवान्य एव प्रसिद्धतरेभ्यो वियद्वायुविशेषतेजोभ्यस्तत्तच्छब्दैः प्रतिपाद्यते वेदान्त इति वर्त्तिष्यमाणमपि सूचयांबभूव। अथच पुनरपि प्राणमपदमेवावष्टभ्याब्रह्मशब्दलिङ्गानां ब्रह्मण्येवानुगममुपन्यस्यान्यथोपासात्रैविध्यमापाद्य ज्ञेयैक वाक्यत्वमुपपाद्य वृत्तमुद्गीथप्रस्तावजाठराग्निषु प्रतीकेषु जन्माद्युपहितस्याकाशादिशब्दितस्य ब्रह्मणस्त्रिविधमुपासनं विदधद्वाक्यार्थ विचारमुपसूचयन्वर्तिष्यमाणश्च स्वतन्त्रमुपासनं विदधद्वाक्यार्थ विचारमुपसूचयामास तत्रैवोपासात्रैविद्ध्याभ्युपगम वादेनोपासात्रैविद्ध्यादाश्रितत्वादिह तद्योगादित्यनेन॥ अतएव तत्र भाष्यकृताऽश्रितत्वादित्येतद्विचारयिष्यमाण शाण्डिल्यविद्यायामाश्रितत्वादित्यनुभाषितम्। एवं साधारणशब्दविशेषादिति क्रोडीचकारातिवृत्तम्। शब्दादिभ्य इति स्वशब्दावलंबेन पुनर्विचारमापादयन् करिष्यमाणं स्वशब्दसंकलनमसुसूचद्विहाय परसाधारणमात्मशब्दम्। उपक्रान्तश्च स्वशब्दादिति। उपसंहृतश्च पत्यादिशब्देभ्यइति। उपसूचितश्च तेनानुपदमेव पूर्वपक्षिणः केनाचिच्छब्देन पुनः प्रत्यवस्थानम्। उपपादितश्चानुक्षणमेवानुमानिकमपि शब्दवदिति।

अद्ध्यायावसानेतु योनिश्चहिगीयत इत्युपसंहृत्यैतेनाण्वादिकारणवादास्सर्वेप्यश्रौततया व्याख्याताइति वचनेन,व्याख्यातास्सर्वेऽपि ब्रह्मपरतया वेदान्ताइति वृत्तं व्याख्यास्यन्ते च कपिलकणादबुद्धार्हत पाशुपत पाञ्चरात्रादीनान्तन्त्राणि तर्काश्च वेदान्तविरुद्धांशेऽप्रमाणतयेति वर्त्तिष्यमाणश्चासुसूचत्। स्मृतिपादावसितावपि सर्वधर्मोपपत्तेश्चेति परिसमाप्यरचनानुपपत्तेश्च। प्रवृत्तेरनुपपत्तेश्चेति बह्वयोऽनुपपत्तय उपपादिताः। तथोत्पत्त्यसम्भवादिति पाञ्चरात्रपक्षे जीवोत्पत्त्यसम्भ-

व वचनेन सर्वेषामपि मतेप्रपञ्चोत्पत्त्यसम्भवमुपसूचयन्विप्रतिषेधा-च्चेत्युपसंहृत्य प्रतिबन्ध्यावेदेऽपि वियदाद्युत्पत्त्यादिविषयं परैरुद्भा-वितमुपनिबबन्ध । तत्र सूत्रभेदेन जीवोत्पत्त्यसम्भवस्य कर्त्तुः कर-णोत्पत्त्यसम्भवस्य चोपपादनमत्र पादभेदेन तदुभयोत्पत्त्यादिविषय विप्रतिषेध विचारोपक्षेपक्रम् । तत्र यथा न च कर्त्तुः करणमिति पूर्वसूत्रानुबन्ध्येवन्तथा प्राणाइति पूर्वपादानुबन्धीति विवेक्तव्यम् ।

एवञ्च विप्रतिषेध प्रतिषेधप्रकरणावसानेऽत्र व्यवस्थापितं ब्रह्मप्रमाण प्रामाण्यम्। इतःपरं यथाशब्दमनतिलङ्घ्यशब्दप्रामाण्यं शिष्यप्रश्नाचार्य निरूपणादिनैव साधनफल विचरोवर्त्तिष्यते । ननु वैतण्डिकवितण्डा तत्प्रतिक्षेप तत्वव्युत्पादन प्रकारैरिति सूचयत्या-चार्य इत्यर्थसंसूचकन्तदिदानीमित्याचार्यइति यथाश्रुत्येवेत्युपदर्शय-तीत्याशङ्कितन्नतु वैतण्डिकतयोद्भावितमिति कश्चिद्दोषन्नत्वप्रामा-ण्यापादकं विप्रतिषेधाख्यम्महान्तमिति परिहरिष्यामिति , एवं प्रासे पठत्याचार्य इति च प्रतिपदं भाष्यं , यथा शब्दं वैशेष्यात्तु तद्वाद-स्तद्वादः , प्रश्ननिरूपणाभ्यामित्यादि सूत्रपदानिच पुनः पुनर्विमृश-न्तोवयं श्रुतिसूत्रभाष्याणामानुगुण्यमध्यक्षमिवोपलभामहे ।

एवंस्थिते , नन्वन्नमशितमित्यादिनोक्तस्य त्रिवृत्करणस्य सृष्ट्युत्तरकालिकत्वावश्यम्भावेन जीवएव त्रिवृत्करणस्यापि कर्त्ता । तत्रकुतः पारमेश्वरन्नामरूपव्याकरणमित्याशङ्क्याह , मांसादिभौम-मिति । मांसमनसीपुरीषवत् भौमएव , तथाचात्र भूतविकारः प्र-तिपाद्यते , ननु त्रिवृत्करणमुच्यत इति समाहितं भातीति वर्णयन्ति परे । अत्र सूत्रार्थो भाष्यार्थएव नतु त्रिवृत्करणमुच्यत इत्येतद्दुर्ज-म् । अथापि कुतोऽत्र संशयः । नहि यथानुखलु सोम्येमास्तिस्रो-देवताः पुरुषंप्राप्य त्रिवृत्त्रिवृदेकैकाभवतीत्यनेन भवति संशयः । पु-रुषं प्राप्यत्रिवृत्त्रिवृदेकैकावर्त्तते तन्मेविजानीहि । अधिभूतमिवाध्या-त्ममपि देवतानान्त्रिवृद्भावन्दर्शयिष्यामीत्यर्थकत्वात् , नचान्नमशि-

तन्त्रेधात्रिधीयत इत्यादिना । विद्यमान त्रिवृद्भावप्रदर्शनार्थत्वात् । किञ्च केनापि जीवेन स्वाशित पीतान्नपानादीनान्त्रिवृत्करण त्रिधाविधानं वास्येन कृतमित्यध्यक्षमनुभूयतेऽनुमीयते वा । अपिचानेनैव तथाविधाने , नकोऽपि जीवः पुरीषमूत्रादिबन्धादिना कदाचिदपि रुग्णस्स्यात् , नचैवं दृश्यते । तस्माज्जाठरेणैव त्रिधाविधीयत इत्यमूढोऽध्यवस्येत् ॥ अथच विद्यमानेनैव शब्देन यदि संशयो भवति तदायथा शब्दमिति कथं समाधातुं शक्येत। यथाशब्दमेव हि संशयप्रापन्नः प्रत्यवातिष्ठतेति न समञ्जसमेव परकीयमवतारणम् ।

अथैवञ्चेत् , उत्तरसूत्रविषयोप दर्शनपरतया सूत्रमिदं व्याख्यातं भाष्यकृता । शङ्कानिराकरणार्थत्वमपि शक्यंवक्तुम् । काणादास्तु मनो नित्यमाचक्षते । साङ्ख्यास्तु वाङ्मनसे आहङ्कारिके । तत्रेदमुपतिष्ठते । मांसादीति । सिद्धेन सहसाध्यस्य निर्देशः । यथामांसादिभौमादि , एवंवाङ्मनसे अपि तैजसभौमेइत्यर्थ इति कथं भामतीति चेदेवम् । केचित्तुदाहरण वाक्यार्थएव संशेरते । तत् कथं सङ्गच्छते । अतिरोहितार्थत्वात् , तत्र यथाशङ्कानिराकरणार्थत्वमपि वक्तव्यमेवानेव वक्तव्यमिति ।

अत्रच भौममित्यस्य भौमादीत्यत्र लक्षणाभवति । नवास्तिदानीमवसरः काणादादीनां स्वमतेन प्रत्यवस्थानस्य विप्रतिषेधाद्वा समञ्जसमिति तिरस्कृतस्त्वस्वपक्षाणां , तस्मात् भाष्योक्तरीत्योत्तरार्थमेव यथाशब्दमिति सौत्रंपदमित्येतदाति स्फुटतयानुक्तं भामत्यामिति सर्वमप्यनुगुणमेव , इति संज्ञामूर्तिक्लृप्त्यधिकरणम् ।

सूत्रानुगुण्यसिद्धौ द्वितीयाध्यायस्समाप्तः ।

अथ साधनलक्षणो नामतृतीयाध्यायः ।

एवन्तावद्यथाशब्दमेवाभ्युपगन्तव्यो वेदान्तार्थः । नतु विप्रतिषिद्धइति प्रत्याख्यातव्यः, नापि यथाकथञ्चिदेष विप्रतिषेधोऽपि

परिहरणीयः । किन्तु यथाशब्दमेव परिहरणीय इति परिहृत्य विप्रतिषेधाभासान्निरस्तकृतेन वादविशेषेणाथेदानीं प्रश्ननिरूपणाद्यारम्भकेन विशेषवादेन साधन निरूपणायारभते यथाशब्दमेव व्यवस्थापितप्रामाण्यवेदान्तावलंबनोभगवान् बादरायणाचार्यः ।

‘ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः ’
प्रश्ननिरूपणाभ्यामित्यादिना ।

अत्र तदन्तरेति तदाकिंवा परामृश्यते । ननु संज्ञामूर्ति क्लृप्तिरित्युपात्तामूर्तिः परामृश्यते । तथाच मूर्त्यन्तरप्रतिपत्ताविति भवति। अथ तत्रगिरिनदीसमुद्रादिसाधारणमूर्तिसमान्यग्रहणात् कथन्देहमात्र समर्पकेण तदासापरामृश्येत । एवन्तर्हि मांसादि भौममित्यनन्तरसूत्रेणाध्यात्ममवतार्य देहाकारविशेषरूपेण तस्यास्स्मारितत्वात्तद्रूपेणैव सातदापरामृश्यत इत्युपेयते । साधुसमीचीनोयमुपगमः । एवं सतीयद्दूरमनालोच्यैव संज्ञामूर्तिक्लृप्तिरिति देहः प्रस्तुतः, सतच्छब्देन परामृश्यतइति प्रवृत्तं श्रीभाष्यमित्येतदप्युपेत्यम् ।

अस्तु तथापि पूर्वदेहं विहायदेहान्तरं प्राप्नोतीतिकेन सिद्धं, येन तदन्तर प्रतिपत्तावित्यनूद्यते । ननु कोयं प्रश्नोऽनधीत वेदान्तस्यैवतवानेनान्यन्नवतरं कल्याणतरं रूपं कुरुत इत्येतां श्रुतिन्द्रुततरमेव स्मारयतिसूत्रकरे । ननु नाहमनधीत वेदान्तः, नापिच नास्मार्ष मिमांश्रुतिम् । कोहिनामनस्मरेदेवं स्मारिता मप्यधीत वेदान्त एतां श्रुतिम् । किन्त्वत्रावश्योदाहर्तव्यामपि कुतोनोदाजहारैतां श्रीभाष्यकारइति जिज्ञासे । अस्तु केन सम्परिष्वक्तोयातीति प्रतिज्ञायते । भूतसूक्ष्मैः । कथं ज्ञायते । किमिदमपि वक्तव्यम् वैशेष्यात्तु तद्वादोऽन्नमित्याप इति तेज इतीत्येतदर्थमवान्यवधानेन पूर्वमुक्तवतापि । अतो भूतसूक्ष्मैरेव सम्परिष्वक्तस्सम्पिण्डित करणग्रामोरंहतीति प्रश्ननिरूपणाभ्यां प्रतिपादयति ।

अथात्र रंहतीति सत्यप्येकवचने कथञ्चिवारंहन्तीत्यश्रुतत्वा-दिति सूत्रे भाष्यम् । श्रुत्यनुसारात् , अत्र रूपं कुरुत इति श्रुतिम नुसृत्यरंहतीत्येकत्वोक्तिः । तत्रत्विष्टापूर्तेदत्तमित्युपासत इति तामे-वानुसृत्य तथोक्तिः । सम्परिष्वं गाच्च । सम्परिष्वक्तं हि भवति न रंहतीत्याशङ्कनं रंहन्तीत्युत्तरेण बहुषु रंहत् सुकेयमाशङ्केत्येवमर्थेन, एवं सत्यनालोच्येवं प्रवृत्तन्तत्राप्यतो जीवोयातीति श्रीभाष्यमितिन मन्ये , काममन्यताम् ।

इतितदन्तरप्रतिपत्त्यधिकरणम् ।

' कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यांयथेतमनेवञ्च '

नकिञ्चिदत्र विषमम् । परन्त्वभ्याश इत्यभ्याङ्पूर्वादशूव्या-प्ताविति धातोर्निष्पन्नं प्रथमाबहुवचनान्तन्दिश इतिवत् अभ्याशः प्रत्यवरूढाइति श्रुतप्रकाशिका । अस्तु कानोहानिः ।

इति कृतात्ययाधिकरणम् ।

'अनिष्टादिकारिणामपि च श्रुतम् ।'

' संयमनेत्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् । को-र्थः । नन्वेवन्तर्हीष्टानिष्टकारिणामविशिष्टवगतिस्स्यादिति शङ्कां वा-रयति तु शब्दः । इतरेषामनिष्टादिकारिणाश्चन्द्रारोहावरोहौ संयमने-नुभूयैव । नान्यथा । पुनःपुनर्वशमापद्यतेमे , इति तेषां संयमनगति दर्शनादिति । एवन्तर्हीदमपि पूर्वपक्षसूत्रमिति स्यात् , एवमवस्यात्, यत आह सुदर्शनः । अस्य सिद्धान्तसूत्रत्वे विद्याकर्मणोरिति सूत्र-स्थतुशब्दस्य प्रयोजनाभावः । नच शङ्कामात्रव्यवच्छेदकस्स इति वा-च्यम् । तदसम्भवात्, नचदेहारम्भोऽपि च पुनर्जायमानानान्नान्तरेण चन्द्रप्राप्तिमवकल्पते पञ्चम्यामाहुतावित्याहुति सङ्ख्यानियमादितीमा म्मतिं व्यपोहयतितुकारेणेति वाच्यम । नतृतीय इत्यनन्तरसूत्रेणैव

तदपोहनात्,किञ्च श्रुत्या सर्वेषांचन्द्रप्राप्त्याशङ्कैव व्युदस्तेति भवति, तथासति साक्षात्पूर्वपक्षस्यैव तेनव्युदास इति तदेव सिद्धान्तारंभसूत्रं स्यादिति सूत्रपञ्चकमपि पूर्वपक्षएव । द्वितीयसूत्रेतु तुकारश्शङ्काव्यवच्छेदकएव । साचोपन्यस्ताभाष्ये अपिचारोहावरोह शब्दास्वारस्यं स्फुटमेव । अनुभूय यमयातना अस्मिँल्लोके जायमानानामुन्नतस्थान प्राप्तेस्ततोवरोहस्य चालाभात् , नचयमालयमारुह्यानुभूययातना स्ततोयमालादवरोहन्तीति वाच्यम् । अनुभूयेतिल्यबन्तनिर्देशे नारोहावरोहयोरपि पश्चात् भावित्वावगमादिति । इदमत्रवक्तव्यम् । कुत्रेदं सङ्गतमनिष्टादिकारिणामपीति सूत्रमिति । इष्टादिकारिणां प्रतीतेरित्येतदनन्तरम् । तथासति भाक्तवानात्मवित्वादिति कथमनुक्षणमेवोपन्यस्तम् । कथञ्चिदाशङ्कानिवर्त्तनव्याजेन तेषां पशुप्रायत्वमावेदयितुम् । तदनन्तरमपि वा कुतोनेदं ग्रथितम् । अत्रारोहावरोहोभयग्रथनार्थं मध्ये कृतात्ययाधिकरणाभावेऽवरोहाप्राप्त्या तदेवग्रथितम् । किञ्च । किञ्चानुक्षणमेव तेषां कृतात्ययशेषसद्भावस्तदनुभवायावरोहोऽवरूढानामपि न नियतारमणीययोन्यापत्तिः , किन्त्वनुशयानुसारेणैव , तथाचयात्यन्तक पूयाचाण्डाळयोनिस्तदापत्तिरपि स्यादित्येतस्याप्यर्थ जातस्य सङ्कलनार्थम् । किमर्थमेवं प्रवृत्तं प्रसक्तमपि परित्यज्याकाण्डे सूत्रकृतातत्वनिर्द्धारणार्थं प्रवृत्तेन, अस्माकमन्तेवासिनामिहामुत्रफलवैराग्योत्पादनार्थम् । यतएवमेवमवत्ते भगवती श्रुतिः ।

अस्तु किमितोप्यस्ति वक्तव्यन्तद्दृढीकरणार्थं सूत्रकारस्योताहोन । अस्ति , किन्नामैतत् , पुनः पुनर्यमालयमवगाह्यानुभवति यामीर्यातना अनात्मवज्जीव इति । तत्र कथं पूर्वपक्षिणैवासङ्गतमभिधीयते यमालयावगाहनन्ततश्चन्द्रारोहावरोहौ चेत्यभिदधात्यदर्शन इव सुदर्शन इति वितथं प्रथितनामा । किमयं परिश्रान्तो भगवान् बादरायणः । उतवाक्षुधयामोदक परिपूरितास्योवदतु भ-

वानेव वक्तव्यमस्माभिः पश्चषैस्सूत्रैरित्यनुनिनाय पूर्वपक्षिणम् । अपिच न श्रूयते गन्तेत्युक्तेप्रतीयन्ते त इष्टादिकारिण इति समाहितम् । तथा श्रूयन्तेऽनिष्टादिकारिण इत्युक्तेऽपि सद्यस्समाधानमेव वरम् ॥ अपिचाविशिष्टैव हि स्यादिष्टानिष्टादिकारिणां गतिर्यद्यनिष्टादिकारिणोऽपि चन्द्रमसमारोहन्तीत्याशङ्कितुः कोऽभिप्रायः । इष्टादिकारिणस्त्विष्टादिफलभोगाय गच्छन्ति । तदभावात् किमर्थमेते मच्छेयुरिति हि तदभिप्रायः । तत्र संयमनेत्वनुभूयारोहावरोहावित्युक्ते किं केन सङ्गतम् । संयमनेऽनुभूय ततः किमर्थश्चन्द्रमारोहन्तीत्यस्य किमुत्तरम् । यदि चन्द्रमसमारुह्यैवयमालयमवगाह्यन्तेदं सदृशमुत्तरं स्यात् , नैवमुत्तरितम् । किन्त्वनुभूयारोहावरोहावित्युक्तम् । तत्रावरोहोऽनाकांक्षित एव । अप्रामाणिकौ च तत आरोहावरोहौ । यतोयमालयावगाहन एव हेतुरुपन्यस्तोऽविप्रतिपन्ने । नहि सिद्धान्त्यनिष्टादिकारिणांयमालयावगाहने विप्रति पद्यते । तत्र किमर्थंस्मरन्तिचापिच सप्तेतिच पुनश्चहेतुद्वयोपन्यसनं पूर्वपक्षिणः ।

अहहायिभोः , फलेन प्रलोभ्यमानोबाल इव प्रसक्तानुप्रसक्त्यानुधाव्य पूर्वपक्षिणं कथमेवं विरुद्धमुच्यत इति तत्वमजानानः पृच्छति बादरायण इति कथमेवं वक्तुं प्रवर्त्तते भवदीयाजिह्वा । यतस्तत्रापिच तद्व्यापारादविरोध इति तं व्युत्पादयति पूर्वादीति भवति ॥ अथ संयमनेऽनुभूयारोहावरोहावन्यथा नोपपद्येते इति चेत् , किं सूत्रैकदेशानुगुण्याय बहूनि सूत्राणि विगुणीकार्याणि । त्वदुक्तार्थोऽपि नोपपद्यत इत्युक्तमेव । अथ कथंवोपपत्तिरिति चेत् ॥ शृणुविहायविषमादृष्टिं, उच्यते सूत्रभाष्यकारयोर्गभीरोऽभिप्रायः ॥ अनिष्टादिकारिणामपीत्येतावत्येव वक्तव्येचेति श्रुतमिति चाधिकमुक्तम् । यतस्तावतैव प्रतीतेरित्याहृत्याक्षेप्तुं शक्यते । तथाच श्रुतमित्येतदनुसारेण चन्द्रमण्डलमित्याकांक्षावशेन गन्तव्यतयेति चा-

द्ध्याह्रियते । चकारेण तव्योक्तावश्यकतायां कायनयुक्तिर्ग्रथिता भवति । नच श्रीभाष्यइव तत् गमनमित्येवाद्ध्याहियतामिति वाच्यम् । इष्टादिकारिणां गन्तृतया प्रतीतेरिति प्राप्ततया तत्रानिष्टादिकारिणामपीत्येतावतैव कृतत्वा१त्तेः । श्रुत्यनुसाराच्च । यातु सूच्यतेऽनेन श्रुतिर्नेसाचन्द्रगमनमेव श्रावयति । किन्तु चन्द्रमसमेवते सर्वे गच्छन्ति नान्यमिति चन्द्रमसोऽवश्यगन्तव्यताम् ।

तत्र सिद्धान्ती , किं श्रुत्याप्रत्यवतिष्ठसे , किं वा श्रुतेरन्यथानुपपत्त्यावश्यगन्तव्यतया । उतयुक्त्यावश्यगन्तव्यतयेति त्रियाविकल्प्यक्रमेण समादधाति , संयमनेतु , विद्याकर्मणोरितितु , न तृतीय इतिच , नहिश्रुतेः प्रतिश्रुतिमन्तरेण गतिकल्पनं युक्तमिति प्रथमन्तदवलम्बनेनाह , संयमनेत्विति , साचश्रुतिः पुनः पनर्वश मापद्यतेमइतियमवचन सरूपापुनः पुनर्यमवश्यतान्दर्शयति नास्तिकीभूयानिष्टादिकारिणाम् । तदत्रग्रथनीयन्तत् गतिदर्शनादिति ग्रथितवता । नातोऽधिकम् । ग्रथितेनापि पक्षप्रतिक्षेपकेण भवितव्यम् । इयश्च पुनः पुनर्यमवश्यताकदाता भवेत् । यदियमालयमवगाह्य तत्रयामीर्यातना अनुभूयपुनरेवेमं लोकं प्रत्यवरोहन्ति , न पुनस्ततश्चन्द्रमण्डलं गच्छन्ति , यदिचैवं भूतावारोहावरोहौ पुनश्च भवतः । तदिदमुक्तं सूत्रभाष्ययोः । तथाच प्रत्यवरोहन्तीत्यद्ध्याहर्त्तव्यमेव। यतस्तथासत्येव तद्गतिदर्शनमुपपादितं भवति । चन्द्रमण्डलगमनश्च प्रतिक्षिप्तं भवति । सूत्रे आरोहेणावरोहस्य समस्य वचनमपि सङ्गतं भवति ।

वस्तुतस्तून्नत स्थलप्राप्तिरेवारोह शब्दावलम्बना । नाधोगतिः । तत्र कथन्नरकलोकप्राप्तिरारोहपदावलम्बना भवति । नहि नरकेपतित इतिवन्नरकमारूढ इति व्यवहियते । तदिदमुक्तं भाष्येयमालयमवगाह्येति । अवगाहोनामावतरणन्तच्चावरोह एव । यथासरोवरमवगाहतेमजः । निम्नमवगाहतेपय इत्युक्ते अवतरणमेव

गम्यते । तथाचयमालयमवगाह्य तत्र यामीर्यातना अनुभूयस्व-स्थानं प्रत्यारोहः पुनर्यमालयं प्रत्यवरोहश्चोक्तो भवत्यध्याहा-रमन्तरेणैव । यमालयमवरूढा एव विसृष्टाभवन्त्यनिष्टादिकारिणो नास्तिकाः । तेनच वैराग्यमपि दृढीकृतं भवति । श्रुतिरपियमवश्य-तायामेव विसृजन्त्याऽहृता भवति । तथाचतीरारोह इव स्वस्थानारो-होऽनिष्टादिकारिणाम् । नचात्रकल्पे कथमिमं लोकं प्रत्यवरहन्तीति भाष्यं सङ्गच्छेतेति वाच्यं तेषामेतल्लोकारोहोप्यवरोह सदृशएव । पु-नरपि यमालयावगाहनहेतु पापयोनिप्रापकत्वात्, कल्याणकारिणामेव मुक्त'मथवा योगिनामेव कुले भवति धीमतामि'ति पुण्ययोनि जन्म-भगवता परमेश्वरेण । अतः प्रथमतरभाष्यानुसारेणैवमर्थकमेवेदं भाष्यम् । अतएव तदनन्तरं भाष्यम् । एवंभूतौ तेषामारोहावरोहौ भवत इति अस्यायमर्थः । एवंभूतौ स्वस्थानादवरुह्य पुनरारोहाव-रोह रूपौ । नत्विष्टादिकारिणामिव प्रथममारुह्य ततोवरोहः । आ-रोहोप्यवरोहप्रायः । नतु तेषामिवारोह एवेति , एवञ्च चन्द्रारोह-ण पूर्वपक्षस्सुशिक्षितो भवतीति ॥

श्रुत्योस्साम्येकोयमेकत्र पक्षपातइति मतिमपाकरोति " स्मर-न्ति चेति " स्मरणबाहुल्यावष्टंभेन । अन्यथास्मृतेश्चैत्येव सूत्रयेत् , अपिच सप्ते''ति सप्तएव शिष्याणां ब्रह्मविचारे रुच्युत्पादकम् ॥ अथस्थूणानि खननन्यायेनोक्तमर्थन्दृढयितुं विरोधमाशङ्क्य समा-दधाति ॥

" तत्रापिच तद्व्यापारादविरोध " इति ।

एतावता चन्द्रमसमेव गच्छन्तीति यथासन्निवेशेन तदितर-गमन निवर्त्तनन्तित्यााजितं पूर्वपक्षिणा सिद्धान्तिना । अथ चायो गव्यच्छेदाभिप्रायेण चन्द्रमण्डलगमनावश्यकताम्मन्वाने तस्मिंस्त-मपि त्याजयति तं " विद्याकर्मणोरितितु प्रकृतत्वादि " ति ॥ अपि

भोः, अथैतयोः पथोर्नैकतरेण च नेति हि श्रूयते । तत्र यदि सऽर्वेपि चन्द्रमसङ्गच्छेयुः केवातदावशिष्येरन्, अथकावागतिरनिष्टाधिकारिणामिति चेदसकृदावर्त्तनमिति श्रावयति श्रुतिः । तच्च पूर्वोक्ता पुनः पुनर्यमवश्यतैव । अथैवन्तर्हि "येवैकेचास्माल्लोकात् प्रयन्ति ते सर्वे इत्यस्यकागतिः । भवतैव वक्तव्यम् । य इष्टादिकारिणस्ते सर्वे इति परिणेयमित्याह लक्ष्मणार्यः । परिणेयन्निर्वाह्यमिति व्याकरोति सुदर्शनः । नहि तेनापि परिणेयम् । नचानेनापि व्याख्येयम् । नापि भवतापि किञ्चित् कर्त्तव्यम् । किन्तु स्वयमेव तथावतिष्ठत इत्याहास्मत् भाष्यकार एवंसत्यधिकृतापेक्षश्शाखान्तरीयेवाक्ये सर्व शब्दोवतष्ठत इति ॥ ननु चन्द्रमण्डलागमने कथन्तेषाञ्जन्मलाभ इति चेदाह "न तृतीये तथोपलब्धेरि"ति ।

पूर्वपक्षतामपीयात् द्वितीयं सूत्रम् । यदिसंयमनेत्वनुभूयारोहावरोहाववधारणादित्याकारं स्यात् । सूत्रन्त्रयन्तु न कथञ्चिदपि परिणेतुं शक्यते । तथाच कथं सूत्रपञ्चकं पूर्वपक्षस्स्यात् । अहहेदं शिरोयश्चरण इत्यजानन्तोऽपि संवृत्ता भाष्यकाराः कलिकौटिल्यादित्यलम् ।

इत्यनिष्टादिकार्यधिकरणम् ।

"तत्साभाव्यापत्तिरुपपत्तेः"

किन्नामानुपपन्नम् । आकाशादितादात्म्यं पूर्ववाद्युक्तम् । नैतदाशङ्कार्हमित्याह सुदर्शनः । यत आह नित्यस्य चेतनस्यानित्य जडात्मतानुपपन्नेति, नन्वनुपपन्येत्येवाह सिद्धान्ती । यत आह सा दृश्यापत्तिरेवोपपद्यत इति । न । पूर्ववादिना शङ्कितुमप्यनुपपन्नेति किलाह । तर्हि किंवातथोपपन्नमित्याह । आकाशशरीरकत्वम् । यथा पूर्वान्तिमयोस्सोममनुष्यादि शरीरकत्वमिति ॥ किमिदमखण्ड-

ताण्डवं यत आकाशादितादात्म्यं तच्छरीरकत्वमेव भामत्यानन्दिकेशादि दृष्टान्तेनस्फुटीकृतम् तस्मान्न किञ्चिदेतत् ॥

इति तत्साभाव्यापत्त्यधिकरणम् ।

" नातिचिरेणविशेषात् , अन्याधिष्ठितेषु पूर्ववदभिलापात् । "

अन्याधिष्ठित इत्येकवचनान्ततया पाठः परेषामसङ्गतः । व्रीहियवास्तिलमाषा जायन्त इति श्रुत्यनुसारेण बहुवचनान्तस्यैव न्याय्यत्वात् ।

" अथाशुद्धमितिचेन्न शब्दादिति " सूत्रम् ।

अत्र नेत्यशुद्धिर्व्यावर्त्यते शब्दादिष्टादेः । यतश्शब्दोविधत्तेऽग्नीषोमीयं पशुमालभेतेति ततोनाशुद्धमिष्टादिशब्दैक मूलकत्वाच्छुद्ध्यशुद्ध्योः । अतो विहितादन्यत्रैवाशुद्धिर्निषेधेन विज्ञेयेति स्वरसतस्सूत्राक्षर लब्धमर्थमनुभाष्योत्सर्गापवादन्यायोऽत्र सञ्चारितो भाष्यकृता ॥ नचात्रपदाहवनीयादिवदुत्सर्गापवादभावस्सम्भवति । क्रतूपकारिकायावैधहिंसायाः प्रत्यवायफलिकाया निषिध्यमानायाश्चभिन्न विषयत्वादित्यस्त्यत्र श्रीभाष्यम् । सूत्रार्थस्तु हिरण्यशरीर ऊर्ध्वस्स्वर्गं लोकमेतीतिहिंसात्वाभाव शब्दात् । अतिशयिताभ्युदयसाधन भूतोव्यापारोऽल्पदुःखदोपि न हिंसा। प्रत्युतरक्षणमेव । तथाच मन्त्रवर्णः । नवाउएतन्म्रियसे नरिष्यसि देवान् इदेषिपथिभिस्सुगेभिः । यत्र सुकृतोनापि दुष्कृतस्तत्र देवस्सविता दधात्विति । चिकित्सकश्चतादात्विकाल्पदुःखकारिणमपि रक्षकमेव वदन्ति पूजयन्ति च तज्ज्ञा इति । अत्र विषमोदृष्टान्तः । रुजार्दितेन प्रार्थ्यमानश्चिकित्सकः । नैवमहं पशुभावमापन्नस्स्वर्गसुखावि-

षयस्ततोमामालभ्य स्वर्गन्नयेति प्रार्थयते यजमानं पशुरिति ॥

अत्र यथा क्षीरं पित्तोपहतरक्षकं प्रमेहोपहतस्य बाधकमित्यत्र न विरोध एवमत्रापीति सुदर्शनः । इदमपि विषमम् । पित्तप्रमेहोपहतिभेदेन निमित्तभेदात् , नचात्रापि भाषितो निमित्तभेद इति वाच्यम् । अशाब्दत्वात् , शब्दतस्तु भूतत्वपशुत्वाभ्यां प्रतीयते सामान्यविशेषभावः । तदुक्तं परिमळे, हिंस्यादित्यनेन विहिताहिंसाया अपि क्रोडीकारादिति । "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य" इति तीर्थपर्युदास श्रुतिमाश्रित्यसूत्रभाष्यकाराभ्यामेवं प्रवृत्तम् । अतोत्रास्ति त्रयाणामैकमत्यम् । तत्र भवादृशानां वैमत्यमकिञ्चित्करणमेव॥ अर्थाद्विभिन्नविषयकत्वसम्भवेऽपि सम्भवत्येवात्रोत्सर्गापवादभाव इति स्पष्टमेवोपपादितं परिमळकारैः । अत्रैते तदुक्तास्संग्रहश्लोकाः ।

हिंसैव वैधमपि संज्ञपनन्नहिंस्यादित्यत्र रागकृततापुरुषार्थता वा । आदौन हिंसनविशेषणमस्त्यथापि नौत्सर्गिकस्पृशति वैधमयन्निषेधः ॥ इत्ययंश्लोक श्श्रुतिसूत्रभाष्याकाराशय प्रकाशकः ॥ सार्वत्रिकोन खलुवृत्तिनिमित्ततौल्ये शब्दार्थता पलपनं परिहारहेतुः । उच्छिष्ट भक्षणसुराग्रहणानुरागप्राप्ताखिलस्त्यपरिहारमुखेष्वभावात् ॥ अयन्तु श्रीरामानुज श्रृंगभञ्जकः । अस्यायमर्थः । अत्र सांख्यमत निराकरणाक्षमेण रामानुजेन शब्दार्थतापलपनं कृतं पशोरतिशयित फलप्रदातृत्वेन तदालम्भनस्याहिंसात्वोपपादनेन । तच्चात्र पूर्वमुपपादितम् । सति सर्वत्र वैधावैध हिंसयोर्हिंसात्वरूप प्रवृत्तिनिमित्ततौल्ये तस्य यच्छब्दार्थतापलनन्न खलु ससार्वत्रिकः परिहारहेतुस्स्यात् कुतः । वक्ष्यमाणेष्वभावेन भागासिद्धिप्रसंगात् , तथाहि क्रत्वंगसोमपानस्यानुच्छिष्टत्वन्नैवं वक्तुं शक्यम् । तत्र सोमस्यवा तत्पानस्यवा पशोरिवानुग्रहासम्भवात् । सत्यपि वैलक्षण्ये वैधावैधोच्छिष्टयोरभ्युपगम्यते श्रुत्यैवसामान्य विशेषभावस्सोमनो-

च्छिष्टा भवन्तीति निषेधयन्त्या । सच सर्वैरप्युपेयते । नच सा श्रुति रतिशङ्क्यते । अनया परं कस्मैकिमपराद्धमन्यत्र तीर्थेभ्यइति पर्युदस्यन्त्या । येन नाद्रियते । एतेनोच्छिष्टभक्षणे तत्वाभावावेदकश्रुति सद्भावादुपेयते सामान्यविशेषभावः । नचास्ति तथात्र प्रमाणमिति वदन् सुदर्शनोविस्पष्टं व्याख्यातो भवति ।

एवमेवसौत्रामण्याद्युक्तसुराग्रहणवामदेव्य सामोपासनोक्तानुरागप्राप्ताखिलस्त्रयपरिहारयोर्मुखशब्दोपात्त ब्राह्मणापगोरणेच विज्ञेयम् । सर्वश्चेदं भाष्ये पशुहिंसादित्यादिपदेन सङ्कलितम् । अथ श्रीरामानुजेनाजय्यं सांख्यं शिक्षयति । रागप्रयुक्तपुरुषार्थविशेषणेऽपि हिंसानिषेधनमसर्वगमेव वाच्यम् । नोचेददोषलवमाहव हिंससनादिव्यावर्त्तनं प्रतिलभेत कथं निषेधात् ॥ इति सांख्यस्तु वैधहिम्सापि रागप्रयुक्तैव । श्रुत्युक्तं फलमुपश्रुत्य तत्रापिरागतएव प्रवृत्तेः । नित्येष्वपि सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखमित्यापस्तम्ब वचनश्रवणेन रागप्राप्तेः । एवंच वैधमपि पापकेन करम्बितमेवेति जायन्त एवानुशयिनो व्रीह्यादिभावेनेति वदन्ति तत्राह आहवहिंसनादीति । अत्यन्तक्रूरतरहिम्साबहुळत्वेऽपि दोषलवरहितएव धर्माहवः । नचतत्रापि विप्रतिपत्तिः । प्रायश्चित्ताविधानादित्यर्थः ॥ एतेनाशुद्धमेवेति चेन्न शब्दाच्छुद्धमपीति सूत्रार्थ इत्यनाघ्रात पूर्वोत्तरतन्त्रगन्धस्य कस्यचिदुक्तिर्गळहस्तिता भवति । तस्मात् भाष्योक्तोत्सर्गापवादन्याय एवात्रन्याय्यः ॥

इति नातिचिराधिकरणम् ।

तृतीयाध्यायस्य प्रथमः पादस्समाप्तः ।

अथ तृतीयाध्यायस्य द्वितीयः पादः ॥

सामान्यतएवारब्धापि देहान्तर प्रतिपत्तिरिष्टाधिकारिष्ववतारयिष्यत इति तत्रान्यन्नवतरं कल्याणतरं रूपं कुरुत इति श्रुतिरुदाहृता भाष्यकृता। तच्च त्रिनश्वरमिष्टादीत्युपदिष्टं यथेतमनेवञ्चेति। अवरूढाश्चानुशयवशादेव योनिमापद्येरन्नतु रमणीयामेवेति नियम इत्यप्यवधारितम्। येत्वसन्तोऽनिष्टादिकारिणस्तेषां पुनः पुनर्यमयातनैव। स्थावरान्ताच भवत्यधोगतिरित्येतदपि व्यवस्थापितम्। यथाचैते संयमनएव विसृष्टास्तथेष्टादिकारिणोऽपि योनेश्शरीरमितीमं लोकमवतार्यैव विसृष्टाः। अतः परमपि किमस्तिवक्तव्यं वैराग्यहेतोरिति वैराग्यपादस्ततोन्यगात्॥ अथेदानीं स्वयं ज्योतिष्ट्वपादः प्रवर्त्तते। तदेतत् 'प्रकाशवच्चावैय्यर्थ्यात्, आहचतन्मात्रं, सूर्यकादिवत्, प्रकाशादिवच्चावैशेष्यं प्रकाशश्चकर्माणि, प्रकाशाश्रयवद्वातेजस्त्वात्, पूर्ववद्वा, प्रकाशादिवदि" ति स्वयं ज्योतिषामेवोदाहरणादुप सूचितम्। तच्चस्वयं ज्योतिष्ट्वमस्य जीवस्य स्वात्मभूतचिन्मात्र ब्रह्मात्मनैव। सोऽपि ब्रह्मात्मभावस्स्वतस्सिद्धोप्यागन्तुकावस्थापञ्चक कालुष्येणास्य तिरोभूतोनाविर्भूतः। तस्मात्तदिदमस्यावस्थापञ्चकं प्रथमं परिशोधनीयमित्यारभते सूत्रकारः।

"सन्ध्येसृष्टिराहही" ति तावत्स्वप्नम्।

यद्यपि जागरितएवायमवतारितो जीवो 'योनेश्शरीरमिति' तदेवचास्य प्रथमम्। अथापि न साद्रागिति शोधयितुं शक्यतेवस्था। ओत्तमाल्लासादेक रूपत्वात्। भावान्तररूपयैव स्वाप्निक्यावस्थया सावधिकत्वात्। स्वाप्निकीतु भवति सुशोधा। कात्स्न्र्येना नभिव्यक्तस्वरूपत्वात्, अभावावसानत्वाच्च। नहि स्वधर्मत्वे सत्यपि स्वस्मिन्नभावावसानो भवति कश्चिद्धर्मः। सन्ध्यमितिवेदे प्रयोगद-

र्शनाच्च, नहि पूर्वोत्तरसमया सक्तं सन्ध्यं स्वधर्मो भवति। पूर्वोत्तरावस्थयोरपि ह्यस्वधर्मत्वमापादयति, अन्यथा सन्ध्यत्वस्यैवासम्भवादिति सन्ध्य इति तावत् स्वप्नन्तदभाव इति सुषुप्तमतः प्रबोध इति जागरितम्मुग्धेऽर्धसंपत्तिरिति मूर्छा तदनुबन्धितया मरणश्चेत्यवस्थापञ्चकं पूर्वपादोपपादितेन जन्मना लब्धसत्ताकस्यास्याध्यक्षं परिशोद्धयपरिशेषयितुं हीमं प्रावृत्त, यतोऽन्यार्थेनापि परिशेषादित्यनेन परिसमापयिष्यतीदं प्रकरणं। परिशोधिते चास्मिन् यदात्मनैवायं परिशिष्यते तदपि प्रपञ्च प्रविलापनेन परिशेषी कर्त्तव्यं ब्रह्मैतदर्थमेव सरूपं, स्वतस्त्वरूपवदेव, अतोनोभयलिङ्गमितीति प्रवर्त्तिष्यते परप्रकरणमिति स्पष्टमेव प्रतीमः।

तथा च परिशेषितोजीवः परश्च परिशेषीकरिष्यत इति सुष्ठु सङ्गस्येते परापर प्रकरणे। तत्रैवंसति जीवस्यपरस्यवा निरूपणं पादस्य कृत्यमिति कुतः परस्य विकल्पस्यात्रकाशः।

अस्तु सन्ध्येसृष्टिः किम्। जीवेनैव क्रियते। कुतः। यतस्सृजते साहिकर्त्तेतिचाह श्रुतिः। अथैवंसति कथं श्रुत्यन्तरे पुरुषो निर्मिमाण इति परकर्तृकत्व श्रवणम्। उच्यते। च किञ्चैनञ्जीवं स्वप्ने निर्मातारमेकेऽधीयते। पुत्रादयश्च कामानेच्छामात्र मित्याह॥ कएवमाहसति सृजते सहिकर्त्तेति सामान्यत एव श्रवणे। अथ जागर इव न तत्रास्य सन्तिरथादयोऽथसृजते सहिकर्त्तेति प्रसक्तया प्रसिद्धवन्निर्देशेन चैवमाहेति चेत्, न, कुतोस्य रथयोगादि सृष्टिकर्तृत्व प्रसिद्धिः। कुतो वा वेशन्तादौतस्य तस्य सुप्तस्य सृष्टिशक्तिरिति चेति। अथास्य सत्यसङ्कल्पत्व श्रवणावष्टम्भेन कुतोऽत्रैवं पूर्वपक्षो नस्यात्। नस्यात्। यतोऽत्र सहिकर्त्तेत्येवाह। नतु सहिशक्त इत्याहेति। बाधकपरिहारार्थतयाऽवतार्योत्तरं सूत्रञ्च किञ्चेति साधकान्तरोपपादकतया विवृण्वन्याख्यातृवर्गं हि हासयते। इच्छामात्रत्व

एव कामानाज्जीवेज्जीवपक्ष इति स्थिते पुत्रादयश्च कामानेच्छामात्रमिति व्याख्यायापि जीवति निर्लज्जमिति चित्रम् ।

अथापि पुत्रादयश्चेति भागः परेषामनुपयुक्त इति कुलटयेव कुलांगनायामस्मासु दोषमाविष्करोतीति विचित्रमेतत् । अथ मायामात्रन्त्वितितु शब्देन पक्षं व्यावर्त्तयति । मायामात्रं परमपुरुषसृष्टमित्यर्थः । आश्चर्यवाचीहि मायाशब्दः । यतो जनकस्य कुलेजातादेवमायेव निर्मितेत्यादौ तथा दृश्यते । अत्रापि न तत्र रथा अथापि सृजतइति तथैव कथ्यत इति कथ्यते श्रीभाष्यकृता । ननु सृष्टिरिति मायामात्रमिति च सृष्टिमेव स्पष्टं प्रत्याचष्ट इति प्रतीयते । नतु स्रष्टारमयमेवेति व्यवस्थापयतीति । सन्ध्यइति च निरभिसन्धिकमेव भवति । स्वप्नेजीव आह हि । परस्तु कार्त्स्न्येनेतिच कर्त्तव्यश्च भवति । नहि बकबन्धनमिव मायामात्रमिति वक्तव्यं भवति, सत्सुचमहामायेषु शम्बरमारीच प्रभृतिषूक्तमपि न सदृशमुत्तरं भवति । मात्रमित्येतदणुमात्रमपि सार्थकं भवति । वाल्मीकिरपि देवेति विशिंषन्नानु कुलोऽस्य भवतीति चेत्, अत्यानकिञ्चिदप्यस्यानुकुलं भवति । मायामात्रमित्यनेन न निस्तत्त्वमुक्तमिति मन्तव्यम् । किन्त्व बाधितत्वरूपं सत्वन्नेत्येवोक्तम् । कुतः हि यतस्सूचकश्च श्रूयते स्वप्नः, तथाच सदसद्विलक्षण इत्येव मर्थमाह ।

"सूचकश्चहिश्रुतेराचक्षतेचतद्विदइति"

एवं स्वोचितदेशकाल विशिष्टतया कार्त्स्न्येनानभिव्यक्तिमुक्तवता कथञ्चिदभिव्यक्तिरुपेता भवति । ननु जागरइवा विशेषेणास्माकं प्रतीयमाने स्वप्ने कथमेव मनभिव्यक्तिरुच्यत इति चेन्न, तथाऽभिव्यङ्क्तुमयोग्य स्वरूपत्वादित्यभिप्रायात् । ननु सर्वमप्ययोग्य मेव । बाढम् । कथं तर्हि कथंचिदभिव्यक्तिः । अथ भवान् स्वप्ने रथादिकन्नविस्पष्टं पश्यति । पश्याम्येव । तत्र कथमेवं पृच्छ-

सि। सर्वमपि पश्याम्येवेति पृच्छामि। अपि तदासर्वमासीत्। किमपि नासीत्। कथन्तर्हि सर्वमपश्यः। सर्वाभावेऽपि सर्वमपश्यमेव। एवन्तर्हि तत्र प्रतीतिमात्रमेव सर्वमप्यासीत्। वस्तुतस्तदा किमपि नासीदिति भवति। तथाच स्वात्यन्ताभावाधिकरण एव प्रतीयमानत्वं प्रतिभासमात्र शरीरत्वंचेत्युभयविधं वैतथ्यमुक्तं भवति। अत एव न तत्र रथा इति श्रुतिः। निस्तत्त्वत्वेकस्य कुतः परिशेष इत्यस्य प्रवृत्तिः। व्यावहारिकेतु तदनन्यत्वमसम्भवस्तु सतआभास एव चेति सूत्रैरुपसूचितम्। वक्ष्यति च वैतथ्यं सूर्यकादि वदिति। इदंच सूत्रं परैरधिकरणान्तिमसूत्रतया विपर्यासितम्। अस्य च प्रयोजनं पराभिध्यानसूत्रस्य मायामात्र सूत्रानन्तर्य सम्पादनम्। तदप्यनभिव्यक्त सत्यसङ्कल्पत्वादिति स्वोक्तार्थस्य साङ्गत्य सम्पिपादयिषया। विवृतंचेत्थं, च, किंच हियतः स्वप्नश्शुभाशुभस्य सूचकः। यदि जीव एव सृजति तदा शुभसूचकमेव सृजेदिति। अत्रोच्यते स्वप्नेऽपि तथ्यामेव सृष्टिमुपेयतां किमेतावता। अशुभस्यापि च सृष्टेरिति स्पष्टं कुतोनाचष्टाम्।

पराभिद्ध्यानात्तुतिरोहितन्ततोह्यस्यबन्धविपर्ययौ ॥

कथमनादेर्जीवीयस्य सत्यसङ्कल्पत्वादेरनभिव्यक्तिरिति चेत् परस्याभिद्ध्यानाद्धितिरोहितम्। यतस्ततोऽस्य बन्धविपर्ययौ। ननु तिरोधानमनाद्येवोपेत्यन्तत्र किम्मध्येपराभिध्यानेन। अस्तु तर्हि विद्यमानमेव न नश्येदिति परोऽभिध्यायतीति। सर्वथापि तिरोधाप्यजीव शक्तिं सृजतिमायांपर इत्येतन्नोभीष्टं सिद्ध्यति। अथ कदेदन्नश्यति। यदा पुनरिदन्नश्येदित्यभिद्ध्यायति परस्तदा। नन्वनादिनातिरोधानेन विहिताकरण प्रतिषिद्धसेवाभ्यामपराध्यति जीवः। तेन संसरति, अनिष्टंच फलमाप्नोति। यदा पुनः परमभिद्ध्यायति तदातु भवत्यभिव्यक्त सत्यसङ्कल्कत्वादिरित्येवास्तु।

किमनयापराभिध्यानात्तिरो भावः, ततो दुष्कर्मापराधः। तेन च परस्य तिरोधानाभिद्ध्यानामिति चक्रकदोष दुष्टकल्पनयेति चेत्। एवमेव वर्त्तते श्रीभाष्यम्।

अथ सिद्धान्ते, तिरोहितन्त्वित्येतावदेव वक्तव्यम्। परांशत्वेऽपि तिरोहितशक्तिरनाद्य विद्यया जीव इति सोऽपि न कर्त्ताभवितुमर्हतीत्येतावत एवापेक्षितत्वात्, अतोऽधिकन्त्वधिकमेव। श्रीभाष्यकारस्यतु यतोविपर्ययस्तदधीन स्ततोबन्धोऽपि तदधीन इति तदर्थन्तिरोधानाभिधानमिति सुष्ठुसूत्रं सङ्गच्छत इति चेत्। न मायामात्रमिति सिद्धान्त प्रतिद्वंद्वितया सृष्टिरित्यत्र तथ्येत्येव साद्ध्यमद्ध्याहरेत् सर्वोऽपि न चेत् क्वचिदपि पक्षपाती। तथाच वियदादि सृष्टिरिश्वर कर्तृकेत्यभिसन्धाय प्रथमं प्रत्यवस्थानं पांचरात्रस्य, तेन तथाभ्युपगमात्, अशक्तत्वाच्च जीवस्य तस्यतस्य सुप्तस्य। तत्रच काठकश्रुतिरुपष्टम्भकतयाऽवष्टम्भिता। तत्र कोहेतुः। अत्र न तत्ररथा इति प्रथमतश्श्रवणेन भ्रान्त्यापश्यतीति कदाचिदुच्येतेति भीः। तथाच न तत्रास्य सन्ति जागरइव पूर्वमेव सृष्टारथादयः। अथ सृजतेपरः, यतस्ससर्वस्य कर्त्तेत्युत्तम्भिता भवति सृष्टिः। तत्रापि शैथिल्याशङ्कापनोदनाय पुत्रादयश्श्रुति भागः।

ततो न तत्ररथा इत्यस्य व्याख्यानम्मायामात्रन्त्विति। तत्र प्राप्तमसत्वमपाकर्त्तुं सृजत इत्यस्य पश्यतीत्यर्थ मुपसूचयन् सूचकश्चेत्युवाचस्त्रियम् स्वप्नेषु पश्यतीत्यादिश्रुति मुदाहृत्य। इदानीन्तु मास्तु परस्येयं सृष्टिः। भवतु जीवस्य साङ्कल्पिकी, सत्यसङ्कल्पत्वात् परांशस्यास्य, सर्वथापि न मायामात्रमित्येतन्नः प्रापयितव्यमिति प्रकारान्तरेण प्रत्यवस्थानं विघटयति 'पराभिद्ध्यानात्विति' अयमाशयः। नहि सत्तामात्रेण किञ्चित् कार्यायकल्पते। यथा विद्यमानमपि पुंस्त्वम्बाल्ये, अतो विद्यमानमपीदन्तिरोहितम्मणिरिवोत्तेजनं संस्कार इवोद्बोधं बलमिव मारुतः प्रोत्साहनमपेक्षते परा-

भिद्ध्यानं स्वयमभिव्यङ्क्तुम् । कुतः । यतस्ततोऽस्य बन्धविपर्ययौ । तथाच कथमिदानीमनभिव्यक्तन्तत् सत्यसङ्कल्पत्वादिकं कार्याय कल्पेतेति । तत्र कुतोऽस्य पराधीन विपर्ययतेत्याशङ्का निराकरणाय बन्धस्यापि समस्य वचनं यतस्तदज्ञान निबन्धनोऽस्य बन्धस्ततस्तेऽतिप्रतिपादनाय । परस्य परकर्तृकाभिध्यानाधीनतिरोधान व्यतिरेकेणाकिं पराधीनबन्धनाभिधानेन च । अथ सृष्ट्यादिषु पंचसु तिरोधानमपीश्वरीयमेव कृत्यमितीति हासादिषु प्रसिद्धमित्यवकल्पतएव परकीयमपि त्रिवरणमिति चेत् । न । स्वस्वरूपाप्रकाशन मूलकत्वस्यैव सर्वत्रापि वक्तव्यत्वात् । अतएव तस्यैष आत्माविवृणुते तनूं स्वामित्याह तद्व्यतिरेकेण परानुग्रहं परमाश्रुतिरिति । यत्तु स्वप्नस्य जीवकर्तृकत्वमुपेयतान्तन्निरसनं विरुद्धमेव ह्यापतीति , तदनाघ्रताद्वैतिमत तत्वनिबन्धनम् । नहि वयं कुत्रापि परमेश्वर व्यापारं वारयामः । इष्यतएव स सर्वत्र । तथाहि त्रिवृत्करणादौ साक्षात्तद्व्यापार एव , भौतिकत्रैलोक्यादि सर्गे हिरण्यगर्भद्वारा , घटादिव्यावहारिके कुलालादिद्वारा । शुक्ति रजतस्वाप्नरथादौ भ्रान्तजीव सामान्यद्वारा । एवञ्च भ्रान्तस्य जीवस्य साङ्कल्पकीयस्मोहमयी सृष्टिर्नतु ब्रह्मलोकं गत्वाविर्भूत सत्यसङ्कल्पत्वादि प्रयुक्तैवेति निर्द्धारणे कोविरोधो वियदादिवन्न पारमेश्वरीति निर्द्धारणेवा । यदप्युक्तमदृष्टद्वारा जीवस्य स्वप्नं प्रति कर्तृत्वं वियदादि सृष्टिसाधारणमिति तदपि भाष्यार्था नवबोधमूलकमेव । तथाह्यत्र भाष्यम् " निमित्तत्वन्त्वस्य रथादिप्रतिभान निमित्तमोदत्रासादि दर्शनात्तन्निमित्त भूतयोस्सुकृतदुष्कृतयोः कर्तृत्वेनेति वक्तव्यमिति । नहि वियदादयो घटादयो वा तमेवैकं प्रतिभान्ति ! तत्र वियदादिसृष्टौजीव सामान्यकर्माणि हि कारणानि । घटादिसृष्टौ तु कर्त्तुः कुलालादेः भोक्तृणांच केषांचित् कर्माणि । तथाहि काचित् कुलटापत्युः पितुश्च पापेन जाराणां सुकृतेन च जातेति वक्तव्यम् भवति तान् हावभा-

वादिना रमयन्ती । नैवं भवति स्वप्नांगनेत्येतत् सर्वं हि स्वहस्तयति प्रतिभानपदघटितं भाष्यम् । एवंनचास्माभिस्स्वप्नेऽपि प्राज्ञ व्यवहारः प्रतिषिद्धयते,तस्यसर्वेश्वरत्वात् सर्वास्ववस्था स्वधिष्ठानत्वोपपत्तेः। पारमार्थिकस्तु नायं सन्ध्याश्रयस्सर्गो वियदादिसर्गवदित्येतावत् प्रतिपाद्यत इति च भाष्यमेवमर्थानुगुणमेवेति ॥

" देहयोगाद्वासोपि । "

नन्वत्रापेः कोर्थोवाकारस्यवेति चेत्, असम्भानना सम्भावने इत्यवेहि । तथाहि । नह्ययन्तिरोभाव हेतोर्देहयोगस्य हेत्वन्तरेण विकल्पावद्योतकोभवितुमर्हति वाकारः । पूर्वसूत्रे तत्र हेत्वन्तरानुपन्यासात् , उपन्यस्तमिति वदतस्सोऽपीत्यस्य व्यर्थत्वात् किञ्च तिरोहितमित्युक्तवता तदपीति विहायसोऽपीति प्रतिनिर्देशे कोहेतुः । कोहेतुः । अयम् । यदुततिरोहितमिति न कर्मणिक्तः । किन्तु कर्त्तरीति विवरणम् । तदपीत्युक्तौ तु तिरोधानमिति स्यात् । तत्र परकर्तृकाभिद्धयान प्रयुक्तन्तिरोधानमिति मतिभ्रमस्स्यात्तन्माभूदिति सोऽपीति गृहीतमपि यदि भ्रान्तोऽसि तदा केन किं वा कर्त्तुं शक्यमिति ।

तस्मान्नतु कथन्नामपरांशस्यैव सतोतिरोभाव सम्भव इत्यसम्भावनामभिव्यनक्त्यपि कारः । सोऽपि ' परांशत्वेनासंभाव्यमानोऽपि तिरोभावो वा भवति संभाव्यमानोऽपि भवति , संभावनापक्षोपि भवतीत्यर्थः । नचैवं सति संभवासंभव पक्षयोर्विकल्पस्यावकाशः , असंभवात् , तथाच पूर्वपक्षप्रतिक्षेपेण सिद्धान्तएव पर्यवस्यति , एवमेव वाकारेण प्रतिक्षेपस्थले सर्वत्रापीति विज्ञेयम् । अत एवात्र "भाष्यं सत्यमेतत्, सोऽपितु, वाशब्दोजीवेश्वरयोरन्यत्व शङ्काव्यावृत्यर्थ इति च । अयमाशयः । परांशस्यैव सत इत्याशङ्कमानस्य तव कोऽभिप्रायः । तथासति तिरोभावा संभावाज्जीवेश्वर-

यो रन्यत्वमुपेयमिति, उतपारमार्थिको वा स्वप्न उपेय इति । न वयं प्राणात्ययेपि तयोरन्यत्वमुपैमोनापि स्वप्नेपि स्वप्नेपरमार्थिकीं सृष्टिं । कुतः । यतस्तथा सतोऽपि कथंचित् संभवत्यस्य देहयोगात् सत्यसङ्कल्पत्वादितिरोभाव इति । पराभिद्ध्यानेन देहयोगस्य समुच्चयं वदतां वेति स्थानेचेति भवितव्यम् । सोऽपीति चाधिकमेवेति ।

सन्ध्याधिकरणम् ।

" तदभावो नाडीषुतच्छ्रुतेरात्मनिच । "

वाक्यभेद वाक्यैक्ये पूर्वापरपक्षोपष्टंभके श्रुति सूत्रयोः । नाडीद्वारात्मनि सुप्तिरित्यत्र न विवादः । अतएव सूत्रकृतायतः प्रबोधश्शिष्यते तत्रैवात्मनि सुप्तिरितरेषान्तुद्वारत्वं परमिति बोधयितुमतः प्रबोध इत्यत्रेदमाऽत्ममात्रञ्च ग्राहयितुमस्यैव सूत्रस्य पूर्वपक्षत्वमपि संपादयितुन्नाडीष्वात्मनि चेति प्रथग्ग्रथितम् । चकारस्तु पूर्वपक्षे वाक्यार्थयो स्सिद्धान्तेपदार्थयोश्च समुच्चायकः । नाडीभिरात्मनीति वक्तव्येनाडीष्विति श्रुत्युक्तासप्तमी संग्रथिता तत् बलादपि पूर्वपक्षमुन्मेषयितुम् । तमिमं सूत्रकाराशयं स्पष्टमेव व्याचष्टे सर्वत्र सप्तमी बलादेकार्थत्वेन च पूर्वपक्षयन् भाष्यकारः । व्रीहियववद्विकल्प इति पूर्वः पक्षः । यथात्र सूत्रकृन्नाडीषु तदभावस्तच्छ्रुतेरात्मनि च तदभावस्तच्छ्रुतेरिति योजनयातुल्यवत् सप्तमी बलमवलम्ब्य विकल्पन्नाडीष्वात्मनि च तदभाव इति योजनान्तरेण समुच्चयञ्चाभ्युच्चयामास चकारेण पूर्वापरपक्षौ मध्ये हेतुं ग्रथयन्नेवमेव भाष्यकारोऽपि भिन्नानि सुप्तिस्थानान्येकार्थत्वादेकार्थत्वञ्च तत्रतत्र सप्तमी निर्देशस्य तुल्यत्वादिति पूर्वपक्षोपपादने, किमेतानि परस्परनिरपेक्षाणि भिन्नानि सुषुप्तिस्थानानीति च विशयोपपादनेऽनुभाष्य नाडीषुपुरीतति ब्रह्मणिच शेते एकवाक्योपादानादिति सूत्रविन्यास-

वैचित्र्यसूचितमेव हेतूचकारेत्यति विचित्रमिदं सूत्राक्षरानुगुण्यं भाष्याक्षराणाम् । अत्र निरपेक्षाणामेकार्थत्वं विकल्पहेतुः, नह्येकार्था अपि प्रयाजादयोविकल्प्यन्ते , नवानिरपेक्षे पानभोजने इति ॥ अथ वैकार्थत्वं समानार्थत्वं , नहि व्रीहिभिस्साद्ध्यमेव यवैस्साद्ध्यते, व्रीहियवादीनामिति भाष्यं , प्रयाजादिभिस्तु संहत्यपश्चादेकमेवा पूर्वमुत्पाद्यत इति तावन्मात्रमेवस्यात् साधकं , सर्वमिदं प्रकृते वाक्यभेदलभ्यमिति सूचितं वाक्यभेदसाधारणमेव सूत्रयतेति स्थिते निरपेक्षत्वेन पूर्वपक्षयित्वा त्रयाणाञ्च स्थानत्व प्रतीतेस्समुच्चय साधकं भाष्यान्तरं केन सङ्गतं सत्यामेव तादृशप्रतीतौ विकल्प इति प्रत्यवस्थाने । यत्तु एकस्याणोरनेकत्रस्थित्य योगाच्चेति पूर्वपक्षहेतौ समुच्चयकरणन्तदपि निरपेक्षमेवेदं भवति विकल्पसाधकमित्यनुपपन्नमेव ।—अथ यथा प्रासादे खट्वा , खट्वायां पर्यङ्कइति भवति एवन्नाडीषु पुरीतत्तत्रच ब्रह्मेत्यपिसम्भवेन नानेकत्रस्थित्ययोगः प्रकृतविकल्पसाधको भवतीति निरपेक्षत्वमप्यपेक्षितामिति चेदेवन्तर्हि व्रीहियववत् समानार्थकत्वमेव हेतूक्रियतां , लाघवात् , किं गुरुतराश्रयणेन, किं वा व्रीहियवादीनामिति भाष्यार्थमनालोच्याभिन्नार्थत्वादित्युक्तमेकार्थत्वादित्यनेनेति भ्रमेणास्मत् भाष्यदूषणेनेत्यलमधिकेन ।

॥ इति तदभावाधिकरणम् ॥

" स एवतु कर्मानुस्मृतिशब्दविधिभ्यः । "

अत्र कर्मशब्देन पुण्यपापात्मकंकर्मोपन्यस्तामिति कथमुपवर्ण्यतां श्रीभाष्यकारेण । प्रथमन्तु लौकिकन्यायद्वयं पश्चाद्वैदिकं हेतुद्वयञ्चोपन्यस्तामित्युपवर्णने हि सुष्टु संगच्छत इति चेदेवमेव ।

" मुग्धेऽर्द्धसंपत्तिः परिशेषात् "

न ह्यत्र विषमं भाष्यान्तरम् । परिशेषात् सूत्रजातात् ब्रह्मपरिशेषी क्रियते ।

“ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्रहि । ”

जीवस्येव परस्य पृथिव्याधिस्थानतोऽपि न दोषः । यतस्सर्वत्र वेदान्तेषूभयलिंगं कल्याणगुणगणलिंगन्निर्दोषत्वलिंगश्च श्रूयते ब्रह्मेत्यर्थे दोष इति ब्रह्मेति चाद्ध्याहारात् भवति दोषः । अपिरप्यनर्थकोभवति । तथाह्यपि नास्थानस्थानापन्नं किञ्चिद्दृष्टान्ततया समुच्चीयत इति निश्चीयते । तत्र स्वरूपत इवेति वक्तव्यम् । नचैवं वक्तुं पार्यते भवता । स्वरूपतोऽदुष्यन्नपि दुष्यति स्थानतः पर इति प्रत्यवस्थानेह्येवं वक्तुं पार्यते । नहि जीववत् परोऽपि स्थानतो दुष्यतीति प्रत्यवस्थाने । तत्रतु परस्तु न स्थानतस्सर्वत्र हीत्येवन्यासो घटते । उच्यतान्नाम कथञ्चित् स्वरूपतोऽदुष्यन्नपि यथास्थानतो दुष्यति जीवोनैवन्ततोऽपि दुष्यति पर इत्यधिकं सिद्धान्तिनाऽथाप्युभयलिंगमित्यधिकमेव ।

एवं , भेदात् , स्वत उभयलिंगस्यापि देवादिशरीरयोगरूपावस्थाभेदादवर्जनीयो जीववत् परस्याप्यपुरुषार्थयोग इति चेन्न प्रत्येकं प्रति पर्यायमन्तर्याम्यमृत इति दोषासंस्पर्शवचनादित्यनन्तरसूत्रार्थोपि न साधीयान् , भेदादित्यस्य गुरुतरार्थे लक्षणाश्रयणात् , मृतिमात्रनिषेधकस्यामृत इत्यस्य दोषसामान्यनिषेधकत्वायोगात् , स्थानसामान्यतोऽपि दोषासंस्पर्शसाधनानन्तरं स्थानभेदेन प्रत्यवस्थानस्य मृतोत्थानसदृशत्वाच्च ॥ उक्तार्थदार्ढ्यार्थत्वेऽप्युत्तरसूत्रानुत्थानप्रसङ्गात् । अथ ब्रह्मण एव जीवरूपेण प्रवेशश्रवणाज्जीवस्य यत् कर्मवश्यत्वन्तत् ब्रह्मण एवेति कुतो निर्दोषतेति प्राप्तस्य तत् ब्रह्मारूपतुल्यमेवहि , नामरूपनिर्वाहत्वेन प्रधानत्वादिति सामाधेरावश्यकत्वेन कुतस्तस्यानुत्थानमिति चेन्न ॥ एतावता किमुक्तं

भवति । अंशगतेन दोषेण कुतोंशी न दुष्येदिति । तस्यास्य सम्भोगप्राप्तिरिति चेन्नेत्यादिना बहुवारं समाहितत्वेन पुनरुन्मेषायोगात्, तत्रैवात्रापि भेदमादाय समाधेयत्वेन त्वदुक्तार्थस्य प्राप्ता शङ्काऽनिरासकत्वात् ॥ जीवब्रह्मणोरभेदवादिनोऽयं पूर्वपक्ष इति भाषमाणस्तु न सम्भाषणमर्हति । यस्तु जीवमेव सदा निरस्तनिखिलदोषमुपैति स कथन्तदभेदेन ब्रह्मणो दोषमाशङ्केतेति । तस्मान्न कथञ्चिदपि साधीयांस्त्वदुक्तोऽर्थ इति ।

एवं, प्रकाशवत्, ज्ञानस्वरूपस्येव कल्याणगुणानामवैयर्थ्यादुभयलिङ्गं ब्रह्मेति विवरणन्नकथमप्यत्र, प्रसजति । नह्यद्वैतिनः प्रत्यवस्थानं युज्यत इति पूर्वसूत्र एवोक्तत्वात्, नचेदानीमेव तस्य प्रत्यवस्थानमिति वाच्यम् । यतोऽवैयर्थ्यमिति प्रथमान्ततापेक्ष्यते । सार्थक्यमिति विपर्यासश्च ॥ आहच तन्मात्रं ज्ञानस्वरूपतामात्रम् । न च निषेधति, कल्याणगुणगणमपि ॥ अत एव च स्थानप्रयुक्तदोषभाक्त्वाभावादेवच "आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथात्मैकोह्यनेकस्थोजलाधारेष्विवांशुमानि"ति जलादिषु प्रतिबिंबरूपेण विद्यमानसूर्य इव घटादिष्वाकाशमिव च निर्दोषं ब्रह्मेति शास्त्रेषूपमाक्रियत इत्येतमर्थं परामृशन्तुपण्डितप्रकाण्डाः । प्रथमन्तु गुणसाधकम् । द्वितीयन्तु पुनरपि दोषाभावसाधकम् । तत्र त्वेकस्यैव सत औपाधिकानेकत्वोपपादकम्, वाक्यमुपष्टम्भकम् ॥ पुनरपि गुणगणं साधयति प्रकृतैतावत्वं हीति । प्रकृतां रूपेयत्तांहि प्रतिषेधति, यतस्ततो ब्रवीति च भूयोगुणजातमिति सूत्रार्थः ॥

ब्रह्मणः प्रमाणान्तरागोचरतया न मूर्त्तामूर्त्तेतत् सम्बन्धितयानूद्य निषेद्धुं शक्येते इत्युक्तम् । तामेव दृढयति प्रमाणान्तरागोचरतां तदव्यक्तमाह हीति । तत्रैव हेत्वन्तरमाहापिच संराधन एव ब्रह्मणस्साक्षात्कारो नान्यत्रेति ॥ ननु प्रथमन्दोषनिरसनन्ततो गुणगणसाधनम् । पुनरपि तथापुनरपि च तथेति किं गमनागमनावर्त्त-

नेन , एवमेव गतागतं करोति रामानुजः । अथ ब्रह्मणः प्रमाणान्तरागोचरत्वं केनोक्तम् । उक्तमिति दृढीकृतमिति च वदति , एवेत्यभावेऽपि संराधन एवेति च व्याकरोति तान्त्रिकः ॥

अत्रैतदवध्रियतां । परस्येति प्रकरणान्तरमित्युपक्षिप्यते । तत्त्वावस्थापञ्चकाज्जीवमिव मूर्त्तामूर्त्ताभ्यां परमपि परिशेषयितुं, प्रकरणश्चेदमधिकरणद्वयात्मकं । तत्र च प्रथमं परिशेषोपपादकप्रपञ्चप्रतिषेधार्थमेकादशसूत्रात्मकं । द्वितीयन्तु नवसूत्रनिर्मितं परिशेषार्थं । तथाच प्रतिषेधाच्चेति प्रकरणावसानसूत्रे भाष्यं "ब्रह्मव्यतिरिक्तप्रपञ्चनिराकरणात् ब्रह्ममात्रपरिशेषाच्चैष एव सिद्धान्त इति गम्यत इति ॥ अथ प्रविलापिते प्रपञ्चे परिशिष्यत एव ब्रह्मेति किमर्थन्तदर्थमप्यधिकरणान्तरमिति चेत् सत्यं । नहिप्राणभृत्परिशेषायप्रयत्नान्तरमादृतं । तत् कस्य हेतोः । सत्ववस्थापञ्चकपञ्चरसञ्चार्यध्यक्षमनुभूयमानः परिशिष्यत एव स्वयमवस्थापञ्चकप्रविलापनमात्रेणेति अतोऽन्यार्थेनैव परिशेषादित्यनेन तत् परिशेषस्समसूचीत्यवादिष्म । परन्तु ॥ परमिति तच्च सविशेषमुतनिर्विशेषमुतत्रोभयलिङ्गमिति विना वेदान्तेन निश्चेतुं शक्यं । यतो नाध्यक्षं । नापि न्यायनिष्णातैः कपिलकणादादिभिरपि निर्णीतं । नच वेदे नापि यतो वैदिकेनापि पूर्वतान्त्रिकेण न निरणायि किन्तु वेदान्तेनैव निर्णेयं ॥

तत्र चास्तितावत् ब्रह्मनित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिच ज्ञेयश्चोपास्यश्च सर्वस्य जगतः कारणं वेदान्तैकवेद्यन्तदेवच कारणन्नचात्र मानान्तरं विरुध्यते नापि चास्तिविगानं कारणे कार्येवेत्येतत् सर्वं गतम् । परन्तु विशेषतदभावयोः परमस्ति परिहार्यतयाऽवशिष्टं विगानम् । नचैवं प्राणपादानन्तरतास्य प्रसजति । प्रयत्नबाहुल्यात् , बहुलो हि प्रयत्नः प्रसजति तदानीं परिशोधनार्थेनैव प्रयत्नेन परिहर्त्तव्ये विगाने । अत्र परिशेषिते जीवे ततोजीवस्य परिशेषान्नस्थानतोऽपि परस्योभयलिंगम् । संपृक्ते हि जीवे परस्य

सविशेषता । नहि परिशेषिते । तदातु तदपि भवति परिशिष्टमेव तदर्थत्वात्तदीयस्य विशेषस्य तथाचात्र सुसंसक्तोऽयं विचारः । सर्वश्चेदमत्र "येन ब्रह्मणा सुषुप्त्यादिषु जीव उपाध्युपशमात् सम्पद्यते तस्येदानीं स्वरूपं श्रुतिवशेन निधार्यत" इति भाष्यात् प्रतीयते । तथाच प्रपञ्चप्रविलापनप्रकारेणैव विगानमपि परिहियते । अत एवाव्यतिरेकाच्छब्देभ्यो नित्यत्वाच्च ताभ्य इति वत् सर्वत्र हीति बहुशब्दोपादानम् । परिहृतेच विगाने प्रसञ्जितेच श्रुतिवशेनैव शून्यवादे परिशेषार्थमपि प्रयत्नस्य कुतोवैयर्थ्यमिति ॥

नचैवन्नस्स्थानतोऽपि परस्य विशेष इति न्यास एव न्याय्य इति वाच्यम् । श्रुत्येकसमधिगम्यस्य यथाश्रुत्युभयलिंगत्वस्यैवैकदेशिना ग्रहणात् । तदिदमुक्तन्तत्रोभयलिंगश्रुत्यनुग्रहादुभयलिंगमेव ब्रह्मेत्येवं प्राप्त इति भाष्येण । परस्य तु परस्तु न स्थानतोऽपि सर्वत्र हीतिन्यासोऽनिवार्य एव । नतूभयलिंगं सर्वत्र हीति । गुणगणोपादानवैयर्थ्यात् ॥ उक्तमर्थमाक्षिप्य प्रतिविधत्ते, "न भेदादिति चेन्ने"ति । अथ को विशेषः पूर्वोत्तरसूत्रयोर्विशेषोपपादने । ननु स्पष्टमेव प्रतीयते भेदः प्रथमं स्थानसम्बन्धाद्विशेषोपपादनं पश्चादाकारभेदादिति । न स्वरूपभेदात्, यतस्तथा सति "ननूक्तन्नोभयलिंगत्वं ब्रह्मणस्सम्भवतीति, अयमप्यविरोधः । उपाधिकृतत्वादाकारभेदस्येति भाष्यं विरुद्ध्येत । तथाच सर्वथाप्यौपाधिक एव स्वाभाविकोविशेष इत्युपपादने को विशेष इति वक्तव्यम्। उच्यते। पूर्वन्तु स्वतश्शुद्धोपि यथारागेण रक्तः पटस्फटिकोवा भवत्येवमिति प्रवृत्तम् । इदमेवोक्तं स्फटिकोऽलक्तकाद्युपाधियोगादिति' तत्रादिपदेन मण्याद्युपात्तन्न जपाकुसुमादीति विवेक्तव्यम् । तेन तत्रारुण्याद्यापादनेऽपि तदनासञ्जनात् । पश्चात्तूपाधियागाद्रूपमेव ब्रह्मणो भिद्यत इति । यथैक एव योग्यनेककार्यकरणसंघातयोगेनानेकधाभूत्वाबहुरूपो भवतीति । तत्राकारबहुत्वमुपाधिनिष्ठमेव, नोपहिते

योगिनि। पूर्वं पश्चाच्चाभावादेवमेव परोऽपीति प्रतिविधानञ्चप्रत्येकमतद्वचनादिति। तथाचात्र भामती "किमुपाधिगत एव रूपभेदो ब्रह्मण्युपचर्यते ध्यानार्थं उतोपाधियोगात् सत्यविरुद्धरूपवत्तया ब्रह्मणो भेदो भवतीति। आद्येऽस्मदिष्टसिद्धिः। द्वितीयमभेदश्रुत्या दूषयती" ति। परस्तु प्रथममकर्मवश्यस्यैव सतो ब्रह्मणस्ततदवस्थशरीरेषु स्थानतो दोषमाशङ्क्य निराकृत्य पश्चाज्जीवस्येव देवादिदेहयोगरूपावस्थाभेदादपुरुषार्थयोगमाशङ्क्य परिहरति निर्लज्जम्। नहि पूर्वापरयोः कश्चिदपि विशेषं पश्यामः। नचाकारभेद एव प्रकारान्तरेणोपपादित इति वाच्यम्। तथासति प्रत्येकमतद्वचनादमृत इति दोषसामान्याभाववचनादिति तदीयेन हेतुना भेदोपमर्दनायोगात्। अभेदवचनादित्युपगमे दोषनिरसनायोगात्।

अभेदमेव द्रढयति "अपिचैवमेक" इति। यदुपक्षिप्तमर्थात्तदिदमेवेति प्रतिजानानस्तत्र विनिगमकमाह "अरूपवदेवहि तत्प्रधानत्वादि" ति। अरूपमित्येवहि वक्तव्यं नवक्तव्यं। कुतः। यतो नोभयलिंगमिति रूपप्रतिषेधानन्तरं रूपवदरूपवच्च ब्रह्मेत्याकारभेदेन प्रत्यवस्थाने रूपवत् पर्युदास एव प्राप्तो न रूपनिषेधः। तदिदमुक्तन्त रूपादिमादिति। तत्, ब्रह्मारूपतुल्यमेव, नामरूपनिर्वोढृत्वेन प्रधानत्वादिति विवरणेयोयस्य प्रधानतया निर्वोढास एव तत्प्रयुक्तगुणागुणभाक् भवतीति विषममेवेदं पश्यामः। अत्रत्य तदीय पूर्वपक्षसमाधाने न संगते इति पूर्वमेवोपपादितम्॥ एवन्तर्हि व्यर्थो विशेषोपदेश इति प्राप्तं परिहरति "प्रकाशवच्चावैयर्थ्यादि" ति। ननु ज्ञानस्येव गुणगणोपदेशावैयर्थ्यात्तत् साधनम्। तदाक्षेपाप्रसक्तेः। प्रतिपादकवाक्ययोर्बलाबले प्रदर्शयित्वा सिद्धान्तप्रतिपादन प्रकारघोरणीं प्रदशर्यति "आहचतन्मात्रमित्या"दिना। प्रकाशरूपतामात्रं प्रतिपादयति। नान्यन्निषेधतीत्यद्वैतप्रद्वेषादेव, नतु सूत्रस्यार्थः।

यतस्स्वरसतस्तन्मात्रं ब्रह्माहेत्येव प्रतीयते । प्रकाशत्वेन प्रकृता तदा परामृष्टाचिदित्यनवद्यम् ।

॥ इति प्रपञ्चनिराकरणाधिकरणम् ॥

अरूपवदेवहि तत् प्रधानत्वादाह च तन्मात्रमित्युभयमेव पूर्वाधिकरणजीवातुः। अत्राह, नन्वरूपवदेवहि, आहचतन्मात्रमितिच-तत् प्रधानत्वेनोक्त मयुक्तं। यतोनतदपि प्रधानं रूपस्येव तद्विषयस्यापि प्रतिषेधादिति । अतः परिशेषाधिकरणमारभते,

"प्रकृतैतावत्त्वंहि प्रतिषेधती"

त्यादिना। प्रकृतैतावद्धीतिहिवक्तव्यं । नवक्तव्यं । कुतः । यतः प्रतिषेधार्थ रूपयोरेवेयत्तयापरिच्छेदः प्रकृतइति प्रत्याययितव्यं बहुव्रीह्याश्रयणेन । नन्वेवं विषममेवेदं भवति । परिच्छेदस्यैव प्रकृतत्वेतस्यैव प्रतिषेधार्हत्वादिति चेन्न । नह्येतावन्त एवैतइति प्रकृत्यनै तावन्त एत इत्यनुन्मत्तः प्रतिषेधति। कित्वेत इयन्तएवेति नेत्येकधैवप्रतिषेधेत्, अतः प्रकरणान्तरकरणान्नैवं भवति । एवन्तु भवत्येव । द्वावेव देवदत्तस्यतनयौ, सूर्यदत्तोऽग्निमित्रश्चेति, अथद्वावपिनस्तइति । तस्माद् परिच्छेदस्यैव प्रतिषेधं ब्रुवाणोनात्रसङ्गच्छते ॥ यद्यस्तितर्हि कुतोनोपलभ्यते ब्रह्मेतिचेदाह । यतस्तदव्यक्तन्ततइति, तत्राहहिश्रुतिरिति श्रुतिवशादुपलभ्यतेति स्फोरकं । तदेवाहापिचसंराधनइतीति ॥ अथैवं परिशोधिते जीवे प्रविलापिते प्रपञ्चेपरिशेषिते च परेकिमन्यदवशिष्टं परिशोधितस्य परिशेषितनैक्यमतोऽनन्तेनेति । तच्चपरस्यपरिशेषानन्तरकृत्यमिति, तदनन्तरं भेदस्यौपाधिकत्वप्रतिपादनपुरस्सरं स्वाभाविकत्वप्रतिषेधेनोपसंहारः प्रतिषेधाच्चेतीति सर्वमनवद्यं ॥

॥ इति परिशेषाधिकरणं ॥

स्थूणानिखननन्यायेन प्रपञ्च प्रविलापनमेव प्रवलयितुं परमत इत्यधिकरणं। अत्र परमिति तन्त्रेण ग्रथितमन्यदिति ब्रह्मेति च। परात्त्विति परस्येति च सूत्रकृता ब्रह्मशब्दस्येव परशब्दस्यापि ब्रह्मणिग्रथनात्, अतएव भेदव्यपदेशहेतूपपादने "आदित्याधारमीश्वरं व्यपदिश्य ततो भेदेनाक्ष्याधारमीश्वरं व्यपदिशति" सावधिकंचेश्वरत्वमुभयोर्व्यपदिशतीति" उपपत्तेश्चेति सूत्रे "बहुश्रुति प्रसिद्धैकेश्वरत्व विरोधादि" ति च भाष्यं तथाचौपाधिकमप्याकारभेदमनंगीकुर्वाणं प्रतिस्वरूपतएव ब्रह्मभेदएषव्योभवति भवतेति क्रोधेनेवप्रत्यवस्थानं परमत इतीति प्रतीयते ॥

ब्रह्मणः परमुत्कृष्टमस्ति नास्तीति विचिकित्सयेदं तदुक्तमिति परे। तत्र यत् परन्तत्ब्रह्मेति स्थिते कथंततोऽप्युत्कृष्टाशङ्का। न च परात् परतरं ब्रह्मेति ततो यदुत्तरतरमिति च श्रुत्यापरादप्युत्कृष्टस्याशङ्का घटत इति वाच्यम्। परापरेब्रह्मणी इवास्तु परात्परं ब्रह्मापि किंचिदित्युपगमेकावो हानिः। परात् परतरमेव ब्रह्मेत्युपगमे वा। सेतुव्यपदेशापेक्षया सम्बन्ध व्यपदेशोनव्यतिरेकेणोत्कृष्टस्य साधनायालम्। बुद्ध्यर्थः पादवादित्यत्र कल्पितमुपासनार्थमुन्मानमित्युपेयता दत्तोऽवकाशोऽद्वैति न इति पराक्रमान्तमस्माभिरित्यलमधिकेन। इतरप्रतिषेधेनैव परात् परप्रतिषेधोऽपि सिद्ध एव सिद्धान्तिन इति। परमत इत्यधिकरणमनुपपन्नमद्वैतिनामिति वदन् सुदर्शनोद्युभ्वाधिकरणे पराकृतः। तेषामेवेदं विरुद्धं तत्र स्वशब्दात् सेतुशब्दादिति व्याख्यातवताम्। यतोऽत्र गौणयति तं ब्रह्मणि सूत्रकारस्सामान्यात्त्विति। नहि गौणोऽपि कस्यचित् स्वशब्दो भवति। अस्मन्नयेतु सत्ब्रह्मात्मशब्दास्सङ्कलिता ब्रह्मणस्स्वशब्दाव्याप्ति बलात् भाष्यकृतेति तत्रैव प्रपञ्चितम्। ननु तत्र त्वायतनायतनवत् भावश्रवणात् सर्वं ब्रह्मेति च सामानाधिकरण्यादित्येतत् भाष्यम् व्याप्तिप्रदर्शकमिति तत्रोक्तमयुक्तम्। तत्र तस्य ब्रह्मणोऽनेक-

रसत्वाशङ्कोत्थापकत्वादिति चेन्न । उभयान्वयित्वात् , अतएव सामानाधिकरण्याच्चेत्यनुक्त्वा सर्वं ब्रह्मेति चेतितुकारार्थकतयापि मद्ध्ये चकार निवेशः । तथाच प्रविलापनार्थं सामानाधिकरण्यन्नतु विशेषणार्थमिति व्युत्पादनार्थमुत्तरान्वयेऽपि प्रविलापनार्थस्य तस्याधिष्ठानतयाऽयतनत्वोपपादकतया पूर्वान्वयोपीष्यत एवेति ।

इति परमतइत्यधिकरणम् ।

प्रकाशवच्चावैयर्थ्यादित्युक्तम् । तच्च केनार्थेनावैयर्थ्यमिति विपरिवर्त्तते हृदि । तदुपशमार्थं सूत्रम् ।

" फलमतउपपत्तेरि " ति

अयमाशयः, उपपन्नएवायं स विशेषोपदेशः । यतो ब्रह्मलोकावसानं फलं कर्मोपासनाकार्यं कर्मिणोपासकेन च प्राप्यमत एव सविशेषात् भवत् भवेदित्युपपद्यते न केवलाद्धर्मादेवेति । एतेन फलमत इत्यधिकरणान्निर्विशेषपादोऽयमित्युपेयतामद्वैतिनामत्रासङ्गतमिति सुदर्शनोक्तन्दुरुक्तमिति वेदितव्यम् ।

अथ यदि सविशेषादेवफलसिद्धिः किमर्थोनिर्विशेषोपदेश इत्याशङ्कापनोदनाय तुरीयस्य पादस्य प्रथममधिकरणं प्रवर्त्तिष्यते ।

" पुरुषार्थोऽत " इतीति ।

सर्वमप्युपपद्यतेऽस्माकम् ।

इति तृतीयाध्यायस्य द्वितीयः पादः ।

निष्कृष्यशोधिते जीवे शेषिते च परात्मनि ।
यत्तयोरेकरूपत्वन्तत् परः पादउत्तरः ॥

अथ पुरुषार्थसाधनज्ञानोपासनप्रकार व्युत्पादनाय गुणोपसंहारः प्रवर्त्तते ॥

"सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादि" ति ।

अनेन चोदनाद्यविशेषेण तत्तच्छाखागतानि तत्तत्प्रकरणानि पुनरुक्तिवर्जमेकप्रकरणीभूयैकमुपासनं विदधतीति साधितं भवति । तत्र चादिपदेन ॥ "एकं वा संयोगरूपचोदनाख्या विशेषादिति" पूर्वतन्त्रोक्तास्संयोगरूपाख्या उपाददानेन तदुक्तयैव दिशाऽत्रापि पक्षप्रतिपक्षपरिग्रहप्रकार इति सूचितश्च भवति ॥

परन्तु "भेदान्नेति चेन्नैकस्यामपी" त्यस्त्यत्र सूत्रम् । तदिदं विशेषाभावे कथमुपपद्येततीहापि कञ्चिद्विशेषमाशङ्क्य परिहरतीत्यवतारितं भाष्यकृता ॥ अयञ्च विशेषो न त्वग्नीषोमीयैकादशकपालत्वद्वादशकपालत्वरूपरूपभेद स रूपः । तथासति तेनैव कृतत्वेन कृतकरतापत्तेः । तस्मादिहापि तद्वत् कश्चिद्विशेषमिति न भाष्यार्थः । किन्तु ततोऽपि कश्चिद्विशेषमाशङ्क्येहापि परहरतीति । अन्यथा सूत्रवैयर्थ्यात् । तत्र कानाममसक्तिस्तान्त्रिकोपपादितस्य रूपभेदस्येत्युपपादितश्च भामत्या "तमिमं विशेषमभिप्रत्याशङ्कते सूत्रकारो "भेदान्नेति चेदि" ति । परिहारस्सूत्रावयवो "नैकस्यामपी" तीति ॥ अयमाशयः, अविशेषपुनश्श्रुत्या प्रकरणभेदाच्च यत्र यावन्तश्श्रूयन्ते तावन्त एवोपेयाः । ततो रूपभेदान्नविद्याऽभेद इति ह्याशङ्का भागोऽवतारितो भवता । नैवमवतारयितव्यम् । एवमनवतारितत्वात् सूत्रकारेण । भेदादित्येवावतारितत्वात्, तस्य च यत्राविशेषपुनश्श्रवणप्रकरणभेदानवलम्बेननापि सम्भवस्तत्रैव विशेषेण प्रदर्शनीयत्वात्, त्वदुक्तस्य सार्वत्रिकत्वात् । पूर्वतन्त्रवर्त्मानतिवर्त्तनाच्च ॥ परिहारोऽपि न प्रतिपत्तृभेदादुभयमुपपद्यत इति त्वदुत्प्रेक्षितः । किन्तु सूत्रावयवः । सतु विद्याभेदकतयोपन्यस्तमभ्युपगम्यैव भेदं वारयति विद्याभेदम् । नतु तद्भेदकतयोपन्यस्तं प्रकरणभेदमुपगम्य साक्षाद्भेदकनिवारणेन । तथासति भेदान्नेति चेन्नैवमित्येवहि सूत्रयेत् । तस्मात् भाष्यमेव सूत्रानुगुणमिति ॥ अग्निषोमीयवै-

लक्षण्यन्तु कल्पतरौ स्पष्टम् । अथायं रूपभेदऐच्छिक आहोस्विद्व्यवस्थित इति विवेक्तव्यम् । ऐच्छिक एव स्यात् । यतोऽस्त्यत्र भामती " षोडशिग्रहणवद्विकल्पसम्भवान्नशाखान्तरे ज्ञानभेद इति । अथायमैच्छिकोऽपि सर्वाधिकारिकः । उत छन्दोगमात्रविषयः । सर्वाधिकारिक एव स्यात् । षोडशिग्रहणवदिति निदर्शनात् । नहि ग्रहणविकल्पो यत्किञ्चिदधिकारिकः । " नहि षोडशिग्रहणाग्रहणयोरतिरात्रो भिद्यत " इति भाष्याच्च । अथ सामान्यतः प्राप्तो ग्रहणविकल्पस्स्यात् सर्वाधिकारिकः । अयन्तु शाखाभेदेन प्राप्तः कथमेवं स्यात् । तथासति " न चात्र गुणोपसंहारश्शक्यते प्रत्येतुम् । पञ्चसङ्ख्याविरोधादि " ति छन्दोगानामुपसंहाराशक्यता प्रतिपादनपरं भाष्यं हि विरुद्ध्यत इति चेन्न । सर्ववेदान्तप्रत्ययत्वादुपासनस्य ॥ सर्ववेदान्तप्रत्ययं यथावदवधार्य पश्चाद्धयनुष्ठेयमुपासनं । तच्च विरूपं वा सरूपं वा यथावधारणं सर्वसाधारणमेवानुष्ठेयतामापद्यते । भाष्यमपि पूर्वपक्षोपपादकन्नविरोद्धुमलम् । न हि षोडशिग्रहणाग्रहणयोरतिरात्रोभिद्यत इति सिद्धान्तभाष्योपष्टम्भकत्वादस्य पक्षस्येति ॥ अथ गुणोपसंहारार्थमेव हि सर्वशाखाप्रत्ययत्वं प्रसाधितमुपासनस्य । स च स्वस्वशाखोक्तगुणव्यतिरेकेण शाखान्तरे समानप्रकरणोक्तानां गुणानामेव । न हि स्वशाखोक्तगुणपरित्यागेनापि शाखान्तरोक्तप्रकारस्य । तस्माच्छन्दोगानामेवेदमनुष्ठानवैरूप्यम् । ऐच्छिकविकल्प इत्येव भाष्यभामत्योर्ग्रहणनिदर्शनमिति चेत् । आस्तान्तावत् , यत एतावतापि नव्यवस्थितोऽयं विकल्प इत्येतन्नोऽभीष्टं सिद्ध्यतीति ॥

अथैवं वैरूप्ये फलेनापि तथाविधेन भवितव्यम् । नह्यायासवैषम्ये फलावैषम्यं युज्यते । नह्येक वेदो द्विवेदेन सममेव पूजां भजते । यतस्स्मर्यते " समासमाभ्यां विषमसमे प्रजात इति । अथ ग्रहणेकागतिः । तत्रापीयमेवगतिः । अग्रहणे न क्रतुवैक-

ल्यम् । ग्रहणे तु भवत्यधिकं फलमिति । अन्यथा ग्रहणकृद्वाक्य-स्याननुष्ठापकत्वलक्षणाप्रामाण्यप्रसङ्गात्, न हि समाने प्रयोजनेऽधिकेविषये प्रवर्त्तते मन्दोऽपि । अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेदिति न्यायात् । तस्माद्दर्शसंक्रान्तिसन्निपातवदुपेत्यमेव ग्रहणाग्रहणयोरपि फलवैषम्यम् । सन्निपाते हि दर्शसंक्रान्त्योरन्यतरस्यैवानुष्ठानेऽपि न श्राद्धपरित्यागप्रयुक्तं भवति पातकम् । उभयानुष्ठाने तु भवति तृप्तिद्वयं पितॄणाम् । तथाहि तत्र क्वचिद्दर्श एवानुष्ठेय इत्युच्यते । क्वचित् संक्रमणमेवेति । कुहचित्तूभयमिति । तत्र चैवं भवति निष्कर्षः ॥

एकदैवत्यानान्नित्यानां सन्निपातेत्वेकमेवानुष्ठेयं श्राद्धम् । नित्यनैमित्तिकयोस्तु नैमित्तिकम् । नैमित्तिकानि तु सर्वाण्यपीत्यस्ति नियमः । तत्र नियतसङ्ख्याकत्वन्नित्यत्वमनियतसङ्ख्याकत्वन्त्वानित्यत्वमित्यस्ति निरुक्तिः । सौरचान्द्रमाने उभेअपि संग्राह्ये सम्भवतः । अत एव वृश्चिकादौ क्वचित्तिथ्यलाभे तुलादितिथौ कर्त्तव्यतया चोद्यते, चान्द्रमानलाभात् । एवञ्च सौरमानापेक्षया भवति दर्शस्यानित्यत्वमिति स एव कर्त्तव्य इति केषाञ्चिद्वचनम् । इतरापेक्षया त्वितरदनित्यमिति तदेव कर्त्तव्यमित्यूचुः केचित् । मानद्वयस्यापि संग्रहणीयतया भवत्युभयमपि नित्यमनित्यञ्चेत्युभयमपि कर्त्तव्यमेवेत्युवाच श्रीमानुभयोरप्यनित्यत्वपक्षावलम्बेन । प्रयोजनाधिक्यसद्भावादिति । सर्वथा परित्यागस्त्वप्राप्त एव । तस्मात् ग्रहणवदतिरात्रवदुपेयमेव फलाधिक्यं षडग्निके विज्ञान इति ॥

अथास्त्येव पक्षे फलाधिक्यम् । अत एव समन्वयसूत्रे "विश्वजिन्यायेन तु स्वर्गकल्पनायान्तस्य सातिशयित्वं क्षयित्वञ्चेति न नित्यफलत्वमिद्ध्यासनस्येति नित्यसिद्धब्रह्मात्मत्वरूपामृतत्वव्यतिरेकेणादृष्टफलस्य सातिशयत्वं प्रतिपादितवती भामतीति चेन्न । तथासति विकल्पोत्विशिष्टफलत्वादिति सूत्र विरोधापत्तेः ॥

अथ ब्रह्मलोकप्राप्तिमात्रमवलम्ब्य सूत्रेऽविशेषोक्तिः। कथमन्यथा-सालोक्यादिफलभेदप्रतिपादकानां प्रमाणानामुपपत्तिरिति चेत् ॥ अस्तितावदयमेकः प्रकारः ॥

अन्येतु व्यवस्थित एवायं विकल्पः। अस्तिचात्र ब्रह्मविद्याभरणं, ग्रहणाग्रहणवद्विकल्पो भविष्यति। परन्तु सव्यवस्थित इति कश्चित् पक्षः। अयश्चाष्टदोषदुष्ट इति पश्चैत्राग्नय उभयेषामित्यपरः। अत्रापि तस्याग्निरेवाग्निर्भवतीति वाजिवाक्यवैयर्थ्यापत्तेष्षडग्निक्रमेवोपासनमिति सिद्धान्त इति ॥ अथैवं सति कुतो होमेन न निदर्श्यते। न निदर्श्यते। यतः कालभेदस्तत्र विकल्पापादकः। सचानुष्ठेयः। इह त्वनुष्ठेयात्मारूपभेदः। अतोरूपभेदइत्येवातिरात्रेणनिदर्श्यते। अत एव विकल्प इत्यनभिधानम्। अन्यथा हि पक्ष एव रूपभेद उपपादितस्स्यात्। तत्र सर्वात्मना तत् प्रतिपादकं सूत्रं विरुद्ध्येत ॥

अथैवं सति षोडशिग्रहणवद्विकल्पसम्भवादिति कथं भाष्यार्थविवरणात्मिका भामतीति चेत् ॥ भाष्ये विकल्प इत्यनभिधानात् ग्रहणवदैच्छिकोयं विकल्प इत्याशंक्येत। विकल्प इत्येवातिरात्रेण निदर्शनम्। न त्वैच्छिकोऽयं विकल्प इती त्येवमर्थावबोधनार्थमेव भामत्यां विकल्प इत्यभिधानम्। अत एवेच्छयेति तत्रानभिधानमिति। अथ विकल्पोपपादने संख्याया अनुवाद्यत्वे नानुत्पत्तेरिति विरोधपरिहारः क्वोपयुज्यते भामात्याम्। नेदं विकल्पस्योपपादकम्। किन्त्वथवेत्याद्यनिष्पत्तेरित्यन्तं मध्यमपक्षेप्रकारान्तरेणोपपत्तिप्रतिपादकम्। इतरथागत्यभावात्। तथाच विधीयमानस्य चाधिकस्येत्यत्र च स्त्वर्थ इति गृहीतव्यं ॥ अथात्र छन्दोगानां फलातिशयं प्रत्याशानस्यात्। न स्यादेव। यदि भूसुराणां राजसूयादिफलं प्रत्याशानप्राप्नोति तत्र केन कथं प्रतिक्रियेत ॥

अथ वामास्त्वत्र फलवैषम्यम् । नह्यत्र ग्रहणवद्विधिवैयर्थ्यं सन्निपातवत्प्रयोगभेदोवास्ति तन्नियामकम् । अन्यथा तु शिरोव्रतादि स्वाध्यायधर्मवतामपिहि कल्पनीयं स्यात् किञ्चित् प्रयोजनम् । तस्माद्व्यवस्थित एवायं विकल्पः । अस्तिचात्र "ज्योतिषैकेषामसत्यन्न" इति पारमर्षं सूत्रं प्रमाणमिति पक्षान्तरं रोचयन्ते ॥

वयन्तु वदामः । न सर्वोऽप्ययं पक्षस्सूत्रस्य वाचनिकोऽर्थः । अभ्युपेतत्वात् रूपवैरूप्यस्य । विकल्पव्यतिरिक्तयोस्तदसंभवात् । अतोऽत्र सूत्रकाराशयो विमर्शनीयः । एवं किलात्राभिप्रैति सूत्रकारः । न हि वस्तुतोऽस्त्यत्र रूपवैरूप्यम् । अथाप्यभ्युपगम्य परिहाराणि विद्याभेदमिति । कथमेतदवगम्यते इदमुच्यते । नह्यत्र भेदान्नेति चेन्न तथापीति सूत्रितम् । तथासति सत्यपि रूपवैरूप्येन विद्याभिद्यते । उपपद्यत एव विद्यैक्यमित्यर्थस्स्यात् । तत्र च विद्यमानमेव वैरूप्यमुपगम्य विद्यैक्यमुपपादित मिति स्यात् । किन्तु नैकस्यामपि, न । यत एकस्यामपि विद्यायामेवञ्जातीयको गुणभेद उपपद्यत इति । अत्र त्ववस्तुनामायं भेदः । यतो विद्यैक्येऽप्युपपद्यते । तत्र का नो हानिः । किंवा तदपाकरणप्रयासेनेत्युपक्षिप्तं भवति । अन्यथा सूत्रस्य गौरवपराहृत्त्यापत्तेः । तथाच गुणाविशेषस्य यत् सर्ववेदान्तप्रत्ययत्वसाधकत्वमुक्तन्तदत्राक्षिप्य विशेष्यते । नतु विज्ञानविशेषस्यैक्यं साध्यते । तथाचात्रोपक्रमे भाष्यम् "विज्ञानानां गुणभेदान्नसर्ववेदान्तप्रत्ययत्वमुपपद्यत" इति ॥

एवञ्च सत्यत्र विकल्पेनवा सर्वात्मनावा कुतः प्रसङ्गो गुणोपसंहारस्य ॥ अनवसराच्च । अनवसरोहीदानीं विज्ञानविशेषैक्यसाधनेनतत्रगुणोपसंहारोपपादनस्य । यत उपरिष्टादेव भविष्यति प्रकृताधिकरणप्रयोजनप्रदर्शनार्थं सूत्रं ॥ स्वातन्त्र्यप्रसङ्गाच्च स्वतन्त्रं हि स्यात्तदानीमिदमधिकरणान्तरं सूत्रम् । अत एवैच्छिकोवा स्याद्व्यवस्थितो वा त्र विकल्पो नास्माकन्तत्र निर्भरोऽभ्युपगमवाद-

त्वादिति मुक्तकण्ठमिवाह भगवान्भाष्यकारो विकल्पानभिधानमु-खेन ॥ सर्वश्चेदमभिप्रेत्यान्त एवोपनिबबन्ध"षोडशिग्रहणवद्विकल्प-संभवान्नशाखान्तरे ज्ञानभेद इति सुहृद्भावेनैवास्मदाचार्यवाचस्प-तिः ॥ अयमाशयः। नास्त्येवात्र विकल्पः। अभ्युपगमवादत्वात्। अथापि कीदृशोऽयं संभाव्यत इति चेत्। षोडशिग्रहणवदैच्छिक-एवसर्वाधिकारिकएव। नतुव्यवस्थितः। विद्यैक्योपगमस्यव्यर्थत्वा-त्। रूपभेदत्वाच्च। नापिछन्दोगानामेवैच्छिकः। पञ्चसङ्ख्याविधानेहि विरोधाद्विकल्पस्य प्रसक्तिः। तत्र कथं पक्षेविरोधस्य परिहा-रः। येनतथोपसंहारः प्राप्नुयात्। नहिविधानं वानुवादोवेत्यनि-र्धारणात् पाक्षिकोविकल्पश्शक्यते प्रत्येतुम्। नचात्रपारमर्षं सूत्रम-पि विरुद्धयते। तत्रैकेषामन्नेनेतरेषाञ्ज्योतिषा स्वस्वशाखोक्तेनैव सं-ख्यानिष्पत्तेर्विनिमये कारणाभावेन होमवद्विकल्पस्यैव न्याय्यत्वा-दिति ॥ उपरितनभाष्यन्त्वभ्यपगमवादे प्रवृत्ते न सूत्रकृता तत्वक-थनाय दत्तानुमत्या प्रवृत्तम् ॥

अतएव सुहृद्भावेन तत्वमुपदिष्टं पक्षभेदेनास्मभ्यं भाष्यकृता। सूत्रन्तु विद्याभेदनिरसन एव प्रवृत्तमित्यावेदयितुं भाष्ये पश्चादुक्त-स्य प्रथमं प्रथममुक्तस्य पश्चाच्चोपनिबन्धनेन न शाखान्तरे ज्ञानभेद इत्युपसंहारो भामत्यामिति ॥ एव मतिगभीरेऽस्मिन् सूत्रे मतान्तरं। अविशेषपुनश्श्रुत्या प्रकरणभेदाच्च यत्र यावन्तश्श्रूयन्ते तावन्तएवो-पेतव्या इति रूपभेदः। ततो न विद्यैक्यमितिचेदेकस्यामपि प्रतिप-त्तृभेदादुभयमुपपद्यत इति ॥

अत्र रूपभेदसाधकद्वयमुभयोपपत्तिसाधकश्चाद्ध्याहर्त्तव्यं भ-वति। अविशेषपुनश्श्रुतिस्तु प्रकरणभेदे विषयैक्यप्रत्यभिज्ञापि केति सिद्धान्तिनस्साधकतमा। प्रकरणैक्यं साधयतः प्रकरणभेदोऽप्य किञ्चित् करः। आपाततस्तदवष्टम्भनिराकरणमपि पूर्वतन्त्रोक्तदिशा

पूर्वसूत्रकृत्यमिति न किञ्चिदेतत् । सूत्रेऽपि वैमत्यं सम्पादयितुं द्वितीयन्न ञन्तत्यजुः । अनन्तरसूत्रेऽपि तृतीयास्थाने सप्तमीप्रक्षिप्ता । अस्तुनामकानो हानिः ॥

इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥

"उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने विज्ञानेच।"

स्थितेच सर्ववेदांतप्रत्ययत्व इति चार्थः । समाने विज्ञान विधिशेषवदग्निहोत्राद्यङ्गानामिव गुणानामुपसंहारो भवति । अर्थाभेदात् । एकत्रेवान्यत्रापि स्वविशिष्टविषयकविज्ञाननिर्वर्त्तनरूपोपकाराभेदात् । मिळित्वैवसर्वेषांयावत् स्वविशिष्टविषयकविज्ञाननिर्वर्त्तकत्वादित्यर्थः॥ ननूपसंहारः केषां, समानप्रकरणे शाखान्तरे विहितानां । कुतः । अर्थाभेदात् । कैस्साकम् । अत्र विहितैस्साकमित्याकांक्षावशेनैव लभ्येऽर्थे कथमत्रविहितस्यैवेतिव्याकृत्य विधिशेषवदित्येतद्व्यर्थयन्ति परे ॥ एवन्तर्हि, अनन्यलभ्य इति न्यायेन न सङ्गच्छन्तेते । अर्थाभेदादित्यस्य तृतीयान्तेनैवाकांक्षा, नवत्यन्ते नेत्यनन्वितान्वयाभिधायिनोऽपि भवन्तिते । लक्षणाचभवत्यत्रेत्यधिकावापात् ॥ अथ कथं विधिशेषणैव विधिशेषो निदर्श्येत । ततः कर्मविधिशेषाणामिवेति भवति भवतामपि लक्षणेति चेत् ।

न । यतोऽतिथिरतिथिवदुपास्य इत्यतिथित्वेनैवातिथिरतिथिना निदर्श्यते । तत् कस्य हेतोः । अतिथित्वमेवातिथ्युपास्तौ । हेतुः । नान्यदन्वेषणीयमित्यर्थ लाभाय । अर्थात्वतिथ्यन्तरवदिति भवति । एवं विधिशेषा अस्येरन्विधिशेषवदित्युक्ते तदन्तरवदित्यर्थादेव भवति । तत्र च ज्ञानोपासनयोर्दार्ष्टान्तिकत्वात् कर्मविधिशेषवदिति पर्यवस्यतीति ॥ अपिचेतरत्र विहितस्योपसंहारः किमर्थं इति चेत्तत्र विहितस्यैव विषयीभावायेति वक्तव्यम् । तदेव किमर्थमिति चेद्विज्ञानैक्ये विशिष्टैकार्थविषयकत्वायेति वक्तव्यम् ।

तथाच साक्षादर्थं विहयार्थार्थायेति फलत्यर्थाभेदादित्यस्यार्थैक्यादित्यर्थं विहायार्थसाम्यादित्यर्थं ब्रुवतां भवताम् ।

अहो परिभ्रमो भवतां । कथमन्यथा सत्येवोपसंहारेमिळित्वा विशिष्टैकार्थविषयकत्वमुपकुर्वन्ति गुणा विज्ञानस्येत्येवं परं सूत्रन्तस्येवास्याप्युपकारकत्वादिति व्याख्यातुं प्रवृत्ताः ॥ किञ्चसदृष्टान्तं साद्ध्यान्तरसाधकमपीदं पूर्वेणैकाधिकरणयन्तः किं वा न कुर्युर्भवन्तः । अस्ति पूर्वसूत्राणामपीदमिति चेन्न ॥

यतस्तत् साद्ध्यसाधकसाद्ध्यकानि तानि । इदन्तु तत् साद्ध्यसाद्ध्यसाद्ध्यकमिति ॥ इदं प्रयोजनसूत्रं पूर्वाधिकरणस्यास्यैव प्रपञ्चो भविष्यति सर्वाभेदादित्यारभ्य, तथाच पादस्यैवेदं प्रधानमित्येवं परे सत्यपि भाष्ये गुणोपसंहारपादोयमित्यपि ब्रुवन् कोवा प्रब्रूयादेवं विना भवन्तं विनापिभाष्यान्तरे प्रद्वेषम् । तस्मान्मास्त्वैकाधिकरण्यं प्रत्याशालेशोऽपि युष्माकम् ॥

इत्युपसंहाराधिकरणम् ।

“ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ”

अन्यथात्वं प्रकारान्तरत्वम् । कस्य, प्रकरणस्य । तच्च, प्रक्रमः, सच प्रकृते, प्रधानप्रतिपादनम् । प्रधानप्रतिपादनप्रकारभेद इति यावत् । सच “ त्वन्नउद्गाय, तमुद्गीथ मुपसाञ्चक्रिर इति तथा प्रतिपादकशब्दादवगम्यते । अतो न विद्यैक्यमित्युक्ते, विशेषानभिज्ञः पूर्वोक्तमनुचिन्तयन्नाह पूर्ववादी“नाविशेषादिति ॥ तमेव विशेषमभिनयति ॥

“ न वा प्रकरणभेदात् परोवरीयस्त्वादिवदि ”ति । तत्र तु साम्पादिकाश्रयः प्रधानं तत्र नास्ति विगानम् । अत्र त्वस्ति तत्र विगानमिति विशेषः ॥ अत्रान्यथात्वं रूपभेदस्ततोविद्याभेद इति

तु न सम्यक् । प्रकारभेदस्यैव शब्दतः प्रतीतेः । विद्यैक्येऽपि रूपभेदमुपगत वतस्सामान्यतो रूपभेदेन प्रत्यवस्थानायोगाच्च ॥ एवं सञ्ज्ञातस्तदुक्तमिति चेदित्यन्वयोऽपि न साधीयान् । प्रथमश्चेदित्यस्य व्यवहितान्वयः, तदुक्तमिति च व्यर्थम् । अतस्तदुक्तमिति सिद्धान्तसूत्रार्थमेव स्मारयति दार्ढ्यार्थं सञ्ज्ञाया दौर्बल्यप्रदर्शनार्थञ्च । अस्तितु तदपीत्यनुरञ्जयति विद्यैक्येऽपि रूपभेद उपपद्यत इति प्रधर्षितं पूर्वपक्षिणमित्येतदेवसमञ्जसम् ॥

इत्यन्यथात्वाधिकरणम् ॥

"व्याप्तेश्च समञ्जसम्"

वृत्तमुपजीव्य प्रसङ्गादिदं प्रवृत्ते ॥ ननु तदर्थचिन्तनात्तच्छेषतैवास्य व्याख्यापरैरभ्युपेतेति चेन्न ॥ तदर्थत्वेऽपि तदर्थान्तर्भूततदर्थार्थसाधकस्यैव तच्छेषत्वौचित्यात् । स्वातन्त्र्येण तदर्थसाधकसाद्ध्यस्यास्य तदयोगात् ॥ तदनपेक्षितार्थपरतयेदं व्याकुर्वन्तो नात्र प्रमाणं भवन्ति परे । एवं हि व्याकुर्वन्तीदं परे । छान्दोग्ये उद्गीथशब्दस्य प्रणवविषयकत्वमेव समञ्जसम् । न वाजसनेयक इव कृत्स्नोद्गीथविषयकत्वम् । उत्तरास्वपि विद्यासु तत्र तस्यैव व्याप्तेश्चेति ॥ अविशेषस्य संज्ञायाश्च निरसनेन निराकांक्षे पूर्ववादिन्यस्यार्थस्यानपेक्षणान्नेदं समञ्जसम् । विशेषणत्वस्यासाधने साधितमपीदन्ननिर्वर्त्तत इत्यतोऽपि न समञ्जसमिति ।

इति व्याप्त्यधिकरणम् ॥

यद्यप्यविशेषएव रूपस्य विद्याभेदहेतुः । अथापि न सामान्यातस्तद्भेदस्तद्भेदकः । किन्तु प्रक्रमभेद एव । यथा वस्त्रालङ्कारादिभेदेन न मनुष्योभिद्यते । भिद्यते तु बाल्ययौवनादिभेदेन । अतस्तत्रोपसंहारोऽन्यत्रैवानुपसंहारो विद्याभेदाभेदाभ्यामित्युत्सर्गा-

पवादन्यायने प्रदर्शितं सर्वं समञ्जसं विशेषणत्ववदित्युपसंहारप्रयोजकप्रकरणं परिसमाप्य पादार्थं प्रपञ्चयितुमारभते ।

“ सर्वाभेदादन्यत्रेमे ” इति ॥

कोऽस्य विषयः। प्राणस्य गुणगणोऽस्य विषयः। कथमेवं ज्ञायते। भाष्यात् नहि सन्देहादलक्षणं, व्याख्यानतो विशेषप्रतिपत्तेरिति हि न्यायः । अस्त्येवैतत् । अथापि किमस्ति किंचित् सूत्रेऽपि सूचकम् । अस्ति । यतोऽनन्तरमेव प्रधानस्येति वदिष्यति । अतोऽप्रधानविषयमेवेदमिति सूचयति ॥ किंच किंचानुक्रमणमप्यावेदयतीदमेवास्य विषय इति । स्वनुष्ठितश्रौतस्मार्त्त निखिलकर्मनिर्मलान्तरात्मा विज्ञानेष्वनुक्रमणेन ह्यवतारणीयः । तत्र यत्तदीयसर्वकर्माङ्गमग्र्याख्यन्तन्नयपाश्रयमेव विज्ञानं प्रथममवतारितम् । तच्च विशकलितहृदयानां ग्रहस्थानां सुखसाध्यन्दुष्प्रापपदप्रापकंचेत्यवश्यमेव प्रथममवतारणीयम् । अतस्तदनवतारयतान्नानुक्रमोभवति । अविकलताच । अनवतारात् , कुत्राप्युत्तरत्र । ततस्तु ततोऽपि यत्सूक्ष्ममुद्गीथाख्यन्तद्वयपाश्रयं प्राणाख्यकार्यब्रह्मसम्बद्धम् । तदुभयं कर्माङ्गविषयकं स्वतन्त्रमपि प्रतीकोपासनंचेत्यासीत् । अनन्तरंचयदुपस्थापितं प्राणतत्वन्तद्विषयमेव स्वतन्त्रं विज्ञानं क्रमप्राप्तमनुक्रमणीयमित्यवश्यमेवेष्टव्यमिति ॥

अवतारितत्वाच्च, अवतारितं हीदं प्रथममेवव्यभिचारवारणावसरे कृशानुनासहितम् । यतः कृशानौ क्रियाकलापः कर्मिणां कर्म । सच प्राणाधीन इति । ततः प्रपंचावसरे तदेवप्रथममवतारणीयमित्यप्यवश्य मेवेष्टव्यम् ॥ संश्लेषितत्वाच्च । संश्लेषितेहिकार्याकार्येब्रह्मणी पूर्वाधिकरणे दृष्टान्तदार्ष्टान्तिकतयोपात्तोद्गीथोपासन विषयत्वेन । तत्र स्वयमप्रधानमपि दार्ष्टान्तिकत्वेन प्रधानं यत्तस्याद्य विज्ञानं प्रथमं संगृह्यते । पश्चात्तु प्रधानस्याप्युपसर्जनस्येति सुश्लिष्टम् -

साधु सुसंश्लिष्टम् । अथात्र किं पूर्वपक्षे बीजम् । इदमत्र बीजं, यत् पंचपदवदेवं कारोऽप्युपास्यपरिच्छेदक इति ॥ एवन्तर्हि तेनैवगतं स्यात्, नस्यात् । तत्रान्यत्रोक्तेष्वेव केषांचिदन्यत्र परिच्छेदः । अत्रतु कचिदवम् । कचित्तु परत्रानुक्तानामपीत्युभयत्रापि परिच्छिद्यतेगुणजातमिति ॥ सिद्धान्तस्तु । सिद्धान्तस्तु योऽयं सर्ववेदान्तप्रत्यायकतया प्रथममुपन्यस्तोगुणाविशेषस्सचात्रविद्यते प्रकरणाभेदः । तस्मात् प्रक्रमभेदाभावादस्येरन्नेवेमेवसिष्ठत्वादयोन्यत्र गुणाविज्ञानैक्यादिति । एवंसति पूर्वमधिकरणत्रयसङ्कलितंविज्ञानभेदकाभेदक गुणोपसंहाराद्यर्थजातमत्रैकस्मिन्नेवाधिकरणे क्रोढीकृतमिति भवति । एवमेव भवति ॥ नन्वेवं सति भामात्यां सर्वमपि सर्वत्र संशब्दितमिति सिद्धान्तयित्वा भाष्यकृता त्वभ्युपेत्यापि ब्रूमइत्याशयवतोक्तमिति कथमुच्यताम् । तथासति कुतः कस्य कुत्रोपसंहारस्स्यादिति चेत् । एवन्तर्हि सूत्रकृतापीति वक्तव्यं स्यात् ॥

परेतु केषाञ्चित् गुणानां समानेऽप्याम्नानेऽन्येषामनुक्तत्वाद्रूपभेदाद्विद्याभेदमाशङ्कयतेऽप्यर्थवशादुक्ताएवातो न कौषीतकिनां विद्याभिद्यत इति वर्णयन्ति ॥ तेषामत्रोपसंहारकथैव नास्तीति नतान्प्रत्यस्ति किञ्चिदपि वक्तव्यमत्रेति ॥ अथास्तामेतत्सर्वम् । कथं प्रत्यक्षादि सन्निधापिता इवेम इति परामृश्यन्ते वसिष्ठत्वादय इति चेत् ॥ इदमुच्यते ॥ इमौच विचार्यविचारकौ प्राणबादरायणौ छान्दोग्य बृहदारण्यकयोर्वर्त्तेते पूर्वाधिकरणवशेन । ततस्तत्रैवोक्तास्तदीयाइमेगुणास्तेनेम इति परामृष्टाइत्यत्र कानुपपत्तिः । अतएतयोरेववर्त्तमानेनान्यत्रेति कौषीतक्यादिकथ्यते । प्रत्यक्षाश्चेमेस्वस्मिन् परत्र वास्माकंवसिष्ठत्वादयः । वसिष्ठश्चायंवंशपरम्परया भगवान् बादरायणो ज्येष्ठश्च श्रेष्ठश्चाविकलेन ब्रह्मवर्चसादिना । तत्र कुतइम इति न निर्दिशेदेतानयम् ॥ तदिदमभिव्यञ्जयामास सदृशेन दृष्टान्तेन सूत्रकारहृदयाभिज्ञोभवान् भाष्यकारो "नहि देवदत्तश्शौ-

र्यादिगुणत्वेन स्वदेशे प्रसिद्धोदेशान्तरं गतस्तद्देश्यैरविभावितशौर्यादिगुणोप्यतद्गुणो भवति । यथाच तत्र परिचयविशेषाद्देशान्तरेऽपि देवदत्तगुणाविभाव्यन्त इति ।

अत्र देवदत्तः प्राणः । शौर्यादयोवसिष्ठत्वादयः, स्वदेशाच्छान्दोग्यबृहदारण्यके यत्रस्थित्वाइमइत्युक्तंसूत्रकृता तेनइमएवेमे अत्रैवोक्तानान्यत्रसंशब्दिताइत्यपि संसूचितं इदमेव तद्देशीयैः कौषीतक्यादिभिरविभावितशौर्यादि गुणोपीत्युक्तं देशान्तरं कौषीतक्यादि तत्र परिचयविशेषात्, छान्दोग्यबृहदारण्यकवाक्यार्थ पर्यालोचनयेति सर्वमवदातम् ॥

॥ इति सर्वाभेदाधिकरणम् ॥

अहञ्ज्येष्ठोऽहं श्रेष्ठ इति कलहास्पदं सातिशयंवसिष्ठत्वादिसंपत्संपादकमुपचितापचित प्रियमोदादिहेतुभूतज्ञ्यैष्ठ्यश्रैष्ठ्यादिकं यत्रपरिसमाप्तंप्राणतत्वे तदुपासनमुपपाद्याथ यन्निर्भेदमुपचयापचयरहितं ज्येष्ठकनिष्ठश्रेष्ठाश्रेष्ठवसिष्ठावसिष्ठ संपन्नासंपन्नप्रतिष्ठिता प्रतिष्ठित भीताभीतसाधारणश्चिदानन्दघनं प्रधानन्तत्वन्ताद्विज्ञानं प्रवर्त्तयति ।

“ आनन्दादयः प्रधानस्य ” सर्वाभेदात् ॥ इति ॥

ननु भेदप्रतिद्वंद्व्यभेदोऽयंप्रतियोगिनमेवप्रथममाकांक्षते यथा-पटेघटभेदस्तदभेदश्चेति तत्र कथन्तत्प्रतियोग्याधारवाचकेन तद्वाचकस्य समासः, अतएव सर्वस्य प्रतिपादनप्रकारस्याभेदादिति भाषितं पूर्वादिकरणे परैः, अत्रतु अत्रत्वभेदादिति वक्तव्य इत्येवभाषितमिति चेन्न । नहि देवदत्तः कश्चित्पक्षं भजते सर्वसमत्वात्तस्येतिवत् सर्वाभेदात्तस्येति पारमर्षप्रयोगेकस्तेपर्यनुयोगः, उपसंहारकथोच्छेदापत्तेरुभयत्रापिसर्वत्रेत्यध्याहारक्लेशाच्च नपरकीयंभाष्यं प्रमाणपदमधिरोहति । नच सिद्धान्तेऽपि प्राणविज्ञानस्येति भवत्य-

द्ध्याहारः प्रथमाधिकरणइति वाच्यं । सर्वाभेदादेव सर्वंह्यभिन्नमुभयत्रापीमइत्यानन्दादय इति च पक्षव्यतिरेकेण अस्येरन्निति साद्ध्याविशेषात् तत्र चान्यत्रेति विशेषणाविशेषात् प्रधानस्येति पक्षेहेतौच तदविशेषाच्चेति । परन्तु प्राधान्यन्तत्रतत्र यथासंभवं तत्र प्रधानस्य गुणिनइमेगुणाइति प्रथमं, प्रधानस्य गुणविज्ञानापेक्षयामुख्यस्य प्राणविज्ञानस्येति पश्चाच्च प्रथमाधिकरणे बोधः । द्वितीयेतु प्रधानस्य परस्यानन्दादय इति प्रथमं, प्रधानस्य विशेष्यस्येति पश्चाच्चेति । अतएव "तस्मादेकप्रधानसंबद्धाधर्मा" इति प्रथमाधिकरणावसानेऽधिकरणद्वयसाधारण्येनोपसंहारभाष्यं । द्वितीयप्रथमसूत्रावसानेऽपि" तेनैवपूर्वाधिकरणोदितेन देवदत्तशौर्यादि निदर्शनेनेतीति नकिञ्चिदवद्यमिति । अथ सर्वत्राभेदाद्विशेष्यस्येति प्रथमे, प्रतिपाद्यस्यैकत्वादिति तृतीयेहेतुरुपपादितोभाष्ये, कोभेदोऽनयोः, येनापौनरुक्त्यं भवेदितिचेत् । अस्त्यत्र श्रीभाष्यं, अभेदात् प्रधानस्य सर्वेषु दहरशाण्डिल्यादिषूपासनेष्विति प्रथमे, अर्थसामान्यात्, अर्थस्वरूपनिरूपण धर्मत्वेनार्थवदर्थ प्रतीत्यनुबन्धितया ऽर्थेन समानत्वादानन्दादीनामितितु तृतीये । अस्तु पौनरुक्त्यं परिहृतं भवति । अथापि प्रयोजकधर्मसापेक्षादर्थेन सामान्यादित्यर्थापेक्षया निरपेक्षस्यार्थक्यैत्यादित्यर्थस्यास्ति लघीयस्त्वं । सर्वेष्विति चाक्लिष्टमानन्त्येव्यभिचारात् । आनन्दादयस्सर्वेषूपसंह्रियेरन्नर्थप्रतीत्यनुबन्धित्वादितिह्युक्तं भवति । तत्र तेष्वनुपसंहार्येऽर्थप्रतीत्यनुबंधिन्यानन्त्ये व्यभिचरत्ययं हेतुः, नच तत्र हेत्वभावः अक्षरद्ध्यधिकरणेऽस्थूलत्वादीनामप्यर्थप्रतीत्यनुबन्धित्वोपपादनात् । अस्तु तर्ह्युपसंहारोऽपि । उक्तश्चात्रैवतैस्ते च गुणास्सत्यज्ञानानन्दामलत्वानन्तत्वानीतिचेन्न संभृत्यधिकरण विरोधात् । उक्तं हि तैस्तत्र, हृदयाद्यल्पायतनपरिच्छिन्नदहराद्युपासनेषु न द्युव्याप्तेरुपसंहारो विरोधात्, नच तत्रैवोक्तपृथिव्याद्यवधिकज्यायस्त्वादौ व्यभिचारः । त-

स्योपास्य माहात्म्यप्रख्यापनार्थस्यानुपास्यत्वादिति ॥

नच मुख्यास्तयादयोभावरूपतया भवन्त्युपास्याइति विरुद्धयन्ते आनन्त्यादयस्त्वभावास्स्वरूपपरिच्छेदायैवोपसंह्रियन्ते, नोपास्यत्वायेति नविरुद्धयन्तइति वाच्यं। एवं सति सत्यानन्दादयस्स्वरूपात्मकतया व्यापका इति दहरादिषु विरोधान्नसार्वत्रिका इति तेषु व्यभिचार तादवस्थ्यात्। नच स्वरूपत्वादेव यत्र यावद्स्वरूपोपासनन्तावदेव तदात्मतया ध्यानं। न हि सौरा लोकाद्यउपाधिपरिच्छिन्नाअपि प्रकाशात्मतया नप्रकाशन्त इतिवाच्यं ॥

तथासति निरस्तसमस्तदोषमनन्तकल्याणगुणगणं ब्रह्मसाक्षादनुभवति मुक्तइत्युपेयतां भवतां मुक्तानां फलतारतम्यापत्तेः।

नचेष्टमेवेदन्तारतम्यं केषाञ्चिदेवपरमैकान्तिनांपरिपूर्णानन्दब्रह्मानुभवो नान्येषामित्युपेयतामस्माकमिति वाच्यं।

तथासति विकल्पसूत्रविरोधापत्तेः। न च भोगमात्रसाम्यएवायंविकल्पोऽविशिष्टफलत्वादिति वाच्यं केषुचिज्जगज्जन्मादि हेतुत्वस्याप्युपास्यत्वोपगमवैयर्थ्यापत्तेः। नच तत्वेनानुभवोऽपि परमैकान्तिनामिष्टइति वाच्यं जगद्व्यापारवर्जमिति सूत्रविरोधापत्तेः। नच ब्रह्मवृत्तित्वेनहि तद्व्यापारमनुभवति मुक्तइतिवाच्यं अविभागेनदृष्टत्वादिति सूत्रविरोधस्य ाशक्यपरिहारत्वात्। पूर्णानन्दादेरपि तथात्वापत्तेश्च। अथ भवतां कथमितिचेत्। अस्माभिस्तस्यानुपास्यत्वोपगमात्। तथाहि तत्र भाष्यभामत्यौ अतत्क्रतुत्वात्तेषामिति, निरवग्रहत्वस्योपासन विद्ध्यगोचरत्वादिति च ॥

अथ कुतः प्रसक्तिः येन पर्युदस्यत इति चेत्, साम्यश्रुत्याप्रसञ्जितमिति गृहाण। तव तूपासनमेवप्रसञ्जकमिति स्थितएवपर्युदासायोगस्तत्क्रतुन्यायविरोधादित्यलं प्रसक्तानुप्रसक्त्या ॥

अथ कथं सिद्धान्ते पुनरुक्तिपरिहार इति चेत्, ननु स्पष्टमेवास्तिभाष्यं विशेष्यस्याभेदादिति प्रथमं प्रतिपाद्यस्यैकादितितु

चरममिति । किमेतावता भवति । इदं भवति । या व्यावृत्तिः प्रथमासात्राभिन्ना, नतु भिन्ना, याच प्रतिपत्तिश्चरमा साप्येका, नतु नाना, व्यावर्त्यस्याभेदात् प्रतिपाद्यस्यचैकत्वादिति ॥ अथापि को विशेषः । उच्यते । उपसंहारोऽर्थाभेदादित्युक्तम् । तत्रार्थइत्यभिधेयं प्रयोजनंचोच्यते । अभेदादिति च भेदाभावादेकत्वाच्चेति । अभिधेयंच विशेष्यम् । नतु तत्परतन्त्रं विशेषणम् । विशेष्यताच व्यावृत्तिः । सातूपायः प्रतिपत्तौ । प्रतिपत्तिस्तु प्रयोजनम् ॥

तत्र यान्यप्रधानविशेषणानि विशेष्यानात्मकानीतिपरस्परंस्वरूपत एवव्यावृत्तानि तानि तत्रतत्रसङ्गीभूय विभिन्दन्ति विशेष्यं विज्ञानमपि विश्लथयन्ति । तथाच वसिष्ठत्वादयोमनोमयत्वादयश्च विशिष्टान्तरात् स्वस्वविशिष्टं व्यावर्त्तयन्तोऽवरुन्धन्त्येकैकस्मिन्विज्ञाने । नत्वेकस्मिन्नेव विज्ञाने नानात्वादप्रधान प्रतिपत्तेः । अतएव पूर्वाधिकरणे भाष्यं "सर्वत्रैव हि, अत्रान्यत्र च समाने प्रकरणेसर्वत्रैव हि । तदेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायत" इति । नतु प्राण इति विशेषणभेदेन तस्य विभिन्नत्वात् । ज्ञानमप्येकन्नतु भिन्नन्नाना, समानत्वादिति ॥ आनन्दादयस्तु प्रधानधर्मास्तदात्मतया परस्परंस्वरूपतोऽव्यावृत्ता इत्यतत्भेदकाविशेष्याभेदादविज्ञेयादेवविज्ञेयं व्यावर्त्तयन्तोऽवरुन्धत्यैकस्मिन्नेव विज्ञाने । नत्वेकैकस्मिन् । विशेष्याभेदेन विज्ञानस्यानानात्वात् । विज्ञानश्च प्रतिपत्तिरिति व्यावृत्तिमादाय विशेषस्याभेदादिति प्रथमं प्रतिपत्तिमवलम्ब्य प्रतिपाद्यस्यैकत्वादिति चरमंच हेतूपपादने विस्पष्टमेवविशेषो विज्ञायत इति ॥

साधु सम्यग्विज्ञायते विशेषः । कथमन्यथा प्रधाने सर्वाभेदात् प्रधानस्येति सूत्रितखुररवमात्रेण प्राप्ति"मुपचयापचयौ हि भेदे" विशेष्यभेदेह्येत उपचयापचयवन्तउपनिबद्धयेरन्निति प्रतिक्षिपेत्सूत्रकारः, कथंवा नन्वानन्दादयोऽपि विशेष्याद्भिन्नाउततदात्मा

नएव, आद्येकुतोनभेदकाः, अन्त्ये किं सर्वोपसंहारेणेति प्राप्ते, इतरेतु विशेष्यात्मतया तदभेदकास्त्वानन्दादयोऽर्थ सामान्यान्मिळित्वैकार्थकत्वात्त्रयोऽप्युपसंह्रियेरन्निति सूत्रयेत्, परन्तु, अर्थैकत्वादिति वक्तव्ये कथन्तत्सामान्यादित्युक्तिरित्येतत्परमस्ति विमर्शनीयमिति चेत् ॥

उच्यते । तथा सति कुतोमिळित्वैवैकार्थत्वमित्याशङ्काऽवशिष्येत । तन्माशङ्कीत्येवमुक्तिः । तथाहि । यद्यपि प्रतिपाद्यप्रतिपत्तिरेकैव प्रयोजनम् । अतस्तत्र न सर्वोपसंहारापेक्षा, अथापि यतोव्यावर्त्यप्रतिपाद्यंब्रह्मसत्वनृतजडदुःखात्मतया भवति त्रिविधः प्रपञ्चः । ततोव्यावर्त्यमपि ब्रह्मसच्चिदानन्दात्मतया त्रिविधं भवति विशेष्यमित्युपायव्यावृत्ति भेदेनोपेया प्रतिपत्तिरपि त्रिधा भवति । अथापि समानैव । प्रतिपाद्यस्यैकरूपत्वात् । व्यावृत्तिभेदात्तुव्यावर्त्तकास्सर्वेऽप्युपसंह्रियेरन्निति ॥

तथाच भाष्यं प्रतिपाद्यस्य धर्मिण एकत्वात्सर्वेषाम् । अप्रधानधर्माणान्तु तस्य नानात्वादस्ति वैषम्यम् । प्रतिपत्तिमात्रप्रयोजनाहिते । नह्यप्रधानधर्मा इव परस्परव्यावृत्तस्वस्वविषयकत्वोपरागेण प्रतिपाद्यभेदकाश्चेति । एवमक्षरद्ध्यधिकरणेऽपीदमेव सामान्यं वक्ष्यते ". सामान्यतद्भावाभ्यामिति विज्ञेयम् ॥ नन्वत्रैव हि सङ्गतमक्षरद्ध्यधिकरणमात्मग्रहीत्यधिकरणादनन्तरं वा । तत्र कुतोऽस्मात्तु दूरविप्रकर्षेण तन्निवेशनमिति चेत् ॥ नह्येतावानेवात्र विमर्शनीयो विषयः । किन्तु प्रधानविषयकत्वेनात्रैव निवेश्यास्थूलत्वादयश्चेत्येतावति वक्तव्ये किन्धियामित्यवरोध इति सामान्यतद्भावाभ्यामिति चेत्येतत्सर्वन्तत्रैव विस्पष्टं विचारयिष्यामः ॥

इत्यानन्दाधिकरणम् ।

येनविना नब्रह्मणः प्राधान्यन्निर्वहति नहि विशेष्यता प्रयुक्तमेवेदम् । किन्तु स्वभावतोऽपि सर्वस्मादितिच तदिदं परत्वमुपपादयितुमयमारम्भः ॥

" आध्यानायप्रयोजनाभावादिति "
आत्मगृहीतिरितरवदुत्तरात् ॥

ऐतरेयब्राह्मणस्यानन्दाद्युपसंहारासिद्धये आत्मप्रकरणत्व साधकमिदम् । आनन्दादिवदात्मत्वस्यापि प्रधानविद्यायामुपसंहारसाधनपरं वा । उभयमपि वा, तैत्तरीयवत् कठस्य, कठवदैतरेयस्य ऐतरयवदारण्यकछान्दोग्य षष्ठयोश्च प्रधानब्रह्मपरत्व प्रतिपादनस्यावश्यकत्वात् । अतएवभाष्येऽथवेत्यनुक्त्वाऽपरायोजनेत्युक्तिरिति । परेत्वानन्दाधिकरणमेवेयद्दूरमागच्छतीति तदनुगुणमेव सूत्राणि विवृण्वन्ति । विस्तरभयान्न तत्र प्रतिवक्तुं प्रयत्यते ॥

इत्यात्मगृहीत्यधिकरणम् ।

" कार्याख्यानादपूर्वम् "

सत्यपि विधिश्रवणे, नाचमनं विधीयते । असत्यपि तस्मिन्ना ग्रमनीयास्वप्सुप्राणवासोविज्ञानमेवविधीयत इत्यत्र न विवादः। अथापि कार्यस्याप्राप्तस्याख्यानादपूर्वन्तद्विधीयत इति श्रीभाष्यम् । यतः प्राप्तं कृतमेव स्यात्, विहितमेववास्यादिति । अत्रापूर्वत्वादित्येव वक्तव्यम् । अप्राप्ताख्यानसम्भवादित्यर्थकत्वे त्वपूर्वमिति व्यर्थम् । पूर्वपक्षसाधकविधिश्रवणा निराकरणेन तदश्रवणेऽपि सिद्धान्तसाधकाप्रतिपादनेन चन्यूनताचेत्यसारमिदम् ॥

किन्तु कार्यस्यस्मृत्याप्राप्तत्वेनावश्यकर्त्तव्यस्य आख्यानादन्वाख्यानादनुवादान्नाचमनं विधीयते । परन्तु वासः कार्यस्यानग्नता-

या आख्यनात्सङ्कीर्त्तनाद्वासो विज्ञानमेत्रा पूर्वं विधीयते । यदिदन्नविधीयते कथन्तत्कार्यसङ्कीर्त्तनेन तत्स्तुयादित्येवार्थ इति ॥

इति कार्याख्यानाधिकरणम् ।

“ समानएवंचाभेदात् ”

कस्मिन् समाने, मनोमयत्वादिके, कुतोऽयमयमेवार्थइति निर्णयः । महिषेवागवासमान इति कुतोनस्यात्, नस्यात्, कुतः । यतो गुणोपसंहारे कुतो गोमहिषयोः प्रसक्तिरिति । अथापिकुतोऽयं विशेषप्रतिलंभः । एवमित्युक्तेरवं प्रकारइतिलब्धेः । एवमप्यस्मिन्नेत्र प्रकारइति कथमुपलब्धिरितिचेत्, उदाहरणवशेनास्यैवार्थस्योपलब्धेः । इदमेवोदाहृनमिति कथं गृहीतिरिति चेत्, चाभेदादितरस्य चाभेदात्, तथाच कस्मिंश्चित् समानइतरस्य चाभेदादिति सूत्रार्थे लब्धेऽग्निरहस्यारण्यकयोरेवायमर्थोवर्ततइति तद्दर्शनसमानेऽग्निरहस्यइवारण्यकेऽपि मनोमयत्वादिके वशित्वादेश्चाधिकस्य सत्यसंकल्पत्वगुणाभेदान्नरूपभेदोऽतोविद्यैक्यमिति पर्यवस्यतीति ॥

मिथ्यैवेदं सर्वमेवश्चेति संघातोवा विश्लिष्टोवेत्यनिश्चये ।

किञ्चैवं समाने एवं प्रकारेण समानइत्येवार्थस्स्वरसतः प्रतीयत इति कस्मिन् केन समानइति जिज्ञासमानस्य कथमुदाहरण विशेषप्रतिलम्भः । अतश्चाभेदादित्येतदपिन कस्याप्युपस्थापकम् ॥ अपिच सर्वसाम्ये कुतस्संशयः । सत्यसङ्कल्पत्वाद्वशित्वादेर्भेदभ्रान्त्या संशय इति चेन्न, अनिर्मोक्षात्, केषाञ्चित्साम्येन प्रत्यभिज्ञाने ह्युपसंहारः । तत्र कथं कचिदधिकश्रवणेन पूर्वपक्षइति । अथ शाखाभेदे हि तन्न्यायः, सतु कुतश्शाखैक्येन पुनरुक्तिपराहतात्रिति चेत्, तर्हि पुनरुक्तिरेव पूर्वपक्षकरी । भ्रान्तिस्तु सर्वत्र साधारणीपूर्वपक्षिण इति न पूर्वपक्षोत्तम्भनम् । सिद्धान्तोऽपि सुदुर्घटः,

पुनरुक्त्यपरिहारात् , सत्यसङ्कल्पत्वाभेदोपि वशित्वादेस्साद्ध्याव-स्थएवेति तदसाधनान्न्यूनताचेति बहळदोषदूषित मिदम्मतमिति ॥

अथकथमत्र विषयनिर्णयइतिचेत् , उच्यते श्रूयताम् । इद-न्तावदत्र प्रथमं विवेचनीयम् । विद्यैक्येविज्ञानैक्यन्तस्मिन् सत्युप-संहारः । तत्र नकथञ्चनवैरूप्यं विरूपयति विज्ञानमितिनिरूप्य, त-दवलम्बेन भेदकमप्यभेदकम्मत्वा प्रत्युत्थानं पराचकार भेदकाभे-दकभेदपरिशोधनार्थमन्यथात्वाधिकरणान्तेन ॥ तत्र चावतारिते प्र-धानाप्रधानविज्ञाने । तयोश्चदार्ष्टान्तिकतया प्रधानविज्ञानहेतुतयाच प्रथममप्रधान विज्ञानमवतारितं सर्वाभेदादिति । तदनन्तरं सद्यःक-र्त्तव्यमप्युपेक्ष्य तदुपासककार्यविचारं प्रधानविज्ञान विचारे कोहेतु-रिति । ननु समाहितमेवेदन्तत्रैव प्रासंगिकमपि परित्यज्य प्रधान-विज्ञानमेव प्रवर्त्यते दृष्टान्त संगतिलोभेनेति वदता श्रीभाष्यकृतेति चेत् ॥ नायमत्र पुष्कलो हेतुः । सर्वस्यापि सर्वत्र कथाञ्चित् कस्या-श्चित् सङ्गतेरवश्यम्भावात् अतः प्रसङ्गमपि प्रतिक्षेप्तुमर्हन्तीवक्तव्या-काचित् सङ्गतिः । प्रासङ्गिकस्य प्रकृतशेषस्य प्रकृतप्रकरिष्यमाण-योर्नैरन्तर्याविघातकत्वेन बलीयस उपेक्षानर्हत्वात् ॥

अस्तु केयमीदृशी सङ्गतिरिति चेत् । अवसर इति गृहाण । नह्यवसरतः प्राप्तं स्वावसरं परित्यजति । अवसरपरित्यागेहि सर्व-त्राप्यनवसरः प्राप्नुयात् । अस्तिह्यवसरस्तत्रतस्य ॥ निर्वृत्तेतु सामा-न्यतोगुणोपसंहारसन्न्यायेसञ्चारयितव्योऽयंविशेषइत्यवतारितेहि प-रापरविज्ञाने । तत्र चतत्प्रतिबद्धयप्रावृत्तप्रासङ्गिकतया प्रबलं व्याप्ते-श्चेत्यधिकरणम् । तदिदं समञ्जसंविशेषणत्वामित्यन्यार्थमपि समञ्ज-समेवेदन्न्यायनिरूपणं वक्ष्यमाणेषु प्रधानाप्रधानविज्ञानेषु व्याप्तेरस्य-न्यायस्येत्यर्थान्तरमपिस्पष्टतरं बोधयामास । सोयं प्रथमोघट्टः पूर्वा-परपरामर्शी ॥ ततश्च सममेवनिरूपणीयतया प्राप्तयोः प्रधानाप्रधान-विज्ञानयोरुक्तरीत्या प्रवृत्त्यनिर्वृत्तेप्राणविज्ञाने सद्योवक्तव्यतया प्र-

वृत्तं प्रत्ययवशात् प्रासङ्गिकमपि कार्याख्यानाधिकरणं प्रधानविज्ञानाधिकरणम् । यतोऽवसरोस्यात्रेति ॥

निर्वृत्ते चास्मिन्नवसरेणैव प्रवृत्तं कार्याख्यानाधिकरणम्। अन्यथात्रास्याप्रसक्तेः । एवमन्यार्थमेव प्रवृत्तमिदमपि कार्याख्यानात्परं प्रवृत्तमपूर्वं, प्रकरिष्यमाणमप्यपूर्वमेव, यत एकस्यामपि शाखायां विज्ञानैक्योपसंहारौ, विज्ञानैक्येऽपि तदभावइति विशेषः । कार्याख्यानाच्चापूर्वम् । यदिदं कारणोपाधित्वेनाकार्यमपि सृष्ट्यादि संसृष्टरूपेण कार्यवदीश्वराख्यन्त त्वन्तदाख्यानाच्चेत्यर्थान्तरमपि गर्भीकरोति । सोऽयं द्वितीयः प्रघट्टः प्रकरण प्रभेदकः । सत्यप्येवन्नेश्वरादन्यदस्ति प्रधानन्निर्गुणमिति वदतां कः प्रतिब्रूयात् ॥

अस्तु प्रकृतेविषयावगतिः कथमित्यस्यकिमुत्तरम् । इदमुच्यते । समानइति सामान्येनपुंसकम् । एवञ्चेति संघातोविश्लिष्टश्च विश्लेषेचोऽप्यर्थः । तथा चैवञ्चसति परापरविज्ञानयोर्व्याप्त्याऽति समञ्जसेसति विज्ञेयैक्ये विज्ञानैक्योपसंहारा वित्येतस्मिन्नयाये, समानायामपि शाखायामेवं विज्ञेयाभेदे विज्ञानाभेदोपसंहारौभवतः । किंकुर्मो वयन्नयायस्यबलीयस्त्वात्, पुनरुक्तिस्तु कथञ्चित्परिहरणीयेत्यभिनयन्निवातिदिदेश सूत्रकारस्समानएवञ्चाभेदादिति भवति । तदिदमग्निरहस्यारण्यकयोरेवेतिसुष्टूपपद्यते विषयावगतिरिति सोऽयं किं कुर्मोवयमिति सूत्रकाराभिनयस्स्पष्टीक्रीयतेस्मपुनरुक्ते भीतिनाटितकेनैवञ्चेति सङ्घातमधृत्वैवोपास्यञ्च रूपं विद्यायाः, नहि विद्यमाने रूपाभेदेविद्याभेदमद्ध्यवसातुं शक्नुमः, नापिविद्याभेदे गुणव्यवस्थानमि"ति विवृण्वता भाष्यकृता ॥

इति समानाधिकरणम् ।

" सम्बन्धादेवमन्यत्रापि " " नवाविशेषात् "

कोऽस्य विषयः । अक्ष्यादित्यपुरुषवाक्यम् । कथमवगम्य-

ते। उक्तन्यायावद्योति नैवं कारेण। तथाच यथाशाखैक्ये प्रकरणाभेदेऽपि विज्ञेयाभेदाद्विज्ञानाभेदोपसंहारावेवमन्यत्रापि स्थानभेदेऽप्येवमेकविद्याभिसम्बन्धादुपसंहार इत्यर्थ गवेषणयाऽवगम्यत इति। नतन्न्यायोऽत्र प्रवर्त्तयतोऽस्ति विशेष इति सिद्धान्तः। अयमाशयः। एकविद्याभिसम्बन्धादिति वदतावक्तव्यम्। अत्राक्ष्यादित्यपुरुषाख्यंवेद्यमभिन्नमिति हिविद्यैक्यम्। तत्र प्राप्तमेवतस्मिन्नहरित्यहमिति च यथाश्रुतमेवोपनिषद्द्वयमिति किंकृतकरणेन। स्थानभेदेन निमित्तेनोभयत्राप्युभयमनुसन्धेयमित्याचक्षाणस्त्वतिशयित प्रज्ञः। यतस्तदेवनिमित्तीकृत्य विशिष्योपदिश्येते उपनिषदावितीति।

अत्रस्तएववेद्यभेदविद्याभेदौ। परन्तु भ्रान्त्यापूर्वपक्ष इतिकेचित्। अत्रोच्यते, उपसंहारेपरंभ्रान्तिः पूर्वपक्षिणः, एतेषान्तु वेद्यभेदविद्याभेदयोः, यत एतएकवेद्याभि संबंधादिति व्याहरन्ति। तत्र चैवमन्यत्रापीत्येववक्तव्यं भवति। यतोऽत्राभेदादित्यनुवर्त्तयितुं शक्येत। अविशेषाच्च। अविशिष्टं हि स्याद्रूपाभेदभ्रान्त्यापूर्वपक्षप्रणयनं। तत्रं कथमेतावतीभिरधिकरणकशाभिस्ताडितस्तद्रूदेवपूर्वपक्षयेदिति कृतधियोविदां कुर्युः। तस्मादेकविद्याभिसम्बन्धादित्युभयवादि सम्प्रतिपन्नएव हेतुरित्यवश्यमेवोपेत्यम्॥

अपिचभोः, शाखैक्येप्यस्ति विद्यैक्यम्। विद्यैक्येप्यस्त्यनुपसंहारइत्ययमस्ति विशेषइति दर्शयति सूत्रकारोविशेषादिति वदन्नित्येतत्पटहप्रताडनपुरस्सरं प्रकटीकर्त्तुप्रभवामोवयमिति निश्चिनुत अन्यथातु भेदावित्येवहिवदेदिति॥

"दर्शयतिच"

दर्शयति च श्रुतिरुपनिषदनुपसंहार गमकन्नामरूपाद्यतिदेशात्मकं लिंगं। अत्रोपसंहारमुदाहरता वक्तव्यं किमर्थोऽयमतिदेश इति, यदिस्थानभेदान्नप्राप्नुयादिति मतिमपाकर्त्तु न्तदानप्राप्नोत्येवानाति दिष्टमुपनिषद्द्वयं। यदि नामाद्यन्तराकरणात्तदोपनिषदन्तर

करणादेव नप्राप्नोति। नामाद्यन्तराकरणेऽपि वा किं बीजं। रूपगेष्णादीनां स्वरूपसमवायिनां भेदे विज्ञेयभेदेन विज्ञानं भिद्येत। तन्माभूदित्येवमर्थमिति वक्तव्यं। तदातु स्थानसमवायिन्याउपनिषदः कुतः प्राप्तिरिति। अथ दर्शयति श्रुतिरुपासनभेदं यतोऽनुपसंहार्यम्मत्वाति दिशति नामादींस्याहलक्ष्मणार्यइति चेत्, तथासति योपनिषत्सोपनिषदिति कुतोनातिदिष्टमित्यस्य किमुक्तरमाह। उपनिषदन्तरकरणान्नेत्याह। तर्हिनामाद्यन्तराकरणादेवातिदेशः, नतु विज्ञानभेदादिति प्रतिब्रूयाः। न्यायलब्धे किमतिदेशेनेतिचेत्, विज्ञानाभेदेनैकत्रैव नामाद्युपगमनेन चरितार्थं विज्ञानमिति मतिमपाकर्त्तुमिति गृहाण॥

इति संबन्धाधिकरणम्।

एवमुपसंहारानुप संहारानुबन्धितया प्रदर्शितं विशेषद्वयं स्वातिदेशसमर्थन परातिदेश पराकरणाभ्यां। अतः परमनुपसंहारानुबन्धि तयैवप्रदर्शयिष्यते विशेषत्रय मतिदेशावतार मुखेनैव, तत्रापि प्रथमं विभिन्नास्वेव बह्वीषुविद्यासु विद्यांगानामेवकेषाञ्चित् गुणानां प्राप्तिविशेषपरिहारः॥

"संभृतिद्युव्याप्त्यपिचात" इति

अथाधिदैविक विभूतिविचारानन्तरमाद्ध्यात्मिक पुरुषयज्ञ संपत्ति विचारोविशेषः॥

"पुरुषविद्यायामिवचेतरेषामनाम्नानादि" ति।

किमिदमेवमुदाह्रियते। इवकारस्थानेऽपिकारः पठ्यताम्। इदमेवं पठ्यते, पुरुषविद्यायामप्यसमाम्नानात्, कथमेव मुदाह्रियते, अपिकारः परं प्रक्षिप्यताम्। नहि वयमन्यथा सूत्रमन्यथाकर्त्तुं शक्नुमः। यद्युभे अपिपुरुषविद्ये अभिप्रेते तदापुरुषविद्यायामप्यसमाम्नानादित्येव भवितव्यं सूत्रेण। अन्यथा केभ्य इतरेकेवागृही-

तुं शक्येरन्। परस्परेषामित्यर्थं कल्पयामीति चेत्, एवन्तर्ह्यनाम्ना-दित्यस्य कथं सङ्गतिः। असमाम्नानादित्येवार्थं कल्पयामीति चेत्। सर्वमप्यर्थं कल्पयसित्वं परकीयत्वात् सूत्रस्य। सत्यंवद। अपि भवताप्येवमर्थायेत्थं सूत्रं ग्रथ्येत। तस्माद्विदुषो यज्ञस्येति सामानाधिकरण्य भ्रान्त्यार्थात् पुरुषयज्ञत्व समाख्यामवलम्ब्य पूर्वपक्षे पुरुषयज्ञत्वमेव नास्ति व्यधिकरणत्वात्। नचार्थिकार्थमादाय समाख्यासम्भवति। नहि दहनहोत्रं पञ्चदहन विद्येतिच समाख्यान्ति समाख्यातारः। अतः पुरुषोवावयज्ञ इतीयमेवपुरुषविद्या। तत्रैवेतरेषामनाम्नान्नोपसंहारः इत्ययमेवार्थ इत्यत्र भवन्तमेवप्रमाणीकर्त्तुं प्रभवामः। अन्यथान्यथात्वाधिकरणान्नास्य विविक्तन्यायता सम्भवतीति॥

इति पुरुषविद्याधिकरणम्।

यज्ञसामान्य सम्पात्ति विषयस्तदङ्गमन्त्रा द्यनुपसंहारात्मको विशेषोयमतिवृत्तः॥ अथाद्याऽभिचारादियज्ञ विशेषमन्त्राणांज्योतिष्टोमादि यज्ञविशेषाणां प्रवर्ग्यादि यज्ञांगकर्मणाञ्चोपासनविशेषेष्वनुपसंहाररूपविशेषः प्रवृत्ते॥

" वेधाद्यर्थभेदादिति "

अस्तिचात्र भाष्यं विशेषसम्बन्धस्तु प्रमाणान्तरादनुसर्त्तव्य इति॥ वेधादिमन्त्राणां लिङ्गादिनान्यत्रविनियोगावगमेऽपि शन्नोमित्र इत्यादीनान्तदनवगमाद्विद्यांगतेति प्राप्ते प्रतिविधत्ते। वेधाद्यर्थानामिव लिंगादिनाध्ययनादिशेषत्वावगमान्नशन्नोमित्र इत्यादीनामुपसंहार इति परकीयं भाष्यम्। तत्र वेधाद्यर्थसामर्थ्यं विजानतः पूर्वपक्षिणस्तन्मामवतुतद्वक्तारमवत्वित्यर्थ सामर्थ्यानवगमे हेतुर्वक्तव्य इति॥

इति वेधाद्यधिकरणम्।

अथार्थभेदः प्रवर्त्तते। यतोऽनुपसंहारविशेषमुपवर्ण्यापि संहारविशेषः प्रवर्त्यते। नचाद्यविद्येय संबद्धधर्मानुबंध्युपसंहारः प्रवृत्ते। किन्तु विद्याफलानुबन्धीत्युपसंहारविशेषएवायं। तत्रापि मन्त्र्याद्यनुपसंहारानन्तरमार्थवादिकस्त्युत्युपसंहार प्रवृत्तिरिति सुसंश्लिष्टोघट्टः। तथाच वेधाद्यर्थानभिसंहननवन्नस्तुत्यर्थोपायनस्यास्त्यनभिसंहति रित्यस्ति प्रवृत्तिसांगत्यम्। अत आह ॥

"हानौत्वि" ति।

अत्रदश्चोद्यते, कुतोगुणोपसंहारपरेपादे स्तुत्युपसंहारस्य प्रसक्तिरिति। तदिदं कुतोऽत्र ज्योतिष्टोमादि कर्मोपसंहार प्रसक्तिर्यतोऽत्रान्यवर्त्यतेति प्रतिवक्तव्यम्। एवं पूर्वमनुपसंहारस्यैव कृतत्वेन कथं गुणोपसंहारविचारप्रसङ्गेनेति भाष्यतामिति च चोद्यते। तदिदन्तवभाष्यार्थानवधान निबन्धनम्। यतोनगुणोपसंहार प्रसङ्गेनेति भाषितम्। किन्तु तद्विचारप्रसङ्गेनेति। नह्यनुपसंहारविचारात्मकोऽयं पादः कृतेऽपि तद्विचारे। यतः कृतेऽप्यधर्मविचारेनतन्मीमांसा, किन्तु धर्ममीमांसैव। एवमब्रह्मविचारेऽपि यथा ब्रह्ममीमांसैव तथा गुणोपसंहारविचारएव भवति तदनुबन्धिविचारेपीऽति प्रतिवक्तव्यम् ॥ अपिचोपायन मेवोपसंहृत्योपयन्तु द्विषन्तोऽघानिमदीयानीत्यनुसन्दधतां किमपराद्धं वेधादिमन्त्रजपमात्रेण परं भवताम्। तत्र व्यर्थ एव पूर्वन्तदनुपसंहार प्रतिपादनप्रयासो भवतामिति। स्थानभेदनिबन्धनेन विरोधेनैकाविद्येऽपि नोपसंहार इति विशेषमुपक्षिप्य तत एवाधिदैविकविभूतिविरोधं पुरुषापुरुषविद्यात्वविरोधं वेधाद्यर्थविरोधश्चावष्टभ्यानुपसंहाराविशेषा उपपादिताः। अथ शाखैक्येऽप्युपास्याभेदानिबन्धनमविरोधमवष्टभ्योपक्षिप्तमुपसंहारविशेषमुपजीव्यतोनव प्रपञ्चयितुमविरोधप्रकरणमारब्धं हानाविति। तादिदमवसाययिष्यते यावदधिकारमित्यन्तेन। तत्रच प्रथमं सुकृतदुष्कृतहानाद्यविशेषीकरणं, ततस्तत्समयसमीकरणम्। ततो गतेरुभयथा-

र्थत्वेनाविरोधसमर्थनम्। ऊर्ध्वन्तु, तस्या अनियमेऽपि सर्वासु सगुणास्वविरोधोपपादनम्। अनन्तरञ्च विद्याया अविरोधेन मोक्षसाधनत्वसमर्थनमित्युपपादनप्रकारः। एवं प्रसङ्गात् प्रसङ्गेनोपर्युपरि-पदात् पदं विन्यस्य विशेषाद्विशेषमुपधावन् समापयामास विशेषविचारमिति विवेक्तव्यम्॥

अतः परं परकीयमधिकरणं विलिख्यते॥ सन्निद्ध्याम्नातवेधादिविचारप्रसङ्गेन तादृशहानोपायनविचारस्सुसङ्गतो भवति॥ हानाविति केवलोपायनस्याप्युपलक्षणम्। हानस्योपायनस्योभयोर्वेति विकल्पेनैवानुचिन्तनम्। नतूभयोरेवेति। तथासति कौषीतकिवाक्येनैव सिद्धयोरन्यत्र पृथगाम्नानवैयर्थ्यात्। नचाद्ध्येतृप्रतिपत्तृभेदेन परिहारः। अविशेषपुनश्श्रवण एव तन्न्यायात्। नचविद्याभेदेन व्यवस्था। सर्वविद्याशेषत्वादस्यानुसन्धानस्येति प्राप्तं प्रत्याह। हानाविति॥ हानमात्रश्रवण उपायनन्तन्मात्रश्रवणे हानञ्चोपनिपतेदेव। हानवाक्यशेषत्वादुपायनवाक्यस्य। विदुषात्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वादित्यर्थ इति॥

अत्रोच्यते। यदिशमदमादिसंपन्नेन सर्वभूतसुहृत्तमेनापि ब्रह्मविदाप्रहीणस्य स्वीयस्य पापस्य स्वविद्विषि प्रवेशोऽनुचिन्तनीयस्तदाकिमपराद्धं वेधादिचिन्तनेनेति पूर्वमेवोक्तम्। अतएव नोपायनं हानशेषः। किन्तु तच्छब्दस्तच्छब्दस्येति ज्ञापयत्युपायनशब्दशेषत्वादिति सूत्रकारः॥ हानोपायनचिन्तनं हि तत्सिद्ध्यर्थत्वात् सर्वविद्याङ्गमिति भवदभिमतम्। नेदं साधीयः। यतोमास्तूपायनं हानं परं भवतु। तत्र कानामहानिर्द्विदुष इति। नहि परैरनुपायने पुनरपि प्रसजेत् प्रहीणमपि पापमिति कल्पयितुं शक्यम्। विद्यासामर्थ्यविघातापत्तेः॥ नच विद्यैवहापयित्वाप्रापयति विद्विषः पापमिति वाच्यम्। तत् सिद्ध्यर्थत्वात्तच्चिन्तनस्येति स्ववचनविरोधापत्तेः॥ अथाप्यभ्युपेत्य वदामः॥ विद्याजन्मन्येव येविद्विषन्ति त एव पापमु-

पयन्ति नतु पूर्वभवेषु विद्विषन्तोऽपि । तथासति शुकवामदेवादीना-मपीदं युगीनविद्वत् पापप्रविभागापत्तेः । नहि कदाचिदपितइमन्न विद्विषन्तिस्मेति वक्तुं शक्यमनादौ संसारे । तथैव समकालिकाना-मपि विदुषां परस्परपापप्रविभागप्रसंगः ॥

नच तत्तद्विद्यासामर्थ्यान्न तेषां पापप्रविभागप्रसंग इति वा-च्यम् । इदं विद्वदनुचिन्तनसामर्थ्याद्धठादेव तेषु पापप्रसरप्रसंगात् । अस्याश्चाचिरोत्पन्नत्वात्ततो बलीयस्त्वात्, परस्परकलहायमानासु वा विद्यासु सर्वेषामपि मोक्षाभावप्रसंगात् । तथाच यस्य विदुषो विद्याजन्मनि विद्विन्धेव नास्ति तत्पापस्यानुपायनप्रसंगः ॥

नच तादृश एव नास्तीति वक्तुं शक्यम् । तादृशानामेव शु-कवामदेवादीनां बहुळमुपलब्धेः ॥ पूर्वपक्षोऽपि भवति दुर्भिक्षो भ-वताम् । कोऽयमपूर्वः पूर्वो बुभूषति भवताम् । यस्तु विकल्पेनैव सर्वविद्यांगतयानुचिन्तनत्रितयमपि समर्थयितुं प्रावर्तत । नतावद्व्य-स्थित एवायं विकल्प इति कल्पयितुं शक्यते तेन । तथासति यत्र न किञ्चिदपि श्रुतन्तत्र कस्याप्यप्राप्तेः । प्राप्तौ वेदमेव चिन्तनीय-मिति व्यवस्थाऽसिद्धेः । तस्मादैच्छिक एवोपेयः । तत्र हानमात्रपक्षेऽ न्यासिद्धिः । तत्तत्सिद्ध्यर्थत्वात्तत्तच्चिन्तनस्य । उपायनमात्रचिन्तने तूभयमपि न सिद्ध्येत् । प्रहीणविषयत्वादुपायनस्य । नचान्यतर-चिन्तनेऽप्युभयमपि सिद्ध्यतीति वक्तुं शक्यम् । अननुष्ठापकत्वेना-प्रामाण्यापत्तेरुभयश्रवणस्य । तस्माच्चण्डप्रज्ञोऽयन्तव पूर्ववादी । ततोऽ पि भवान् । यस्तु तं समाधातुं प्रवृत्त इत्यलमधिकेन ॥

यद्विधूननन्तद्धानमेवेति सिद्धवत्कारेण प्रवृत्तं पूर्ववर्णकं सम-र्थयितुमधिकरणान्तरसदृशतयोत्तरवर्णकमपि विवक्षितमिति तदक-रणादूनं भाष्यान्तरमिति तत्पक्षीयैरवश्यमवधारयितव्यमिति

हानाधिकरणम् ॥

समीकृत्य सर्वास्वपि विद्यासु हानोपायनशब्दौ तत्समयसमीकरणाय प्रवर्त्तेते " सांपराय " इति । सांपरायएवेत्यर्थः ॥

नन्वप्रहीणकर्मणो नोत्तरेण पथा गमनं भवितुमर्हति । कर्मप्रहाणिश्च विद्यासामर्थ्यादिति स्थिते कथं केषाञ्चित् साम्पराये, केषाञ्चिद्व्यद्ध्वनीति पूर्वपक्षस्समुन्मिषेत् नोन्मिषेदेव ॥

अत एवाह श्रीमाल्लक्ष्मणाचार्यस्सर्वेषामप्यर्द्धं व्यध्वन्यर्द्धं सांपराये नश्यति श्रुतिद्वयप्रामाण्यात् , अथकथमेवमर्द्धजरतीयं कल्पयितुं शक्यम् । सत्यपि पुष्कले कारणेऽर्द्धं पूर्वमर्द्धन्तुपश्चात् कार्यन्निष्पद्यत इति केन वा कल्पयितुं शक्येतेति चे, न्न । सत्येवोभयथागतिश्रुतेरर्थवत्त्वं स्यात् , अन्यथा हि साम्पराय एव सर्वकर्मक्षये सूक्ष्मशरीरस्यापि नाशप्रसङ्गेन केवलस्यात्मनो गमनमेव नोपपद्येतेति विरोधो हि प्रसज्येतेति ॥ नैष पक्षस्साधीयान् । अर्द्धजरतीयादविमोक्षात् , व्यध्वन्यप्यर्धम्मनो नश्यत्यर्द्धन्न नश्यतीति हि कल्पयितव्यं भवति । ताम्मनसान्येतीति वत् ब्रह्मलोकेऽपि मनसैतान् कामान् पश्यन् रमत इति तेनैव मनसा भोगोपपादनात् ॥

अथ कोवा जानाति साम्पराये वा व्यध्वनिवा कर्मक्षय इति । तस्माद्यथाश्रुत्येवोपेतव्यम् । तत्र न पर्यङ्कविद्या कर्मक्षयकरी । किन्तु विरजातरणस्मरणमेवेति कल्पयितव्यमिति चेत् । एवमेव ॥ अथ सूक्ष्मशरीरसद्भावः कथमिति चेत् , तेषां वा कथम् ॥ उपपन्नस्साम्पराय एव सर्वकर्मक्षयः । तल्लक्षणार्थोपलब्धेः । क्षीणकर्मणोऽपिस एकधा भवतीत्यादिना देहसम्बन्धरूपार्थोपलब्धेः । विद्या हि स्वयं सूक्ष्मशरीरानारम्भिकापि तदारम्भकर्मविनाशेऽपि स्वीयं फलमनुभावयितुं सूक्ष्मं शरीरं स्थापयति । यथा सस्यादिसमृद्ध्यर्थमारब्धमपि तटाकादिकन्निर्वृत्तेऽपि सस्यादिके तदशिथिलयन्तस्तत्र स्नानपानादिकं कुर्वन्तो वर्त्तन्ते लोका इति ॥

मिथ्यैवैतत् । यतस्तन्नाशनासमर्थामेव तत् परिपालनसमर्थां कल्पयन्ति । यत इयमनुपोष्यामृतत्वस्यैव साधिका । सूक्ष्ममपि शरीरन्नकर्मारब्धं किन्त्वविद्यारब्धम् । गतेरिति स्थिते तच्छ्रुतेरिति लक्षणाप्यन्न्याय्या । उपपन्नस्त्विति तु काराभावाच्च न गतिसूत्रं पूर्वपक्षः । अविरोधावलम्बिनि सिद्धान्तिनि पूर्वपक्षिणा प्रथममेव विरोध आपाद्यमान आपाद्येत । अन्यथाऽन्यथाहि विरोध इति सिद्धान्तिनैवापाद्यत इति साधुसङ्गच्छते । अतोगतेरित्यधिकरणान्तरमेव । श्रुत्यविरोधायार्थस्वभावाविरोधाय च यथेच्छं पदसमन्वयः कर्त्तव्य इति छन्दत इति सूत्रं व्याकुर्वन्ति । किमिदमपि वक्तव्यम् । उच्यमानमपि कथमवशिष्टे विचारेऽस्य प्रवृत्तिरवसान एव वक्तव्यस्येति नेदं साधुव्याकरणमिति ॥

साम्परायाधिकरणम् ॥

अथ यदर्थः कर्मक्षयस्तामेतां गतिमुपपादयन्नाह ॥

" गतेरर्थवत्वमुभयथे " ति ।

कर्मक्षयकालस्याविशेष एवाविरोधः । गतेस्तु विशेष एव । यतोऽन्यथा भवति विरोध इति सुष्टूपपद्यते सूत्रमद्वैतिनाम् ॥ कथमेवं व्यपस्थापयितुं शक्यतेद्याऽपि भेददृष्टिमविमुञ्चत्सु बहुषु वावदूकेषु जीवत्स्विति चेत् ॥ उपपन्नएवायं विशेषस्तल्लक्षणार्थोपलब्धेर्लोकवदित्यवश्यवक्तव्यश्चोक्तमित्यवधारयितव्यम् ॥

इति गत्यधिकरणम् ॥

यद्यविरोधायोभयथाभावोगतेस्तदायास्वियमर्थवती सगुणासु तत्रापीयं क्वचिदेव नसर्वत्रेति विशेष एवैष्टव्योऽविरोधायैव, अन्यथा हि प्रकरणाविशेषपुनश्श्रवणे विरुद्ध्येते इति प्राप्तं प्रत्याह ॥

" अनियमस्सर्वासामिति "

नन्वनवतार्य ब्रह्मलोक प्रपदिनीमर्चिरादिकां गतिन्नसाक्षादेवतत् प्रापिका ब्रह्मविद्येति स्थिते कथं कासुचिदप्राप्तिर्गतेश्शक्यशङ्केति चेत् ॥ यथा यथा क्रतुन्यायावलम्बिन्येव विद्येति स्थिते, अब्रह्मक्रतुरपि पञ्चाग्निविद्याभवति ब्रह्मप्रापिका तथेतिगृहाण ॥

एवं तर्हि एषां पञ्चाग्निविद्यापि ब्रह्मविद्येत्यभिमानः कागतिरेषां श्रीभाष्यकाराणामितिचेत् । अगतिरेवेति गृहाण ॥

अथवापञ्चाहुति नियतेऽपि केषाञ्चित् पुरुषवचस्त्वे यथानकेषाञ्चित्तन्नियम एवमिति भवति श्रीभाष्यकाराणामपि गतिरिति गृहाण ॥ अथैवं सत्यास्तामेवनियमः, किंवात्रानियमसमर्थनायासेनेति चेत् ॥ तत्राहत्यवादेन तथोपगमसम्भवेऽप्यत्र तदभावान्ननियमस्सम्भवति । प्रत्युत प्रत्यक्षानुमानाभ्यामनियम एवोपगन्तव्य इति गृहीतव्यम् । अस्तु गतेरेवमनियमः । तच्चिन्तनन्तु कथम् । तस्य तत्सिद्ध्यर्थत्वे तस्याप्यनियम एवस्यात् ॥ अस्तिचात्र प्रमाणन्तच्छेषगत्यनुस्मृतियोगाच्चेति पारमर्षमेव वचनम् ॥

अथैवंसति यदुपकोसलविद्यायां पञ्चाग्निविद्यायाञ्च तुल्य वद्वचनन्तदुभयत्राप्यनुचिन्तनार्थमिति भाष्यकृद्वचनं विरुद्धयेतेति चेत् ॥ एवंसति नियमएवात्रन्याय्यस्स्यात् । यतोद्ध्यानन्निरन्तरादरसेवितमन्त्यप्रत्ययवशेनदृष्टे नैवद्वारेण ध्येयात्मसाक्षात्कारायकल्पत इत्याप्रायणसूत्रे वक्ष्यते । तत्र गतिचिन्तनं कोपयुज्यते । नहि गमनसमये गच्छामीत्यनुभवितुं शक्नोत्युपासकः । यतोवदिष्यत्युभयव्यामोहादिति तस्य तदाव्यामुग्धतां सूत्रकारः । अतएवाहस्म गत्यनुस्मृतिव्यतिरेकेण विद्यासामर्थ्यं हार्दानुग्रहश्च गतिप्रापकतया तदोकोग्रज्वलनसूत्र एव । अतएव च सर्वत्रापीत्यनभिधायोभयत्रापीत्यभिधानं भाष्ये ॥ एवञ्च सत्यब्रह्मक्रतौ पञ्चाग्निविद्यायामदृष्टा-

धायकतयैवोपयुज्यते गतिचिन्तनम् ; उपकोसलविद्यातु यद्यपि ब्रह्मक्रतुरेव । अथाप्यपेक्षत एवाचार्यानुपदिष्टेति तदुपादिष्टगतिचिन्तनाहितमपूर्वम् । अतएवाचार्याद्धैवविद्याविदिता साधिष्ठं प्रापदिति श्रवणेन नास्माभिरुपादिष्टाकार्यक्षमेयं भवितुमर्हतीत्यालोच्य तद्नाचार्यैराग्निभिराचार्यस्तुते गतिं वक्ता, आवश्यकश्च ते तेन गत्युपदेशः । यतस्तदुपदिष्टगतिचिन्तनवशेनैवेयं कार्यक्षमाकारयितव्या भवतीति निगूढमुपदिष्टम् । अतएवच तत्रसातिशयेन स्तूयते गतिर्यदुचैवास्मिन् शव्यं कुर्वन्तीत्यादिना । तस्मात् सुष्टूक्तमुभयत्राप्यनुचिन्तनार्थ मितीतिमन्यामहे ॥

इत्यनियमाधिकरणम् ॥

———

अथ यत्र गतिरेव नास्ति तस्याः फलोपधायकत्वप्रतिपादनार्थं सूत्रम् ॥

" यावदधिकारमवस्थितिरि " ति ॥

नन्विदं सूत्रमनियमसूत्रात् पूर्वं ग्रथयित्वा साम्परायसूत्रशेषतया विवृतम् । केन । तान्त्रिकेण । कथम् । ननु ज्ञानिनान्देहपातसमये निरवशेष कर्मक्षयः। तदनन्तरन्देहान्तरसङ्गत्या सुखदुःखाद्यनुभवोनेति यदुक्तन्तदयुक्तम् । यतस्तादृशा अपि वसिष्ठापान्तरतमः प्रभृतयो देहान्तरमापन्नाः पुत्रजन्मविपत्त्यादि निमित्त सुखदुःखानुभवभाजश्चोपलभ्यन्त इति तत्राह यावदिति ॥

प्रारब्धकर्मनाशानन्तर भाविनि साम्पराय एव सुकृतदुष्कृतविनाश उक्तः । एतेतु नैकभविकप्रारब्धकर्माण इति नान्तरालिकदेहविदाहे सुकृतदुष्कृतनाशएषामिति न को पि दोष इति ॥ एवं सति तदधिगम उत्तरपूर्वाघयोरित्यधिकरणविरोधः । प्रारब्धनाशानन्तर भाविसाम्पराये हि सर्वस्यापि सञ्चितत्वेनोत्तरस्यैवाभावादि-

ति । अत्र यद्वक्तव्यन्तत्तत्रैव वक्ष्यते । अतो निर्गुणविद्याशीलिनो निश्शेषनिवृत्तकर्माणश्च वसिष्ठापान्तरतमः प्रभृतयः प्रारब्ध विनाशं परं प्रतीक्षन्त इत्येव युक्तम् ॥ किञ्च हानिसूत्रे नोपसंहारे विवादः। अप्रहीणकर्मणो गत्यभावात् । किन्तु विकल्पसमुच्चययोः । तथाच सर्वेषामपि समुच्चयचिन्तनं साधितन्तत् सिध्यर्थत्वात् । इह तु वसिष्ठादयोऽप्रहीणकर्माणः । देहपातानन्तरङ्गत्यनुपलब्धेरिति गतिकर्मक्षययोर्हेतु हेतुमद्भावश्चावधारित इति कुतोऽतःपरमपि नियमाशङ्कागतेः ॥ अस्माकन्तु यत्र हानमात्रश्रवणन्तत्राप्युपायनशब्दस्सन्निपतेदित्येतावन्मात्रे प्रथमाधिकरण प्रवृत्तिः । तदनन्तरस्य तु सच कर्मक्षयस्साम्पराय एव नतु व्यद्ध्वनीत्यत्रैव । तृतीयन्तु गतेरुभयथाभावे प्रावर्त्तत इति भवत्युपरिनियमाशङ्केति सुष्टुसूचयति सर्वासामिति ॥ तदनन्तरन्तु नैतेषां साम्परायमपेक्षते कर्मक्षयः करतलामलकवदध्यक्षीकृत ब्रह्मात्मभावानाम् । किन्तु कुतो देहपातादनन्तरमेव नकैवल्यभाजोऽभवन्नित्यस्य प्रवृत्तिरिति जानन्त्येव सर्वेऽपि न्यायनिष्णाता इत्यलं प्रसक्तानुप्रसक्त्या ॥

इति यावदधिकाराधिकरणम् ॥

अथ यावदधिकारंस्थित्वा ततः परं यदात्मनैव केवलमवतिष्ठन्ते वसिष्ठादय स्तदिदमधिक्रियते ॥

"अक्षरधियान्त्ववरोध" इति ।

इयमेव सङ्गतिरभिभाषितापूर्वाधिकरण एव "यथा सौभगवान् सवितेत्यारभ्य, नैवोदेतानास्तमेतैकलएव मद्ध्येस्थातेति श्रुतेरि"त्यन्तेन भाष्येण । अतएवास्यनानन्दाधिकरणानन्तरता । आनन्दाधिकरणन्तु समञ्जसेन व्याप्तिप्रदर्शनार्थमेवतत्र प्रावर्त्तत ॥ परेषान्तु सर्वविद्यासाधारणगुणोपसंहारपरमत्रैव स्यात् संगतमानन्दा-

धिकरणम् । इदमेव वा तत्रैव तादृशम् । नचास्ति किंचिदपि कारणमनयोर्व्यवधायकम् ॥ अस्तिचात्र कश्चिद्विशेषः । आनन्दादय इतिवदस्थूलत्वादय इत्यनुक्तेः, धियामित्यवरोध इति चाधिकोक्तेश्च । तथाच यथागोष्ठे गवामवरोधस्तथाक्षरे तद्धियामवरोध इत्युक्तं भवति ॥

तेनच नेमे मनोमयत्वादय इव गुणतयाऽऽनन्दादय इव स्वरूपतया वा विज्ञेयानुबन्धिनोभवन्त्यस्थूलत्वादयः । अभावरूपत्वात् । किन्तु तद्धिय एवाक्षरेऽवरुद्ध्यन्तेऽनक्षरेभ्योऽक्षरव्यावर्तनार्थम् ॥ प्रतियोगिरूषिताश्चैते यथास्वमेव विभिन्नविज्ञानविषया अप्यक्षरस्वरूपावगमार्थत्वादनक्षरापोहस्य तावन्मात्रेणानुपरममाणा अन्ततोऽखण्डामेवैकान्तद्धियञ्जनयन्तीति तत्र समानाभवन्त्येते । यथा प्रतिस्वमेव चरन्तोऽप्यन्तत एकगोष्ठीया एव भवन्ति गावः ॥

आनन्दादयस्तु स्वयमखण्डैक ज्ञानावरोधिन आर्थिकास्वेव व्यावृत्तिविषयासु धीषु विभिन्नतया भवन्ति विषया इति वैषम्यम् ॥ तद्धीजनकत्वमप्यभावस्य तद्धीजनकधीविषयत्वमेव । कुत्रापि स्वस्याहेतुत्वात् । नच स्वधियं प्रत्यस्ति हेतुतेति वाच्यम् । यतो नैय्यायिक एवेदश्चोद्यश्चोद्यः । यस्त्वभावधियमद्ध्यक्षम्मन्यते । न वयमनुपलब्धिगम्यमभावमुपयन्त इत्येतत्सर्वमत्र साधितं भवति ॥ अक्षरशब्दस्त्वभावबोधकोपि व्याप्त्यर्थेन भवति स्वशब्दोपीत्यक्षराधिकरणएव पराक्रान्तमस्माभिः । तदिदमक्षरधिया मक्षरेऽवरोधं वदता सूत्रकृता सम्यगनुमोदितमिति मन्यामहे ॥

सामान्यमपि गुणानामाश्रयसामान्यमुपकारसामान्यश्चेति द्विविधम् । तदिदं विवेचितं पूर्वमेव । तत्र प्रतियोगिनमनपेक्ष्य स्वतो निस्वरूपाणामभावानामुपाकारसामान्यमेव भाविकम् । आश्रयसामान्यन्तु वैज्ञानिकमेवेति द्योतयितुं प्रथममुपकारसामान्यस्य ग्रहणं सामान्येत्यर्थसामान्यादितिवत् । वैज्ञानिकन्त्वाश्रयसामान्यं पश्चात्त-

द्भावशब्देन विवक्षितम् ॥ इत्थञ्च सामान्यशब्दस्याश्रयसामान्य परतयोपवर्णनं कथञ्चिदर्थवैमत्यसम्पादनायैव परेषामिति विवेक्तव्यम् ॥

इत्यक्षरद्ध्यधिकरणम् ॥

एवं यावदधिकारं यथा स्वमवस्थितानामक्षरधियामधिकारोऽपरमेऽक्षर एवावरोधो वसिष्ठादीनां यथायथा स्वमेवासायश्चरतामेकगोष्ठीयानां गवां गोष्ठ एव सायमवरोध इत्येवमर्थमनयोरधिकरणयोर्नैरन्तर्यमवश्यंभावीति तथैव ग्रथयित्वाथ उपचयापचयौ हि भेदे । निर्भेदन्तु प्रधानमित्युक्ते, कथमस्य निर्भेदता, यतोऽस्येवार्थादीनामप्युत्तरोत्तरं परत्वं प्रतिपादितमितीमामाशङ्कां सद्य एव समाधातुं यथानन्तरमेवाद्ध्यानाय प्रयोजनाभावादित्युक्तमेव मिहापि कथमक्षरात्मनैवावतिष्ठेरन्वसिष्ठादयः पातृपाययितृ भावेन विवक्षिते जीवेश्वरविभाग इत्येताम्मतिमपाकर्तुमाह ॥

" इयदामननादि " ति ॥

इयदेवामनन्ति वेदान्तानातोऽधिकमित्यभिप्रायगर्भम् । इयत्ता परिच्छेदायैव पातृपाययितृभावादयोऽनूदिता नतु विवक्षिताः । तेषां गुहाप्रवेशादीनां विवक्षायां वाक्यभेदापत्तेः ॥ इयदामननन्तु तादात्म्योपदेशनार्थम् । तच्चसम्यगेवोपपादितं भाष्ये ॥ यद्यपि भेदकधर्मानुवादपुरस्सरं विभागप्रतिपादनार्थमियदामननमितीयदामननादित्युक्तमित्यर्थान्तरमप्याशङ्कितुं शक्येत, तथाप्युपसंहारपरे प्रकरणे तथा विवक्षानाञ्जसीस्यादित्युक्तार्थपरमेव सूत्रम् । इदञ्चोभयत्र समानमिति न विद्याभेद इति सिद्धम् ॥

अथेदमेकपदं सूत्रमुत द्विपदम् ॥ अथ कस्यामननमिति सामर्थ्येन सिद्धे समासे कुतः पुनरियमाशङ्केति चेत् ॥ आशङ्कते तान्त्रिकः । यत आहास्थूलत्वादीनामिव सर्वकर्मत्वादीनामपि प्रधाना-

नुवर्त्तिनां स्यात् सर्वोपासनसम्बन्ध इत्याशङ्क्याह । इयदेवसर्वसम्बद्धम् । आमननादनुचिन्तनात् । इयतामेव प्रधानचिन्तन प्रयोजकानुचिन्तन विषयत्वादिति । अथ वेदेनप्रतिपादनमामननमित्येव स्वारसिकोर्थः । स्यात् सर्वेषामेवानुचिन्तनमिति पूर्वपक्षे । इयतामेवानुचिन्तनादिति निर्युक्तिकश्च हेतूपन्यासः । असङ्गतमेवात्रेदमधिकरणमिति पूर्वमेवोपपादितश्च । अतोऽधिकरणान्तरमेवेदं सूत्रमेकपदमेव चेति चेत् ॥ ॐ ॥

इतीयदामननाधिकरणम् ॥

यथाद्ध्यानाधिकरणे, आत्मशब्दाच्चेत्यात्मनः परत्वमुपक्षिप्यात्मग्रहीतिरिति परस्यात्मत्वं प्रसाधितमेवमियदामननादित्यत्राप्यात्मनः परत्वमुपपाद्याथेदानीं परस्य सर्वान्तरत्व प्रतिपादनद्वारा संघातातिरिक्तमशनायाद्यतीतञ्च यदात्मतत्वन्तत्वं प्रतिपादयितुं प्रवृत्ते ॥

" अन्तराभूतग्रामवत्स्वात्मन " इति ।

पूर्वन्तु जीवपरयोरियत्तया द्वित्वेन तादात्म्योपदेशार्थमामननमियदामननम् । अत्र पुनरेकस्यैव सर्वान्तरस्य संघाताद्यतिरेकाशनायाद्यत्ययाभ्यां प्रतिपादनायेयदामननं द्विरामननमित्यस्त्यनयोरत्यन्त साङ्कत्यम् ॥ नहि द्वौसर्वान्तरौ भवतः । आत्मातु सर्वान्तरइति सुप्रसिद्धः । तत्र कथंविनाऽत्मत्वं स्यात् सर्वान्तरता परस्येति स्पष्टमेवेदमावेदयति शुद्धाद्वैतानिष्ठत्वं सूत्रकारस्य ॥

किंवात्र प्रतिपद्यते तान्त्रिकः । निलीय पलायनम् । कुतः । यतो यत्किञ्चिदेव प्रलपितुं प्रवृत्ते । कथम् ! अन्तरा, उषस्तप्रश्ने सर्वान्तरत्वं भूतग्रामवत स्स्वात्मनः प्रत्यगात्मनः प्रतिपाद्यते आपेक्षिकम् । कहोळप्रश्ने तु परस्य मुख्यं सर्वान्तरत्वम् । अन्यथा रूपभेदानुपपत्तेरिति चेत्, न विद्याभेदः । उपदेशवत् । तत्वमसीति-

नवकृत्व उपदेशवादित्यर्थः। प्रकारभेदेनोपदेशस्य का गतिरिति चेत्। व्यतिहारः परस्परगुणोपसंहारः कर्त्तव्य उषस्तकहोळाभ्याम्। तथाहि विशिंषन्ति याज्ञवल्क्यवचनान्युद्दालकवचनवत् ॥

अथ तत्रापि नवकृत्व उपदेशेसति कथमैकविद्यमवगम्यते। हि यतस्सैव परादेवता सर्वत्रानुवर्त्तते। सत्यादयश्च गुणास्तथैवानुवर्त्तन्त इत्यन्तरत्वाधिकरणमिति ॥

सोयं पृष्टो व्याचष्टाम्। कोऽयं भूतग्रामवत्स्वात्मा। प्रत्यक्, तत्र स्वपदार्थः कः। स्वयमेवात्मा। तर्हि भूतग्रामवदात्मन इत्येव कुतो नोच्यते। नोच्यते परमात्मव्यावृत्यर्थं यतस्स्वेत्यपेक्षितम्। तथापि स्वस्याप्यात्मा पर इति विपरीतग्रहणं कुतो नस्यात्। अस्तु भूतग्रामवदिति किमर्थं विशेषणम्। सर्वान्तरत्वस्यापेक्षिकत्वद्योतनार्थम्। अथ भूतग्रामस्य प्राणिवर्गस्येव स्वस्याप्यात्मन इति मुख्यमेव सर्वान्तरत्वं कुतो न गृहीतं स्यात्। अन्तरेत्युषस्तब्राह्मणोक्तमन्तरत्वमेव गृहीतमिति च कथं गृहीतिः। अतोऽनर्थग्राम एवार्थग्रामतयोच्यते भवता। किञ्च किमयं याज्ञवल्क्योपदेशोनोपदेशः। यतउपदेशवदित्येव पठ्यते। किं वा नास्माकं व्यतिहारः, यत उषस्तकहोळयोरिति वर्ण्यते। सैवेति परदेवतापरामृश्यत इति च कथं वा साधयितुं शक्यते सैवेयं विद्येत्यर्थसम्भवे ॥

श्रुण्वत्राधिकरणानामुत्तरोत्तरसाङ्गत्यम्। अर्थगतं द्वित्वेनेयदामननमुपवर्ण्य शब्दगतन्तत्तादृशमुपसंगृहीतमन्तराधिकरणेन। अथाधिकरणद्वयेन योयमार्थिक आत्मत्वब्रह्मत्वयोर्व्यतिहार उपसंगृहीतस्स एव शाब्द उपवर्ण्यते व्यतिहारसूत्रेणाधिकरणान्तरेण। तत्र च सगुणनिर्गुणविज्ञाने संगृहीते। यथान्यथात्वाधिकरणे प्रधानाप्रधानविज्ञाने दृष्टान्तदार्ष्टान्तिकतया। यथा वा विशेषाधिकरणयोरुपसंहारानुपसंहार विशेषौ। अत्रापीयदामननमुपसंगृहीतं भवति। आत्मत्वपरत्वयोस्सगुणनिर्गुणयोश्चोपसं-

ग्रहात् ॥ ततश्चोपस्थितेऽतस्तद्वचनादिति प्रवृत्तं सैवहीत्यधिकरणम् । यतः पूर्वमुपस्थिते सत्यादित्यपुरुषविज्ञानेऽत उपस्थितेरेव हेतोरनन्तरन्तद्वचनम् । इदमेत्र प्रकृताकर्षणादिति हेतूपन्यासमुखेनोपसूचितं भगवता भाष्यकृता । आकृष्टाचसैवेति सूत्रकृता ॥

प्रकृताकर्षणश्च सौत्रं श्रौतश्चेति द्विविधम् । सौत्रश्चोपस्थितेऽतस्तद्वचनात्मिकायास्सङ्गतेरुपष्टम्भकं सैव पूर्वाधिकरणे प्रकृतैवेयं विद्येति । श्रौतन्तु सयोहैतमिति या प्रकृता सैवेयन्तद्यत्सत्यमित्यनुकर्षादिति । इदश्च व्यतिहारस्योपष्टम्भकम् । यतस्सैवेयमित्युक्तेनुक्षणमेवेयमेव स्येत्यनुपतति । इयदामननन्त्वतिवृत्तम् ॥ ततस्सत्येब्रह्मण्युपस्थितेऽतोयदुपस्थितन्तन्निष्ठं सत्यकामादितद्वचनं कामादीति । अनुपस्थिते कथं कामादीत्यर्द्धनामानिर्देशस्यात् । प्रथमन्तूपस्थितस्यैव वचनम् । पश्चात्तूपस्थितसम्बन्धिन इति विशेषः ॥

व्यतिहारस्त्वत्राप्यनुवर्त्तत इति सूच्यते सगुणनिर्गुणधर्मयोरितरत्र तत्र चेति । सच सगुणमेव निर्गुणमपेतोपाधिकल्पनं, निर्गुणमेवसगुणं कल्पितोपाधियुक्तमित्येवमर्थः जीवस्येवेश्वरस्यापि प्रधानतादात्म्यप्रतिपादनस्यावश्यम्भावात् । नतूपासनार्थः । तथाच व्यतिहारसूत्रोपात्तमिदमुभयमत्र व्यतिहृतं भवति । इतोऽत्यगाद्व्यतिहारः । यत इतरत्र तत्र चेत्युपसंहृतः । यथा व्यतिहार इतीयदामननं द्विरामननं विनिमयात्मना व्यतिहारे यदामननश्च॥ अथ यत्रोऽपस्थितेऽतस्तद्वनन्तामेव श्रुतिमुदाहृत्य व्याकर्त्तुम् ॥

“ आदरादलोपः, उपस्थितेऽतस्तद्वचनादि ” त्याहेति

सुसङ्गतमत्रेदमधिकरणम् ॥

अनयैव सङ्गत्या तन्निर्द्धारणानियमः प्रवर्त्तत इति सुष्टु सूच्यते शास्त्रकृद्भ्याम् । कथम् । यतो वैश्वानरविद्यांगप्राणाग्निहोत्रसम्पत्तये सम्पाद्यतयोपस्थापितानि कर्मांगानि तदापरामृश्यन्ते सू-

त्रकृता । भाषितश्चाविस्त्रव्यमेव सन्ति कर्माङ्गव्यपाश्रयाणीति भाष्यकृतेति ॥ परस्यतु कासंगतिः । यस्तु कामादिसूत्रशेषतया कथं कल्पितत्वेननिषेद्धव्यं कामाद्युपासनायोपसंहार्यं स्यादित्याशङ्कान्तत्र श्रुतेरादरादलोप इति निराकरोतीति व्याकरोत्यनन्तरसूत्रमेवं सत्यनिषेध इति हि वक्तव्यं, कोवास्यादयं पूर्ववादी, नचाद्वैती । तेन मिथ्याभूतस्याप्युपासनोपगमात् । अन्येन मिथ्यात्वानभ्युपगमात् । सौगतादीनां पराकृतत्वाच्चेत्यादिकमनालोचयन् । एवं ब्रह्मप्राप्तेरेवोपासनफलतया कामाद्यनुभवो न तत्फलमित्यनुपसंहार्यमेव तदिति प्राप्तमुपस्थिते परञ्ज्योतिरुपसम्पन्ने विदुषि, अतस्तदनन्तरभावितया कामाद्यनुभववचनादुपसंहार्यमेवेति तदनन्तर सूत्रश्च ॥

सर्वथाऽसंगतिरेव । आदराधिकरणे प्राणाग्निहोत्राख्यं कर्म प्रकृतमग्निहोत्रकर्मांगसम्बद्धम् । तत्र कर्माङ्गनिर्द्धारणनिरूपणानन्तरमद्यविशेषणीभूत प्राणोपासनमवसरेण निरूपयति ॥

"प्रदानवदेवे"ति

किञ्चादराधिकरणे लोपालोपावुपनिबद्धौ । तत्रालोपोनित्यता, नियम इति यावत् । लोपोऽनियमः । तत्र सैद्धान्तिकमनियमं प्रथममवतार्य पश्चाच्च पृथगेवेमौवायुप्राणावुपगन्तव्यौ, पृथगुपदेशात् । नैकस्योपगमस्य लोपः कर्त्तव्योऽपृथगुपगमनेनेति नियमोऽवतारित इति सुष्ठु सङ्गतम् ॥ अपिच वायुप्राणसमवायीबाह्याद्ध्यात्मिकक्रियाकलाप इत्यनेनाप्यत्र प्रदानाधिकरणं सुसङ्गतम् । तस्माद्दहरविद्याविषयमेवात्रापि कश्चिद्विचारं प्रवर्त्तयतां कानाम सङ्गतिस्स्यात् ॥

पूर्वोत्तरयोर्दहरविचारे कथमकस्मादन्तराळे कर्माङ्गनिधारणं शिरः प्रसारयति स्मेति प्रष्टव्याश्चते ॥ विद्यांगकर्मविचारः कर्माङ्गविद्याविचारः कर्माश्रयप्राणवायुविद्याविचारश्चाति वृत्तः । तत्र पृथगपृथगुपगमावुपनिबद्धौ । तत्र प्रथममियं विद्याकर्मणः पृथगुपगन्तव्येत्यवतारयति ॥

“ लिङ्गभूयस्त्वादि ” ति ।

अत्रेदं परकीयमधिकरणम् ॥ तैत्तरीये दहरविद्यानन्तरं सहस्रशीर्षन्देवमित्यारभ्य सोक्षरः परमस्स्वराडित्यन्तमाम्नायते । तेन च परविद्योपास्य विशेषनिर्द्धारणं क्रियते । परविद्यासु चाक्षर शिवशम्भुपरब्रह्मपरञ्ज्योतिः परतत्वपरमात्मादिशब्दाश्श्राव्यन्ते ॥ तत्र किमिदं प्रकृतदहरविद्यामात्रस्योपास्यविशेषनिर्द्धारकमुतपरविद्यासामान्यस्येति विचिकित्सायां, प्रकरणाद्दहरविद्यामात्रस्येति प्राप्ते लिङ्गभूयस्त्वात् परविद्यासामान्यस्यैवेति सिद्धान्त इति ॥

अत्रोच्यते । कोऽयमत्र पूर्ववादी नैवन्निरीश्वरवादे पूर्वपक्षोघटते, निराकृतश्च सः । अनेकेश्वरवादस्तु निर्युक्तिको न केनाप्युपेतश्च । शैवोऽपि शिव एक एवेश्वरोऽन्येतु सर्वे जीवा एवेति वदति। यथातु भवान्नारायणादन्ये जीवा इति ॥ न चापूर्वोयं कश्चिदनेकानीश्वरानुपगच्छन् प्रत्यवतिष्ठत इति वाच्यम् । तथासति किन्नश्छिन्नम् । नहि नारायणो नेश्वर इति वदति । दहरोपासनेनैवोपास्य भगवन्तं परन्नारायणं प्राप्नुवाम परमं पदम् । किमनेन वृथा कलहेन ॥ नच निरुपपत्तिको वादो निराकरणीय इत्ययमारम्भ इति वाच्यम् । तत्रावश्योद्भावनीयानां बहूनान्दोषाणामत्रानिरूपणात् । साधितत्वाच्च त्वद्रीत्या नारायण एवेश्वर इत्यस्योत्पत्त्यसम्भवाधिकरणेन ॥ तस्मात् सत्यपि यः परस्समहेश्वर इति पूर्वानुवाकोपसंहारे यदि दहरोपासनोपास्यो नारायण इत्यभ्युपगच्छति पूर्ववादी तदा निगूढमुपेत्य तूष्णीमेव स्थातव्यं भवता । न पुनः प्रतिभटीभूयगर्जनीयमितीममवधारय हृदि सुहृदुपदेशम् । नचाद्वैती । यस्त्वीश्वर एव नारायणः । सचैक एव परोपासनसर्वोपास्यश्चेत्यभ्युपगच्छति ॥ अथाप्यस्त्युपास्यात् परमप्युपास्योपासकानुस्यूतं शान्तं शिवमद्वैतमक्षरादिनिखिलविद्याविज्ञेयं यत्साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरस्तदल्लक्षीकृत्य तदात्मनैव वर्त्तामहे वयमि-

ति वदन्तस्तएवात्र प्रत्यवतिष्ठन्तेऽद्वैतिन इति चेत् । का ते हानिः, नहि ते प्रतिबध्नन्ति भवन्तं ब्राह्मं पदं प्राप्नुवानम् ॥

अथ यद्यस्ति कैवल्यन्नामपरमामुक्तिस्तामेव वयमपि प्राप्नुवामेत्येवमर्थं विवदामह इति चेदेवन्तर्हि श्रुणु सुहृदुपदेशं । यदि मुक्तिमेवेच्छसि तदा केवलीभूयाः, नहि तत्र प्रमाणमन्वेषणीयं । सुषुप्तावनुभूयमानत्वात् कैवल्यस्य, उद्बोधितत्वाच्च श्रुत्यातदेतदतिच्छन्दारूपं, द्वितीयाद्वैभयं भवति शान्तं शिवमद्वैतञ्चतुर्थम्मन्यन्ते स आत्मा स विज्ञेय इति तत्र किं सूत्रार्थगवेषणया यदि भोगन्तदा विस्रब्धमेवोपास्व भगवन्तं पुरुषोत्तमम् । को वा त्वां प्रतिबध्नाति, किं लिङ्गभूयस्त्वाच्चिन्ह भूयस्त्वाच्छंभुशिवादिपदघटितवाक्यभूयस्त्वादिति हठादर्थवर्णनेन । किंवा प्रसक्ताधिकरणविरचनेन किञ्च वा पूर्वविकल्प इत्यारभ्यास्मदधिकरणविरचनेनेति ॥

विद्याकर्मणोः पृथक्करणानन्तरन्तदनुबन्धिनं शारीरं शरीरात्पृथगुपमयतीति भाष्यएव स्पष्टमवतारितमेक इति । अत्र व्यतिरेक इति वक्ष्यमाणतयाऽव्यतिरेकमेकेमन्यन्ते, सचात्मन इति कण्ठोक्तः । प्रतियोगी तु हेतूपन्याससामर्थ्येनैव शरीरादिति लभ्यत इत्यमूढ एवाद्ध्यवस्यति ॥ एवंस्थिते, उपास्योपासनस्वरूपवदुपासकस्वरूपमपि तेनानुसन्धेयम् । तत्रोपासनसमयेऽस्यात्मनश्शरीरे भावात् कर्त्ता भोक्तेत्येवमेवानुसन्धेय इत्येकीयपक्षे प्राप्तेऽतोव्यतिरेको मोक्षकालीनोऽपहतपाप्मत्वादिकोनुसन्धेयः । मोक्षभावभावित्वादस्य रूपस्येत्यर्थं वर्णयन्तो हठात् कुर्वन्ति परे । तत्र हेतुरत्र शरीरात्मवादनिराकरणमप्रसक्तमिति ॥ पूर्वोत्तरयोरुपासनस्यैव विचारे कथमन्तराळे उपासकस्वरूपविचारप्रसङ्ग इति न कोप्यस्मान् पर्यनुयुञ्जीत लक्ष्मणमुनित्वादित्येषामाशयः । हानादिप्रकरणे हीदं स्यात् यदि स्यादिति पर्यनुयोगे निरुत्तरा एते : सूत्राक्षरबाह्यार्थवर्णनमेवैतदित्येतत् स्फुटमेव । एतांस्त्वेकानेत एव जानन्ति नेतरे । एक इति निकर्षोक्तिरपि भ-

वति प्रणष्टा । शरीराद्व्यतिरिक्तोऽयं यत्राधिकरोति प्रथमं कर्मणि तदंगावबद्धान्युपासनान्युपदिश्यन्ते ॥

"अङ्गावबद्धास्त्वि"ति ।

अथ निरन्तरानुष्ठितनित्यनैमित्तिकनिखिलकर्मनिर्मलान्तरङ्गोयं यद्वंशो विश्वात्मा तमिमं मूर्द्धादिचिबुकान्तेषु स्वाङ्गेषु संपाद्योपासीत वैश्वानरं स्वतन्त्रमिति तदुपासन मुपनिबध्नाति ॥

"भूम्न"इति ।

अपि च व्यतिरेकाव्यतिकावुपनिबद्धावेकाधिकरणे, तत्र न प्रतिशाखं विहितोपासनन्तत्तन्मात्रोदिताङ्गविषयं । किन्तु शाखान्तरोदितान्यपि शाखान्तरोत्पन्नविज्ञानविषयतयाऽव्यतिरिक्तान्येव भवन्त्यङ्गानि ॥ एवं समस्तोपासनव्यतिरेकेणनास्ति व्यस्ततयाप्युपासनानि वैश्वानरस्येत्यव्यतिरेक उपसमाहृतो भवति ॥

परन्तु व्यतिरेक उपसमाह्रियत इति भवति ॥

"नानाशब्दादिभेदादि"ति ।

अस्य प्रयोजनं विकल्प इति। तस्यापवादः काम्यास्त्विति ॥

नवा तत्सहभावाश्रुतेरितिचेति सुष्टूपसंहृतं भवति ॥

दृश्यते चात्र कश्चिद्व्यतिक्रमस्तान्त्रिकहतकस्य, शब्दान्तरे कर्मभेद इति पूर्वतन्त्रेणैव सिद्धे पुनरपीह नानाशब्दादिभेदादित्युपन्यसनं वेदान्तवाक्यान्यविधेयज्ञानपराणीति कुदृष्टिनिरसनायेति ॥

अहह दृष्टेरयं स्वभावः, यदुत स्वन्न पश्यतीति । यतोऽस्य दृष्टिर्न पश्यत्यात्मीयां कुत्सिततां । परस्परं विभिन्नप्रवृत्तिनिमित्तकाहि कर्मभेदहेतवो यजति ददाति जुहोत्यादयश्शब्दाः ॥

यतो ददातिस्स्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनार्थः, यजतिस्तु परस्मिन् देवतात्वविशेषणघटिततदर्थः । जुहोतिरप्यग्न्यादौ द्रव्य-

प्रक्षेप विशिष्टयजत्यर्थार्थ इति। वेदोपासीत क्रतुंकुर्वीतेत्यादयस्तु म-नोवृत्तिविशेषत्वरूपाभिन्नप्रवृत्तिनिमित्तका इति कथं पूर्वतन्त्रेणैव ग-तार्थता। रूपञ्च कर्मणो द्रव्यन्देवता च तेच नानेति ताभ्यां सुसा-धः कर्मभेदः। इहतु ब्रह्मच प्राणश्च। तच्चैकं सोप्येक इति दु-स्साधस्ताभ्यां विद्याभेद इति,

विशेषदर्शनाभावात्वं कुदृष्टिरितिस्थिते।
सुदृष्टिमेव दुर्दृष्टिं पश्यत्यात्मसमं भवान्॥

परेणैव तदनुयायिनापि किञ्चित्प्रलपितन्तदश्रुतमिव परिहृ-त्योपरम्यते विस्तरभयात्।

अद्वैतानुगुणोऽयं वृत्तो विद्यागुणोपसंहारः।
वर्त्तिष्यते तु विद्या सन्निहिताङ्गानुबन्धिनी चिन्ता॥

इति तृतीयाध्याये तृतीयो गुणोपसंहारपादस्समाप्तः।

तत्सहभावाश्रुतेर्दर्शनाच्चेत्युपसंहृत्यतदसहभावन्दर्शयितुं प्रति-जानीते॥

"पुरुषार्थोऽतश्शब्दादिति बादरायण" इति।

इदमातु दर्शनं परामृशति। तच्चात्मन एव। यतोऽन्यदर्शन-मदर्शनमेव। अत एव वेदान्तविहितादात्मज्ञानादिति निरंकुशाभाष्य-स्य प्रवृत्तिः। कथमन्यथा सन्निधिरात्मज्ञानस्य। अथकर्तुरन्यस्य दहरादि सर्वोपा सनोपास्यस्य ब्रह्मणो "नेतरोऽनुपपत्तेरधिकन्तुभेद-निर्देशादि" त्यादिना साधितत्वेन कुतः पुनरिदानीं "शेषत्वात्पुरुषार्थ-वादो यथान्येष्विति जैमिनि"रिति प्रत्यवस्थानमिति चेत् अत्राहुः, वेदान्तेष्वेव विद्यायाः कर्मणः प्राधान्यं सूचयद्भिर्बहुभिर्लिङ्गैस्तदु-पबृंहितेन तत्वमसीत्यादि सामानाधिकरण्येनच देहातिरिक्तजीवस्व-रूपयाथात्म्यप्रतिपादनपरा वेदान्ता इति बलादायातीति पूर्वपक्ष्या-शय इति॥ एवंसति गण्डस्योपरि पिटकाहि संवृत्ताभवति। यत-स्सकलजगत्कारणं सर्वात्मकम् ब्रह्मैव जीवस्य याथात्म्यमिति प्रतिपादयति वेदान्ते कदा कः केन यष्टव्य इति भवति। कर्माधि-

कारविरुद्धश्च कर्तुस्स्वरूपं प्रतिपादयन्तो वेदान्ताः कथंवा कर्मणः प्राधान्यं सूचयेयुः । सूचकाश्चवा कथं सामानाधिकण्यमुपबृंहयेयुः । अतो नाद्वैतात्मविज्ञानावलंबनेन पूर्वपक्षो घटते । अत्र वादत्वमपि पुरुषार्थस्य दुस्संपादंस्यात् । ज्ञानेन सुसंपादत्वाद्यथात्मभावस्य । ततो जीवात् पृथक्तया संराधिते ब्रह्मणि नैवं पूर्वपक्षो घटते । अथनास्त्येवोपासकादतिरिक्तमुपास्यन्नाम ब्रह्म । तत्र कुतस्तत्प्राप्तिः पुरुषार्थः । ततोवादएव तस्य । किन्तु तदस्तीतिकृत्वा तदहमस्मीत्यहं गृहपूर्विकयोपासनया सुसंस्कृतेन कर्मकर्त्तव्यं कर्त्रेत्येवंपरो वेदान्तइति पूर्वपक्षइतिचेत्, अयमेव पक्षस्साधीयान्। यतोऽतउपासनात्पुरुषार्थो भोगसाम्यमिति प्रतिजानाने सिद्धान्तिनि तदेव प्रतिक्षिपति पूर्वपक्षीति सङ्गच्छतेतरां। तत्र तदुपबृंहितेन तत्वमसीत्यादिसामानाधिकरण्येन जीवस्वरूपयाथात्म्यप्रतिपादनपरा वेदान्ता इति बलादभ्युपगमनीयं भवतीति पूर्वपक्षिणोऽभिप्राय इति न भाषितव्यं भवति । अथाप्येवमत्र पूर्वपक्षो नोन्मेषमर्हति । यतो महता प्रयासेन तथा संराधिते ब्रह्मणि तत्सत्वाक्षेपश्शक्रेणाप्यशक्यः ॥

अभ्युपगम्य ब्रह्म तदुपासनस्य कर्मशेषत्वावलंबने तु तदर्थस्य वादत्वसमर्थनमशक्यमकिञ्चित्करञ्च । गोदोहनादिवत्तस्य पुरषार्थत्वसंभवात्, कर्मतत्फलाभ्यामविरोधाच्च ॥ अद्वितीयब्रह्मात्मभावस्त्वद्धयाक्षादिविरोधादसंभावनार्ह इति तमेवावलंब्य, नास्त्येवैवं भावः । नास्ति तत्प्रयोजकस्तत्साक्षात्कारश्च । किन्तु तज्ज्ञानमात्रमेव कर्त्तुस्संस्कारार्थतया प्रतिपिपादयिषितमित्येवमेवाञ्जनादेरिव कर्मशेषत्वं वक्तव्यं । तत्र यादृशस्य पुरुषार्थस्य वादत्वमुच्यते पूर्वपक्षिणा स एव पुरुषार्थोऽत इति प्रतिज्ञात इत्यभ्युपगन्तव्यं । नतु भोगसाम्यमुपासनादिति । तस्यैव शेषत्वात्पुरुषार्थवाद इति वादत्वमात्रेण प्रतिक्षेपोपक्षेपात्, फलभेदमादायोत्तरत्र प्रत्युत्तराभावाच्च। सर्वञ्चेदं फलद्वारेणेति भाष्येणैव स्पष्टीकृतं ॥

तस्मादेवमतिदूरपर्यालोचनाविधुरतया परिभ्रान्तेनास्मदीयमेव पूर्वपक्षमवलंब्य दत्तोऽत्रकाशोऽद्वैतिनेऽत्र भवतेतीदानीमेवासीद्भवतः प्रभातं घट्टकुट्यामेवेति। अथ नास्त्येव तद्ब्रह्म, यदात्मतामयमियात्। तत्र कुतस्तद्दर्शनात् पुरुषार्थः। ततो वाद एव तस्येति प्रत्यवस्थानसंभवेऽपि कथमधिकोपदेशादिति सिद्धान्तोऽनुगुणोऽद्वैतिन इतिचेत्। अन्योपदेशादिति विहायाधिकोपदेशादित्युपदेशादिति गृहाण। यतस्तदेवेदमिदानीमधिकमासीदित्येकस्मिन्नेव पूर्वापरकालावलीढतया न्यूनाधिकभावो व्यवह्रियते लोकैः। अथेदमतोऽधिकमिति भिन्नेऽप्येवं व्यवह्रियत इतिचेत्॥

कामं व्यवह्रियतां। यतस्तदप्यपेक्षितमस्माकमुपासकादन्यस्योपास्यस्यापि ज्ञेयोपसर्जनस्य साधनाय किञ्चिदपि ब्रह्मानभ्युपगच्छन्तंप्रति। नह्युपदिश्यमानं किञ्चिन्नास्तीति प्रतिपत्तुं पार्यत इत्येवमर्थमुपदेशग्रहणं। तवतु कर्त्तुरर्थान्तरस्य परस्येति व्याख्यानार्थमन्येत्येव वक्तव्यं। नतूभयसाधारणतयाऽधिकेति॥

नचानन्तकल्याणगुणवत्त्वसूचनायैव मुक्तिरिति वाच्यं। तस्य नस्थानत इत्यनेन कण्ठत एव त्वद्रीत्या साधितत्वात् अस्माकन्तु ज्ञेयार्थतयैव ग्रथितस्यान्यत्रापि विनियोगान्न नैरर्थक्यमिति॥

"तुल्यन्तुदर्शनं" अकर्माङ्गतायाः।

"असार्वत्रिकी" प्रकृतमात्रपरत्वात्।

"विभागश्शतवत्"

कोऽर्थः, विभागोत्र द्रष्टव्यो विद्यान्यं समन्वारभते कर्मान्यमिति। कथमिव। यथा शतमाभ्यान्दीयतामित्युक्ते विभज्य दीयते पञ्चाशदेकस्मै पञ्चाशदपरस्मै तद्वदिति॥ नायं साधीयानर्थः तं विद्याकर्मणी इत्येकं प्रत्येव समन्वारंभवचनाद्द्वयोरेकेन शतेन निदर्शनायोगाच्चेति।

अत्राह, परेऽपरेऽन्येचेति त्रय एवं व्याचक्रुः । अस्मदाचार्यास्तु, विद्यास्वस्मै फलाय समन्वारभते कर्मच स्वस्मा इति विभागोद्रष्टव्यः । यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थं शतं रत्नार्थं शतमिति विभागः प्रतीयते तद्वदित्येव व्याचक्रुश्श्रीभाष्य इति । अत्र शतशब्दस्य शतद्वये लक्षणया दोषः । नैषदोषः, शतयोरिव शतवदित्यस्यैव फलितार्थकथनात् ॥ एवमपि वर्त्तत एव दृष्टान्तवैषम्यमपरिहार्यो दोषः । यतो दृष्टान्ते साधनाभ्यां फलविभागः । दार्ष्टान्तिकेतु फलाभ्यां साधनविभाग इति । विक्रेतारं विहाय क्रयिपरिग्रहेतु न तं शतद्वयमन्वीयात् । किन्तु क्षेत्ररत्ने एव । शतद्वयन्तु विक्रयिणमेवान्वीयात् । तत्र चोक्तो दोषः॥ वस्तुतस्तु तं विद्याकर्मणी इत्यत्र तमिति मुमूर्षुसामान्यमभिधीयते । तच्च समभिव्याहृतविद्याकर्मभ्यां द्विधा विभज्यते । शतपदमपि सौत्रमनुद्धूतावयवकन्दार्ष्टान्तिकानुरोधेन द्विधा विभज्योपपादकम् । एवंसति सुप्रसिद्धो लोकव्यवहारोऽनुसृतो भवतीति त्रयोप्यभिप्रयन्ति । तत्रैवंसति सम्यग्व्याकृतमस्माभिरिति व्यामोह एव भवतामपहाय महापथमपथगामिनाम् ॥ अवकाशदानाच्च ॥

दत्तोहि भवत्यवकाशः पूर्वपक्षिण एवं विभागेऽपि गोदोहनादिवत् कर्मशेषत्वसम्भवेनात्यन्तन्तदनाक्षेपादिति ॥

" अध्ययनमात्रवतः "

कथमेवं वक्तुं पार्यते सिद्धेऽध्ययनविधेरर्थावबोधपर्यन्तत्वे । यत आहुर्दृष्टोहि तस्यार्थः कर्मावबोधनन्नामेति ॥ अत्राह कात्रानुपत्तिर्यदिजैमिन्याचार्याभिमतन्नाभ्युपगच्छति बादरायणाचार्य इति । नैतत्सारम् । यत इदमेकमेवस्यात् साधकतमं बादरायणस्येति किमियता सूत्रजालेनेति स्यात् । विधिनावा स्वतोवाऽविचार्यकर्मकथमनुष्ठातुं शक्नुयात् । विचारेच कुतो वेदान्तावशेषस्स्यादिति च । अथच पक्षान्तरमप्याह ॥ यद्यप्यध्ययनविधिरेवार्थावबोधे प्रवर्त्तय-

ति । तथापि न विद्याकर्माङ्गम् । कर्मस्वरूपविज्ञानापेक्षया तदनुष्ठानस्येव ब्रह्मस्वरूपविज्ञानापेक्षया तदुपासनस्यार्थान्तरत्वादिति ॥

इदमप्यसारम् । यतोऽस्त्यत्र काचित्परिपाटी । प्रथमं प्रतिज्ञातार्थव्यवस्थापनम् । पश्चादवष्टम्भितानामन्यथाकरणम् । तदनुव्यवस्थापितेनार्थेनोपमर्दनम् । अन्ततो व्यभिचारप्रदर्शनश्चेति । तत्रेदानीं वेदार्थज्ञानवतः कर्मविधानात्तदनुसारितया वेदान्तो नेतव्य इत्यस्यान्यथाकरणे कथं सिद्धान्त्यभिमतार्थापेक्षया समाधानं सङ्गच्छेत । सूत्राक्षराणिचाननुगुणानीति ॥ अथ कथमाशङ्कितस्य दोषस्य परिहारः । उच्यते । किन्तद्वतोविधानं श्रुत्या, उताध्ययनविध्यर्थापत्त्या । नतावच्छ्रुत्या । वेदमधीत्येत्येव श्रवणात् । अध्ययनविधिरपि हि तत्तद्विहितानुष्ठापनाय तत्तदवगममेवोपधावन्नार्थान्तरावगममपीति । तथाचेदानीमुपनिषद्विषयेऽध्ययनमात्रवत इति सूत्रार्थ इति फलति ॥ वस्तुतस्तु द्वे विद्ये इति प्रकृत्यर्ग्वेदादिकमेवापरविद्यात्वेन श्रावयन्तीं सोहम्मन्त्रविदेवास्मि नात्मवित् । वाचारम्भणं विकारोनामधेयमित्यादिकाश्च श्रुतिमनुसृत्यात्मवेदनविधुर एव कर्मस्वधिकरोति सच सर्वज्ञसदृशोऽप्यध्ययनमात्रवानेवेति वेदमधीत्येति श्राव्यत इति मात्रपदं प्रयुञ्जानस्य भगवतो बादरायणस्य "नवयमध्ययनप्रभवं कर्माधिकारकारणं वारयामः किन्तर्ह्यौपनिषदमात्मज्ञानं स्वातन्त्र्येणैव प्रयोजनवत्प्रतीयमानन्नकर्माधिकारकारणतां प्रतिपद्यत इत्येतावत्प्रतिपादयामः ॥ तथाचाध्ययनमात्रवत एव कर्मविधिरित्यध्यवस्यामः । यतोऽध्ययनमात्रवानेव भवत्यौपनिषदात्मज्ञानविधुर इत्येवकारमपि घटयित्वा भाषितवतः, दृष्टोहि तस्यार्थः कर्मावबोधनन्नाम । न सामान्यतोऽर्थावबोधनं नाम अविधिगोचरत्वादौपनिषदात्मावबोधस्येति भाषितवतश्च भाष्यकृतो रतिनिगूढामभिसन्धिन्द्रुतमिव कोवानुसन्धातुं शक्नुयादिति भूषणमेवास्माकमत्र परेषान्दूषणमिति ॥

"नाविशेषात्"

नहि स्वतन्त्रफलकर्मविषयो नियम इत्यत्र विशेषहेतुरस्ति । विद्याङ्गभूतकर्मविषयतयाप्युपपत्तेरिति श्रीभाष्यम् । विद्यैव कर्माङ्गमिति वादिनं प्रत्येवमुपन्यासायोगादविद्वद्विषयो नियम इति त्रयाणां व्याकरणाच्च नैवं भाषितव्यम् ॥

प्रकरणात्भीरुंप्रति "स्तुतयेऽनुमतिर्वे" ति ।

यदि कुर्वन्नेव जिजीविषेः । इतोऽन्यथा त्वयि नास्ति पूर्वमुक्तस्त्यागस्तदापि न कर्म लिम्पतित्वान्नरसमान्यवर्त्मवर्त्तिनमपि विद्वांसमिति स्तुतिप्रकारः ॥

"कामकारेण चैके" इति चकारस्साधकनिराकरणपरिसमाप्त्यर्थः ॥

"उपमर्दञ्चे" ति तु बाधकमपि तेन समुच्चिनोति ॥

"ऊर्ध्वरेतस्सुचशब्देही" ति ।

व्यभिचारश्च समुच्चिन्वन्नधिकरणमपि समापयति । ततो विधिर्वेत्यन्तमिदं गच्छतीति भ्रान्तिरेव परेषाम् ॥ यत्तु भिद्यते हृदयग्रन्थिरित्यादिना विद्यया कर्मफलोपमर्दनप्रतिपादनादित्युपमर्दसूत्रार्थवर्णनन्तन्नसाधुवर्णनम् । कामकारेणेति कर्मत्यजतामूर्ध्वरेतास्स्वतित्यक्तवतामुभयत्रोदाहारणेन कर्मोपमर्दनपरत्वस्यैवोचितत्वात् । न जुहवाञ्चक्रिरे । कुतः । उपमर्दनात् । अत एव विद्वांस ऊर्ध्वरेतसो भवन्तीत्युपर्यपरिसमारोहसम्भवाच्च ॥

इति पुरुषार्थाधिकरणम् ॥

उपर्येव समारोहति । यत ऊर्ध्वरेतस्सुचेति सिद्धवद्धेतूक्त्योपरितद्भावं साधयति ॥

" परामर्शं जैमिनिरचोदनाचापवदतिही "

त्यादिना । अत्र सत्यपि विस्पष्टे विधाने साधारणमेव सर्वेषामनुष्ठेयकत्वं साधयामास साम्यश्रुत्या सूत्रकारो गार्हस्थ्यानधिकृतविषयत्वमितरेषामिति मतिमपाकर्त्तुम् । भाष्यकारस्तु पारिव्राज्यानधिकृतविषयाण्येवाश्रमान्तराणीति प्रसाद्ध्यात्यन्तमेवापाचकारतामेकवाक्यता बलेनेति विशेषः । तत्र नह्येवं भवति देवदत्तयज्ञदत्तौ मन्दप्रज्ञावन्यतरस्त्वनयोर्महाप्रज्ञ इति । भवतित्वेवन्देवदत्तयज्ञदत्तौ मन्दप्रज्ञौ विष्णुमित्रस्तु महाप्रज्ञ इतीत्येवमनुभाषितम् ॥

अत्र चोदयति । मन्दप्रज्ञयोरपि देवदत्तयज्ञदत्तयोः कालभेदेन महाप्रज्ञत्वसम्भवादिष्टमेवेदमापादनम् । धर्म्यन्तरप्रतिपादकविष्णुमित्र शब्दवदत्राभावादृष्टान्तवैषम्यश्चेति ॥ अत्रोच्यते अयमेव मन्दप्रज्ञः, यस्तु स्पष्टमपि भाष्याशयन्नाभिजानाति । न देवदत्तयज्ञदत्तौ । नहि देवेन यज्ञेन च दत्तौ मन्दप्रज्ञौ भवितुमर्हतः । भाष्यन्तु श्रमसम्पादिता वतिलाळनान्नातीवानुशिष्टौ पितृभ्यान्तथाकारितौ भवेतामित्यभिप्रायगर्भम् । अत एव निदर्शने विष्णुमित्रग्रहणम् । यस्तु विष्णुमित्रः प्रह्लादो हरिर्मित्रमिति गरळमपि निजगारेति ॥

भाष्याशयस्तु निकर्षोत्कर्षौतु समकालं परस्परव्यावृत्तधर्माभ्यान्निकृष्योत्कृष्यमाणानिष्ठतया विवक्ष्येते । अत्र पुण्यलोकसाधकत्वेन निकर्षोऽमृतत्वसाधकत्वेनोत्कर्षश्च विवक्षितः । तत्र यदिपरिव्राडपि तपसा पुण्यलोकसाधकत्वेन गृहीतस्तदा चत्वार्यप्याश्रमाणि निकर्षकुक्षिं प्रविष्टानीति कथन्तान्येव तदैव तद्विरुद्धधर्मवत्तयोत्कृष्येरन्निति । विरोधस्त्वाश्रमधर्मब्रह्मसंस्थयोर्भाष्य एव स्पष्टमुपपादितः । कालभेदस्तु न श्रानितः । तपसैव हठात्परिव्राड्ग्रहणेऽप्ययमन्यःपरिव्राडेवब्रह्मसंस्थ इति योगरूढेन पदेन प्रतिपाद्यत इति छान्दोग्यविवरणे स्पष्टं ॥

इति परामर्शाधिकरणम् ।

विहितत्वेनानुष्ठेयमेव पारिव्राज्यमित्युपपाद्य तदुपरियत्नेनानुष्ठेयमोङ्काराद्युपासनन्तत्रापि विधिमुपपादयितुम् ॥

"स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वादि"त्यादि ।

ऊर्ध्वरेतस्त्वमिव तेषु विद्यावत्त्वमपि विहितमेवेति साधितं भवति । विधेयस्तुत्यपेक्षोविधिरिति "पारिप्लवार्था इति चेन्न-विशेषितत्वादि" त्यारब्धं । नहि त्वदुक्तास्तुतिरियन्तु स्तुतिरित्यपि सुसङ्गतं भवति । एवमुपर्युपर्युपधावन्व्यवस्थाप्यपुरुषार्थोऽत-इतितत् फलमुपसंहरंस्तेनापि किञ्चिदुपधावति ॥

"अत एव चाग्नीन्धनाद्यनपेक्षे"ति ।

यथा न कथञ्चित् परिणममानाकर्माङ्गं विद्या किन्तु स्वतन्त्र-फला तथा तेनैव हेतुना न कर्माङ्गिकाचेत्यर्थः । इदमसमञ्जसं, वि-प्रकृष्टार्थपरामर्शात्, संभवति सार्थक्ये केवलफलोपसंहारकत्वेन नै-रर्थक्यापादनायोगाच्च । सार्थक्यन्तु, ननूर्ध्वरेतसां विद्यावत्त्वागमा-श्च यज्ञाद्यङ्गिकाविद्येति चेत्, तथात्रगमात्तेष्वेव तदनपेक्षा विद्येतीति चोदयन्ति परे । इदमेवासमञ्जसं । किं स्वोत्पत्तावनपेक्षा, उत स्वकार्ये, नाद्यः । उदितविद्या एव पर्यव्रजन्नित्युपगमे कथन्तेषु विद्यावत्त्वं पूर्वपक्षोत्तम्भनं स्यात्, नापिद्वितीयः । इष्टप्रसङ्गात् । न चैवं सति गृहस्थानां पञ्चाग्न्युपासनादिनापि ब्रह्मप्राप्तिर्नस्यादिति वाच्यं । यदि ते निष्पन्नोपासनास्तदा स्वाश्रमपरिरक्षणायैवाग्नीन्ध-नादीनामनुष्ठेयत्वात् । प्रायण एवोपासनानान्निष्पत्तेस्तत्रैव तदनु-ष्ठितानामुपक्षीणत्वाच्चेति । तस्मात् परिसमाप्तमिदमेकं प्रकरणम-धिकविवक्षया, व्यवधानमपि भवतामेव । यतो यस्मादूर्ध्वरेतस्स्वपि विद्यते विद्या तस्मादतः पुरुषार्थ इत्यस्मादन्तिमं प्रधानमेव परामृशामो वयं । यूयंत्वग्रिमप्रधानमिति ॥

"सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्"

स्वोत्पत्तौ । गृहस्थेष्विति परे । यदि पूर्वसूत्रे परिव्राक्ष्वनपेक्षेति स्यात्तदैवैवं स्यात् । स्यादेव । न स्यादेव यतो यज्ञादिविधुरेषु विद्यमानत्वं हेतूकुर्वता तेष्वनपेक्षत्वमवक्तव्यमिति सर्वात्मनानपेक्षत्वमेवोक्तमिति भवतीति । यथा स्वपरिकरबन्धपरिकर्मापेक्ष एवाश्वो गमनाय प्रभवत्येवं सर्वापेक्षैव विद्या मोक्षाय प्रभवतीति निदर्शनं । अत्रोर्द्ध्वरेतसः केवलमेवविद्याश्वमारूढामद्धये पतेयुरिति प्राप्नोति । अथ तेषामप्यस्ति परिकरबन्धो ब्रह्मचर्यादिः, तदभावे पतेयुरेव न इति वक्ष्यत्येवाचार्योऽनभिभवश्च दर्शयतीति व्यतिरेकमुखेनेति चेत् । एवमेव, एवञ्च सति सर्वापेक्षेति सर्वाश्रमकर्मपरमित्येवोपेत्यं । तदातु गृहस्थेष्विति गतं भवतीति ॥

ननु स्तुतिरेवेयं यज्ञादिश्रुतिर्नविधिः । यतस्तथा सत्यसिना जिघांसतीतिवत्करण एव तृतीयो पेया स्यात् सा चार्थतः प्रधानां विद्यां प्रत्येवयज्ञादीनां साधनभावमवगमयेदिति नस्यादारुरुक्षुसन्यास इति यदि कश्चिन्मन्येत तदिदन्तदीयम्मतमभ्युपगम्याप्याह ॥

"शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वादि"ति ।

ननु सर्वापेक्षेत्याश्रमकर्मसामान्यं हि गृहीतं । बाढं । तत्र परिव्राट्कर्मापि परिगृहीतमिति कथं वा कश्चिदेवम्मन्यतां । कथमेव वा तन्मतमप्यभ्युपगम्यतामिति चेत् । सूत्राक्षरपर्यालोचनया एवमेवावतारयितुं शक्यते किं कुर्मो वयं । न, एवमेवावतारयितव्यत्वात् । कथं । शमदमादीन्यपि विद्यासाधनतया विधीयन्ते । तानि गृहिणामनवरतं यज्ञादिषु व्यापृतवतामशक्यान्येवोपादातुमिति मास्युरिति प्राप्तं प्रत्याह तथापि तु स्याच्छमदमाद्युपेतो गृहस्थ इतीति । कथमेवमशक्तिपराहतमाचार्यो विदद्ध्यात् । कथं वा त-

दीयनियोगवचनमात्रेणाशक्येष्वपि शक्तस्स्यात् गृहस्थ इति चेत् । किमेवमगृहीत्वा हृदयमाचार्यस्याक्षिपसि । अविहितेषु हि कर्मसूपशममुपदिशत्याचार्य इति चेन्न । एवं सत्यतिलघूकृतं हि भवति सूत्रं । नह्यविहितेष्वपि भोजनादिषूपशमोपदेशो भवति । अनङ्गीकारपाहतेः भवतापि भिया प्रयोजनशून्येष्विति भाषितत्वाच्च । तानि च नाचार्योपदेशमाकांक्षन्ति । न कुर्यान्निष्फलं कर्मेति वैदिकसामान्यं प्रत्येव निषिद्धत्वादेव । अपिरपि न विरोधावद्योती । किन्तु तथापीति पूर्वपक्षाभ्युपगमावद्योती यत आह यज्ञादिषु विद्ध्यभावेऽपि तद्विधेरिति । नहि निष्प्रयोजनकर्मोपरमो विद्ध्यपेक्षः । प्रतियोगिन एव निषिद्धत्वात् । अवश्यानुष्ठेयत्वश्च न वक्तव्यं । निषेधादेव सिद्धत्वात् । तस्मात् सर्वकर्मोपरमपरमेव सूत्रमिति ॥

अथकथमाशंकितस्य दोषस्योपशम इति चेत् । किमेवमाशङ्कानर्हमप्याशंक्य विषीदसि । वेदानुवचनेन यज्ञेन दानेन तपसेति हि यज्ञादिश्रुतिः । तान्येव सर्वशब्देनोपात्तानि यज्ञादिश्रुतेरित्युक्तवतेति पूर्वपक्ष्याशयः । न हि तानि परिव्राट्कर्माणि । यत आह शमदमाद्युपेतस्स्यादिति तल्लक्षणं । परन्तु पूर्वन्तदपि लक्षणयोपात्तमितिसर्वेति गृहीतं श्रुतानामेव विद्ध्यभावे कुतो लक्षणाया अवकाश इति मन्यमानो विद्ध्यन्तरमुपादत्तात्रेति सारं ॥ नन्वेवं सति नास्ति गृहस्थानां विद्योत्पत्तिरिति स्यात् । स्यादेव या तु निर्गुणविषयिणी विद्या सा तेषु न निष्पद्यत इति । विरोधात् । यात्वविरुद्धा स्यान्नाम सा । अविरोधादेव, प्रायण एव पुष्कलन्निष्पद्यमानाचेति ॥

नचैवं विद्वत् सन्न्यासो नस्यात् । यतस्सन्न्यासिष्वेव निष्पद्यते विद्येति भवतीति चेत् । न । विद्वत्सन्न्यास इत्यस्य श्रवणमननादिनाऽपरोक्षकल्पं परोक्षनिश्चयवतां विदुषां सन्न्यास इत्यर्थकत्वात् । नन्वेवं सति जनकादयो न विद्वांस इति स्यात् । नचैतन्न्याय्यं, अभयं वै जनकप्राप्तोसि, तद्धास्यविजज्ञाविति श्रुतिविरोधापत्तेरिति

चेत् ॥ केयंबिभीषिका भवतोऽर्थवादावलंबनेन । मानामस्युः, का नोहानिश्शास्त्रार्थव्यवस्थायां व्यापृतवतां ।

अथवा, आधिकारिकाहि ते जनकयाज्ञवल्क्यादयो विद्या संप्रदायकर्माणि गुरुशिष्य भावतया। न हि वसिष्ठादयो यतयोऽविद्वांसो वा । अत एव भगवतीश्रुतिर्योयो देवानां प्रत्यबुद्ध्यत तथर्षीणान्तथामनुष्याणामिति मनुष्यव्यतिरेकेणर्षीन् परामर्शति ॥

अथायमभ्युपेतवादश्चेत् कथन्तत्त्वार्थ इति चेदुच्यते । अस्ति यज्ञादीनामपि साधनभावः । परन्तु श्रमेण सुषुप्सति क्षुधया बुभुक्षतीत्यादाविव विविदिषायामेव शब्दतः प्रधानायामवगमयति साधनभावं यज्ञादीनां हेतुतया तृतीया । तत्र यज्ञादिना विविदिषवो भूत्वा सद्य एव सन्न्यस्यन्ति तानि सदा श्रवणमननादि संपिपादयिषया केचन । केचित्तु विविदिषवोऽपि सन्तोऽसन्न्यस्तकर्माण एव श्रुत्वा मत्वा चावगत्यनिर्विचिकित्समपरोक्षकल्पं ब्रह्मात्मानमथोपरि व्रजन्तीति ॥ अथैतेषां श्रवणमननादिसमये शमदमादीनि नस्युः, कुतोनस्युः कामक्रोधौ हि शमादिविरोधिनौ। तत्र शास्त्रीयेऽपि फलेऽनभिसन्धिमतां कुतोऽन्यत्र कामः। कुतो वा तन्मूलस्य क्रोधस्य च प्रसंगः। अत एव "माकर्मफलहेतुर्भूरि"त्यन्वशात् भगवान् परमेश्वरः ॥

परन्तु सहकार्यन्तरं परन्निरुन्ध्यात् कर्मव्यापार इति ततस्तदर्थं सन्न्यस्येयुस्तान्येत इति सावकाशो विदुषामपि सन्न्यासः ॥

अत्र बहिरङ्गत्वं कर्मणामन्तरङ्गत्वञ्च शमदमादीनां विस्पष्टमाचष्टे वेदाचार्यः। यतो विविदिषन्ति यज्ञेनेति श्रुतिमनुसृत्यानपेक्षा सर्वापेक्षा चेति च विद्यामेव व्यशिषद्यज्ञादिना । शमादिना तु विद्यार्थिनं शमदमाद्युपेतस्स्यादिति शान्तो दान्त इत्यादिश्रुतिमनुसृत्य॥

एवं हि हृदयमाविष्कुर्वाते श्रुतिसूत्रकारौ। विद्यैव हि यज्ञादीन्यपेक्षेते नतु स्वयं विद्यार्थी, यतस्तानि तात्कालिकानि तदसम-

वेतानि बह्वायाससाद्ध्यानि च । अतो विद्यार्थमेवापेक्षमाणो विद्यानिष्पत्तौ न कटाक्षेणापीक्षेत तानि । शमदमादीनि तु तत्समवेतानि तेनैव स्वयमवश्यमपेक्षितव्यानि । यतस्तानि विना न कथञ्चिदपि निष्पद्यते विद्यानिष्पन्नापि न स्थिरपदाभवति । यतश्चानेन प्राप्तव्यमपि शान्तं शिवमद्वैतं ब्रह्म । तस्मादवश्यानुष्ठेयान्येतानि सर्वाधिकारिसाधारणानि ॥ यज्ञादीनि तु तत्र तत्र विभिन्नरूपाण्याश्रमकर्मतयानुगमयितव्यानि, अथापि विद्याधिकारिविधुरावृत्तीनि चेति न सर्वाधिकारिसाधारणानीति बहिरङ्गान्येवेति ॥

तथाच शास्त्रारंभेऽथशब्दार्थप्रतियोगित्वेनैतान्येवोपात्तानि नान्यानीति सिद्धं ॥

इति सर्वापेक्षाधिकरणम् ।

"सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्"

कः प्रसङ्गः । अयं । अद्धा तदङ्गतया विहितमवश्यानुष्ठेयं, एवन्तदङ्गतयानुमतमप्यवश्योपेयमेवेति । अत्र सर्वान्नानुमतिरर्थवाद इत्यद्ध्याहारगौरवमाह कश्चित् भाष्याशयमजानानः ॥

विशेषानुग्रहाय हि प्रवर्त्तमानस्सूत्रकारो विद्यार्थिनं विहितेषु प्रवर्त्तयन्निषिद्धाच्च निवर्त्तयंस्तदर्थमेववाक्यार्थं विचारमारचयति । नतु स्वतन्त्रं स्वाभिमतार्थसाधनाय तस्यानपेक्षत्यन्तंनैव निर्वृत्तत्वात् । तत्र सर्वापेक्षाचविद्याविद्यार्थिनि । नतु विदुषीवानपेक्षा । अथ विद्यार्थिन्यपि नापेक्षतेऽग्नीन्धनादीनि विद्येति कथञ्चित् कश्चिन्मन्येत तथापि तु विहितं शमाद्यवश्यानुष्ठेयमित्युपदिष्टे, तर्हि सर्वान्नानुमतिरप्यवश्योपेतव्येति वादिनमन्तेवासिनं सा तु प्राणात्यय एवेति तर्जयन्निव ह्याहेति । तथाच भाष्यन्नह्यसत्यामपि विधिप्रतीतौ प्रवृत्तिविशेषकरत्वलोभेनैव विधिरभ्युपगन्तुं शक्यत इति । तथाचार्थिकमेवाविधानं वादत्वञ्चेति कुतोऽद्ध्याहार इति ॥

एवञ्च सर्वान्नाशनस्य प्राणोपासनाङ्गत्वनिवृत्तिपरमेव सूत्रं। नतु भाष्यान्तरोक्तरीत्या तद्वाक्यस्य तदुपासकं प्रति प्राणात्यये सर्वान्नानुमतिपरत्वप्रतिपादकमिति भवति तस्य सर्वसाधारणतया शास्त्रान्तरेणैव सिद्धेश्चेति। अविद्यार्थिनोऽप्यनुगृहीतुमवश्यवक्तव्यमाह॥

" विहितत्वाच्चाश्रमकर्मापी "ति।

माभूत् प्रयोग भ्रम इत्यनुगृण्हाति।

" सर्वथापि त एवोभयलिङ्गादि "ति।

श्रुतिलिङ्गात् स्मृतिलिङ्गाच्चेत्येवार्थः। नतूभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्य विनियोगाल्लिङ्गादिति। एकत्राभिज्ञातस्यैवापरत्र प्रत्यभिज्ञाया वक्तव्यत्वादिति। विधुरमपि विद्यार्थिनं प्रोत्साहयति॥

" अन्तराचापितु तद्दृष्टेरिति "

अत्र विधुरादीनां विद्याधिकारवैधुर्यं वदता वक्तव्यं। किंपु तत्र प्रमाणाभावः। उताश्रमधर्माणां विद्याहेतुतायां व्यभिचारः। नाद्यः। तद्दृष्टेः। नच दर्शनमर्थवादः। यतस्स्मर्यतेऽपि च। नच व्यभिचारः। यतस्तत्रतत्र ते ते धर्माहेतवः। अथवा भवान्तरीयाश्रमधर्मानादाय तत्वेन हेतुत्वोपपत्तिः। अतो न गौरवपराहतिरपीति। अथ स्यादेवास्माकमपि भवान्तरीयो धर्मः। तेनैव कृतार्था वयं किमाश्रमधर्मानपेक्षेमहीति मन्यमानान् शिक्षयति॥

" अतस्त्वितरज्ज्यायोलिङ्गाच्चे "ति।

वरान्हिरैक्वादीन्वरिष्ठांश्च संवर्त्तादीनुदाहृत्या शक्ता ह्यनुगृहीताः। तत्र कथं शक्तानामयन्नयायः प्राप्नुयात्। ततो भवतामितरदेवज्यायः। यतो न वरीयांसः। यतश्च शक्ताः, ततो नालं साधारणपुरुषधर्म इति भावः। आरूढस्यावरोहेच्छा ममवरुणद्धि॥

" तत्भूतस्येति "

प्रमादात् पतितस्य पश्चात्तापे सति परिहारं समर्थयते ॥

" उपपूर्वमिति "

अप्रच्युतेभ्यो हितमुपदिशति ॥

" बहिस्त्विति "

" स्वामिनः फलश्रुतेरित्यात्रेयः "

कः प्रसङ्गः । कुतोऽत्र संशयआचाराच्चेत्युक्तवता तत्रैवोपासनविषये शिष्टयोरेव विप्रतिपत्तिः प्रदर्श्य परिह्रियत इति विस्पष्टे प्रसंगे। अत्र तत्भूतस्येत्यारभ्य बहिस्त्वित्यन्तमेकमधिकरणं । तत्र नैष्ठिकवैखानसादीनां स्वाश्रमात् प्रच्युतिरतत्भावः । तच्चानाश्रमित्वेन वर्त्तनं । स न भवति । स्वतोविधुरस्येवास्य न विशेषानुगृह इति भावः । अस्मिन्महति विषये विश्वासार्थञ्जैमिनिग्रहणं । अलसशिक्षार्थेनातस्त्वितरज्जयाय इत्यनेन न गतार्थतास्य ॥

एवं स्वधर्माननुतिष्ठतामधिकाराभावेऽपि ब्रह्मचर्यात् प्रच्युतानान्तेषामवकीर्णिपशुना परिहृतपाप्मनां स्याद्विद्यायामधिकार इति प्राप्तं प्रत्याह सूत्रत्रयेण नास्ति प्रायश्चित्तिस्तवो नाधिकार इति । कुतः । यतस्तेषां शिष्टानोपदिशन्ति विद्यामिति । अत्र विद्योपदेशात् परं पतितानाम्माभूत् प्रायश्चित्तिरिति स्यात् । अवरोहशङ्कापि न निष्टङ्किता वहूपदिशतापीति स्यात् । प्रमादात् पतितानानुगृहीताः किन्तु बुद्धिपूर्वकं पतिता इव निगृहीता एवेत्यादिकं विमृशन्तु विमर्शका इति । अथ विदुषामपि विपरीतभानप्रतिबन्धनायावश्यमेव निदिध्यासनं स्वयमेवाप्रयतमानानामित्येतमर्थं समर्थयते ॥

" सहकार्यन्तरविधिः पक्षेण तृतीयन्तद्वतो - -
विध्यादिवदिति "

तेषामेव दंभाहङ्कारादिवर्जनेन यथा स्थिरपदास्याद्विद्यातथा-भावायाह ॥

" अनाविष्कुर्वन्नन्वयात् "

सर्वसाधनसमन्वयेऽपि कदाचित् प्रतिबद्ध्येत विद्याभवान्तरार्जितेन पापेन । तदपगमे त्ववश्यमेव जायेत, नहि कल्याणकृत् कश्चिदिति न्यायादिति विद्यार्थिनां प्रवृत्तिमान्द्यम्मार्जयति ॥

" ऐहिकमपीति "

संभावनायां समुच्चये चापिः, यतो दुरवबोधआत्मा, यत आहभगवान् बहूनाञ्जन्मनामन्ते ज्ञानवान्मां प्रपद्यत इति, आमुष्मिकन्तु प्रायेणेति समुच्चयः । तत्र पक्षभेदाद् स्यात् फलभेद इति भीतिमपाकुर्वन् प्रोत्साहयितुं फलाभेदं सुदृढमवधारयति ॥

" एवम्मुक्तिफलानियमस्तदवस्थावधृतेस्त - -
दवस्थावधृतेरि "ति ।

इति तृतीयाध्यायस्य तुरीयः पादः परिसमाप्तः ।

ॐ ।

॥ श्रीः ॥

अथ चतुर्थोऽध्यायः ।

फलफलिभावापन्नं प्रत्ययमेकं परात्मविस्फूर्त्यै ।
आवर्त्तयताद्यस्मादादरवत्येनमसकृदुपदिशति ॥

तदवस्थावधृतिरवधारिताऽसकृदुपदेशेन । न ह्यावृत्त्या विना केनचित् काचिदवस्थाऽवधृता भवति । नहि कादाचित् केन कथश्चित्तक्षणादिना कश्चित्तदवस्थस्संपद्यते । तस्मादवश्यकर्तव्या प्रत्ययावृत्तिर्ब्रह्मात्मभावावस्थावधृत्यै विद्यार्थिना, यतोऽसकृदुपदिशत्यादरेण भगवती श्रुतिरित्याह भगवान् बादरायण आचार्यः, ॥

"आवृत्तिरसकृदुपदेशादि"ति ।

असकृद्ध्युपदिशति श्रुतिरात्मप्रत्ययं । ततस्तदावृत्तिरवश्यं कर्तव्येत्युपादिशत्याचार्यः । ननु किमिदमसकृद्ध्युपदिशतीति प्रलोभनं सकृदुपदेशेऽपि व्रीहीन् अवहन्तीत्यावृत्तिः क्रियतेऽसकृदुपदेशेऽपीदंकुर्विदं कुर्वीति सकृदेव क्रियत इति स्थिते ॥

एवन्तर्ह्यावृत्तिरसकृत् कर्तव्योपदेशादिति साधयतीति वक्तव्यं । यतस्तथैवाह श्रीमान् । तर्ह्यावृत्तिः केन सिद्धा । येन पक्षीक्रीयते । उपासनप्रत्ययत्वादित्याह । नह्येकस्मिन्नेव क्रियमाणे प्रत्यये भवत्युपासनमिति ॥ एवमप्यावृत्तिमसकृत्कुर्यादित्युपदेशः प्रदर्शयितव्यो भवति ॥ अथ न तदुपदेशादिति हेत्वर्थः । किन्तूपदेशविशेषादिति । तथाहि —ब्रह्म वेदेति श्रुतं वेदनं सकृदेव कर्त्तव्यमिति प्राप्त्या विद्युपास्त्योर्विनिमयेनोपदेशादिति समाहितं श्रीमतेति चेत् ॥ एवंसत्युपासनत्वादिति यावदुक्तं भवति तावदुक्तं भवति । नचैतदावृत्तावसकृत्वं प्रत्यये वाऽसकृदावृत्तिं साधयितुं शक्नोत्यावृत्तिमात्रघटितं ॥ एतेनावृत्तावसकृत्वं विहाय प्रत्ययेऽसकृदावृत्तिविधानमपि परास्तं भवति । असकृदावृत्तिरुपदेशादिति कुतो न प्रयुञ्जीतेति तत्र चोद्यान्तरश्च भवति ॥

अथ सत्यप्यस्मिन्नेवंविधे दोषे न ह्यावृत्तिमात्रविधानं कथञ्चिदपि घटते । यत आह सुदर्शनाचार्यः । आवृत्तेर्द्विस्त्रिप्रत्ययमात्रेण कृतत्वान्नेष्टसिद्धिरिति । न । आवृत्यावृत्तेरपि प्रत्ययचतुष्केण वा षट्केणवाऽन्ततो नवकेन वा कृतत्वेन तत्रापीष्टसिद्ध्यभावात् । अथ ततोप्यधिकेनैव सिद्ध्यति तदा यावता प्रत्ययेनावृत्त्या वृत्तिम्मन्यसे तावताप्यावृत्तिमेव मन्महे ॥ अथावृत्तिमात्रविधाने बलवदुच्छेदकोपनिपातावद्ध्येयावर्त्येत । तदावृत्तिविधाने तु तदुपशमानन्तरं पुरप्यारभ्येतेत्यस्ति विशेष इति चेत्तर्हि प्रायणमेवावधिस्स्यादित्याप्रायणसूत्रं व्यर्थं स्यात् ॥ अथैकाहमेवोपरुन्ध्यादिदं सूत्रमिति चेन्न । एकाहपरिचर्यामात्रेणोपास्त इति व्यवहाराभावात् ॥

अथावृत्तिमात्रविधानेऽपि तुल्योयन्दोषः । उपासनत्वस्यापि तत्र हेतूकरणादिति चेन्न ॥ राजोपासनादिष्विव मद्ध्ये परित्यागसम्भवात्। तथाचोक्तं कियन्तञ्चित् कालं प्रत्ययमभ्यस्योत्सृजेदित्याप्रायणसूत्रे भाष्ये । आवृत्यावृत्तिविधाने तु मध्ये परित्यागासम्भवात् ॥ अथावृत्तिमेव विदध्महे वयमप्युपासनत्वेनेति चेन्न ॥ असकृदित्यस्यानन्वयेनास्य वाचनिकत्वायोगात् । कथञ्चिदन्वये तु तस्य वैयर्थ्यात् ॥ अथावृत्तिपक्षेऽपि हेतुर्नघटन इति चेत् । घटिष्यते शृणु ॥ प्रत्ययस्यावृत्तिः कर्तव्या । तस्य श्रोतव्योमन्तव्यो निदिद्ध्यासितव्य इति प्रकारभेदेनासकृदुपदेशादिति सूत्रार्थः । न चायं साधकतयोपन्यस्तो हेतुः । किंतु सूचकतया । तथाच भाष्यं “ इत्येवंजातीयको ह्यसकृदुपदेशः प्रत्ययावृत्तिं सूचयतीति ॥

तत्प्रकारश्च । श्रवणन्तु श्रोतव्यार्थनिश्चयपर्यन्तम् । यद्यपीदन्धर्ममीमांसा साधारणमेवाथापि न तत्र श्रवणावृत्तिरतीवोपयुज्यते । ब्रह्मात्मभावेत्वसम्भवाशङ्का कश्मलीकृते तदुच्छेदावध्यपेक्ष्यते तदावृत्तिः । एवम्मननोपदेशोऽपि यावत्संशयभावनोच्छेदावसानन्तदावृत्तिं सूचयति। तदुभयं दृष्टमेव प्रयोजनम्। निदिध्यासनन्तु स्वरूपत

एवावृत्तिघटितमपि दर्शनार्हेण विषयेण भवति दृष्टार्थमिति याव-द्दर्शनमावृत्तिं सूचयति तदुपदेशः । आप्रायणसूत्रन्तूपासनविषयमि-ति भाष्यादिषु स्पष्टमिति ॥

इत्यावृत्त्यधिकरणम् ।

"आत्मेति तूपगच्छन्ति ग्राहयन्ति च ।"

इदमहं ग्रहोपासनसाधारणम् । भेदोऽपि चिन्तनीय इत्यनुक्त-मपि स्वयमावापयामास श्रीमान् । स्थितामेव भेदबुद्धिं कथञ्चिच्छि-थिलयामीति श्रुतिसूत्रकृतोः प्रवृत्तिरित्युपेक्षणीयमेतत् ॥

इत्यात्मेत्यधिकरणम् ।

" न प्रतीके न हि सः । "

यतः प्रतीको नात्माततस्तत्र नात्ममतिं बध्नीयात् । अथ सा-क्षात्त्वाभावेऽपि प्रणालिकया तत्त्वात्तत्रेवात्रापि तन्मतिं ब्रुवाणः कथमेवं प्रतिक्षेप्यस्स्यात् ॥ वचनबलात्तत्र तथेति वक्तव्यं स्यान्नस्त्वे-वं व्याकरोति तेन । तथा सत्यवचनमेव हेतूकर्तव्यं स्यात् ॥ तदपि न झटिति तथाकर्तुं युक्तं स्यात्तदभावेऽपि प्रकारान्तरेण प्रत्यवति-ष्ठमानं प्रति ॥ कथन्तर्ह्यत्र सूत्रार्थस्स्यात् ॥ एवं स्यात् । न प्रतीके-ष्वात्ममतिं बध्नीयात् । यत उपासकस्तत्र तान्नाकलयेदिति ॥

कथमेवं स्यादुपासकैस्तत्र साऽऽकलनीयेति प्रत्यवस्थाने ते-नानाकलनात्तत्र सानक्रियेतेति ॥ अयमर्थः । दत्तोत्तरप्रायमिदम् । सर्वेऽप्यात्मेत्येवोपगच्छन्ति ब्रह्म विद्वांसः । कुतः । यतस्तथा ग्राहयन्ति श्रुतयः । प्रतीके तु न कोऽप्याकालयेदात्ममतिमुपासकः । यतस्तन्त-था न ग्राहयति काचिदपि श्रुतिः ॥

नहि तदभावेऽपि प्रणालिकयात्मत्वात्तत्र तन्मतिमाकलयेत् । यतो न स प्रतीक आत्मा । नहि रुचकस्वस्तिकयोरितरेतरात्मत्वमस्ति

तन्वेतु वचनाभावेऽपि तन्मतिं कुर्युः । यथाघटेमृण्मतिं कुर्वन्ति लौकिका अपि विद्वांसः । नहि रुचके स्वस्तिकमतिं । योषिदादावग्न्यादिमतिन्तु सर्वेऽपि कुर्वीरन्वचनबलादिति । इदमेव सर्वं संगृहीतमाचार्येण वाचस्पतिना श्रुतेर्वानुभवाद्वा तदुभयमपि नास्तीत्यर्थ इति । आस्तामेतत्, आत्मेति तु ग्राहयन्तिहीत्येतावति वक्तव्ये उपगच्छन्तीति प्रथमतो निवेशनस्य प्रयोजनं वक्तव्यं । सत्यं वक्तव्यं । किन्तत्र प्रयोजनं । उच्यते । मया त्वब्रह्मण्यपि मन आदावद्धयस्ते ब्रह्ममतिर्विहिता कस्मै चित् प्रयोजनाय । एवमनग्नावपि योषित्यग्निमतिश्च । तथाऽब्रह्मण्येवात्मनि ब्रह्ममतिरनात्मन्येव ब्रह्मण्यात्ममतिश्चोपदिष्टेति मतिर्माभूदित्येवमर्थं त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसीत्युपगच्छन्ति जाबाला इति विद्वदनुभवप्रदर्शनपूर्वकमुपदिशतिश्रुतिर्न हि विद्वांसोऽतस्मिंस्तन्मतिं कुर्वीरन् । कुर्वन्तो वा भवन्ति विद्वांस इति मत्वा न विपरीता मतिर्भवेदित्यभिप्रायेणेति श्रुतिहृदयाविष्करणं प्रयोजनमिति गृहाण ॥

तथाच नहिकोप्युपासकः कमपि प्रतीकमात्मत्वेनाकलयेत्, यतो विद्वानिति प्रतीक इति स इति चैकवचनेन सूचितं भवति । भाष्यकारस्तु प्रतीक इत्यस्यैव जातिवचनत्वञ्चोपेत्य किमुत बहूनित्यर्थं सूचयति प्रतीकेष्वितीति सर्वं हृदयङ्गमम् ॥

अत्रैवं प्रतिक्षेपः । प्रतीक आत्ममतिबंधनार्हस्तदभिन्नब्रह्माभिन्नत्वात् यत्तदभिन्नाभिन्नन्तत्तन्मति बंधनार्हं यथाग्न्यभिन्नब्रह्माभिन्नायोषित् । एवं प्रतीकोपासनमात्मविषयं । तदभिन्नब्रह्मविषयत्वात् । दहराद्युपासनवदिति पूर्ववादिप्रयोगे वचनं विद्वदुपगमश्चेत्युभयमुपाधिरिति वा तदभावाभ्यां सप्रतिपक्षतावेति ॥

इति न प्रतीकाधिकरणम् ।

तत्रैव विचारान्तरम् ॥

"ब्रह्मदृष्टिरुत्कर्षादि"ति ।

प्रतीकोपासनेषु स एवोपास्यो न ब्रह्म । तत्तु तत्र दृष्टिविशेषणमात्रं । प्रतीकोपासनन्नामाब्रह्मणि ब्रह्मदृष्ट्यानुसन्धानं । ततस्तत्र नात्मत्वानुसन्धानमित्यवधारितं पूर्वसूत्रेण । अथात्र ब्रह्मैवोपास्यं तस्य तत्वसंभवे मन आदीनामचेतनानामल्पशक्तीनाञ्चोपास्यत्वाश्रयणमन्याय्यमिति चेत्तत्राह । ब्रह्मदृष्टिरिति । मन आदिषु ब्रह्मदृष्टिरेव युक्ता । नतु विपरीतमिति पूर्वावयवसूत्रमिदमितिश्रीमान्, कथमिदमेवंस्यात् । दृष्टिविशेषणत्वेऽपि ब्रह्मणः कुत इदं ब्रह्मोपासनन्नस्यात् नहि सालिग्रामाराधनं विष्ण्वाराधनन्नभवति महालिङ्गाराधनं वा महादेवाराधनं । नहि सालिग्रामे विष्णुमुपास्ते महालिङ्गे महादेवमिति वा न व्यवहरन्ति लोकाः । य एतान् पञ्चाग्नीन्वेदेति वा वेदः । अथाप्रतीकालंबनसूत्रे तत् क्रतुश्चेत्यनेनाब्रह्मक्रतुत्वं सूत्रकृतैव सूच्यते प्रतीकक्रतोरिति चेत् । न ॥

यतस्तेनालंबनपदघटितसूत्रस्थेनास्य ब्रह्मानालंबनत्वमेवार्थात् प्रतिपाद्यते, किञ्च ब्रह्मदृष्टिवदात्मदृष्टिस्स्यात् प्रतीक इति चेत् किं ब्रूयाः । प्रतीकविषयत्वेन पूर्वशेषत्वे आत्ममतिविषयत्वेन पूर्वसूत्रन्तत् पूर्वशेषः कुतो न स्यात् । ब्रह्मदृष्टिरादित्यादिमतयश्चेति फक्किकामनुरुद्ध्योत्तरसूत्रमिवेदमपि स्वतत्रं वा कुतो न स्यात् ॥

तस्माच्छ्रुतिसूत्रभाष्याणामाशयमजानतैव भवतैवं प्रवृत्तमिति सुष्ठु व्यक्तमिदानीमिति ॥

ब्रह्मदृष्ट्यधिकरणम् ।

"आदित्यादिमतयश्चाङ्ग उपपत्तेः ।"

द्विविधमङ्गोपासनं कर्मसमृद्ध्यर्थं पुरुषार्थश्चेति । तत्र प्रथमे यत्क्लृप्तं कर्मणोऽपूर्वन्तत्रैव विशेषाधानेन कर्मसमृद्ध्युपपत्तेः ।

द्वितीये तु गोदोहनादिवदधिकृताधिकारत्वेन यत् प्रकृतं क्रत्वर्थापूर्वन्तत्रैव विशेषाधानेन पुरुषार्थकल्पनोपपत्तेरिति च पृथगुपपत्तिद्वयं। आदित्यादीनां कर्मफलत्वेनोत्कर्षोपपत्तेः, स्वयमेवोपासनस्य कर्मत्वेन फलवत्त्वोपपत्तेः। तत्र तत्रोपक्रमोपसंहाराभ्यां श्रुतेरङ्गोपासने तात्पर्यावगमेनाङ्ग दृष्टयास्पदमङ्गत्वादाज्यवदिति साद्ध्यवत्त्वोपपत्तेश्चेति साधारणश्चोपपत्तित्रयमुपपादयन् भाष्यकारोऽत्र बहुमुखीमेवोपपत्तिमुपपादयामास। तत्रादित्यादीत्यादिपदग्रहणव्यतिरेकेणमतयश्चेति बहुवचनमुपसूचकम्। अङ्ग इति जात्यालंबनन्तु द्विविधेऽपि साद्ध्यस्यैकरूप्यमेवन्याय्यमित्यर्थं सूचयतीति भवति सारवद्विश्वतोमुखश्च सूत्रमेवं विवरणे॥ तदिदमादित्यादीनां कर्माराद्ध्यदेवतात्वेनोत्कर्षोपपत्तेरित्येकोपपत्तिप्रदर्शनमात्रपरतया व्याकृत्यातिलघूकुर्वान्ति परे। व्यर्थयन्ति चोपपत्तेरित्येतत्। यत एवं सत्युत्कर्षादित्यनुवृत्त्यैवेष्टं संपद्यते। अथोक्तरीत्योत्कर्षस्योपपादनीयतया तदुक्तिसार्थक्यं। अत एवाहस्म मतिमानाशङ्कापनयनाय सुदर्शनो लोकादीनां प्रामाणिक एव देवतात्वे लोकदृष्टिरुत्कर्षात्। अन्यथा यथा प्रतिपन्नस्वीकारेऽप्यविरोध इतीति चेत्॥

नैवेदमुपपद्यते यथा प्रतिपन्नमस्वीकुर्वति सूत्रकारे कथमेवमुद्घुष्यतामिति। न ह्यजाश्वमज्जालोमलोहितादयो भवन्ति कर्माराद्ध्यादेवताः। नच भूस्स्वाहा भुवस्स्वाहेतिवद्भ्याय स्वाहेति वा यदन्तः कुरुते तस्मै स्वाहेति वा स्पष्टं दृष्टचरं यतस्स्वयमेव प्रामाणिक एवेत्याशङ्काशूलकीलितहृदयो भूः॥

सति संप्रतिपन्ने कर्मफलत्वे तव विप्रतिपन्नदेवतात्वावलंबनेन कोऽप्यस्ति हेतुर्विहाय भाष्योपात्तमिति विद्वेषं। तस्मात् स्वस्य नासिकाकर्तनेनापि परेषामपशकुनोपपादकानामग्रगण्योभवानिति निश्चितमेतदिदानीं॥ यत्तु लोकेषु पंचविधं सामोपासीतेत्यादिषु लोकेषु सामदृष्टौ लोकान् साम्नेति विभक्तिद्वयं विप-

रिणम्येत। साम्नि लोकदृष्टौ तु सप्तम्या एव विपरिणाम इति भाष्यभामत्योस्सामदृष्टिविधानेऽपि सप्तम्या एव विपरिणामः। लोकान् सामोपासीतेत्यन्वयोपपत्तेरिति दूषणं सुदर्शनस्य भूषणमेवास्माकन्तत्त्वस्य व्युत्पत्तिविहीनस्य ॥

तथाहि । आहार्यं हीदमुपासनम् । तत्र घटत्वेन पटञ्जानाति पटत्वेन घटमित्येव न्यायविदां प्रयोगः । न तु घटं पटञ्जानातीति । तत्र को हेतुः । समानविभक्तिकस्थले विशेषणविभक्तेस्साधुत्वार्थकतया पटाभिन्नं घटञ्जानातीत्यनाहार्यप्रमानुवाद एव स्यादयं प्रयोगः । तृतीया तु विभिन्ना विभक्तिस्स्वयं प्रकारतां धात्वर्थान्वयितया बोधयति । तथाच हठात् पटत्वेन घटं गृह्णाति । नतु घटः पट एवेति प्रमतीत्याहार्यानुवादस्तत्र हेतुरिति स्थिते कुतोऽस्य दूषणस्यावकाश इति ॥

इति अदित्यादिमत्यधिकरणम् ।

"आसीनस्सम्भवात्। "

आसीनस्यैवोपासनसम्भवादासीनकर्मैवोपासनमिति झटिति प्रतीयते । प्रकृतप्रतियोगिकत्वसम्भवात् सम्भवस्य । तस्यैवैकाग्र्यसम्भवादिति प्रकरिष्यमाणावलम्बनन्तु परेषां क्लेशावहमिति गृहीतव्यम् । न ह्युपासनमैकाग्र्यमिति चानर्थान्तरम् । यत उपासनं नाम पुन्तन्त्रो मानसो व्यापारविशेषः । एकाग्रता तु तदधीनस्तस्योपास्य एवैकस्मिन्निष्पद्यमानोऽभिनिवेशोविक्षेपकाभावं परं प्रतीक्षमाणः । नतु पुरुषाधीनः । तदिदं स्पष्टमेवाचष्ट पृथगर्थद्वयमासीन एवोपासीतेति विदधानो यत्रैकाग्रताभवतीति सुहृद्भावेन चाचक्षाण आचार्यः ॥ तत्र पुन्तन्त्रोपासनसम्भवायासनविधानन्तदधीनैकाग्रता निष्पत्त्यनुकूलदिग्देशकालादिज्ञापनञ्चेत्यनुगुणं भवति । न पुनरेकाग्रतासम्भवायासनविधानमिति । विभिन्नाधिकरणद्वयमेवेदं सूत्र-

द्वयम् । नियमानियमविषयत्वात् । ततस्समानाधिकरणमिति भ्रान्तिरेव परेषाम् ॥

“ आप्रायणात्तत्रापि हि दृष्टम् । ”

प्रायणान्तमुपासीत । हि यतस्तत्र प्रायणसमये उपासनारम्भप्रभृतिमद्ध्ये यः कालस्तत्र च सर्वत्रापि दृष्टं स खल्वेवं वर्तयन् यावदायुषमिति श्रुताविति विवरणस्य सूत्रानुगुणम् । आप्रायणाद्दर्शनादिति न्यासापत्तेः किन्तत्रापीति, किं वा हीति पञ्चम्यर्थस्य पृथक्करणेन किञ्च वा दृष्टमिति भावकर्मसाधारणप्रत्ययान्तस्य प्रथमान्ततयेति ॥ अतो नापिरत्र समुच्चये । अपितु दारिद्र्येऽपि ददाति किमुतान्यदेतिवत् प्रायणेऽपि दर्शयति किमु तान्यदेति सर्वदाऽवश्यकर्त्तव्यत्वं साधयति कैमुतिकन्यायावद्योतनेन । तथाहि । सत्यपि “ यावदायुषं प्रायणान्तमोङ्कारमभिद्ध्यायीतेति दर्शने कैमुतिकन्यायावद्योतकप्रकारान्तरानुसरणं यावति प्रत्ययावर्त्तने कृते महत्यामप्यापदि प्रायणे तदनुवर्त्तनं कर्त्तुं शक्येत तावदावर्त्तनं कर्त्तव्यमित्यर्थलाभाय ॥ अस्य च प्रयोजनमिदमवधेयम् ॥

आमुष्मिकफलं विहितं प्रतिषिद्धं वा कर्मफलप्रदानाय पुण्यमपुण्यं वाऽदृष्टं द्वारीकरोति । फलप्राप्तिश्च प्रायणकालीनभाविफलभावनाप्रत्ययद्वारैव । तदिदं व्यपदिशति भगवती श्रुति “ यच्चित्तस्तेनैष प्राणमायाती ” ति । स्मृतिश्च “ यंयं वापि स्मरन् भावमिति । तत्र स्वर्गाद्यर्थं कर्मस्वयमप्रत्ययत्वेन फल इव तत् भावनाप्रत्ययं प्रत्यपि परानुग्रहरूपमदृष्टमेव द्वारीकरोति ॥

स्वर्गाद्विशिष्टतरब्रह्मलोकार्थन्तूपासनं स्वयं प्रत्ययत्वेन प्रायणकालिकब्रह्मभावनाप्रत्ययार्थं स्वानुवर्त्तनरूपंदृष्टमेव द्वारीकुर्यात् । नतु कर्मवत्तदर्थमप्यदृष्टं । तत्तु तदुपरिभाविशताधिकनाडीप्रवेशादावेवापेक्षत इति वक्ष्यति “ हार्दानुग्रहीतश्शताधिकयेति । तमेतमेवार्थमन्वाचष्ट “ स यावत् क्रतुरस्माल्लोकात् प्रैती ” ति श्रुतिः “ प्रयाण

काले मनसा चलेने"ति स्मृतिश्च । इममेवन्यायसिद्धमर्थमनूचतुर्विधिसरूपे यावदायुषं, प्रायणान्तमिति श्रुती । न विधत्त इति व्युत्पादनमस्य प्रयोजनमवधेयम् ॥

तथा च दृष्टद्वारमुपासनमाप्रायणमुपासकप्रयत्नसाध्यं प्रायणे स्वानुवर्तनं साधयेदित्यर्थान्तरमपि क्रोडीकर्त्तुं ह्याह स्मेतिभवति तत्रापि हि दृष्टमिति॥ सूत्रार्थस्तु प्रायणान्तं प्रत्ययावर्त्तनं कर्तव्यम्। यतस्तत्रापि दृष्टन्दर्शनमस्ति श्रुतिस्मृत्योरिति । एवमाप्रायणं प्रत्ययावर्त्तनेहि प्रायणेऽपि महत्यामापद्यपि भवति दृष्टन्तदनुवर्त्तनरूपं द्वारमवश्यापेक्षितमिति च ॥ सर्वोप्ययमर्थः "प्रत्ययास्त्वेत स्वरूपानुवृत्तिमुक्त्वा किमन्यत् प्रायणकालभाविभावनाज्ञानमपेक्षरन्नि"ति भाष्येण । तानि खल्वाप्रायणन्तत्तदुपास्य गोचरबुद्धिप्रवाहवाहितया दृष्टेनैव रूपेण प्रायणसमये तत् बुद्धिं भावयिष्यन्तीति भामत्याच स्पष्टीकृतः ॥

निर्गुणनिदिध्यासनन्तु सम्यग्दर्शनायानुष्ठितं सन्निष्पन्ने तस्मिन्न किञ्चिदप्यपेक्षेत । प्राक्तु तन्निष्पत्तेः प्रतिबन्धापनयायापेक्षितापि परानुग्रहमिति विवेक्तव्यम् । एवं प्रतिपदं प्रत्यक्षरंप्रति प्रत्ययश्च सारवदिदं सूत्रमतिलघूकृतवता किं कृतं श्रीभाष्यकृतेति विदन्तु विद्वांसः ॥ अत्रानियोज्यब्रह्मात्मत्वप्रतिपत्तेश्शास्त्रस्याविषयत्वादिति भाष्यंदृष्ट्वा प्रत्यवतिष्ठते तान्त्रिकः । तस्येदमुत्तरम् । ननु किमिदं विदुषश्शास्त्रावश्यत्वम् । किमुच्चार्यमाणमपि न शृणोति । न । शृणोत्येव । अथ शृण्वन्नपि नार्थं प्रत्येति । न । प्रत्येत्येवाथापि न पूर्ववत्तादर्थ्येन । अथवा प्रत्ययन्नपि नानुतिष्ठति । न । अनुतिष्ठत्येवावश्यश्चेत् । अनुतिष्ठन्नपि किं वा न प्रत्यवेयात् । अप्राप्तकालमिदञ्चोद्यम् । प्रत्यवायहेतोरनावश्यकत्वात्तस्य च तेनाननुष्ठानात् ॥

तथाच सर्वद्वैतविनिर्मुक्तमात्मानं साक्षात् कुर्वतो विदुष इष्टानिष्टवस्त्वन्तराभावान्न तत् प्राप्तिपरिहारसाधकेषु कर्मसु मात्रयापि प्रवृत्तिस्सम्भवति । अपरिहार्य क्षुत्पिपासादि बाधकोपनिपातवशा-

दात्मप्रत्ययपरिभवेन जानन्नपि लोकमुपेक्षितमेव जानन् कथञ्चिदुपशमस्य बाधकं पुनरात्मन्येव सम्पद्यत इति न तं प्रति तव कुकल्पनाया अवकाश इत्यवेहीति ॥

एवं प्रत्ययरत्नैः प्रपूरितान्तःप्रदेशमणिपेटी ।
पातिपरिशीलिता चेत् प्रायणपर्यन्तमादरान्नित्यम् ॥

अथ—कर्मप्रदाहरूपं प्रत्ययकार्यं विविच्य वेदयितुम् ।
सारतरसूत्रघटिता प्रदाहपेटी प्रतन्यते स्पष्टम् ॥

तत्र प्रसङ्ख्यानपरिपाकनिष्पन्ने,

"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ।"

अत्र पूर्वाघस्य विनाशो विद्यया तस्य फलप्रदानशक्ति प्रतिबन्धः । नतु मूर्त्तस्येव ध्वंस इत्यत्र न विवादः । अश्लेषस्तूत्तराघस्याकरणमेवेति भाष्यम् ॥ प्रामादिकविषयमिति भाष्यान्तरं प्रमादात् कृतोऽपि परानुग्रहात् प्रणश्यतीति तद्व्याख्यानञ्च सूत्राक्षरविन्यासविशेषविरुद्धम् ॥

तथाहि क्रमिकयोस्स्वरूपेण प्रयोगेऽपि दृश्यते स्नानानुलेपने स्वापप्रबोधाविति पूर्वापरीभावनियमो लोके । किमुत पूर्वोत्तरत्वविशिष्टवेषेण । तदत्रोत्तरपूर्वाघयोरिति व्यत्ययेनाचार्यस्य प्रयोगे को हेतुः ॥ उत्तराघाश्लेषे स्वस्यादरातिशयाविष्करणम् । तत्र वा किं कारणम् । इदम् । यत् किलाधिगमात् पूर्वमविद्यया कृतं कृतमेव । न तत् परावर्त्तयितुं शक्यते । अथापि विद्यया विनश्येदेव । तदुत्तरन्तु कर्तृत्वादिविनिर्मुक्तमात्मतत्वमध्यक्षीकुर्वतो विदुषः कदाचिदपि कथञ्चिदप्यघप्रवृत्तिर्नस्यात् । यदि स्यादधिगम एव न निष्पन्न इत्यधिगन्तव्यं स्यात् । तथाचाकरणमेवाश्लेषः नतु कदाचित् प्रमादात् कृतऽपि विद्यया वा परानुग्रहेण वा विनाश इति स्थितधीलक्षणावेदनम् । उपासनन्तु साम्पराय एव निष्पन्नं सदघादिहरं भ-

वतीत्युपपादितमेव । तत्रोपासकाघस्योत्तरत्वमेव न सम्भावनार्हम् । अथाप्युपासनोद्योगमारभ्याघविषयेऽत्यन्तजागरूकेण भवितव्यन्तेन । अन्यथोपासनमेव हि न निष्पद्येतेत्यारुरुक्षुशिक्षणञ्चेत्युभयमिति ॥

इति अघाधिकरणम् ।

उक्तमितरस्मिन्नप्यतिदिशति ॥

"इतरस्याप्येवमसंश्लेषः पातेत्वि" ति ।

अत्र समित्याधिकं प्रयुञ्जानोऽर्थमिममाविष्करोति यद्यपि विद्वान्निरीक्षेत कटाक्षेणापीतरत्तथापि न तात्पर्येण । अघन्तु न कटाक्षेणापि निरीक्षेतेति ॥ अतोऽपि प्रामादिकविषयमित्येतदसङ्गतम् । अस्त्यत्रातात्पर्याद्योतकं भाष्यं ज्ञानफलापेक्षया निकृष्टफलत्वादिति । तात्पर्याभावेन स्वारसिकीप्रवृत्तिः । कथञ्चित् प्रतिभानसमये कृतमपि सुकृतन्तात्पर्यराहितन्न फलप्रदं भवति । अघस्त्वतात्पर्येण क्रियमाणोपि बध्नात्येव । तथाहि जिज्ञासाधिकरणे भामती । "विधिषु श्राद्धोधिकारी । नाश्राद्धः । निषेधशास्त्रन्तु श्रद्धान्नापेक्षते । अपितु निषिद्ध्यमानक्रियोन्मुखो नर इत्येव प्रवर्त्तते । तथाच विदुषः प्रतिभानसमये नरसामान्यानतिवर्त्तनान्न निषेधोल्लङ्घनमिति ॥ एवञ्चेतरयोरप्येवमिति वक्तव्येऽश्लेषासंश्लेषव्युत्पादनार्थमेवैवं विन्यास इति विवेक्तव्यम् ॥

व्यपदेशात् पूर्वसुकृतविनाशं प्रसाद्ध्य विद्यासामर्थ्यादपि तं साधयति पाते त्विति । कार्त्स्न्येन जीवन्मुक्तविषयमिदमधिकरणद्वयं यथा सम्भवमुपासकविषयञ्च ॥ ननु विदुषोऽप्युपासननिर्वृत्तये वृष्टयन्नादीनीष्टानि । तत्र कथमुपासनार्थानां सुकृतानां विरोधाद्विनाश उच्यते । तत्राह पातेत्विति । शरीरपाते तु तेषां विनाश इति श्रीभाष्यम् ॥ विरुद्धमिदमवतारणम् । अदत्तफलानां

हि विरोधस्ततो विनाशश्च । विद्यारूपं फलं प्रणालिकया प्रदत्त-वतामेषां कुतस्तया विरोधः कुतो वा विनाशश्चेति ॥ यत्तु विद्यानु-गुणदृष्टफलानि तिष्ठन्ति चेत्तानि पातादूर्ध्वन्नश्यन्तीति तदर्थ इति तद्व्याख्यानन्तदपि विरुद्धम् । यतः पातपर्यन्तान्तिष्ठन्ति तानि न दृष्टफलानि । नच वृष्ट्यादिदृष्टफलार्थमनुष्ठितानि तानि प्रतिबन्धव-शादप्रदत्तफलानि पाते नश्यन्तीति तदर्थ इति वाच्यम् । सर्वेषाम-पि साम्पराय एव हानोपायनयोरुपपादितत्वेनास्याविशेषात् ॥

किञ्च विद्यानुगुणकर्मणां फलाप्रदाने साम्पराये वा ततः पू-र्वं वा कथं विद्या निष्पद्येत । निष्पत्तौ वा कुतस्तस्याविनाशः । नहि विद्योद्देशेनानुष्ठितन्तस्या अन्यथासिद्धौ फलान्तरारम्भाय प्रत्यवति-ष्ठेत । पुनरपि वा विद्यानिष्पादनायेति न कथञ्चिदपि शक्यते सम-र्थयितुं भाष्यं भवतेति ॥ नच भवतामपि भवति कृतकरतेति वा-च्यम् । अघस्तु निषिद्धस्सुकृतन्तु विहितम् । अघनिर्हरणाय विद्या विहिता । विद्यानिष्पादनाय सुकृतं विहितम् । अतोऽत्र नाघन्या-योऽतिदेशमर्हतीति विशेषमाशङ्क्यावश्यम्भाविनीपाते मुक्तिरित्यव-धारयतीति चेत् कुतः कृतकरतानामेति ॥ नचैवं सत्यसंश्लेषश्चेति पुनरनुवादेनैवावधारयितव्यमिति वाच्यम् । इतरयोरप्येवमिति व-क्तव्ये, इतरस्येत्युक्त्वाऽसंश्लेष इति पुनरुक्त्याघस्येव धर्मस्य विना-शो नास्तीति मतिस्स्यादिति चकारमात्रेणावधारणासिद्धेः ॥ नचोत्तरधर्मे विशेषविज्ञानार्थं समित्यधिकावापाय प्रयोग-भेदानुसरणमित्यन्यथासिद्ध्या भवत्येवावधारणश्चकारेणेति वा-च्यम् ॥ एवन्तर्हि स्वयमेव धर्मे विशेषविज्ञापनेन दत्तोऽवकाश इति न केवलमनुवादमात्रेणैव भवत्यवधारणम् । अतोऽवश्यम्भाविनी-पाते मुक्तिरिति कार्यावधारणेनैव प्रतिबन्धविनाशावधारणं कर्तव्य मिति सुष्ठूपपद्यते पतेत्त्विति ॥

एतेन पातेत्यवश्यम्भावी विनाश इत्येव हि भाषितव्यमित्येतत्परास्तम् । अधिगमानन्तरक्षणमेव विनाशितत्वाच्च । मुक्तेरुपरिविचार्यत्वेनात्र तदवधारणं व्यर्थमिति पूर्वपक्षोऽपि परास्तः । अन्यार्थत्वान्मुक्त्यवधारणस्य ॥

"अनारब्धकार्ये एव तु पूर्वे तदवधेः"

एवकारोऽवधारणार्थः । नत्वेवारब्धस्य पर्युदस्तत्वात् । तथा च विद्यासामर्थ्येन विनाश सामान्यमवधार्य स्वानुभवेन तत्र विशेषमवधारयन् श्रुतार्थापत्तिमपि प्रमाणयति तदवधेरितीति भवति । न हि स्वानुभवमन्तरेण नारब्धन्नश्यतीत्यवधारयितुं शक्यम् । तथा च भाष्यकारोऽपि तथैवावधारयामासापि च नैवात्र विदितव्यमित्यादिनेति सर्वमनवद्यम् ॥ तदिदञ्जीवन्मुक्तविषयमजीवन्मुक्ते न तान्त्रिकेण कथमेवमवधारयितुं शक्येत ॥

तथा हि । अधिगमोत्तरं प्रायणावधिफलप्रदानोन्मुखस्यारब्धशेषस्य हि पर्युदासः । तत्र कदा वोपासननिष्पत्तिरुपेयते तेन । साम्पराये उत ततोऽर्वागेव । यदि साम्पराये कुत आरब्धशेषः । नहि ततोऽर्वाक् । साम्पराय एव हानोपायननिर्द्धारणात् । उपासनोपयोगिवृष्ट्यन्नादिदृष्टेष्टार्थकर्मणां पातावश्यविनाशायोगेन पातेत्विति सूत्रखण्डविरोधाच्च ॥

नच यस्य स्यादद्धानाविचिकित्सास्तीति प्रतिपादितस्य निर्विचिकित्सानिश्चयस्य तदधिगमपदार्थस्यार्वागेव निष्पत्तावपि प्रायणान्तमनुवर्त्तनीयतया तदुपयोगिवृष्ट्यादीष्टार्थकर्मणामदत्तफलानां पात एव विनाशो न्याय्य इति नायं विरोध इति वाच्यम् । अधिगमात् पूर्वकृतानामनारब्धकुक्षौ प्रविष्टत्वात् । तदुत्तरकृतानान्त्वसंश्लेष इत्यनेनैव गतिसिद्धेः पातेत्वित्यस्य व्यर्थत्वात् । सर्वेषां साम्पराय एव हानोक्तेश्चनारब्धशेषसिद्धिरिति स्थिते कथमस्मासु दोषमुद्भावयितुं प्रवर्त्तते भवदीया जिह्वा । तस्मात् सर्वमिथ्यात्ववादि-

विद्यार्थत्वेन व्यवस्थापितस्यात्र तत्कार्यार्थैवेत्यवधारणं विरुद्ध्यत इति चेन्न। विद्यार्थस्यैव सतस्तदनन्तरभाविमोक्षार्थत्वस्य पूर्वोक्तफलसिद्ध्यर्थमाहत्यवादेनैवोक्तत्वात् मोक्षार्थत्वाच्च विद्यार्थित्वस्य। आवश्यकत्वाच्चाहत्य वादेनाऽपि शिष्यशिक्षणस्य ॥

"अतोऽन्यापि ह्येकेषामुभयोः।"

कयोः पूर्वोत्तरयोः। अस्ति हि तयोरतोऽन्यापि साधुकृत्या। सैव ह्येकेषामुपायनवचनविषयः। नेति ब्रूमः। अर्थसिद्ध एवास्मिन्नर्थे किमुभयोरिति वचनेन। नन्वन्याकाम्यकृत्याऽर्थसिद्धैवेति किं सूत्रेणैवत्रा। न। आदिपदेन सर्वं गृहीतमिति भ्रमसंभवात्। अथष्टमेव काम्यकृत्याया अपि विद्यार्थत्वम्। इष्टमिदं कामेनेदं कर्तव्यमिति विहिताया अपि निरभिसन्धिकृतायाः। नतु फलमभिसन्धायापि। तथाच तादृशभ्रमनिवारणव्याजेन नकिञ्चिदपि विद्यार्थिना फलमभिसन्धेयमुपासकेनाप्यप्रायणान्तमिति शिक्षयतीति भवति। आवश्यकत्वात्। वृष्टयन्नादि तु विद्याप्रापकेणैव कर्मणोपपादितं स्यादित्यभिप्रायः। अस्तु कयोः। आवयोर्जैमिनिबादरायणयोर्वैदिकयोः। किमर्थात्र सम्प्रतिपत्तिः। विहितस्य स्वनुष्ठितस्य सर्वात्मनानुपयोगेन विनाशोपगमस्य कर्मतन्त्रकारसम्प्रतिपत्तेरवश्यापेक्षितत्वात्। तदनुपन्यासे शिष्याणां कदाचिदप्रत्ययप्रसङ्गात्। तस्मादियद्दूरविवेकाविरहेणैव सत्यपि भाष्ये पूर्वोत्तरयोरिति विवृतन्तान्त्रिकेणेति ग्रहीतव्यम् ॥

इत्यग्निहोत्राद्यधिकरणम्।

"यदेव विद्ययेति हि।"

अत्राह तान्त्रिकः। तन्निर्द्धारणानियम इत्यत्र यत् साधितं विद्याविधुरं कर्म तदेवात्र यदेवेति श्रुत्यपन्यासपूर्वमुपन्यस्यति नित्यकाम्यसाधारणमुपायनासंश्लेषवचनविषयसमर्पणाय। तथाचेदं पूर्वशेष

एवेति ॥ तत्रेदमुच्यते । तन्निर्धारणानियम इत्यत्र विद्याविहीनकर्मणस्साधनं किमर्थमिति वक्तव्यम् । नतु स्वरूपप्रदर्शनार्थम् । तस्य कर्ममीमांसाविषयत्वात् । नचाश्लेषोपायनोपपादनार्थं तस्यापि पूर्वतन्त्रसिद्धकेवलकाम्येनैवोपपत्तेः । अत एव ह्यन्यापि हि वर्तत इति प्रसिद्धिरुपदर्शिता पूर्वसूत्रे ॥ अग्निहोत्रादीत्युक्ते तत्सदृशस्य नित्यस्यैव ग्राह्यत्वे कथं कर्मसामान्यं गृहीत्वा भ्रान्त्या प्रत्यवतिष्ठसे। नहि ब्राह्मणादिकमानयेत्युक्ते महिषमप्यानयति कश्चिदिति वदन्निव ह्यन्यापि हीत्युवाच । अतः काम्यमेवोपायनादिविषयः । न नित्यमपि । तस्मात् यदर्थं विद्याविहीनमपि कर्मनिर्द्धारितन्तदिदमाह यदेवेति । ब्रह्मविद्यायामुपयोगोपपादनाय हि कर्मप्रस्तावोऽत्र ब्रह्ममीमांसायां विशेषेण । तथा विद्यासहित इव विद्याविहीनेऽपि नित्ये जिज्ञासुं प्रोत्साहयत्यनेनेत्यधिकरणान्तरमेवेदं । यदेवेत्यधिकरणम् ॥

"भोगेन त्वितरे क्षपयित्वा सम्पद्यते"

स्वयमेव विद्वान् पूर्वमेव स्वयं ब्रह्मीभूतः ॥

इति प्रथमः पादः ॥

अथ तुरीयाध्यायस्य द्वितीयः पादः ॥

कर्मप्रदाहपेटी कठिनतरेयं सुसूत्रसंग्रथिता ।
ग्रथयत्यनन्तरेऽस्मिन् प्रस्थानोत्क्रान्तिपेटिके पादे ॥

"वाङ्मनसि दर्शनाच्छब्दाच्च।"

सम्पद्यत इत्यनुवर्त्तते ॥

ननु भोगेन त्वितरे क्षपयतीत्येव तत्रापेक्षितम् । अत्र तु संपद्यत इति । तत्र किन्तत्र ग्रथितस्यात्रानुवर्त्तनेन । अपेक्षितत्वादिति ब्रूमः ॥ अपेक्षितं हि सम्पद्यत इत्युभयत्र यथा भोगे नत्वितरे क्षपयित्वा सम्पद्यते सर्वात्मना ब्रह्मणि विद्वानेवन्तेनैव ते क्षपयित्वा तत्र सम्पद्यते सर्वोऽपि जन्तुर्म्रियमाणस्स्वपन्निव दैनन्दिने ते दिनेदिने तत्तज्जन्मीये ॥ तत्र या नाममूर्तिस्सात्वेवं रूपेति सङ्गमनार्थम् ॥ अनुवदनाय च ॥

यथायथा दर्शनमेवानुवदति श्रुतिस्सम्पत्तिन्तथा यथा श्रुत्येवानुवदानीत्यर्थमनुवदनाय च पूर्वमेवापेक्षितं सूत्रकारस्य । तथा चार्थोऽपि यथा शब्दार्थं सूत्रस्य यथा दर्शनञ्च शब्दस्येति भवति । तदिदमप्युपप्रदर्शितं भवति दर्शनादिति प्रथमं शब्दाच्चेति चरमञ्च सूत्रितवता यथा शब्दमेव वाङ्मनसीति च ॥

किञ्च सम्पद्याविर्भाव इत्यनुवदिष्यति विदुषस्संपत्तिम् । तदर्थमपि तत्रापेक्षितमेवेत्यवधारय । सूचनाय च ॥ यथा तत्र सम्पद्यत इत्यस्यार्थस्तथात्रापीति सूचनाय च तत्रापेक्षितम् ॥ अस्तु कानामेयं सम्पत्तिः । सम्पत्तिर्लयोऽविभाग इति चानर्थान्तरम् ॥ कथमेवं स्यात् स्वाप्रकृतौ मनसि वाचो लय इति । पठति चाचार्यो वाङ्मनसि सम्पद्यत इति यथा शब्दमेवेति चेत् । एवन्तर्हि कस्यचिल्लक्षणाश्रयणीया स्यात् ॥ नैवाश्रयणीया । किन्तु यथाशब्दमेवात्रार्थोऽभ्युपेय इत्याहाद्वैतिनां पूर्ववादी । यद्येवन्तर्हि पूर्वपक्षोऽपि सूचितो यथा शब्दपाठे नेति भवति ॥--परन्तु--

परन्तु लक्षणैवाश्रयणीया । सा तु वागित्यस्य वाग्वृत्ताविति प्रत्यवतिष्ठते विशिष्टाद्वैतिनां पूर्ववादी ॥ तेतु । तेतु सत्यम् लक्षणैवाश्रयणीया । परन्तु न सावागिति प्रथमस्य पदस्य । किन्तु सम्पद्यत इत्यस्य संसर्गविशेषे । स च वक्ष्यतेऽविभागो वचनादिति पृथग्व्यवहारानर्हतापादकस्संसर्गविशेष इति वदन्ति । तत्र पूर्वपक्षिणः का युक्तिः प्रथमे लक्षणाश्रयणस्य ॥—इयं—

या नामनेदं वाक् प्रकरणम् । किन्तु सम्पत्तेः । नहि प्राकरणिकं पदं लक्षणामर्हतीति ॥ अहो सूत्रकारोऽपीदमनुमन्यत इति मन्यामहे । कथमन्यथा पूर्वमेवेदं प्रकृत्यतत्वं सम्पादयेत् । किञ्च श्रौतेन क्रमेण चरममपीदं सौत्रेण पाठेन प्राथम्यमप्यापादितमित्ययमेवास्तु सिद्धान्त इति चेत् ॥ अस्त्वयमेवाद्वैतिनां सिद्धान्तः ॥ तर्ह्यत्र सूत्रे सूचकं वक्तव्यम् । किं सूचनेन स्पष्टमेव प्रतिपादने

वाङ्मनसि सम्पद्यत इत्येतद्दर्शनात् । दर्शनेनैव ज्ञाप्यते यथा दर्शनमेव शब्दाच्च प्रतिपाद्यते किमत्र वृथा कलहेनेति ॥

अथ वाङ्मनसि संसृज्यत इत्येतावदेव वक्तव्यं विशिष्टमते । नच शब्दादिति तत्सहकारितया दर्शनादिति चावश्यं प्राकरणिकपदलाक्षणिकीकरणायेति वाच्यम् । वाङ्मनसीति निर्देशेनैव शब्दादित्यस्य सिद्धश्शब्दाद्दर्शनाच्चेति क्रमभेदापत्तेश्च । साम्याच्च शब्दस्याभावाच्च दर्शनस्य। एवं हि दृश्यते वागुपरतेदानीमुक्तन्तु जानाति यत आहूतश्चक्षुरुन्मील्य पश्यतीति । ननु वाङ्मनसि संसृष्टेतीति चेत्॥ यद्येवंतर्हि वक्तव्यमिदं विपश्चिदपश्चिमानान्धुरि ॥ उत्तराधिकरणे तु । नन्वस्ति मनः प्राणयोः प्रणालिकया प्रकृतिविकृतिभावः । अतस्सम्पत्तिर्लय एव । नत्वविभाग इत्याशङ्क्य तद्वाक् संयुक्तम्मनः प्राणे संसृज्यते । नतु तद्वृत्तिस्तत्र लीयते । मनः प्राण इत्युत्तराद्वाक्यात् । ततोऽविभाग एव सम्पत्तिरिति समाहितम् ॥

अहो केयमसम्बद्धप्रलापता मूकस्वप्नायमानता च वादस्य । केन मनःपदन्तद्वृत्तिपरमुक्तम् । यद्युक्तं किं प्रणालिकयापि प्रकृतिविकृतिभावसंपादनया । येन नतु तद्वृत्तिस्तत्रलीयत इत्युच्यते ॥ यत्र-विवादस्संपद्यत इति पदे लयोवासंसर्गविशेषोवाऽस्यार्थ इति तत्र किमपि वाचा नोद्घाट्यते पूर्वापरपक्षिभ्यां । किन्तु मनस्येवाभिप्रेयत इति मूकस्वप्नायमानश्चायं वादः । स्यादप्यत्रायं वादो यतोऽद्यवाङ्मनसि संसृष्टा ॥ असाधकत्वाच्च । न ह्यत्राभिमतसाध्यसाधको भवत्युपन्यस्तो हेतुः । यतो मनः प्राण इति शब्दादित्युक्तं भवति । तदर्थमेव प्रणालिकया प्रकृतिविकृतिभावेन प्रत्यवस्थानश्चेति ॥

अथाप्रकृतेरिन्धनात् कथं वह्नेर्ज्वलनव्यापारोक्तिरिति चेत् । कात्रानुपपत्तिरिन्धनारूढ एव वह्नौ ज्वलनव्यापारदर्शन इति शिवम् ।

इति वाङ्मनोऽधिकरणे ॥

" सोऽध्यक्षे तदुपगमादिभ्यः "

स प्राणोऽध्यक्ष इति हि वक्तव्यं क्रमानुसरणाय । कथमेवं वक्तव्यं स्याद्यथा शब्दमेवानुवदता प्राणोऽध्यक्ष इति शब्दाभावे ॥ तर्हि तन्मनः प्राण इति कथन्तत् पदावापोमनः प्राण इत्येव सति शब्दे ॥ तत्तु पूर्वप्रतिपादितार्थसंवलनाय स्यात्तद्वाक् संयुक्तमिति ॥ नैवं स्यात् । यतो वाङ्मनसि संसृज्यते मनः प्राण इत्येतावत्युक्तेऽपि वाक् संसृष्टम्मन इत्यादिकमेवार्थं सर्वः प्रत्येति नतु तत्तद्वियुक्तमिति ॥ अतो विशेषो वक्तव्यः ॥

एवन्तर्हि पूर्वं पूर्वं प्रतिपादितस्यार्थविशेषस्यैवानुवादाय स्यात्तत्तादृशमागृहीत वाग्वृत्तिकं सतादृश आगृहीत मनोवृत्तिक इति च ॥ सत्यमेवमेवस्यात् ॥ अथ " भूतेषु तच्छ्रुते " रित्यधिकरणान्तरम् । कएवमाह । श्रीलक्ष्मणार्यः । कथमेवं स्यादेकैकस्य श्रौतस्य वाक्यस्यैकमेकमधिकरणं कुर्वाणे सूत्रकारे सत्येकस्मिन्नेवात्र प्राणस्तेजसीति वाक्ये ॥ नन्वधिकावापेनाधिकावापस्स्यात् । नस्यात् कथमधिकावापेनादृता भङ्गीभङ्क्तुं युक्तेति ॥ अधिकावापत्रयं हि दृश्यते तन्मन इत्यत्र पदावापेन पदार्थस्याधिकस्य सोऽध्यक्ष इति वाक्यावापेन वाक्यार्थस्य भूतेष्विति लक्षणयापदार्थमात्रस्येति । सर्वश्चेदं कथमधिकावापः क्रियत इति भाष्येणोपसूच्यते । अधिकावाप इति शब्दएव न दृश्यते भाष्यान्तरे ॥

अस्तु कथं सूत्रार्थ उपवर्ण्यते तेन । जीवसंयुक्तः प्राणः अलमलम् । प्राणसंयुक्तोऽध्यक्ष इति हि वक्तव्यं क्रमाभङ्गाय ॥ एवन्तर्हि सभूतेष्विति वक्तव्यम् । न वक्तव्यम् । यतस्तथा सत्यधिकरणान्तरमिति भ्रमस्स्यात् । अस्तूच्यतामुपरि । तेजस्येव सम्पद्यते प्राणस्तेजसीति श्रुतेरिति प्राप्ते । भूतेष्वेव संपद्यते पृथिवीमय आपोमयस्तेजोमय इति तच्छ्रुतेरिति । मिथ्यैवैतत् । न ह्येषाश्रुतिर्भूतेषु संपत्तिं श्रावयति । किन्तु कथञ्चित् साधयति । परन्तु सर्व-

मय इत्यप्यन्ते श्रावयति ॥ तस्मात् कथमधिकावापः क्रियतां सप्रा-णोऽद्ध्यक्ष इति प्राणस्तेजसीत्येव श्रुतिसत्त्वे यथा श्रुत्येवानुवदा-नीति प्रतिज्ञा तत्र तेतिप्राप्तं प्रत्येवाह भूतेष्विति ; नतु तेजस्येव के-वले प्राणस्संपद्यत इति प्राप्तं प्रति ॥ अयमाशयः । किं कुर्मोवयम् । अनिवार्योहि भवत्यत्राधिकावापः । तत्र किमेतावतैव विषीदसि । पुनरपि कर्त्तव्योहि भवत्यावापस्तेजसीत्यस्य भूतेष्विति । तथा प्रा-ण इत्यस्य प्राणसहितोऽद्ध्यक्ष इति चेति ॥ तदेव कुत इत्यपेक्षा-यामाह ॥

" नैकस्मिन्दर्शयतोऽही " ति ।

व्यर्थमेवैतत्श्रीमन्मते । यस्तु स्यात् क्रमेणैकैकस्मिन् संपत्ति-रित्याशङ्क्य समादधाति ॥ कोहिनामैवं वृश्चिकाद्भीत आशीविषमु-खेंऽगुळिन्निवेशयेद्दत श्रीमन्तम् । यस्तु तेजसीत्यस्य भूतेष्वित्यधि-कावापमसहमानः प्राणस्तेजसि सोप्सुसपृथिव्यामित्यधिकावापेना-शङ्कत इति ॥ अत्र सत्यप्याधिकावापे प्राणस्तेजसीति श्रुतिर्नविरु-ध्यत इत्यत्र प्रणीतोदृष्टान्तो " योऽपि हि स्रुघ्नान्मधुराङ्गत्वा मधु-रायाः पाटलिपुत्रं व्रजति सोऽपि स्रुघ्नात् पाटलिपुत्रं यातीतिशक्य-ते वदितुमि"ति ॥

तत्राह सुदर्शनः । पाटलिपुत्रगमने स्रुघ्नमधुरयोस्सहगमना-भावात् प्राणस्य गुणभावेऽपेक्षिते प्रधानभावलाभाच्चेदमसङ्गतमिति श्रुतिसूत्रभाष्याणां हृदयानभिज्ञः ॥ अत्र सप्रष्टव्यः । अपि जानी-षेऽध्यक्षस्तेजसीति कुतो न श्रावयति भगवती श्रुतिरिति ॥ कुतः नास्ति जीवस्य स्वतोगतिरिति सूचनाय । सूचितश्चेदं सभूतेष्वि-त्यसूत्रितवता । अपिवाजानीषे प्राणोभूतेषु भूतानिपरस्यान्देवता यामिति वा न श्रावयतीति ॥ कुतो वा । दर्शनानुसरणात् । अ-स्ति दर्शनमस्त्यप्ण्यञ्जीवति नास्त्यौण्यम्मृत इति । इदमेवहि स्पष्ट-

मन्त्रावाचष्टदर्शनाच्छब्दाच्चेति दर्शनविहीनानेव भवादृशान्व्युत्पादयितुम् ॥ वक्ष्यतिचास्यैव चोपपत्तेरेषरूष्मेति ॥

तदिदं सर्वमभिप्रेत्य प्रणीतस्सदृशो दृष्टान्तः । तत्र न सुघ्नः प्राणः । किन्तु योऽपि हि । सुघ्नस्तुनासिकातो बहिश्चतुरङ्गळदेशमारभ्याहृदयदेशपर्यन्तं प्राणस्य स्थानम् । तत्र प्राणस्स्वसञ्चारसङ्कोचेन हृस्थमेवाद्ध्यक्षमन्ववक्रम्य तत्स्थानिभूतानि समाश्रयति । ततो मथुराध्यक्षः । पाटलिपुत्रन्तेज इति विवक्षित कुतः कयोस्सहगमनम् । केन वा प्राणस्य गुणभावोऽपेक्षितः । प्राणगतिरेवाध्यक्षस्य गतिर्नस्वत इति हि विवक्षितमिति ॥ अतएव लोकोगतःप्राणइत्येव स्वरसंव्यवहरति । नतु गतोजीव इति ॥

युष्मदीयदृष्टान्तस्तु नजाघटीति । यथा यमुनायागङ्गयासंयुज्य सागरगमनेऽपि यमुनासागरं गच्छतीति वचोनविरुद्ध्यत एवं प्राणस्तेजसीतीति ह्यु क्तम् । तत्र यमुनायास्सागरगमने प्राधान्ये तव भाष्यार्थानभिज्ञता । यतो गङ्गास्थानीयजीवापेक्षया यमुनास्थानीयस्य प्राणस्य गुणभावाच्चेति त्वया विवृतम् । यदि तथा गुणभाव एव तदा जीवसंयुक्तस्य प्राणस्य तेजसि सम्पत्तिरुक्तेति भाषितस्य दार्ष्टान्तिकस्य दृष्टान्तानुगुण्याभाव इति ।

अद्ध्यक्षाधिकरणम् ॥

“ समानाचासृत्युपक्रमादमृतत्वञ्चानुपोष्य ”

अत्रेदं विभावनीयम् । समानाचेत्येतावति वक्तव्ये । आसृत्युपक्रमादित्युक्तिरद्ध्यक्ष संपत्तिसृत्युपक्रमयोरन्तराळे यत् यदस्तिकार्यन्तत्सर्वं विद्वदविद्वत्साधारणमिति सूचयितुम् ॥

तच्च भूतानां परसम्पत्तिस्तदोकोग्रज्वलनन्तेन द्वारप्रकाशश्चेत्येतत्त्रयम् । तदुपरिविद्यासामाथ्यर्याद्वा तच्छेषगत्यनुस्मृतियोगाद्वाहार्दानुग्रहाद्वा शताधिकनाड्यानिष्क्रमणं विशेषो विदुषाम् । यतोऽ

विदुषाश्चक्षुष्टोवान्येभ्यो वा देशेभ्यो निष्क्रमणमिति ॥ नन्वेवं सति तत्रैव परिहृत्यबाधकं समर्थनीयोऽयं विशेषो विद्वदविदुषोरिति चेत् । एवमेवस्याद्यदिस्यात् पाञ्चरात्रस्सूत्रकारः । तत्कथम् ॥ इदमुच्यते । श्रुत्वा हि भूतेष्वध्यक्षसम्पत्तिमसहमानश्चोदयति ननु क्षपयित्वा सम्पद्यते विद्वानित्युक्त्वा किमर्थमियम्महाजनगतोत्क्रान्तिरुपवर्ण्यते । यदि तत्र विदुषो विशेषः प्रदर्शनीय इत्येवमर्थंतदात्रैव स प्रदर्शनीयः । यतः पुनर्भवायैव भूतपरिष्वङ्गस्सच नास्ति विदुषोऽमृतत्वभाजनस्येति ॥

तत्राह समानाऽविदुषा विदुषोप्युत्क्रान्तिरासृत्युपक्रमादिति । एतेनच तयोर्ध्वमायन्नमृतत्वमेतीत्युपसूचितं भवति ॥ अथ यतः पुनर्भवायैव भूतपरिष्वङ्ग इत्यस्योत्तरमाहामृतत्वञ्चेदमनुपोष्येति । तेन कथमेवं प्रतिज्ञायते भूतपरिष्वङ्गएव नास्ति विदुष इति स्थितेऽस्ति सृतिरपीति माविषीद । यस्तूपोष्य भूतान्यमृतीभूतस्सकिल क्षपयित्वा सम्पद्यत इत्युपसंहृतः । स च पुनः प्रकरिष्यते सम्पद्याविर्भाव इत्यनूद्य । अयन्त्वन्योऽनुपोष्यामृती । तदर्थमियमुत्क्रान्तिरुपक्रान्तानुक्रम्यते । अस्य तु समानेयमासृत्युपक्रमात् । कथमन्यथा तयोर्ध्वमायन्नमृतत्वमेति । न तस्य प्राणाउत्क्रामन्तीति श्रुती निर्विवादं परस्परमनुगुणं स्याताम् । ततो मास्तु ते भ्रान्तिरेक एव विद्वानिति समाहितो भवति ॥

ततस्तूष्णीभूते सद्य एव पिधाय मुखमुत्क्रान्त्यनुक्रमविरोधिन्यनुक्रमयामासावसरादवशिष्टामिति सुष्टूपपद्यते सरणिरियम् ॥ एवं स्थिते कथमयं पाञ्चरात्रस्स्यात् सूत्रकारः । यतोऽत्र परिभ्रमति पाञ्चरात्रः ॥ यथाकिल । नन्वथमर्त्योऽमृतोभवत्यत्र ब्रह्मसमश्नुते । ततोऽविदुष एवोत्क्रान्तिः ॥

न किन्तु समानाचेयमुत्क्रान्तिर्विदुषोऽप्यविदुषा । अमृतत्वञ्चानुपोष्य भूतानि कर्मप्रदाहरूपम् । यत्त्वया प्रदर्शितम् । अत्र

ब्रह्मसमश्नुत इति तूपासनवेळायां विदुषो ब्रह्मानुभवपरम् । अवश्यंच तदनुपोष्यामृतत्वम् ॥ यत आपीतेरुपोष्य भूतानि ब्रह्माप्ययपर्यन्तं संसारं व्यपदिशति शास्त्रन्तस्य तावदेव चिरमिति ॥ किंच सूक्ष्मं शरीरमनुवर्त्तत एव । प्रमाणतस्तथोपलब्धेः ॥

अतो नोपमर्देनामृतत्वंत्वत्प्रदर्शितं । अस्यैव चोपपत्तेरेष ऊष्मा नतु स्थूलस्य । उत्क्रान्तिसमये क्वचिदेवोपलब्धेः ।

प्रतिषेधादितिचेन्न शारीरात्स्पष्टोह्येकेषामाम्नाये ।

" स्मर्यते चेति "

अथ कुतोऽयं परिभ्रमः । एवमेवस्यादितिचेत् । कथमेवं स्यात्, यदि यां काश्वनश्रुतिमवलंब्य प्रत्यवतिष्ठत तदा किमियन्तं समयमुदास्त किमर्थमियमुत्क्रान्तिरुपवर्ण्यते परमपुरुषार्थप्रतिपादनावसरे अमृतीसन्विद्वानत्र ब्रह्मसमश्नुत इतिहि श्रूयत इति प्रथमतएव कुतो न प्रत्यवतस्थे । यदीयमेतादृशीकष्टतरोत्क्रान्तिर्नास्ति विदुष इति विवक्षति तदा किं कुर्यामिति चेदुदास्ततदान्तत एवोचितमेवं प्रत्यवस्थानं । नत्वन्तराळे ॥ अथ यथास्माभिरवतारितं यदि तथाऽवतारयासि तदा-तव किं वाक्यविशेषावलंबनेन ॥

तत्र प्रमाणमपि प्रदर्शनीयमित्यवलंबिता श्रुतिरिति मावोचः । यतो भूतदाहंमश्रावयति त्वदुदाहृता श्रुतिः । यथा तथाविद्वान्नामरूपाद्विमुक्त इति श्रुतिः। समाधिरपि न जाघटीति ॥ अमृतत्वश्च त्वदुदाहृतन्नोपोष्यभूतानि । किंतु कर्माणीतिहि समाहितं भवति । तत्र कुतोभूतपरिष्वंगो विदुषोऽमृतंभाविष्णोरित्यस्य किमुत्तरमुक्तं भवति ॥

नचोपोष्यामृतत्वन्तूत्क्रम्यब्रह्मलोकं गत्वैव भवतीत्यर्थादुक्तमेव भवतीति वाच्यम् ॥ भवेदेवम् । यद्यमृतत्वश्चानुपोष्यभूतान्युपोष्य कर्माणीतिवा ग्रथितम् । यथान्यासेतु कथमेवं भवत् सति यत्किंचिदुपोष्यामृतत्वद्वित्वेऽभिप्रेते । यद्येकमुपोष्यापरमनुपोष्येत्यभिप्रेतन्तदैव यथा न्यासो घटेतेति ॥

अथ त्यज्यते श्रुतिविशेषावलम्बः । नहि वार्त्तिकस्य व्याहारमात्रेण भवति पथ्यविच्छेदः । भवतु युष्माकमिवास्माकमप्यवतारणमिति चेत्तदापि न समाधिस्सङ्गच्छते विद्वद्विभागाभावे । यतोऽमृतत्वञ्चेदमनुपोष्य भूतानि यदत्र विवक्षितमित्येव वक्तव्यं भवति । नतु यत्त्वयोपक्षिप्तमिति । उपोष्य भूतान्यमृतत्वस्यैवोपक्षिप्तत्वात् ॥ कर्मप्रदाहरूपस्य चातिवृत्ततयात्राविवक्षितत्वात् । अत्रैवं विप्रतिपत्तिर्युक्तापूर्वमेव प्रदर्शिता सूत्रकृतेति तानि पर इति त्वदीयभूतसम्पत्यधिकरणे त्वया वक्ष्यमाणतयाऽत्रासङ्गतेरभ्युपेतत्वाच्च । तस्मादयमप्येकोघट्टोऽद्वैतिनां विजयस्य पाञ्चरात्राणां पराजयस्येत्यवश्यमेवोपेत्यं भवति ॥

इति समानाधिकरणम् ॥

परिहृत्य प्रासङ्गिकमाक्षेपं स्वावसरप्राप्तस्य तेजः परस्यामित्यस्य यथावदर्थं समर्थयते ॥

" तदापीतेस्संसारव्यपदेशादि " त्यादिना ।

ननु तानि परइति वक्तव्यं, यतो भूतेष्विति बहुळीकृतम् ॥ न वक्तव्यम् । यतोर्थ एवावापितो लक्षणया । नहि लाक्षणिकं पदमप्यन्यथयन्ति लक्ष्यार्थस्योपगन्तारः ॥ अस्तु तत् पर इति वा वक्तव्यम् । तदपि न वक्तव्यम् । कुतः । यतः परप्रकृतिकन्तेजो लीयत एव तस्मिन्निति प्रबलं प्रत्यवतिष्ठमानेवादिनि सोद्ध्यक्षोभूतेष्ववतिष्ठत इति वत्तत् परेऽवतिष्ठत इति नानायासेनवदितु शक्यते । तस्मादप्ययपर्यन्तंतत्तेजो वर्त्तत एव । तावत्पर्यन्तं संसारव्यपदेशात्तेन विना तदयोगादिति सुष्ठूक्तं भवति ॥

अवश्यश्च तत्त्वत्प्रदर्शितमनुपोष्यामृतत्वम् । तस्य तावद्देव चिरमित्यापीतेस्संसारव्यपदेशादित्यर्थो न कथमप्युपपद्यते । अमृतो भवतीत्यनुपोष्यामृतत्वपरम् । अत्र ब्रह्मसमश्नुत इत्युपासनवेळायां

ब्रह्मानुभवप्रतिपादकमिति प्रतिक्षिप्तः पूर्ववादी कुतस्सद्यः प्रतिषेधादिति नाक्षिपति । किन्तत्रैव कथञ्चित् कलहायते ॥

अस्मन्नयेत्वन्योऽयं प्रस्तूयत इत्युक्ते सद्यएव परावर्त्ततेति युक्तवरं भवतीत्युक्तमेव । समाधानमपि तस्य तावाच्चिरमेवेति व्यपदिश्यते चेत् सङ्गच्छेतेति ॥ एवं किञ्चसूक्ष्मं शरीरमनुवर्त्तते प्रमाणतस्तथोपलब्धेः । अतो न भूतोपमर्देन त्वत् प्रदर्शितममृतत्वमित्येतदपि न साधुसङ्गच्छते । एतावत आयासस्यात्रानपेक्षणात् । निगमनानन्तरमस्यैव चेति पुनरपि समर्थनायोगाच्च ॥ नन्व "स्यैव चोपपत्तेरि"ति न प्रकृतोपयुक्तं भवति सूत्रम् । ऊष्मोपलम्भसमयेऽसंपन्नमनुपलम्भसमये तु सम्पन्नमित्यपि वक्तुं शक्यत्वात् । अतो न विद्यमानस्यैव स्थित्युत्क्रान्तिसाधकं भवति । तत् सत्ताप्रतिपादनमात्रंत्वनपेक्षितम् । सूक्ष्मन्तु तदर्हत्वात्तधीनत्वादर्थवदिति च तस्य साधितत्वात् ॥ श्रीभाष्यकारस्तु किञ्च विदुषोप्युत्क्रान्तिसमये यतोऽस्यैवोष्मोपलभ्यतेऽतोऽनुपोष्यैवेदममृतत्वमिति सुसङ्गतमेव व्याकरोतीति चेत् ॥

अस्त्यवश्यविमृश्योऽयं विषयः । किमेवमिदमेव परं विलोक्य वृथा विषीदसि । सूक्ष्मंत्विति तस्य सामान्यतस्सत्तासाधिता । तदापीतेरित्याप्ययम् । ततो यदि न सम्पद्यते किन्तु स्थित्वा गच्छत्येव । तर्हि कुतो गच्छन्नोपलभ्यत इत्येतत्पर्यहार्षीत् सूक्ष्मंत्विति । अथ यदि कश्चिद्वह्निना दग्धो म्रियते तदास्य कुतस्सत्वं कुतो वागमनमित्येतदुक्तरितत्रोपमर्देनात इति । एवं स्थिरीकृत्य स्थितिगमने तत्रोपपत्तिमात्र प्रदर्शनमन्वयव्यतिरेकाभ्यामिति स्थिते कानामात्रानुपपत्तिः ॥ तत्रान्वयव्यतिरेकोपपादनार्थमेवकारः । ततः पुनरपि तमादाय माविषीदेति ॥

इति तदापीत्यधिकरणम् ॥

विद्वद्विशेषस्योत्क्रान्तौ विशेषमुपपादयितुमुपक्रान्ता सामान्यतो महाजनगतोत्क्रान्तिरवसायिता विशेषसमयोपसूचनपूर्वकम् । तत्र तदुपसूचननान्तरीयकतयावश्योपसूचनीयमुपसूचितममृतत्वद्वित्वम् ॥ तत्तु विद्वद्वित्वायातन्नान्यथेत्यवश्यं स्पष्टीकर्त्तव्यं स्पष्टीकर्तुमाह ॥

“ प्रतिषेधादिति चेन्न शारीरात् ”
“ स्पष्टोह्येकेषामि ” ति ।

किमिदं राद्धान्तछायया पूर्वपक्षप्रणयनम् । नेदमदृष्टचरम् । अन्यथा त्वंशब्दादिति चेन्नाविशेषादिति दृष्टत्वात् । तथाच यथा तत्रार्थाविशेषे विद्याविशेष इति स्वेनैव सामान्यतो व्यवस्थापितमर्थं शब्दविशेषमवलम्ब्यापवदितुमियं रीतिराद्दता तथैवात्रापि सामान्यतो विदुषामविदुषाव्यवस्थापितमुत्क्रान्ति सामान्यमपवदितुं सैवरीतिराद्दतेति सुष्टूपपद्यते ॥

परन्तु तत्र विधिशब्दोऽत्र प्रतिषेध इति भेदः । एवमेवानियस्सर्वासामिति व्यवस्थापितमपवदितुमप्रतीकालम्बनान्नयतीति बादरायण इति प्रकारभेदोऽवलम्बित इति तत्रैव प्रदर्शयिष्यामः ॥ अथ स्पष्टस्त्वेकेषामिति कुतो न सूत्र्यताम् । स्पष्टत्वमपि स्पष्टयितुं हिकार एवावश्यके कथम्पूर्ववदाक्षिपसि । ननु शारीराद्धि स्पष्टः प्रतिषेध एकेषामाम्नाय इति व्याकुर्वन्ति । स्मर्यते चेत्यन्तं समानाधिकरणमिति चोपयन्ति परे ॥

व्याकुर्वन्तु काममुपयन्तु च । य एते सूत्रकारस्यापि व्यामोहकत्वमारोपयन्ति । यतस्सूत्रकारः ॥

“ तानि परे तथाह्याह । अविभागो वचनादि ” ति ।

पूर्वं प्रकृतिविकृतिभावाभावेन प्रत्यवस्थाने संपत्तिर्न लयः । किन्त्वविभाग इत्यवश्यवक्तव्यमनुक्त्वाऽत्र पुनः प्रकृतिविकृतिभावोऽप्यस्तीति प्रत्यवस्थानेऽपि तत्रोक्तस्यैव सम्पद्यन इत्यस्यात्रानुषङ्गेण

तत्र योऽर्थस्स एवात्राप्यविभागोर्थ इति तत्रोक्तवानिवात्र वदति । कुत इति चेत् सत्यपि प्रकृतिविकृतिभावे लयस्येदानीन्नावसर इति न वदति । किन्तु मनस्येव निधत्त इति कल्पयन्तीति ॥

इति प्रतिषेधाधिकरणादीनि ॥

अथ विद्वद्विशेषस्यावशिष्टामविदुषा समानामुत्क्रान्तिमुपवर्णयन्विशेषं प्रतिपादयति ॥

"तदोकोग्रज्वलनं भवति । तत् प्रकाशितद्वारो भवति विद्वानविद्वांश्च । ततस्तयोस्स्वविद्यासामर्थ्यातच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतो गच्छति विद्वांच्छताधिकया स्वस्वकर्मानुरूपमितराभिरितर इति ।"

तदोक इति कस्योकः । उपासकस्येत्याह श्रीमान् । कथमेवमाह । स एतास्तेजोमात्रास्समभ्याददानोहृदयमेवान्ववक्रामति । तस्यैहैतस्य हृदयस्याग्रं प्रद्योतते । तेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नोवेति प्राणिसामान्यसम्बन्धितया श्रूयमाणे ॥

अस्तु किमेकं पदमुतभिन्नम् । भिन्नमित्याह । यत आहाग्रे ज्वलनं यस्य तदग्रज्वलनन्तदोक इति । तस्य हैतस्य हृदयस्याग्रं प्रद्योतत इति श्रुतेऽप्येवं व्याकरोदिति विचित्रमेतत् ॥ तत् प्रकाशितद्वारोऽपि विद्वानेवेति ब्रूयात् । तथाच श्रुत्या समानाचासृत्युपक्रमादिति स्मृत्याच नसङ्गच्छेत। एवञ्च तदोकोग्रज्वलनन्तत् प्रकाशितद्वारत्वञ्च शताधिकनाडीप्रवेश इव पराधीनमिति तदुक्तिरपि श्रुतिसूत्राभ्यां विरुद्ध्यत इति विज्ञेयम् ॥ हेतुत्रयञ्चात्रोक्तं यथा सम्भवन्तत्र तत्रोपासन इति पूर्वमुपपादितम् ॥

इति तदोकोग्रज्वलनाधिकरणम् ॥

अहो अनादितया प्रवृत्तमतीत्य महान्तं समयं परानुग्रहपात्रीभूतो ।निष्क्रम्य शताधिकया शरीराज्जातो विद्वान् रश्म्यनुसारीत्याश्चर्यवद्वदन्निव प्रतिजानीते दीर्घान्तेन ॥

" रश्म्यनुसारी " त्यनेन ।

तीरानुसारीसन् गच्छेति पितेव पुत्रं प्रस्थापयतीव वैदिकसार्वभौममुपासकं वेदाचार्यः । रश्म्यनुसार्येव स्यादुपासकः । न तत्रास्य भवति प्रतिबन्धो निशामरणादिनेत्युपादिशतीवास्मभ्यमाचार्य सार्वभौमः ॥

" निशिनेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च " ।

तामेतामाचार्यस्य प्रतिज्ञामसहमान इवाक्षिपत्याक्षेप्तारिप्रतिक्षिपति नेत्यादि नेति स्पष्टं प्रतीयते ॥ अस्तु निशिनेत्युच्यते । तत् किन्नेत्युच्यते । यत् सम्बन्धस्य यावद्देहभावित्वमुच्यते तन्नेत्युच्यते । न तन्नेत्युच्यते । यतः कर्मसम्बन्धस्य तत्वमुच्यते । स कथन्निशिनेत्युच्येत । किन्तु निशि मृतस्य ब्रह्मप्राप्तिर्नेत्युच्यते ॥ कथमिदमुच्येत । उपात्तेहि सम्बन्धिनि सम्बन्धस्येति सम्बन्धस्स्वतन्त्रमुच्येत । तत्रोपात्तोरश्मिरेवेति तत्सम्बन्धस्यैव तत्वमुच्यत इति स एव निशिनेत्युच्येत ॥

न कथञ्चन स नेत्युच्यते । यतो नेदं पूर्वानुसारिसूत्रम् । किन्तूत्तरानुसारि । कुतः । अतिदेशत्वात्तस्य । स कथमुपदेशं विना सङ्गच्छेत । अतो निशामरणापराधेन तदामृतस्य विदुषो न ब्रह्मप्राप्तिरिति चेन्न । यतो यावद्देहभाव्येव श्रेयः परिपन्थिकर्मसम्बन्ध इति दर्शयति तस्य तावदेव चिरमिति श्रुतिः । ततोऽतश्चायनेऽपि दक्षिण इत्यतिदेश इति सुसङ्गच्छत इति ॥ अथ प्रतिज्ञातमर्थमप्रसाध्यकोयं कोलाहल इति चेन्न । को वा नप्रससाध । तस्याभिप्रायिकेणैव रश्मिभिरेवेत्यवधारणेन लौकिकया च युक्त्या प्रसाधित-

स्यात् । तस्मान्न प्रतिज्ञामात्रमिति प्रतिज्ञातुं शक्यते भवतेति ॥ प्रतिज्ञामात्रमित्येव प्रतिजानीमहे । तथाहि यस्तु नूतनतया साधयितुमारिरिप्सितोऽर्थस्तत्रेदमेवमिति प्रतिज्ञामात्रमेव प्रथमं क्रियते व्यवहारकुशलेन । तत्र यदि प्रसजति तदनुकश्चिदाक्षेपस्सद्य एव प्रतिक्षिप्यते स आक्षेपः । अन्यथा तु प्रतिज्ञातः प्रतिज्ञात एव । तत्रेदानीं परिसमाप्योत्क्रान्तिपेटिकां प्रस्थानपेटिकामारभमाणः कुतो न कुर्यात् प्रतिज्ञामात्रं सूत्रकारः ॥

तत्र तामिमां लौकिकीमपि परिपाटीमजानता यावानुच्यते निशिनेतीति सूत्रेण तावन्तमप्यर्थमाभिप्रायिकं कल्पयित्वा किमर्थमन्यथानीयते क्लिष्टकल्पनया भवता तत् सूत्रम् । निशिनेति चेन्न यावद्देहसम्बन्धभाव्येव हि सम्बन्धइत्येवहि वक्तव्यं भवन्मतावलम्बने ततः परन्नास्तीत्यर्थन्द्योतयितुम् । किञ्च रश्मिसम्बन्धार्थमेव स न प्रतिज्ञायते । किन्तु ब्रह्मप्राप्त्यर्थम् । तत्रैवमाक्षेपः । किं विद्वान्रात्रौ म्रियते न वा । यदि म्रियेत तर्हि न रश्मिसम्बन्धः । तदा तदभावात् । निशामरणापराधेन प्रतिबन्धाच्च । अथ न म्रियते । एतदेव वरम् । कथमन्यथा भीष्म उदीक्षाञ्चक्रे । परन्तु तस्य पितृवरलाभेन तथा समर्थनेऽपि अनियतकालत्वान्मृत्योः पाक्षित्येव रश्मिसङ्गतिरिति । तत्र भवत्येव निशायामपि रश्मिसम्बन्धः । नह्यनिवार्येण निशामरणादिना कश्चित्तथा पराद्धो भवति । स्वल्पोऽपि तेन प्रतिबन्धो विद्यासामर्थ्याद्विगतो भवति । अतो रश्म्यनुसार्येव । अतश्चायनेऽपि दक्षिण इति सुसङ्गतेऽर्थे किमेवं लोकमाकुलयसि ॥

"योगिनः प्रति च स्मर्यते स्मार्त्ते चैते"

अथ वैदिकव्यातिरेकेण स्तोगतीस्मार्त्ते । स्तः । याभ्यां सनकादयो योगिनो गतागतं कुर्वन्ति योगेन भूतादीञ्जित्वा । अथैवं सति योगिन उपासकान् प्रति स्मार्त्ते स्मर्त्तव्ये इति स्मर्येते । न

कालविधिरिति किं क्लिष्टकल्पनयाऽप्रतिसंहितेन समाधानेन श्रीमतः विरोधशङ्कायामेते एव स्मर्येते इत्येतावत्येव कर्तव्ये किमियत्या वाचा पश्चिकैयेवमर्थविवक्षायामिति चेत् ॥ तत्र तत्र किञ्चित् किञ्चित् कथञ्चिद्वैषम्यमेव सम्पादनीयमित्येवं प्रवृत्तमिति गृहीतव्यम् ॥

इति चतुर्थाध्यायस्य द्वितीयः पादः ॥

अथ तृतीयः पादः ॥

रश्मिष्ववतारितस्य विदुषो मार्गैक्यक्रमस्वरूपनिरूपणायारभतेऽतश्चायनेऽपि दक्षिणेऽर्चिरादिना गच्छत्येव विद्वानिति पूर्वोत्तरसंघटनानुकूलेन ॥

" अर्चिरादिना तत्प्रथितेरि " त्यादिना ।

अत्रपूर्वपक्षभाष्ये भिन्नप्रकरणत्वं भिन्नविद्याशेषत्वमथैतैरेवेत्यवधारणं स यावत् क्षिप्येदिति त्वरा वचनश्चेति चत्वारः कण्ठोक्ता मार्गभेदहेतवः ॥ यासु त्वन्या श्राव्यते तासु किमित्यर्चिराद्याश्रयणमिति श्रुतीनां भिन्नरूपत्वमनपेक्षितत्वश्चेति सूचितश्च हेतुद्वयम् ॥

तत्र सूचितमेव निगूढमुपादायाविशेषतस्स एव विषयः प्रदर्शितः परैर्वाक्यान्तरैः ॥ सत्यप्येवं कण्ठोक्तेषु हेतुषु भाष्योक्ताभिरेव सिद्धान्तयुक्तिभिस्तन्मन्दन्तन्मन्दमत एवाचार्येण त्यक्तमिति परानुयायिनो दोषोद्भावनं केन सङ्गतमिति प्रेक्षावन्तो विमृशन्तु ॥

अमन्दस्यापि पक्षस्य सिद्धान्तयुक्त्याऽभासीकरणाय कियता क्षणेन भवितव्यम् । अनाभासीकरणे कुतस्तस्य पूर्वपक्षतेति ॥ तदिदमास्ताम् । मार्गैक्यं प्रसाध्य मार्गक्रमं ग्रथयन्नाह ॥

" वायुमब्दादविशेषाविशेषाभ्यामिति " ।

छन्दोगश्रुत्युक्तार्चिरादिपर्वसु तत्राश्रुतानि श्रुत्यन्तराल्लब्धानि पर्वान्तराणि घटयन्वाय्वात्मकं पर्वान्तरमब्दादित्ययोरन्तराळे

घटयामासानेन सूत्रेण सूत्रकारोऽर्थाद्देवलोकमपि वायोरर्वागिति भाष्यकारः ॥

अयञ्च विषयो दोषगणग्रस्त इति मन्वाना वायुदेवलोकशब्दयोरेकार्थत्वं वर्णयन्ति परे ॥ तदत्र किञ्चिद्विचार्यते ॥ नानेन सूत्रेणाब्दादित्यान्तराळे वायुस्साध्यते । व्यर्थत्वात् । १ । असाधकत्वात् । २ । वैरूप्यात् । ३ । प्रतिपादनीयाप्रतिपादनप्रसङ्गात् । । ४ । बाधापत्तेः । ५ । अर्थान्तरयोगाच्च । ६ । तथाहि । उक्तार्थपरत्वे व्यर्थमिदमधिकरणम् ॥

सदेवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकमिति पाठक्रमेण हि समामनन्ति कौषीतकिनः ॥

वाजसनेयिनस्तु स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं । तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तथा स चन्द्रमसमागच्छति तथैव स ब्रह्मलोकमागच्छत्यशोकमहिममित्यधीयते । तत्र च प्रतीयते तृतीयया क्रमः । तथाच बलीयसा श्रौतेन क्रमेण पाठस्य बाधात् संशय एव नास्तीति व्यर्थमिदमस्मिन्नर्थे सूत्रमिति चेत् ॥

न । यतो तेनेति तृतीययोर्ध्वाक्रमणमात्रे तु श्रुतावायोर्निमित्ततेति ॥ अथोर्ध्वशब्दस्योर्ध्वदेशसामान्यबोधकत्वेऽपि प्रकृतेऽर्चिरादरातिवाहिकदेवतात्वस्य साधयिष्यमाणत्वेन वायूपरितनदेवतापरत्वस्यावश्यकतया विशेषाकांक्षायां सन्निहितादित्यपदेनैकार्थीभूय तमेव बोधयतीति कुतस्संशय इति चेन्न । अथाप्यग्न्यानन्तर्याविघाताया हरादिपरत्वस्यापि सम्भवेन संशयोपपत्तेः ॥

अथ कौषीतकिवाजसनेयिश्रुत्योरेव विप्रतिपत्तौ कुतश्छन्दोगश्रुतिगताहरादीनामुपस्थितिरिति चेत् ॥ प्राज्ञोसि । प्रथिते हि पथि पथ्यन्तराणि प्रविशन्ति पश्यामः । अत एव ह्युक्तमर्चिरादिना तत्प्रथितेरिति । तत्र कुतश्छन्दोगश्रुतिगताहरादीनामनुपस्थितिः ॥

अथैवमपि न संशयोपपत्तिः । यतोऽर्चिषोऽहरिति पञ्चमीबाधो भवतीति चेन्न । पक्षान्तरेऽपि संवत्सरादादित्यमिति पञ्चमीबाधस्य तुल्यत्वात् ॥

अथ देवलोकादादित्यं संवत्सरादादित्यमिति च पञ्चम्योस्सुन्दोपसुन्दयोरिव परस्परमेव बाधात् कुतोऽत्र संशयइति चेन्न ॥ संवत्सरादित्ययोर्निर्वर्त्य निर्वर्तकत्वसम्बन्धसहकृतया पञ्चम्यन्तरस्यैव बाधात् ॥ नन्वेवंसति पूर्वपक्षएव स्थितस्स्यादिति कुतोऽत्र संशयइति चेन्न ॥ ऊर्ध्वशब्दस्य सन्निहितपरत्वं वोपेयतां पाठक्रमो वा पाल्यतामित्यनिर्द्धारणात् संशयोपपत्तेः ॥ अथ तथा सत्यनिर्द्धारणमेव स्यान्नकथञ्चन पूर्वपक्षोन्मेषस्स्यादिति चेन्न ॥ वायोरादित्याद्वोक्त्वमुपेत्य सामान्यविशेषभावेन वाक्यद्वयस्यैकस्मिन्नेवार्थे व्यापारद्वयकल्पनामपेक्ष्याग्न्यानन्तर्यमेव युक्तमग्निमित्रस्य वायोः । ऊर्ध्वशब्दस्य तु ब्रह्मलोकपार्यायगतस्य तटिदादिपरत्ववदहरादिपरत्वसंभवात्। चन्द्रपर्यायगतस्य तु गत्यन्तराभावादिति पूर्वपक्षप्रणयनात्। एवञ्चेत्तर्हि कथं सिद्धान्तस्साधयितुं शक्येत । ततः प्रकारान्तरमेव परिमार्गितव्यमिति चेन्न ॥ प्रतिज्ञाहानात् । भग्नाहिते प्रतिज्ञा । अतः,

साधयामि यदि वात्यजाम्यहं व्यर्थमेतदिति ते वचोगतम् ।
शांकरे वचसि सूत्रसंगते शङ्करोऽपि नहि शङ्कितुं क्षमः ॥

साद्ध्यते श्रूयतामवहितेन मनसा । नायमूर्ध्वशब्दस्सामान्यतोऽहरादिपरः । किन्तु सन्निहितादित्यपर एव । यतो न तेनेति तृतीयापञ्चमीव परत्वसामान्यबोधिका । किन्तु करणत्वबोधिका । यत आह भगवान् पाणिनि'स्साधकतमं करणं कर्तृकरणयोस्तृतीयेतिच। आह च न्यायसिद्धान्तप्रवर्तको मणिकारः, 'फलायोगव्यवच्छिन्नं कारणं करणमिति । तथा च करणत्वमव्यवहितपूर्वत्वमिति भवति ॥ पंचमीतु व्यवहिताव्यवहित साधारणमेव परत्वं बोधयति।

अत एव शतात् परं सहस्रमिति लोकव्यवहारः । तथाचोर्ध्वपदार्थस्य वायोरव्यवहितपरत्वं लभ्यते । नचेदानीमूर्ध्वशब्दोऽहराद्यब्दान्तपरो भवितुमर्हति । सर्वेषामपि तेषां वायोरव्यवहितपरत्वासम्भवात् ॥ नचाहरेव गृह्यतान्तेनेति वाच्यम् । वायोरन्यानर्पेसिद्ध्यनन्तरसम्भावनीयत्वात्तेन तन्मात्रग्रहणस्य । पंचम्या इव पाठस्यापि बाधितत्वात् ॥ नचाधिकबाधः । प्रबलेन बहूनामपि दुर्बलानां बाधस्यौचित्यात् । पूर्वपक्षेऽपि स आदित्यमागच्छतीति पाठबाधप्रसङ्गाच्च ॥

तथाचायं सूत्रार्थः । चन्द्रपर्याय इवाविशेषेण विशेषेण चैकस्यैवादित्यस्य वायोरव्यवधानेन प्रतिपादनादब्दाद्वायुमभिसम्भवेयुः । नचाब्दानन्तर्य बाधो दोषः । यतोऽविशेषः पञ्चम्यर्थो विशेषस्तृतीयार्थः पाठबाधेऽप्येवमेवेति ॥ अथापि विरूपमेवेदमस्मिन्नर्थे सूत्रं । यद्यादित्यादर्वाक्त्वं वायोस्सिषाधयिषितन्तदा वायोरादित्य मित्येवहि सूत्रयितव्यमिति चेन्न । तेऽर्चिषमभिसंभवन्तीतिवद्वायुमभिसंभवन्तीत्यस्य सिषाधयिषितत्वात् । अथैवञ्चेद्वायुमर्वागादित्यादित्युपन्यस्यतामितिचेत् अहो लोकव्यवहारज्ञता ते पंडितमानिनः । गौरीमायूराच्छ्रीरङ्गं प्रति प्रस्थितोऽयन्ततोऽर्वाग्ब्रह्मपुरमभिसमभवत्ततोऽर्वाञ्च वैद्येश्वरञ्चेति कोवाप्रब्रूयादिति यतो नालोचितम् ॥ अस्त्वब्दात् परमिष्टो देवलोकः । ततो वायुन्देवादित्येवोपन्यस्यतामिति चेत् । कथमपूर्वा ते विस्मृतिः । अर्चिरादौ हि प्रथिते पर्वान्तराणि घटयितुं प्रवृत्तस्सूत्रकारः । अथ देवलोकोऽप्यर्चिरादावेव । किञ्चैवं सति देवलोकादब्दमब्दाद्वायुमित्यस्य कस्समाधातेति चेत् सूत्रकार एव । यतस्सत्यपि देवलोकादादित्य मित्यर्चिरादावेव तदविगणय्य वायुमब्दादिति सूत्रयन्नास्त्यर्चिरादावब्दपर्यन्तं विगानमिति सूचयामास । तथाच मासान्तमविशिष्टमुभयोरविगानं । छांदोग्ये त्वब्देऽप्यस्त्यविगानमिति विशेषः । तदेव

कुतइतिचेत् अविशेषविशेषाभ्यामेव यद्यप्यविशिष्टामासेभ्य इत्युभयत्रापि पंचमी । अथाप्यस्ति विशेषोऽब्दस्य मासनिर्वर्त्यस्येति । सूचितश्चेदं वायुमब्दादिति छन्दोगश्रुत्यपेक्षयेति भाष्येण सैवापेक्षितव्याऽब्दाद्वध्यविगानादित्यभिप्रायकेण । तथाच मासेभ्यो देवलोकमित्येतद्बाधितं भवति ॥

अथापि कथमब्दात् परत्वसिद्धिर्देवलोकस्येति चेत् अविशेषविशेषाभ्यामेव । तथाहि अर्वाङ्मासेभ्यः परस्तादादित्याच्च प्रवेष्टुमनर्हस्य देवलोकस्यास्त्यवशिष्टमन्तराळे स्थानत्रयम् तत्रास्ति मासाब्दयोरतिरिक्तसंबन्धो विशेषः । अस्तिच वाय्वादित्ययोर्नैरन्तर्ये करणत्वं विशेषः । अविशिष्टाश्च मासेभ्यो देवलोकन्देवलोकादादित्यं संवत्सरादादित्यमिति च सर्वा अपि पञ्चम्यो बाधिताश्च पूर्वमेव । तस्मादप्रत्यूहमब्दात्परो भवति देवलोक इति स्थिते कुतः प्रतिपादनीयाप्रतिपादनमस्माकम् ॥ अथ कथं वायुमब्दादिति सौत्र्यपि पञ्चमी बाध्यतामिति चेत् ॥ कोयमपूर्वस्तेपक्षपातस्सौत्र्यां श्रौत्यामपि बाधितायां बाध्यतामियमिति सूत्रकृताप्यनुमतायां । कथमन्यथा वायुमब्दादिति क्रमभङ्गेन प्रयुञ्जीत ॥ बाध्यत एवेयमित्याह भाष्यकारस्तत्रादित्यानन्तर्याय देवलोकाद्वायुमभिसंभवेयुरिति । आदित्यानन्तर्यायेति देवलोकादादित्यं संवत्सरादादित्यमितिच श्रौत्योर्देवलोकाद्वायुमिति सौत्र्याश्च बाधः प्रकटितः । अब्दात्परत्वेन साधितस्य देवलोकात्परत्वोक्त्यैव मासेभ्यो देवलोकमित्यस्यापि बाधः प्रकटीकृतः । यद्यप्यब्दाद्देवलोकमित्यपि वक्तुं शक्यम् । तथासति देवलोकस्यापि साध्यता सूचितेतिस्यादित्येवमुक्तम् । अत एवाभिसंभवेयुस्स्वयमेव । नास्माकन्तत्र भारोऽस्तीति सूचितम् । नत्वब्दाद्वायुमभिसंभवन्तीतिवत् साधितम् ॥

नन्वेवं सति संवत्सरादित्यस्य स्थाने देवलोकाद्वायुमिति पठितव्यम् । वायुमब्दादिति तु सूत्रमत्रापि वाचकमेवेति भामती

कथं संगच्छेतेति चेत् । एवं। नचेयं सूत्रभाष्याशयविरोधेन स्वातन्त्र्येण देवलोकसाधनपरा । तथासति वायुमित्यस्य स्थाने देवलोकमिति पठितव्यम् । तथाच वायुमब्दादिति सूत्रमत्रापि साधकमेवेति हि वदेत् ॥ किन्त्वब्दादिति सौत्रं पदं परित्यज्य संवत्सरादिति श्रौतं पदमादाय संवत्सरादित्यस्य स्थानेऽगतिकदेवलोकप्रवेशेनादित्यमित्यस्य स्थाने वायोर्घटनेन च यादृशीश्रुतेरानुपूर्वी निष्पन्ना तामेव हि व्युत्पादयति ॥

नच तर्हि बोधकमेवेति वक्तव्यम् । ननु वाचकमेवेतीति वाच्यम् । वाचकमिवातिस्पष्टमर्थाद्द्योतकमेवेत्यर्थकत्वात् । कथमन्यथा संवत्सरादित्यस्य स्थान इति ब्रूयात् साधकमेवेति च न ब्रूयादिति सर्वमपि रमणीयमेवेति ॥ ननु वायुदेवलोकयोरैक्येऽपीदं सर्वं सङ्गच्छते । तथाचार्थान्तरयोगान्नायमेवार्थ इति चेन्न ॥

वैयर्थ्यात् । १ । वैरूप्यात् । २ । प्रमाणाभावात् । ३ असाधकत्वाच्च । ४ ॥

तथाहि । उक्तेन प्रकारेणोभयोरपि यथायथन्निवेशसंभवे व्यर्थमिदन्तयोरैक्यप्रसाधनम् । नच लाघवादेवमेवेति वाच्यम् । सत्यप्यनुचिन्तनलाघवे तवातिवाहिकगणोहि खिद्येदेकस्यापि न्यूनतायाम् । वैरूप्याच्च ॥ बलीयसा प्रमाणेन स्वयमेव वायुरादित्याद् र्वाङ्निविशते । तेनैव स्वस्थानाद् प्रच्यावितो देवलोकोऽपि स्वयमेवाब्दात् परं प्रविशति ॥

तत्र तयोरैक्यं परं सिषाधयिषितमिति त्वन्मतावलम्बने देवोवायुरिति हि सूत्रयितव्यम् ॥ नच देवलोकं सन्तं वायुमित्यर्थाङ्गीकारे कुतोऽयन्न्यासो नोपपद्येतेति वाच्यम् । यतोऽस्फुटैवास्मिन्नर्थे भवति लक्षणा ॥ नचाब्दादित्युक्त्या हेतुविशेषोक्त्या च प्रस्फुटत्येवेयं लक्षणेति वाच्यम् ॥ तर्हि देवं वायुमिति कुतो न सूत्र्यताम् । अब्दाद्वायुमिति किं वक्रोक्त्या ॥

नच सूचनार्थमेवमुक्तम् । सूचनात् सूत्रमिति हि सूत्रलक्षणमिति वाच्यम् ॥ अहो पाण्डित्यं भवतः । लघुनाहि सन्दर्भेण बह्वर्थसंसूचनं सूत्रलक्षणम् । यावता तु सन्दर्भेण योऽर्थस्स्पष्टमेव प्रतिपादयितुं शक्यते तावतापि तस्यैवास्पष्टं सूचने सूत्रत्वमिति कुतोऽधिगतम् भवता । एवं विधोऽपि भवान् भाष्योपरि पर्यनुङ्क्त इति विचित्रमेतत् ॥

प्रमाणाभावाच्च । नैवात्र प्रमाणं पश्यामः । नच योऽयं पवते एष देवानां गृहा इत्यस्त्यत्र श्रुतिर्मानमिति वाच्यम् । अर्थवादत्वात् । अर्थवादोह्येषावैमानिकानान्देवानां विमानविधारकं वायुं स्तुवन्ती । न ह्यर्थवादमात्रेण तयोर्भेदप्रसिद्धिमुल्लंघ्याभेदं साधयितुं शक्नोति शक्तोऽपि । प्रसिद्धिमादायैव भवतापि पूर्वपक्षप्रणयनात् ॥ नचेन्द्रलोकाद्यपेक्षया देवलोक इति पृथङ्लोकासम्भवेनोक्तश्रुतिबलाद्वायुरेव स इत्यवश्यमेव ग्राह्यमिति वाच्यम् । सामान्यतोऽप्याजानजादीनान्देवानां लोकस्य सम्भवेनासम्भवाभावात् । अतो न तयोरैक्येऽस्ति प्रमाणम् ॥

प्रत्युतास्ति तयोः पृथक् पर्वान्तरत्व एव प्रमाणम् । तलवकारिणां गुहासि देवोसीत्यादि श्रुतौ । तमग्निरभिप्रवहति तं वायुरभिप्रवहतीत्यादिना पृथिव्यग्निवायुरन्तरिक्षलोको दिशोऽह्नोरात्रेर्धमासामासा ऋतवस्संवत्सरो दिव्यगन्धर्वाप्सरसो द्यौर्देवा आदित्यश्चन्द्रमा इत्यातिवाहिकगणनिरूपणे वायोः पृथग्देवा इति परिगणनात् ॥ असाधकत्वाच्च ॥ सिद्धे हि वायोर्देवलोकत्वे तच्छब्दयोरविशेष विशेषभावसिद्धिः । तत्र कथन्ताभ्यामेव तत्साधनम् । किंच स वायुमित्यस्य स वायुलोकमित्यनेन समानार्थत्वं वक्तव्यम् । तत्र वायोर्लोकमिति तत्पुरुषे योऽयं पवते एष देवानां गृहा इत्यस्य क्वोपयोगः ॥

नच वायुश्चासौ लोकश्चेति विगृण्हीमो वयमिति वाच्यम् । तर्हि देवलोकमित्यत्रापि तदापत्तेः । नचेष्टापत्तिः । देवानां लोक इति त्वदीयविग्रहविरोधापत्तेः ॥ अथ तत्पुरुष एवोपेयते । तत्राग्निलोकमित्यादयश्शब्दास्तत्तदधिष्ठातारं लक्षयन्ति । वायुमिति तु साक्षाद्वायुमेवाभिदधाति । देवग्रहा इत्येतदपि वायुमेव तदधिष्ठातारं लक्षयतीत्यभ्युपगमे कानामानुपपत्तिरिति चेत् ॥ सूत्रार्थानुपपत्तिरेव । अविशेषविशेषाभ्यान्देवलोकवायुशब्दाभ्यां वायुरेवाभिधीयत इति हि सूत्रार्थोऽभिमतो भवताम् । सच देवलोकशब्दस्य लाक्षणिकत्वे कथमुपपद्येतेत्यलमधिकेन ॥

इति वाय्वधिकरणम् ॥

"तटितोऽधिवरुणस्सम्बन्धात् ।"

मार्गक्रमं निरूप्य स्वरूपं निरूपयति ।

"आतिवाहिकास्तल्लिङ्गात् । उभयव्यामोहात्तत्सिद्धेरि" ति ।

तटितोऽधिनेतृविशेषं साधयति ॥

"वैद्युतेनैव ततस्तच्छ्रुतेरि" ति ।

स एनान् ब्रह्म गमयतीत्यत्र गमयिता निर्द्धारितः । परं दशसूत्री वर्तते । तत्राष्टसूत्री गन्तव्यनिर्द्धारणपरा । द्वयीतु गन्तृनिर्द्धारणपरेति वयम् । तत्रापि प्रथमं पञ्चसूत्री सिद्धान्तः । पश्चात्त्रिसूत्री पूर्वपक्ष इति सिद्धान्तः ॥

ननु कथं विलक्षणापरिपाटी पूर्वापरपक्षयोः पौर्वापर्यविनियमात्मिका । किमस्याः प्रयोजनम् । उपासकानां कार्यप्राप्तिरेव प्र-

थमम् । पश्चादेव परप्राप्तिरित्येतत् संसूचनम् । तदोवोच्यते कार्या-त्यये तदध्यक्षेण सहेति ॥ अथायमेव स्यात् पूर्वः पक्षः । न स्यात् । कार्योपासकानां गत्यन्तराभावात् । अस्तु परप्राप्तिरेव । कथमेवं-स्यात् । तवानिष्टेः । ममाप्यनिष्टेः । तत् क्रतु न्यायविरोधाच्च । अ-स्तु तथासति धूमादिः । सोऽपि कथं स्यात् । विद्याकर्मणोरिति पृ-थक् प्रकृतत्वात् ॥

अस्तु परोपासकानां कागतिः । परोपासका इत्येवाभावान्न-गतिः । तद्विदान्तु । अगतिरेव यत आहास्य कार्यस्य गत्युपपत्तेरि-तरस्य तु तदनुपपत्तेरिति ॥ यदि सन्ति परोपासकाः । तर्हि तेऽपि कार्यमेव गच्छेयुः । कथं गच्छेयुस्सति तत्क्रतुन्याये । तथासति प-श्चाग्निविदां का गतिः । सोऽपि ब्रह्मक्रतुरेवेत्यस्मन्मतम् । यद्यब्रह्म क्रतुः । तर्ह्याहत्यवादेनैव गच्छेयुरिति वक्तव्यम् । अयमत्र न्यायः परोपासकानामपीतीक्षतिकर्माधिकरण एव सिद्धान्तितमस्माभिः ॥

किञ्च । किञ्चातिबल्बज एवात्र पूर्वपक्ष इति सूचयितुंच त-स्य पृष्ठतः करणम् । कुतः । यदि बादरिर्वस्तुतः पूर्ववादी तदा त-दुक्तानां हेतूनामुत्तरवादः कर्तव्यो भवति । नैवं क्रियते । प्रत्युत वक्ष्यमाणानामेवात्र दृश्यत उत्तरवादः । तथाहि ॥ नह्यत्र मुख्यत्व माश्रयणीयम् । गत्यनुपपत्तेः । व्यपदेशस्तु सामीप्यात् स्यात् । ग-त्वैव कार्यं पश्चात् केषांचित्तदध्यक्षेण परप्राप्तेरभिधानाच्चेत्युत्तरायि-त्वापि स्मृतेश्चेत्युपबृंहितत्वात् । अस्तु तर्हि दशापि सूत्राण्येकमधि-करणम् । अस्तुच मुनिद्वयमपि पूर्ववादि । स्वमतन्तु सिद्धान्तः । दृश्यन्ते चैवंविधानि बहून्यधिकरणान्युत्तरत्र । दृश्यते चात्र तादृ-श्येव रीतिरन्ते स्वनामग्रहणात् । आदृताचेयमेव श्रीमता भाष्यका-रेणेति चेत् ॥ नैवम् । यतः कथञ्चिदप्येवमत्रोत्प्रेक्षितुं शक्यते । कु-तः । विषयान्तरालाभात् स्वमतस्य ॥

तथाहि । उभयथाऽदोषादित्युक्तं तत्र । तथाचानिर्द्धारणाद्विकल्प इति स्यात् । सचानिष्ठः ॥ नचोभयमपि गन्तव्यमेव । परन्तु प्रतीकालम्बनान् परं वर्जयित्वा नयतीत्यस्ति विविक्तोविषयस्सिद्धान्तिन इति चेन्न ॥ सर्वेषामप्यनिष्टः । न कोप्येवमुपैति ब्रह्मसूत्रभाष्यप्रणेता ॥ अस्तु तर्हि परमेव गन्तव्यमिति श्रीमतमेव । कथन्तदुपपद्येतोभयथादोषादित्यस्य सत्वे । अथाऽन्येऽपि सर्वएवमेव पठन्ति । स तूभयाच दोषादित्येव पठति श्रीमानिति चेत् ॥

अहो बत किमर्थं स्वयमपि दोषीभूय सूत्रकारमपि दोषीकरोति श्रीमान्महापथात् प्रच्युतः । तथाहि ॥ अत्र कापिलादिपाञ्चरात्रान्तानि केवलतान्त्रिकाणामपि मतानि विनैव तत्तन्नामग्रहणमुभयथाच दोषाद्विप्रतिषेधाच्चासमञ्जसमिति विषयदोषविवेचनमात्रेणैवोपन्यस्य निराचकार तदर्थ एव पाद इति स्पष्टम् ॥

येतु वैदिका आत्रेयाश्मरथ्यौडुलोमिकाशकृत्स्नकार्ष्णाजिनिबादरि जैमिनयोमुनयस्सुगृहीतनामानस्तत्र संगृहीतनामानः ॥ तेषान्तु तत्रतत्र विप्रतिपत्तौ हेतुविशेषप्रतिपादननैपुण्येनैव कुत्रचित् कस्यचिन्मतमेव सिद्धान्ततया समसूचि । नतु मतान्तरो दोष उद्भावि । कुहचिन्मन्यन्तरमतापेक्षया स्वमतेऽतिगाढां युक्तिमुपनिबद्ध्य निगमयामास ॥ क्वचिच्च मुनिद्वयविप्रतिपत्तिमविरोधेनैव शमयिष्यति ॥

कुत्रापि मतान्तरन्दोषादिति दूषयित्वा न महावैदिकम्मुन्यन्तरमवमन्यते । किमुत मुनिद्वयम् ॥ तत्र किमनायासेनैव स्वयमपि दोषीभूय सूत्रकारमपि दोषीकरोति श्रीमान् कथन्नामावसाने परमनिर्वाणादिफलप्रतिपादने मतान्तरदूषणं क्रियेतत्यनालोचयन् विन्यासविरोधाच्च ॥ परमुपासीनानिति जैमिनिः । तानेवाप्रतीकालम्बनानिति बादरायण इति हि श्रीमतोमतम् । तत्राप्रतीकं बादरायण इत्येव वक्तव्यम् । उपासीनानित्यद्ध्याहृतत्वात् ॥

यथाश्रुते तु प्रतीकालम्बनवर्जं कार्यंवा परं वोपासीनानुभयानपि नयतीति स्वमतमिव प्रतिभाति । तच्च तस्य नेष्टमस्माकञ्च ॥ तस्मात् कार्यन्नयतीति कश्चित् । परमित्यपरः । अत्रैव पूर्वपक्षसिद्धान्तौ । नातो बहिस्सिद्धान्तः । एवं तर्हि व्यर्थमुत्तरं सूत्रद्वयम् । विशेषाभावादिति चेन्न । विशेषदर्शनार्थत्वात् ॥

"विशेषं हि दर्शयाति"।

स्वेनैवोक्तस्य नियमस्याप्रतीकालम्बनानिति । एवं विशेषञ्च दर्शयति श्रुतिस्तत्क्रतोरेव प्रेत्य तथाभावो नातत्क्रतोरक्रतोर्वेति । तत्र कुतः परविदो नयनं क्वचित् केन चिन्नेत्राप्रशान्तसर्वक्रतोरिति विशेषञ्च दर्शयति तत्क्रतुश्चेति । एवं विशेषान्तरंच दर्शयति । यथात्रोभयथाभावे भवति दोषः । अन्यतरग्रहण एवादोषः परस्परविरोधात् । नैवमत्रोभयथाभावे भवति दोषः । यतस्सामान्येनोक्तस्य विशेषंच दर्शयतीति । एवमनन्तरमपि विशेष एव दर्शयिष्यत इति सूचयति विशेषञ्च दर्शयतीति । एवमुभयार्थे सति सूत्रे कुतोस्य व्यर्थतेति निपुणान्निभालय ॥

इति चतुर्थाध्यायस्य तृतीयः पादः ।

॥ अथ चतुर्थाध्यायस्य चतुर्थः पादः ॥

विशेषं किल दर्शयत्युपासकप्रकरणाविच्छेदेन सम्पन्नविषयम् । एवं विशिष्टेयम्मुक्तिरिति विशेषन्तु दर्शयति ॥

"सम्पद्याविर्भावस्स्वेनशब्दात्" इति ।

योऽयं भोगेन त्वितरे क्षपयित्वा सम्पद्यत इत्युपसंहृतः । यस्य च स्पष्ट एवोत्क्रान्ति प्रतिषेधस्तस्य तु सम्पन्नस्य योऽयं संपद्याविर्भावश्श्रूयते स स्वेनैव रूपेण । नतूपासकस्येव स्वीयेन । किञ्च । स्वेनैव । नतु वैगुतेनैवान्येन द्वारेण । कुतः । स्वेन शब्दात् । तस्यैवं सत्येवार्थवत्त्वादिति ॥

गीतश्चेद् " न्तेप्राप्नुवन्ति मामेव तेषामहं समुद्धर्ते तिच " ॥
तर्हि को विशेषः पूर्वावस्थात इत्यपेक्षायां विशेषश्च दर्शयति ॥

" मुक्तः प्रतिज्ञानात् " ।

मुक्तिरागन्तुकविशेषनिवृत्तिरेव विशेषः । नतु कश्चिदतिशयः । कुतः । तथा प्रतिज्ञानादिति । तामेव मुक्तिमाक्षिप्य परिहरति ॥

" आत्माप्रकरणादि " ति ।

ज्योतिर्दर्शनादिति साधितस्यैवात्र प्रसङ्गाद्दृढीकरणम् । तस्मान्नकस्यापि चोद्यस्यावकाशः । यत्रात्मैव नितान्तनिवृत्तसर्वविशेषो मुक्तिस्तदा किमविभागेनेत्युत्तरेण सूत्रेण । तत्र विभागाशङ्कानुन्मेषादिति चेत् ॥ न । अविभागदर्शनार्थत्वात् । तथाहि । ब्रह्मेति सचात्मा जीवस्येत्युपेत्यापि विभागमेव तयोर्वस्तुसन्तमुपैति यः पाशुपतः पाञ्चरात्रोवा तं व्युत्पादयति ॥

" अविभागेन दृष्टत्वादि " ति ।

नत्वविभागोवचनादितिवद्वचनादिति ॥ यतोऽविभागेनैव पश्यति परमात्मानं यथा दर्शनञ्जीवन्नेव स्वयं सूत्रकारः । अस्ति चात्र भाष्यं यस्य मतिस्तं व्युत्पादयतीति ॥

एवं व्युत्पादितऽप्यविभागेनापृथक्तयाऽनुभवति पृथगेव सन्तं परमात्मानम्मुक्त इति यदि विवृणोति पाञ्चरात्रस्सकस्यापराधः ॥ अथार्थवादिकानां फलवचनानां गतिं कल्पयितुं कश्चित् पक्षमाह ॥

" ब्राह्मेण जैमिनिरुपन्यासादिभ्य " इति ।

तत्त्वदृष्टिमात्रमवष्टभ्य पक्षान्तरमाह ॥

" चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिरि " ति ।

अथ समाधातुञ्जैमिनिमभ्यन्तरीकरोत्यौडुलोमिम् ॥

“ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायण ” इति ।

चिन्मात्रेणाविर्भावेऽप्युपन्यासात् पूर्वोपि भवन्नविरुद्ध्यत इत्यर्थः ॥ अथ तन्मात्रेणाविर्भावो न ब्राह्मः । चेत् किम् । कथन्तर्ह्यपहतपाप्मत्वादिकमेव ब्राह्मेणेत्युच्येत । एवन्तर्हि ब्रह्मैव स्यात् स इति गृहाण । स्यादेव तर्हि ब्राह्ममपि ब्रह्मीभूते मुक्तात्मनि । स्यान्नाम का नो हानिः । इयं हि हानिरत्र भवति । यदेव मपीत्युपेत्य तन्मात्रतान्तद्विरुद्धं पूर्वस्यापि जैमिनिनोपन्यस्तस्य तस्मिन्नभ्युपगमो नामेति । कथन्नामतन्मात्रतेति च॥

न तद्दृष्ट्या । किन्त्वस्मद्दृष्ट्या । अत एव तत् ब्राह्ममेव । नास्मदीयम् । यतो वयमिदानीन्नाहं ब्रह्मेत्यभिमन्यामहे । तं प्रत्यप्यासीत् पूर्वन्तत् ब्राह्मम् । यतोऽस्मादृगेवासीत् सोऽपि पूर्वम् । इदानीन्तु स्वीयादिव पूर्वादनर्थव्रतात् ब्राह्मादपि पूर्वादेव गुणगणान्मुक्त इति स्वं प्रति चिन्मात्रेणैवाविर्भूत इत्येवमपीत्युपेयाय ॥ वयन्त्विदानीमपि ब्रह्मणीव ब्रह्मीभूते तस्मिन्नपि यत्तस्य पूर्वं ब्राह्मन्तदभिमन्यमाना वर्त्तामह इत्यस्मान् प्रति यदि तदपि तस्मिन्नभ्युपयाय कोऽत्र विरोध इति ॥

अतिदुरूहोयमर्थ इति हि पूर्वभावग्रहणम् । अन्यथात्वेवमप्युपन्यासादविरोधमिति हि ग्रथयेत् । यत्र त्वेवमपि प्रज्ञानघन एवेति श्रवणेप्युपन्यासात् कथञ्चिदविरोधं सम्पादनीयं मन्येत बादरायण इति तान्त्रिकविवरणस्य स्यादवकाशः ॥

न ह्युपन्यासोपदेशयोस्समबलता । यत उपन्यासो नामोपदेशार्थग्रहणानुकूलानेकार्थप्रतिपादनम् । उपदेशस्त्वनधिगता बाधितप्रयोजनवदर्थावबोधनम् । तथा ह्युपदिशति त्वं प्रज्ञानघन एवेति मातृशतेभ्योऽधिकतमा श्रुतिः । उपन्यस्यतिच तदर्थं जक्षत् क्रीडन्रममाण इत्यादि यत्किंचिदिति किमद्यापि विवादेनेति तूष्णिमेवा-

स्महे ॥ यतश्शिक्षयत्यद्याविरोधं बादरायण इत्यस्मानाचार्यः को नाम विरोधस्सर्वात्मभावमापन्नस्य ब्रह्मीभूतस्य विदुष इति ॥

" कैवल्यपेटिका शुद्धचिद्रत्नपरिपूरिता । सम्यगुद्घाटिता येन ब्रह्मवेदनकुंचिका ॥ स्वनाममुद्रितान्ताच विरोधविनिवर्त्तिनी । नमस्कुर्मो नमस्तस्मै वेदाचार्याय वेधसे " इति ॥

अथ गृहिणोपसंहारवदुपासकभोगैश्वर्यापवर्णनेन शास्त्रमुपसमाहरिष्यन्नुपक्रमते विशेषं दर्शयित्वा प्रकृतम् ॥

" सङ्कल्पादेव तु तच्छ्रुतेरिति " ।

एवंचानन्दमयाधिकरणेन ज्ञेयमन्तरधिकरणेनोपास्यं चोपक्रान्तमिति यथोपक्रममेवोपसंहृतं भवति ॥ नेयं सकलसङ्कल्पविकल्पोपशमरूपा मुक्तिः । किन्तु सङ्कल्पादेव विभाव्यमानेयम्भुक्तिः । यदि ब्राह्मेणैव धर्मेणाविर्भूतोऽयम्मुक्त इत्युपपादितं स्यात्तर्हि ब्रह्मण इवास्यापि सङ्कल्पादेव सर्वसमुच्चिष्ठेदित्यर्थसिद्धं स्यात् । तत्रेदमधिकरणं व्यर्थं स्यात् । तस्मात् ब्रह्मसाधर्म्यमागताः कार्यं ब्रह्मप्रापिताश्च ये तेषामेवेदं पृथक् भोगैश्वर्यमुपवर्ण्यते ॥

" अत एव चानन्याधिपतिः " ।

किमन्याधिपतित्वन्निषिद्ध्यते किं वानन्याधिपतित्वं साद्ध्यते । अस्तु यथेच्छं कोऽत्र विशेष इति चेन्न । उभयथा च दोषात् । नहि स्वस्मादनन्यस्स्वयं स्वस्याधिपतिर्भवितुमर्हति । स्वस्मादधिस्वस्याभावात् ॥ अन्याधिपतित्वनिर्वर्त्तने त्वनधिपतिरित्येवालमिति चोदयति तान्त्रिकः । यतस्वस्मादन्य एव स्वस्याधिपतिर्भवितुमर्हति न स्वयम् । अतोधिपतिसामान्यनिवर्त्तनेऽनधिपतिरित्येवालमिति । एवंसति कोवात्रसूत्रार्थस्स्यात् ॥ अयमेवार्थस्स्यात्॥

अन्याधिपतित्वं विधिनिषेधयोग्यत्वन्तदयोग्यत्वं त्वनन्याधिपतित्वम् । तत्वे तु वन्ध्यसङ्कल्पोहि स्यान्मुक्तः । अतो विधिनिषेधागोचरत्वेनावन्ध्यसङ्कल्पोपपादनमस्य सूत्रस्यार्थ इति ॥ नायम-

र्थस्स्यात् । अशाब्दत्वात् । नह्यन्यपदं विधिनिषेधवाचकम् । नवास्ति तयोराधिपत्यञ्जडयोर्बादरायणमते ॥

असाम्प्रदायिकत्वाच्च । नहि देवदत्तादन्योऽयमित्युक्तेतदन्यमपि घटं प्रत्येति लोक इति । अथास्ति कश्चिदत्र सम्प्रदायः । यदाह सुदर्शनः । अनधिपतिरित्येव वक्तव्येऽनन्याधिपतिरित्युक्तिस्स्वभावशेषिणः परस्मादन्योनाधिपतिरस्येति सम्प्रदाय इति ॥

नायं सम्प्रदायस्साधीयान् । यद्यस्ति स्वाभाविकमस्य शेषत्वं कथन्तदायं मुक्तस्स्यात् । न हीयमापेक्षिकीमुक्तिरित्यभिमैति भवान् । ततो वरम्मनाक्त्वदीयमेव भाष्यम् । यतो विधिः परस्यैवाज्ञा । प्रतिषेधश्च । तदगोचरत्वे सर्वात्मना स्वतन्त्रो मुक्त इति प्रतिपादितं भवति ॥

अवक्तव्यत्वाच्च । नहि चिरादुपासनाकर्शितानां वस्तु सन्नपीयानेव भोग इति वक्तव्यं भवति ॥ अबोधनीयत्वाच्च । न ह्याप्रायणात्परश्शेषी अहं शेषस्तदंशत्वात्ततोऽहं सस्सोऽहमित्युपासितवतां परादन्याधिपतित्वमेव निवर्त्तते नतु तत्पतित्वमपीति बोधनीयं भवतीतः । पूर्वतनाशेषाधिकरणार्थान्विजानतः प्रति ॥

प्रकृतानुपयोगाच्च । सर्वात्मना स्वातन्त्र्यं ह्यवन्ध्यसङ्कल्पत्वोपपादकं भवतीती । तस्मान्नायं सम्प्रदायस्साधीयान् एवन्तर्ह्यनधिपतिरित्येव हि वक्तव्यम् । न वक्तव्यम् । कुतः । असम्प्रदायादेव । न ह्यधीनत्वेऽनधीनत्वे वा विवक्षिते साधिपतिरिति वानधिपतिरिति वा प्रयुञ्जते लोकाः । किन्त्वन्याधिपतिरनन्याधिपतिरिति वा । तत्र कथमनधिपतिरिति वक्तुं युक्तं स्यात् । अस्तु तर्ह्यत एव चानधीन इति ॥ आस्तामेतत् प्रणयनान्तरगवेषणम् । प्रणीते तु प्रकारे या युक्तिरुद्भाविता सा ते प्रणष्टा । वस्तुतस्त्वधीनत्वमुपासकनिष्ठन्तत्र भवत्यधीनोऽनधीनस्स्वाधीनः पराधीन इति च । पतित्वन्तूपास्य निष्ठम् । तत्र त्वन्याधिपति रनन्याधिपतिरित्येव व्यवहारः ।

यथा स्वतन्त्रःपरतन्त्र इत्येव व्यवहारः । नतु तन्त्रोऽतन्त्र इति वा । तत् कस्य हेतोः । तन्त्रयति व्युत्पादयतीति तन्त्रतायाः पतिता समकक्ष्यत्वात् । अथ स्वतन्त्र इति वत् स्वपतिरिरिति कुतो न व्यवह्रियत इति चेत् । पृच्छ लोकान् । स्वस्य स्वपालनन्नियतमेवेत्यवक्तव्यम् । स्वतन्त्रतात्वनियतेति व्यवहारपथमवतरतीति वा गृहाणेति ॥

किञ्च प्रसक्तमन्याधिपतित्वं हि प्रतिषिद्ध्यते । यतः प्रतिबद्धभोगैश्वर्यस्य तत्राप्रतिबन्धो विवक्षितः । प्रतिबन्धश्च तत्रान्येन । यद्यपि परस्सर्वान् प्रति शक्नोति निग्रहानुग्रहयोः । तथापि स स्वस्यैश्वरत्वसिद्ध्यर्थन्नतौ करोति । किन्त्वविद्यावशेन स्वात्मनि पारतन्त्र्यमारोप्य फललोभेन विहिताविहितयोः प्रवर्त्तमाना न विदुषो नियमयितुम् ॥

तत्राविदुषोपि निरन्तरादरसत्कारवत्या निजोपासनया निर्भिन्ननिखिलसुकृतदुष्कृतपञ्जरान् स्वनिकटमुपेत्य स्वसाधर्म्यमुपागतानुपासकान् प्रत्युदास्ते । स्वसाधर्म्योपगमेनैव स्वायत्तभोगैश्वर्यतया स्वानपेक्षणात् । अन्येतु न तान् प्रतीशते निग्रहानुग्रहयोः । तदिदमुक्तमनन्याधिपतिरिति ॥

अथ स्वयमेव वृणतात् स्वस्य स्वामिनमिति चेन्नेत्याह । नहि सत्यां गतौ प्राकृतोऽपि स्वस्यान्यस्वामिकत्वं सङ्कल्पयतीति । अथापि यदि तथा सङ्कल्पयसि न प्राकृतोऽपि भवानिति व्यक्तं भवतीत्यलमतिविस्तरेण ॥

“ अभावं बादरिराह ह्येवम् ” ।

क एवमाह । श्रुतिः । कथमाह । यथाच सत्यभावस्यादेवं । का सा । मनसैतान् कामान् पश्यन्नमते य एते ब्रह्मलोक इत्येषा । सुष्ठूपपद्यते । कथन्तर्ह्यशरीरम् वा वसन्तमित्येषेत्याह श्रीमान् । कथमेवं स्यादेवमिति वर्त्तमाने साक्षादेवाभावबोधिका ह्येषा

प्रियाप्रियास्पर्शार्थम् । न ह्येषा विनैव भावं भोगोपपादिका । अतश्च सन्ध्ये सृष्टिराह हीतिवदेवंकाराभावेऽपि नोदाहरणमर्हतीति ॥

" भावंजैमिनिर्विकल्पामननात् " ।

विकल्पयति समाधातुम् ॥

" द्वादशाहवदुभयविधं बादरायणोऽत " इति ।

अत इति कुतः । सत्यसङ्कल्पत्वादेवेत्याह । नैतद्युक्तम् । कथं पराजित्य प्रधानमल्लादीनुपर्युपरि प्रशान्तमना मुनिद्वयमुपनिबध्य युक्त्यन्तरेण सिद्धान्तयंस्तदवमाननमिव कुर्यादवसाने सम्भवति तदुद्भाविताभ्यामेव विकल्पे ॥

सत्यत्वमपि सङ्कल्पस्य सङ्कल्पितार्थसाधन एव प्रभवेत् । न तु विकल्पे । अत्र तु तद्वैचित्र्यं प्रभवेत् । तथा च भाष्यम् । सत्यसङ्कल्पत्वात् सङ्कल्पवैचित्र्याच्चेति । यदि भाष्येऽप्युपात्तं कुतस्तत्र ते विप्रतिपत्तिरिति चेन्न ॥

यतो नेदमतः पदविवरणम् । असंशब्दितत्वात् । सुदूरविप्रकर्षेणार्थसिद्धो ह्येषोर्थः । किन्तु मुनिद्वयोपवर्णितमेव हेतुद्वयमतः पदार्थतयोपवर्ण्याभिप्रायिकेण हेतुना तन्मनस्समाधानम् । नतु सत्यसङ्कल्पत्वादेवेतिवत्तत्तर्जनमिति ।

" प्रदीपवदावेशस्तथाहि दर्शयति "

एकत्र स्थितस्यैव प्रदीपस्यान्यत्र स्वप्रभयेव व्याप्तिरावेश इत्येतदनेकधाभावन्नोपपादयेत् । किन्तु यथावर्त्तिकान्तरसम्बन्धेनैकोऽपि भवत्यनेकधा प्रदीप एवं स्रष्टा मन आद्यन्तराण्यनेकधा भवति मुक्त इत्येवोपेत्यम् । नेदञ्जीवाणुत्ववादे सङ्गच्छते । स्वरूपेण शरीरान्तरसम्बन्धासम्भवात् ॥

अथ सिद्धान्तेऽप्युपाधिपरिच्छेदमनतिवृत्तः कथमुपाद्ध्यन्तरमाविशेदुपासक इति चेत् । यथैकत्र वृत्तिलाभस्तथान्यत्रापीति गृहाण । नन्वेवं किं प्राचीनेन मनसेति चेन्न । तदधीनत्वान्मनोन्तर-

सर्जनस्य ॥ नच सर्वेषामविशेषापत्तिः । सर्वदा सर्वत्र सन्निहितत्वात् प्राचीनस्य मनसस्तदनुतर्त्तीन्येवान्यानीत्यवश्याभ्युपेयत्वादिति ॥ अत्र काञ्चनानुपपत्तिमाशङ्कय परिहरति ॥

" स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीति "।

अत्राश्लीलं कीर्त्तयति सम्पत्तिर्मरणमिति महामंगळप्रस्तावे-पाञ्चरात्रः । भोगेन त्वितरे क्षपयित्वा सम्पद्यत इत्युक्त्वा सम्पद्याविर्भाव इति यानामपादादावनूदिता ब्रह्मसम्पत्तिस्सैवात्रोदाह्रीयते । अतस्तत्राप्युभयत्र म्रियते मृत्वाचेति व्याकर्त्तव्यमनेन । यदि मरणादन्या ब्रह्मसम्पत्तिरुपेयते तदाऽनिच्छतोऽप्यस्यापतति कैवल्यं भागवतप्रवरस्येति ॥

अतिवृत्तमुभयविधस्यापि पुरुषार्थस्योपपादनम् । अथ यानामात्रोदाहृता सम्पत्तिस्तत्रैव निरवग्रहे पुरुषार्थे यत्र आस्थे यस्साधकप्रत्नैरिति शिक्षयितुमुपासकैश्वर्यमवगृह्णाति ॥

" जगद्व्यापार वर्जं प्रकरणादसन्निहितत्वाच्चे " ति ।

वाक्याभासावष्टम्भप्राप्तां शङ्कां व्युदस्यति ॥

" प्रत्यक्षोपदेशादिति चेन्नाधिकारिक-
मण्डलस्थोक्तेरि " ति ।

नेदमनादिसिद्धस्वाराज्यप्राप्तिप्रतिपादकं वचनम् । किन्त्वान्तराळिकाधिकाराधीनमित्यर्थः । अयमाशयः । किं स्वाराज्यश्रवणेन जगद्व्यापारं साधयसि । उतोपासनबलात् । आहो वस्तुत उपास्यनिष्ठत्वात् । परमसाम्यापत्त्या वा । नाद्यः । अर्थान्तरपरत्वाद्वचनस्य । न द्वितीयतृतीयौ ॥

" विकारावर्ति च तथाहि स्थितिमाह " ।

यथा विकारावर्त्तिरूपमुपास्य निष्ठमपि नाप्नोत्युपासकोऽश-

कल्पाऽतत्क्रतुत्वादेवमुपासनागोचरत्वादेव नाप्नोति जगद्व्यापारमपि । नापि चतुर्थः ॥

“भोगमात्रसाम्यलिङ्गाच्चे” ति ॥

अथापि ॥

“ अनावृत्तिश्शब्दादनावृत्तिश्शब्दादि ” ति ।

आवृत्त्याद्दयस्यनावृत्तिम् ॥ ननु कार्यं ह्यनीयन्तोपासकाः । बाढम् । तत्र कथमेषामनादिसिद्धेश्वरभावशङ्कासमाधाने उपपद्येयाताम् ॥ एवं यदनाद्यनन्तं बीजभावापन्नं सत्पदाभिधेयन्तुरीयमीक्षितृ तदेव दग्धबीजानामवशिष्टं पुच्छाभिधानमुपसृप्यम्मुक्तानाम् । तदेव च त्रिवृत्कृत्य भूतान्यंकुरीभूय ब्रह्मविष्णुमहेश्वरात्मना जन्मस्थितिभङ्गं कुर्वदाविर्भूय निखिलहेयप्रत्यनीकमनन्तकल्याणगुणगणं कप्यासपुण्डरीकाक्षश्च वर्तत उपास्यत्वाय सत्यादिलोकेषु । तदेवन्तदा तदा कार्याविष्टत्वात् कार्यम् । अकार्यस्य स त एव कार्यत्वाज्जगद्व्यापारस्य नित्यसिद्धत्वञ्चेति सर्वमनाकुलम् ॥

अत्र कथञ्चित् कयाचित् प्रणालिकया व्याकुर्वन्ति स्म सूत्राणि श्रीमन्तो भाष्यकाराः सन्तु ते महान्तः ॥ येत्वाप्रणखात् सर्वसुवर्णम् कप्यासपुण्डरीकाक्षं कल्याणगुणगणाढ्यं कालाम्बुदश्यामळाङ्गं करुणारससागरं कौस्तुभालंकृतोरसं भगवन्तं कमलाकान्तमनवरतमद्ध्यक्षमेवानुबुभूषन्त्यनुभवन्ति च परमैकान्तिनः ॥

न तेभ्यः प्रत्यवस्थातुम्महद्भ्यो यत्र आस्थितः ।
सूत्रानुगुण्यं कस्येति परमत्र विविच्यताम् ॥ १ ॥
सगुणाविगुणात्राम्यात सूत्रानुगुणता परम् ।
सिषाधयिषितासिद्धौ सन्तः क्षन्तुमिहार्हथ ॥ २ ॥

मूर्तित्रयेण मुनिभिस्सुरसिद्धसंघैः
जिज्ञासितस्त्रिदितिसुतैः पृथिवीसुरैश्च ।

जन्मादिलक्षितमुताखिलशास्त्रयोनि
सद्ब्रह्मपुच्छमहमस्मिचिदेकरूपम् ॥ ३ ॥
सम्पद्य स्वेनरूपेण प्रादुर्भूतोऽस्मि संकटात् ।
मुक्तोऽस्मि सर्वभूतानामात्मास्म्येवाविभागतः ॥ ४ ॥
शक्यते वेदनावृत्तिस्सगुणालम्बिनामपि ।
किमुत स्वेन रूपेण प्रादुर्भूतस्य सर्वतः ॥ ५ ॥
शिवगुरुतपःप्रबन्धश्चिद्घनमार्यावटोदरावासम् ।
शङ्करगुरुवरमाद्यं ध्यायाम्यनिशं परात्मानम् ॥ ६ ॥
हरिहरगुरोः प्रसादादात्तां विद्याम्मयाऽद्वैते ।
हरिहरसमता सिद्ध्यै विनियुक्तां वेत्तुबुधबृन्दः ॥ ७ ॥
यं वेदान्तविभूषणं विदुरिमे लोकास्तदर्थादरं
शास्त्राण्यत्र लसन्ति रत्नवदतो यं शास्त्ररत्नाकरम् ।
सोऽयं कृष्णतटाककृष्णविबुधोऽद्वैते सभापण्डित-
स्सिद्धिं विन्यदधाति विस्मयकरीं पादांबुजे शांकरे ॥ ८ ॥

इति श्रीमहामहोपाध्यायचतुस्तन्त्रस्वतन्त्रहारिहरगुरुचरणनळिन-संसेविनो वेदान्तविभूषणस्य कृष्णशास्त्रिणः कृतौ ब्रह्मसूत्रानुगुण्यसिद्धौ चतुर्थाध्यायस्य चतुर्थः पादस्समाप्तः ॥

—:* ॥ समाप्तश्चायं ग्रन्थः ॥ *:—

॥ ॐ ॥



शुद्धाशुद्धपत्रिका ।

पुटः	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	२०	त्तनु	त्तदनु
१२	१	सिद्धान्त	सूत्र
१२	२३	पितीति	पिति
१३	८	सिद्धान्त	सूत्र
१४	२५	राम	रम
१६	१३	य्यात्रि	यात्रि
१८	१	यंच	यश्च
१८	११	कलिप	कलिक
२१	१३	चरं	चरमिति
२८	११	पासा	पवाक्यसा
३७	१७	लिंगयते	लिंगयतां
३७	१७	चेन्न	कथं
३७	१९	क्ष्मान्त	क्ष्मन्त
४३	२५	मुमा	मुपा
४४	१६	कप्यस	कप्यास
४७	८	याक्षे	यानाक्षे
५३	१०	विशिष्ट	विष्ट
५४	२	वाक्यंभे	वाक्यभे
५५	८	न्यन्न	न्यान्न
५६	८	पादे	पदे
६३	११	त्यक्तं	त्युक्तं
७२	१८	द्दोद्ध	द्दोभ्र
७९	१७	यासो	यासाधारणस्सो
८०	२२	नादिव	नादितिव
८३	५	खण्डा	खण्डश
८४	२०	स्याने	स्थाने
८५	५	न्दाति	न्दन्ति
८६	२६	धिहो	धिरो

पृष्ठः	पङ्क्तिः	अशुद्धम्	शुद्धम्	पृष्ठः	पङ्क्तिः	अशुद्धम्	शुद्धम्
८८	१४	मरे	महे	१२१	१२	बन्येने	बन्धने
९०	८	रम्मा	रन्ध्या	१२३	५	घटाभा	घटभा
९०	२०	भिद्य	भिध्य	१२३	६	मनो	मानो
९०	२२	व्यत्र	व्यप	१२४	१२	ष्ठ	ष्ट
९१	३	भिभे	भिभै	१२६	२१	नमा	नुमा
९१	५	स्तश्च	स्तच्छ	१२८	१२	ण्डाल	ण्डल
९२	१	महि	मभि	१२८	१९	द्वेवत्य	द्वेऽत्य
९६	२	द्दव्य	दृश्य	१२८	२९	रब्द	रब्ध
९६	७	णाभ्यां	णत्वाभ्यां	१३३	४	किन्त्वेते	किन्त्वन्ते
९६	१८	नेऽवि	नेऽपि	१४४	२२	वत्र	वतृ
९७	२१	ध्वश्च	द्धश्च	१५६	२४	त्वस	त्वेस
१०१	२६	साव	व्याव	१५७	२	मह	मर्ह
१०७	२४	मिति	मिष्यदि	१६०	२१	कर्त[illegible]	कर्तव्ये
११०	२६	यते	येते	१६१	१३	[illegible]लव	ब्रह्मैव
११२	१०	णगेव	गैर	१६४	२१	[illegible]	बह्वर्थ